इति। कथमेभिर्देवस्य सन्तृप्तिसम्भव इति। स्वारम्भभूतात्मकैः। आरम्भा इह कार्याणि। शोभना आरम्भा येषामिति स्वारम्भाणि, तान्येव व्यष्ट्याद्यवस्थानि पञ्चभूतानि तदात्मकैः। जलगन्धादिगतभूतकार्याणां शोभनत्वं रसात्मकत्वम्। तदुक्तम्– 'तत्राभिव्यक्तरूपाणाम्' इत्यादि। रसयोगात् तु जलगन्धादिभिः स्वकारणयोगिभिरपि देवसन्तृ(प्ति? प्त्यु)पपत्तिभावः। रसस्य च भूतव्यष्ट्याद्यन्वयतः स्वरूपभेदः। तदप्युक्तम्–'स पुनस्त्रिविधो रस' इत्यादि। प्रतिपत्तिविशेषमप्यु (प) हरणेषूपदिशति–स्वारम्भभूतात्मकैरिति। स्वशब्देनेह यज्वसम्बन्धिनां ग्रहणम्। पञ्चभूतारब्धानि हि साधकानां सभोग्यार्थजातानि शरीराणि। वक्ष्यति च–"भूतानि पञ्च परमात्मनि"त्यादि। तदात्मनां तेषां यज्वनां निजनिजारम्भकपञ्चभूतात्मकैरुपहरणैः जलगन्धाद्युपहरणसमर्पणविधौ तद्द्वारा देवे स्वकीयकृत्स्नसमर्पणमेव यज्वभिरवहितैर(नु)सन्धेयमिति भावः। जलगन्धादिसमर्पणयोग्यतामपि देवस्याह–वपुरधिष्ठायेति। जलगन्धादिग्रहणोचितैः रसनाघ्राणाद्यखिलकरणैः सहितं मन्त्रमयविग्रहं तदभिमान्यात्मतयाविश्य तत्स्वामितया तत्रावस्थायेत्यर्थः। उपहरणैस्सन्तर्पितोऽनुगृह्णातीति सम्बध्यते। समाराधनसम्बन्धमप्युपदिशति–सदापि पूर्णानन्दरसानुभूरिति। तत्कालविशेषणं चेतत्–सदापीति। स्थूलात्मनि जलगन्धादिमयसमरससमर्पणसमये सूक्ष्मात्मनि तत्समष्टिमयामृतसमर्पणसमये परात्मनि तत्कारणमयप्रकृतिसमर्पणसमयेऽपीत्यर्थः। वक्ष्यति च–"स्थूलात्मतोन्मेषविधायिके"त्यादि। पूर्णमानन्दरसमनुभवतीति पूर्णानन्दरसानुभूः। आनन्द इह देवस्य स्वरूपानन्द एव। रसश्च यथासमर्पणं रसामृतप्रकृतिलक्षणः। तयोः सामानाधिकरण्येनोभयोरेकतादात्म्यलक्षणः सम्बन्धः। रसादीनां यावद् यज्वाभिप्रैति देवो वा तावान् भूमा भवतीति तस्य पूर्णविशेषणम्। तदुक्तम्–'रसं ब्रह्माण्डसम्मितम्" इति। एतदर्थमेव च दर्शितं पवित्रिताभिधानं समाराधनविधौ। व्यष्ट्यादिभूतात्मकस्य रसादेः स्थूलात्मादिना तादात्म्यमापादनीयमित्येतदपीहोक्तम्। नन्वेवमाहार्यसन्तृप्तेरपरिपूर्णस्यास्य परानुग्रहायोग इति। नेत्याह–सदा पूर्णानन्दरसानुभूरपीति। सदेति। समाराधनावस्थायामवस्थान्तरेष्वपीत्यर्थः। पूर्णानन्दः स्वरूपानन्द एव। स च चरमः फलरूपो रसः। उपहरणरसा हि क्रमोत्कर्षिणो मायीया एव। स्वरूपानन्दस्तु नित्योऽकृत्रिमो रसः। तस्य देशकालाद्यनवच्छिन्नत्वाद् घनत्वाच्च पूर्णत्वम्। तदनुभूरपि सन्नित्यर्थः। ननु यद्येवं पूर्णानन्दरसानुभूर्देवः, तदा कथमस्य समाराध्यताद्युपपत्तिरित्यत आह–श्रीमत्षड्गुणसम्भृतं वपुरधिष्ठायेति। देवस्यैव स्वस्वरूपाव्यतिरिक्ता शक्तिरिह श्रीर्व्यपदिश्यते। सैव मायाप्रकृतिः।

तदवान्तरशक्तयो ज्ञानैश्वर्यादयः। ताश्च समुचितानुग्रहादिकार्यविषयतया प्रधानस्य देवात्मतत्त्वस्य तदुपकारितया षड्गुणा षड्वाङ्गानि। यद्वा कल्याणस्वभावतया षड्गुणा एव, तैः श्रीसमन्वयतन्त्रीमद्भिः षड्गुणैः सम्भृतं हृदयाद्यवयवसम्भवक्रमेण उपकल्पितं वपुरधिष्ठायेति। देवस्य स्वरूपानन्दनिर्वृतत्वेऽपि सकलानुग्रहादिकरशक्तियोगतः समारा (ध्यादु? ध्यताद्यु) पपत्तिरिति भावः। श्रीमदिति पृथग्वा पदम्। श्रीशब्देन तद्वपुषः स्वाभाविकी भूषणादिप्रभवा च शोभा गृह्यते। स्वोक्तेऽर्थे प्रमाणमपि वदन् वेदानुसारिता मप्यस्य समाराधनस्य दर्शयति–निगमागमाद्यधिगतमिति। निगमो वेदः। आगमश्च विष्णुसंहितादितन्त्रम्। सदाचारादेरादिशब्देन ग्रहणम्। परदेवतानुस्मरणमाशीर्लक्षणं च मङ्गलाचरणमेवं कृतम्। परदेवतायाः समाराधनोचिततयानुस्मरणात् तत्समाराधनार्थनायाश्च अस्य समुचितत्वम्। किञ्च परदेवतात एवेयमर्थनार्थतो भवति। ततश्च अर्थनयैव सपरिकरसमाराधनसम्पत्तौ तदन्यतमस्यापि समाराधनक्रम-गुणनिकासाधनस्यास्य ग्रथस्याविघ्नेन परिसमाप्त्याद्यपि लभ्यत इति। इह सपरिकरं समाराधनं विषयः। तत्साध्योऽनुग्रहश्च प्रयोजनमिति च अर्थात् प्रतिपादितम्। किञ्च षड्गुणसम्भृतं वपुरिति भूसंस्कारादिपूर्वकमाधारशिलादिस्तूप्यन्तप्रासादवपुषो ब्रह्मशिलाद्याधेयप्रतिमावपु(ष)श्च विरचनमपि सूचितम्। वपुरधिष्ठायेति तयोः स्वोचितसंत्कारादिपूर्वकं प्रतिष्ठापनं वाहनादि सर्वं सूचितम्। श्रद्धाभक्तिपवित्रितोपहरणैः सन्तर्पित इति समाराधनोत्सवौ। श्रीमदिति स्नापनं प्रायश्चित्तजीर्णोद्धारौ च। वक्ष्यति च–'विशुद्धिसान्निध्यसमृद्धिकारकम्' इति। बिम्बादेरशुद्धिजीर्त्यादिपरिहृतिरपि पुनश्शोभाहेतुर्भवति। कुण्डमण्डलादिलक्षणं तु इहैवान्तर्भूतमिति प्रतिपाद्यभेदा इहैव सूचिता इति।। 1।।

I shall always worship that God who blesses one and all having occupied a form encompassing the six auspicious qualities (such as knowledge, happiness, eternity, freedom, absence of impediment and dexterity), who is worshipped with devotion and faith using materials (like water, flower and incenses) despite being the enjoyer of beatitude and propitiated by sacrificial priests and himself pervaded through out Nigamas (the Vedic texts) and Āgamas (the ancient scriptures). (1)

गुरुदिवाकरभद्रकटाक्षरुक्
स्फुरितहृत्कमलोदरसम्भृतम्।
लिखितयाम्यथ तन्त्रसमुच्चयं
गुणनिकाविधिसाधनसिद्धये।। 2।।

विमर्शिनी

एवमाशीर्वा[1]दरूपमङ्गलाचरणं कृत्वा गुरुस्मरणपूर्वकं ग्रन्थमारभते–गुरुदिवाकरेति। अथ गुणनिकाविधिसाधनसिद्धये तन्त्रसमुच्चयं लिखितयामि। अथेत्याशीर्वचनानन्तरम्। सकृद् गृहीताया विद्यायाः पुनरभ्यासो गुणनिका, गुणनिकैव विधिर्गुणनिकाविधिः, विधिः[2]करणं, तस्य साधनसिद्धये साधनपरिग्रहाय। तन्त्रसमुच्चयं तन्त्राणां समुच्चयरूपत्वात् तन्नामकं ग्रन्थम्। लिखितयामि लिखितं

1. 'दम' ग. पाठः,
2. 'का' ख. पाठः,

करोमि, पुस्तकस्थं करोमि। ननु कथम्भूतं तन्त्रसमुच्चयमित्यत्राह–गुरुदिवाकरभद्रकटाक्षरुक्स्फुरितहृत्कमलोदरसम्भृतमिति। गुरु[1]रेव दिवाकरो गुरुदिवाकरः सूर्यः, तस्य भद्राः प्रसादयुक्ताः कटाक्षा एव रुचो रश्मयस्तैः स्फुरितस्य विकसितस्य हृदयकमलस्योदरेऽन्तर्भागे सम्भृतं संगृहीतम्। यथा दिवाकररश्मिभिः कमलानि विकसन्ति, तथा गुरोः प्रसादयुक्तैः कटाक्षरश्मिभिर्हृदयकमलस्य विकासनं सञ्जातमिति रूपकालङ्कारच्छलेन स्वगुरोर्दिवाकरनामत्वमपि सूचितम्।। 2।।

विवरणम्

मङ्गलाचरणेनाविघ्नसम्पत्तौ विषयादिप्रतिपादनेन श्रोतुः सपरिकरसमाराधनप्रतिपित्सोपपत्तौ च बाह्यं तत्प्रतिपादनप्रकारं तदुचितग्रन्थकरणे प्रतिज्ञानेन वदन् तदीयं प्रयोजनमपि दर्शयति–गुरुदिवाकरेति। अथ तन्त्रसमुच्चयं लिखितयामि इत्यन्वयः। तन्त्राणां वैष्णवशैवादीनां तद्भेदानां च विष्णुसंहितादीनाम् अर्थात् प्रतिष्ठासमाराधनाद्यर्थं समुच्चयस्तन्त्रसमुच्चयस्तम्। लिखितयामि लिखितं करोमि। पुस्तके विनिवेशयामीति यावत्। गुरुरेव दिवाकरो गुरुदिवाकरः तस्य भद्रास्सन्तः कटाक्षा एव रुचो रश्मयः ताभिः स्फुरितं विकसितं हृत्कमलं तदुदरे सम्भृतम्। सकलतन्त्रतो यथोपदेशमावश्यकमशेषमुपादायोपकल्पितमिति। नानातन्त्रगतस्य सपरिकरस्य समाराधनस्य तेषाम् अर्थतः समुच्चयेन इदं प्रतिपादनमिति बाह्यः प्रतिपादनप्रकारोऽप्युक्तः। तथाप्रतिपादनं च लघुप्रयत्नेन प्रतिपत्त्यार्थात् सिद्धमेव। लिखितयामीति तथाग्रन्थकरणमुक्तम्। तत्प्रयोजनमुच्यते गुणनिकाविधीति। गुरोः सकाशात् सकृत् प्रतिपन्नस्यार्थस्य स्थैर्यसिद्धये पुनः पुनरनुसन्धानरूपोऽभ्यासो गुणनिका, तस्यां विधिर्विधानं करणं तस्य साधनमुपाय आश्रयः तस्य सिद्धय इति। ग्रन्थद्वारा हि क्रियमाणा गुणनिका निरुपप्लवेति भावः। तदेतत् स्वं प्रयोजनं परार्थं चैतद्ग्रन्थकरणम्। ततश्च तदीयं प्रयोजनमप्येतत्। अत्र च गुरुदिवाकरेति दिवाकरो नाम निजगुरुः, तथा रविर्नाम स्वपिता च परिगृह्यते। ततश्च प्रकरणारम्भे परदेवानुस्मरणानन्तरं स्वगुर्वनुस्मरणमपि कृतमिति।। 2।।

Now I am composing the Tantrasamuccaya (the compenditum of Tantric rituals) to help the proper performance of the rites, the text that throbs in my lotus (like) heart blooming with the rays of Divākara (the sun as well as my teacher of that name) that pervades all over my innerself. (2)

श्रीशेशसेशहरिसुम्भजिदाम्बिकेय-
विघ्नेशभूतपतिनामविभिन्नभूम्नः ।
वक्ष्ये परस्य पुरुषस्य समानरूप-
मर्चाविधिं सह पृथक् च विशेषयुक्तम्।। 3।।

विमर्शिनी

अथ चिकीर्षितग्रन्थस्य देवतानियमादिकमाह–श्रीशेशेति। श्रीशेशसेशहरिसुम्भजिदाम्बिकेयविघ्नेशभूतपतिनामविभिन्नभूम्नः, श्रीशो विष्णुः, ईशः शिवः सेशहरिः शिवनारायणः, सुम्भजिद् दुर्गा, आम्बिकेयः स्कन्दः, विघ्नेशो गणपतिः, भूतपतिः शास्ता, एतैर्नामभिरेव विभिन्नं विशेषतः पृथग्भूतं

1. 'रोर्दिवाकरभद्रस्य कटाक्षस्य रश्मिभिः स्फु' ग. पाठः

भूमा महत्त्वं यस्य तस्य। परस्य पुरुषस्य परमात्मनः, अर्चाविधिं पूजाविधानं वक्ष्ये। अर्चाविधिमित्यनेन भूपरिग्रहादितीर्थस्नानपर्यन्तं कर्म विवक्ष्यते। तत्र समानरूपम् एकप्रकारेण स्थितम् अर्चाविधिम्। सह एकरूपत्वेन। विशेषयुक्तं विशेषसहितम्। पृथक् च विभागेन।। 3।।

विवरणम्

ननु यद्यप्ययं तन्त्राणां समुच्चय आरभ्यते तथापि किंवपुषो देवस्येदं सपरिकरं समाराधनं, कथं वा अनेन समुच्चयेनापि तत्प्रतिपादनमित्यपेक्षया तत्सर्वं तन्त्रसमुच्चयप्रकारप्रतिज्ञानेन दर्शयति–श्रीशेति। श्रीशो विष्णुः, ईशः शिवः, सेशहरिः शङ्करनारायणः, सुम्भजिद् दुर्गा, आम्बिकेयः सुब्रह्मण्यः, विघ्नेशो गणपतिः, भूतपतिश्शास्ता, श्रीशादिसप्तनामभिर्विभिन्नो विष्ण्वादिमूर्त्तिरूपभेदतो विभक्तो भूमा स्वतोऽनवच्छिन्नमपि महस्त्वरूपं यस्य स तथोक्तः। विष्ण्वादिवपुषः सत्तात्मकस्य देवस्येदं प्रतिष्ठादिपूर्वकं समाराधनमिति भावः। परस्य पुरुषस्येति। तं देवमिति प्रकृतस्येति भावः। समानरूपमर्चाविधिं सहेति। अर्चा प्रतिमा समाराधनं वा, तद्विषयं सर्वमपि समानरूपमेकतया वक्ष्ये इति। यथा–स्नात्वावम्याथ देवालयगुरुनिलयादाविति, क्षेत्रे वारिधिवर्गकोष्ठसुविचित्र इति। विशेषयुक्तमर्चाविधिं पृथक् (च)। चेन समुच्चयेन क्वचित् क्वचिद्विशेषोऽप्युक्तः। यथा–विष्णौ माषपयोऽधिकं स्मृतमिहार्घ्यमिति, शार्ङ्गीशदुर्गाजिते बीजौघ इति। अयमिहाभ्यन्तरः सपरिकरसमाराधनप्रकार इति।। 3।।

First, I shall narrate the common modes of worship of the Supreme Being assuming different forms such as Śrīśa (Viṣṇu the husband of Lakṣmī), Īśa (Śiva), Seśahari (Śiva and Nārāyaṇa–the composite form known as Śaṅkaranārāyaṇa), Sumbhajid (the Goddess who vanquished the demon Sumbha meaning Durgā), Āmbikeya (the son of Ambikā meaning Skanda worshipped as Subrahmoṇia), Vighneśa (Gaṇapati the remover of obstacles) and Bhūtapati (Śāstā the leader of the class of Attendants) and thereafter the special features of worship of each one of them. (3)

वर्णाश्रमाधिकृतकर्मरतस्तदुक्त–
न्यायात्तवित्तनिचयः परमस्य पुंसः।
नित्यार्चनादिविधये प्रतिमाप्रतिष्ठा–
कर्मोन्मना गुरुवरं प्रथमं वृणीत।। 4।।

विमर्शिनी

कर्तृनियमं वदन् गुरुवरणं प्रस्तौति–वर्णाश्रमेति। वर्णाश्रमाधिकृतां कर्मरतः ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणामधिकृतेषु विहितेषु कर्मसु रतः नित्योद्युक्तः। तदुक्तन्यायात्तवित्तनिचयः। तेषामुक्तेन न्यायेन ब्राह्मणानां याजनाध्यापनप्रतिग्रहैः, क्षत्रियाणां परिपालनादिभिः, वैश्यानां कृष्यादिभिः शूद्राणां त्रैवर्णिकशुश्रूषणेन इत्यादिन्यायेनात्तेन परिगृहीतेन वित्तनिचयेन धनसमुदायेन युक्तः। स्वाभीष्टदेवतात्मकस्य परमस्य पुंसः। नित्यार्चनादिविधये नित्यपूजोत्सवादिविधानाय। प्रतिमाप्रतिष्ठाकर्मोन्मनाः प्रीतमायाः प्रतिष्ठाकर्मण्युद्युक्तचेताः कर्ता। प्रथममादौ। गुरुवरं गुरुश्रेष्ठं वृणीत।। 4।।

विवरणम्

अथ प्रथमं तावद् अर्चाविधावधिकारिविशेषं वदन् तदीयं प्रथमकर्तव्यमपि विधत्ते– वर्णाश्रमाधिकृतकर्मरत इति। ब्राह्मणादयो वर्णाः तेषु ब्रह्मचर्यादय आश्रमाः। वर्णग्रहणमनुलोमानां सूतकस्य चोपलक्षणार्थम्। तेष्वधिकृतानि कर्माणि सन्ध्योपासनाग्निहोत्रादीनि नित्यसमाराधनादीनि च श्रुतिस्मृत्यागमसिद्धानि तेषु रतः तात्पर्यप्रवृत्तः। तेषां वर्णाश्रमाणां वृत्त्यर्थमुक्तेन न्यायेन आत्त आर्जितो वित्तनिचयो निजवृत्तिदेवप्रतिष्ठादिपर्याप्तो येन स तथोक्तः। परमस्य पुंसो नित्यार्चनादिविधय इति। काम्यनैमित्तिकानामादिशब्देन ग्रह(ण)म्। श्रीशेशादिवपुषः परस्य पुरुषस्येति प्रकरणाल्लभ्यते।। 4।।

First one should select a noble preceptor interested in the performance of the daily worship of the God installed in an idol of the Supreme being, one who is devoted in the prescribed duties of one's caste, stage of life (like youth etc.) and who has earned much wealth in the proper way assigned to them (such as teaching to a Brāhmin, by affording of porteetion to a Kṣatriya and so on.) (4)

विप्रः कुलीनः कृतसंक्रियौधः स्वधीतवेदागमतत्त्ववेत्ता।
वर्णाश्रमाचारपरोऽधिदीक्षो दक्षस्तपस्वी गुरुरास्तिकोऽस्तु।। 5।।

विमर्शिनी

गुरुलक्षणमाह–विप्र इति। विप्रो गुरुरस्तु ब्राह्मणो गुरुर्भवतु। सर्ववर्णेषु मध्ये ब्राह्मणस्यैव प्रतिष्ठादिकर्मण्यधिकार इत्यर्थः। तेषु मध्ये कुलीनः विशिष्टकुले जातः। तेष्वपि मध्ये कृतसंक्रियौघः संक्रियाः गर्भाधानाद्यग्न्याधानान्तिमा[1]: क्रियाः, तासामोघः समूहः, स कृतो यस्य स तथोक्तः। तेष्वपि मध्ये स्वधीतवेदागमतत्त्ववेत्ता सुष्ठु सद्गुरुभ्यस्तदधीनो भूत्वाधीतानां पठितानां वेदानामागमानां चार्थस्य तात्पर्यस्य च ज्ञाता। तेष्वपि मध्ये वर्णाश्रमाचारपरः। वर्णाश्रमयोर्विहितेष्वाचारेषु तत्परः। तेष्वपि मध्येऽधिदीक्षोऽधिगतदीक्षः प्राप्तदीक्षः। तेष्वपि मध्ये दक्षः कर्मणि पटुः। तेष्वपि मध्ये तपस्वी बहुप्रकारतपोयुक्तः। तेष्वपि मध्य आस्तिक ईश्वरादिष्वस्तित्वबुद्धियुक्तः।। 5।।

विवरणम्

गुरुलक्षणमाह–विप्र इति। गुरुरस्त्विति सम्बन्धः। संस्क्रिया गर्भाधानादयः। तासामोघो यथाशक्ति निचयः। तत्त्वं तात्पर्यतः प्रतिपाद्यं वस्तु। अधिगता लब्धाः गुरुतः प्राप्ताः, दीक्षास्तन्त्रसिद्धाः संस्क्रियाः येन सोऽधिदीक्षः। तपांसि मासोपवासादीनि।। 5।।

The preceptor shall be a Brāhmin of nobility, enjoined with the performance of domestic rituals, well-versed in Vedas and scriptures along with their principles, devoted to the performance of rites pertaining to the castes and stages of life, properly consecrated in rites, competent, pious and above all a believer in divinity. (5)

---

1. 'माः ता' क. पाठः

स्नात्वाचम्याथ देवालयगुरुनिलयाद्येषु सम्मार्जनाद्यै-
भूमिं संशोध्य सोदग्दशपटयुगदर्भासनेषूपवेश्य।
आचार्यं मूर्तिपालानपि मनुमहितात्मेष्टविघ्नाधिराजः
संवन्द्यैतान्निदध्याच्छिवदिशि यजमानोऽर्घ्यपाद्यादिकानि।। 6।।

विमर्शिनी

अथ गुरुवरणविधानमाह–स्नात्वेति। अथ यजमानोऽर्घ्यपाद्यादिकानि निदध्यादिति सम्बन्धः। अथेत्यस्य धनधान्यादिसाधनसम्पत्तौ सत्यामुत्तरायणादिकाले च प्राप्त इत्यर्थः। यजमान इत्यस्यात्र वरणकर्मणि ब्राह्मणक्षत्रिये[1]ष्वन्यतमो यजमानश्चेत् स्वयमेव वृणीत, वैश्यशुद्रानुलोमप्रतिलोमेष्वन्यतमश्चेद् ब्राह्मणेन तत्कर्म कारयित्वा स्वयं तस्य दक्षिणां दत्त्वा तत्कर्म परिगृह्णीयादित्यभिप्रायः। किं कृत्वेत्यत्राह–स्नात्वाचम्येति। स्नानमाचमनं च विशेषतस्तदर्थं कर्तव्यमित्यभिप्रायः। देवालयगुरुनिलयाद्येषु कस्मिंश्चिद् देवालये[2] गुरुगृहे वा, आद्यशब्देन स्वालयादौ वा गुरुमाना[3]य्य। सम्मार्जनाद्यैर्भूमिं संशोध्य मुष्ट्यादिसादनपूर्वकं यथावत् स्थलशुद्धिं कृत्वा। सोदग्दशपटयुगदर्भासनेषु उदग्दशानामुदगग्राणां पटानां वस्त्राणां युगेन युग्मेन प्रागग्रैर्दर्भैश्च युक्तेष्वासनेषु। दक्षिणादिक्रमेण आचार्यं स्वगुरुम्। मूर्तिपालान् दीक्षाकाल एवाचार्येण दत्तां स्वां स्वां वासुदेवादिकां मूर्तिं पालयन्ति सेवन्ते इत्याचार्यशिष्या एव मूर्तिपालाः, तानपि। हस्तालम्बनपूर्वकं पूर्वाभिमुखानेवोपवेश्य। मनुहितात्मा भूत्वा गुरुवन्दनादिपूर्वं स्वस्वमूलमन्त्रस्य सकलीकरणं शङ्खपूरणमात्माराधनं च कृत्वेत्यर्थः। इष्टविघ्नाधिराजश्च भूत्वा स्वबीजेन गणपतिमूलेन प्रदीपं चाराध्येत्यर्थः। एतान् गुरुमूर्तिपालान् संवन्द्य तदनुज्ञापुरस्सरं शिवदिशि ईशानकोणे अर्घ्यपाद्यादिकानि निदध्यात्।। 6।।

विवरणम्

इदानीं गुरुवरणं प्रस्तौति–स्नात्वाचम्येति[4]। अथ कर्ता स्नात्वाचम्येति योजनीयम्। कर्माङ्गतया स्नानमेतत्। देवालयगुरुनिलयादाविति स्वालयपुण्योद्यानादिग्रहणम्। स्वमन्त्रञ्चितात्मेति। यन्मन्त्रमूर्तिर्देवः प्रतिष्ठापयितुमभिमतस्तन्मन्त्र इह स्वमन्त्रोऽभिप्रेत, तस्य सकलीकरणमात्माराधनं च कृत्वेति भावः। भूमिं संशोध्येति। वरणमण्डपं संवृतोद्देशमेव वा सम्पाद्य तत्र स्थलं मुष्ट्यादिभिर्मार्जनालेपनाभ्यामेव वा शोधयित्वेत्यर्थः। सोदग्दशपटयुगदर्भासनेष्विति। उदग्दशयोः पटयोर्युगेन दर्भेण च सहितेष्वासनेष्वित्यर्थः। गुरोर्मूर्त्तिपानां च आसनानि पश्चिमोद्देशे दक्षिणादिक्रमेण निधाय तदुपर्युदग्दशतया वस्त्राणां द्वयं द्वयमास्तीर्य

---

1. 'ययोरन्य' क. ख. पाठः,
2. 'ये वा गु',
3. 'चार्यं स' ख. पाठः
4. स्नात्वाचम्याथ देवालयगुरुनिलयादौ स्वमन्त्राञ्चितात्मा
   भूमिं संशोध्य सोदग्दशपटयुगदर्भासनेषूपवेश्य।
   कर्ता स्नातान् यथार्हं गुरुमथ तदुदङ्मूर्त्तिपान् विघ्नमिष्ट्वा
   दीपं चामून् प्रवन्द्येश्वरदिशि पुरतोऽर्घ्यादि सम्पादयेच्च।।
   इति विवरणपाठः

तदुपरि ह्रस्वदर्भांश्च कृत्वा तेष्वासनेष्विति भावः। उपवेश्येति हस्तग्रहणेनोपवेशनमुक्तम्। यथार्हं स्नातानिति कर्माङ्गतया मन्त्रस्नानाद्यभिप्रायम्। यथार्हमुपवेश्येति पादप्रक्षालनादिपूर्वकत्वमुक्तम्। किं च यथार्हं गुरूं मूर्तिपांश्चेति। यथार्हं सत इत्यर्थः। गुरुस्तावत् स्वयमेव देवः, तस्य कलाव्यष्टयो यथास्वं वासुदेवशर्वादिमूर्तयस्तद्रूपा मूर्त्तिपाः। तथा सतो गुरुं मूर्त्तिपांश्चेति भावः। तथानुसन्धानार्थमेतदुक्तम्। गुरुमपि तदुदङ्मूर्तिपानिति। दक्षिणासनादिक्रमेणेति भावः। विघ्नमिष्ट्वेति। तत्र प्राग्भागे स्थण्डिले स्वस्तिके वा गणपतिं निजबीजमन्त्रेण पूजयेत्। तद्विधानं च पूजापटले भविष्यति। दीपं चेति। इष्ट्वेत्यनुकर्षः। प्रणवेन श्रीबीजेन वा दीपपूजा। एतान् अमूनिति गुरुमूर्तिपान्। पुरत ईश्वरदिश्यर्घ्यादि सम्पादयेच्चेति सम्बन्धनीयम्।। 6।।

The Yajamāna (the patron) shall, after taking his bath and sipped holywater, and purified the plot (of land) in the temple campus, or in the residence of the preceptor, having seated (the preceptor) in a plank covered with darbha grass and a pair of clothes with their tips in the northern direction and placed the chosen preceptor and his disciples to help him, (with their seating arrangements from the southern direction) having worshipped Vighneśa (Gaṇapati) with mantras (hymns) lend his hands to the guests for their occupation of the seat shall offer Arghya(the oblation) and pādya (water for washing the feet) placing them in the north eastern direction. (6)

न्यक् पात्राणि निधाय दर्भनिचये वस्त्राद्यपि प्रोक्षणी
तोयैः प्रोक्ष्य सुसंस्कृतैरथ समुत्तानेषु पात्रेष्वपि।
कूर्चं न्यस्यतु तारतोऽर्घ्यमपि पाद्याचामकं योजयि-
त्वाभ्यार्च्याभिमृशेत् स्वमूलमनुना मूर्त्याह्वयैर्वाङ्गकैः।। 7।।

विमर्शिनी

सादनक्रममाह–न्यगिति। दर्भनिचये स्वस्येशभागे स्थण्डिलमालिप्य दर्भसमूहं विन्यस्य तत्र प्रोक्षणीपात्रेण सह चत्वारि पात्राणि न्यक् अधोमुखं निधाय। वस्त्राद्यपि वस्त्राङ्गुलीयकुण्डलय-ज्ञसूत्रभूषणादीन्यपि निधाय। सुसंस्कृतैः प्रोक्षणीतोयैः प्रोक्षणीसंस्कारं कृत्वा तज्जलैः प्रोक्ष्य। अथ धारणादिभिश्च संशोध्य। समुत्तानेषु पात्रेष्वपि प्रोक्ष्य तेषु तारतः कूर्चं न्यस्यतु। अर्घ्यं पाद्याचामकमपि पाद्यमाचमनीयं च स्वस्वद्रव्यैर्योजयित्वा स्वमूलमनुना मूर्त्याह्वयैः स्वस्वमूर्तीनां मन्त्रैः। अङ्गकैः स्वार्थ एव कप्रत्ययः। स्वस्वदानकाले वक्ष्यमाणैरङ्गैरेव वा अभ्यर्च्य अभिमृशेत् स्पृष्ट्वा जपेत्।। 7।।

विवरणम्

एतदेव विवृणोति–न्यक्पात्राणीति। प्रागग्रे दर्भनिचये पश्चिमादिक्रमेण प्रोक्षणीपात्रमर्घ्यादिपात्रत्रयं च सादयेत्। वस्त्राद्यपीति वस्त्राङ्गुलीयककुण्डलयज्ञसूत्रादिग्रहणम्। सुसंस्कृतैः प्रोक्षणीतोयैरिति। प्रोक्षणीसंस्कारः कल्पप्रसिद्धः। यद्वा तन्त्रसिद्ध एव। यदाह–

सकूर्चे गन्धपुष्पाढ्ये जले ताराभिमन्त्रिते।
ध्यात्वा मन्त्रमयं ज्योतिः प्रोक्षणं द्रव्यशोधनम्।।

इति। समुत्तानेषु पात्रेष्वपि प्रोक्ष्येत्यन्वयः। मनुविदिति फडन्तप्रणवेन प्रोक्षणमुक्तम्। शोषणादि सर्वं सामान्यसिद्धम्। वस्त्रादिष्वपि प्रोक्षणमपिशब्देनोक्तम्। तारत इति योजने पूजने च मन्त्र उक्तः। स्वमूलमनुना मूर्त्यास्वयैरभिमृशेदित्येकः पक्षः उक्तः। इह सर्वेषामपि सर्वैरभिमन्त्रणं कार्यम् अङ्गकैर्वेत्यपरः पक्षः। अत्र तु अर्घ्यस्य शिरसा पाद्यस्य हृदयेन आचमनीयस्य शिखयेत्यादि यथाविनियोगमङ्ग-नियमोऽवसेयः। पूजनाभिमन्त्रणे वस्त्रादिष्वपि भवतः।। 7।।

Place the vessels (small copper pots) on the darbha grass spread on the ground with their opening (face) downwards (so as to touch the ground) as also the pair of) clothes. Then sprinkle sanctified water on them (for purification). Thereafter take the vessels and put them facing upwards to place kūrca (two or three shreads of Darbha grass with their tip joined together in a knot) in them chanting of the Mūlamantra (the basic hymn) pertaining to each of the deities. (7)

विष्णौ माषपयोधिकं स्मृतमिहार्घ्यं पद्मपत्रादिकै-
स्तान्याच्छाद्य गुरुं समूर्तिपममुं संवन्द्य दद्यात् क्रमात्।
पाद्याचामकमर्घ्यकं स्वमनुतो हृच्छीर्षशैखैस्तु वा
वस्त्रे द्वे कवचाणुनास्त्रमनुना स्वर्णाङ्गुलीयं तथा।। 8।।

विमर्शिनी

विष्णौ इह वरणे अर्घ्यं माषपयोधिकं स्मृतम्। तानि पात्राणि पद्मपत्रादिभिराच्छाद्या[1]मुं गुरुं समूर्तिपं मूर्तिपैः सहितं संवन्द्य। पाद्याचामकमर्घ्यकं[2] क्रमात् पाद्याचामनीयार्घ्यक्रमात्। स्वमनुतः गुरुमूर्तिपानां मन्त्रैः। तेभ्यो दद्यात्। हृच्छीर्षशैखैस्तु वा हृदयशिरश्शिखामन्त्रैर्वा। त्विति पाद्यादिना पादशौचादिकं कर्तव्यमिति विशेषद्योतकः। तस्मिन् पक्षे वस्त्रे द्वे द्वे वस्त्रे कवचाणुना कवचमन्त्रेण। तथा स्वर्णाङ्गुलीयं सुवर्णशलाकादिभिर्बद्धं पवित्रमयमङ्गुलीयकम्। अस्वमनुना पञ्चाङ्गस्यावसेयत्वात्।। 8।।

विवरणम्

इहार्घ्यमिति। वरण एव, न तु सपर्यादिष्वित्यर्थः। पद्मपत्रादिभिरिति पलाशपत्रादिग्रहणम्। स्वमनुत इति। मूलेन गुरवे वासुदेवादिमन्त्रैर्विष्ण्वादिमन्त्रैर्वा तत्तन्मूर्त्तिपेभ्य इत्यर्थः। हृच्छीर्षशैखैस्तु वेत्यङ्गाभिमन्त्रणपक्षे द्रष्टव्यम्। स्वमनुत इत्यस्य वेत्यस्य च भूषान्तमनुवृत्तिरिष्यते।। 8।।

In the worship of Viṣṇu the oblations (to fill the pot) shall consist mostly of Māṣa (the blackgram or kidney beans – Phaseolus radiatus) and milk. The vessels may be covered with the leaves of lotus. After propitiating the preceptor and his assistants, the deity may be invoked using the basic hymn pertaining to him before presenting oblations and holy water. The oblation may be placed chanting Hṛdayamantra or Śiromantra, the hymns relating to one's heart as well as the head). A pair of clothes shall also be offered to

1. 'याथामुं' ग. पाठः,
2. 'कं पा' क. ख. पाठः

the preceptor with the chanting of Kavacamantra. Thereafter using the Astramantra a golden ring shall be given to him. (8)

दत्त्वास्त्रतः कुण्डलयज्ञसूत्र-
भूषास्ततः स्वाणुभिरर्चयित्वा।
अर्घ्यं च दत्त्वा सहमूर्तिपालं
सम्भोजयेत् साज्यममुं पयोन्नम्।। 9।।

विमर्शिनी

कुण्डलादीनां को मन्त्र इत्यत्राह–दत्त्वास्त्रत इति। कुण्डलयज्ञसूत्रभूषाः स्वर्णमयं कुण्डलयुगं यज्ञसूत्रं चन्दनादि च अस्त्रतो दत्त्वा। ततः स्वाणुभिः स्वस्वमन्त्रैर्जलगन्धपुष्प धूपदीपाक्षतैरर्चयित्वा। पुनरप्यर्घ्यं दत्त्वा सहमूर्तिपालं मूर्तिपालैः सहितममुं गुरुं साज्यं पयोन्नं पायसं सम्भोजयेत् सम्यग् यथाभिलषितं भोजयेत्।। 9।।

विवरणम्

भूषाः उष्णीषकटकाद्यलङ्कारा:। ततः स्वाणुभिरित्येतदङ्गपक्षेऽपि समानम्। स्वाणुविदिति वा पाठः। अङ्गपक्षे गुरुमूर्तिपानामप्यर्चने मूलमेव मन्त्र इह लभ्यते। सघृतं पयोन्नमिति। पायसं घृतप्रधानमुपसेचनादियुक्तमिति भावः।। 9।।

Thereafter he may be presented with Kuṇḍala (ear ornament) yajñasūtra (the sacred thread) and unguents for anointing the body to the accompainment of the Astramantra and propitiate him with the respective mantras along with his attending priests. Thereafter he may be fed with sumptuous food including milk and pudding after the presentation of the oblations. (9)

भुक्त्वाचान्तेष्वेषु दत्त्वावसानी-
यार्घ्यं तेभ्यो भुक्तसत्कारपूर्वम्।
आलिप्योर्वीं तान् प्रणम्यामिवाद्य
प्रार्थ्यानेनालम्ब्य पाणौ वृणीत।। 10।।

विमर्शिनी

भुक्तवा एषु गुरुमूर्तिपेषु आचान्तेषु कृताचमनेषु सत्सु। तेभ्यो भुक्तसत्कारपूर्वं भोजनानन्तरं योग्याः सत्कारास्ताम्बुलापूपादयः ते पूर्वं यथा भवति तथा। अवसानीयार्घ्यं अवसानभवमर्घ्यं दत्त्वोच्छिष्य-दिकमुद्धृत्य उर्वीं भूमिमालिप्य तान् प्रदक्षिणीकृत्य प्रणम्याभिवाद्य प्रसादं प्रार्थ्य। पाणौ दक्षिणकरे दक्षिणकरेणालम्ब्यानेन मन्त्रेण वृणीत।। 10।।

विवरणम्

भुक्त्वावान्तेष्विति करमुखशोधनादिपूर्वमाचमनमुक्तम्। भुक्तसत्कारपूर्वमिति। ताम्बूलपूगफल-मोदकादिदानमुक्तम्। दक्षिणापि यथाशक्तीष्यत एव। यदाह–"शक्त्या दत्त्वा च दक्षिणाम्" इति। तान् प्रणम्येति। तत्तन्मन्त्रैरिति शेषः।। 10।।

After feeding the preceptor and attending priest, and supplying water to wash their hands oblatory things (like betel) may be presented to them. After cleaning the ground and purifying it with sprinklings they may be bowed to and worshipped before lifting up by holding on to their hands and seek their assistance one by one with the chanting of the hymn. (10)

मया सम्पूजितैरत्र दक्षिणाभिश्च तोषितैः।
क्रियतां विष्णुयागो मे प्रार्थयामि प्रसीदत।। 11।।

विमर्शिनी

वरणमन्त्रं पठति–**मया सम्पूजितैरिति**।। 11।।

विवरणम्

प्रार्थनामन्त्रमाह–मयेति। सकृन्मन्त्रप्रयोगः पाणावालम्ब्य वृणीतेति क्रियतां विष्णुयागो म इति प्रार्थनायां वरणे च साधारणम्। ततश्च सकृन्मन्त्रोच्चारणेन प्रार्थना गुर्वादिकरग्रहणरूपं वरणं च कार्यम्। वक्ष्यति च–"सङ्ग्रहेण वरणक्रियाक्रमः" इति। यद्वा प्रार्थनायामेवायं मन्त्रः। वरणं तु पुनः स्यात्। यदुक्तं–"इत्युक्त्वा दक्षिणे पाणावालम्ब्य वरयेत् ततः" इति। वरणं त्वेवं वा स्यात्। 'ओं विष्णुयागे गुरुकर्म क्रियताम् ओं विष्णुयागे मूर्तिपकर्म क्रियताम् इति, ओं विष्णुयागे गुरुं त्वां वृणे गुरुकर्म क्रियतां विष्णुयागे मूर्तिपं त्वां वृणे मूर्तिपकर्म क्रियताम्' इति वा।। 11।।

"Pleased with the worship offered by me and the presentations of remunerations in this connection, you may perform this Viṣṇuyāga (the sacrificial ritual to invoke Viṣṇu), for which I pray to you seeking your co-operation. (11)

स्वस्वदोस्समवलम्बने वद–
न्त्वों तथेपि गुरूमूर्तिपालकाः।
इत्यभाषि हरिसुम्भविद्विषोः
संग्रहेण वरणक्रियाक्रमः।। 12।।

विमर्शिनी

ते गुरुपूर्तिपालकाः स्वस्वदोस्समवलम्बने स्वस्वकरग्रहणे 'ओं तथा' इति वदन्तु। प्रथमं गुरोर्वरणं कृत्वा मूर्तिपालानपि पूथक् पृथग् वृणुयात्। तदा तदा स स मूर्तिपः 'ओं तथे' ति वदत्वित्यर्थः। हरिसुम्भविद्विषोः विष्णुदुर्गयोः वरणक्रियाक्रमः वरणक्रिया[1]विधिः। संग्रहेण संक्षेपेण इति अभाषि उक्तः।। 12।।

विवरणम्

सङ्ग्रहेणेति। अनेन समाचारे विशेषोऽपि सूचितः।

---

1. 'याया वि' क. पाठः

दत्त्वा कूर्चान्यथैतेषामासनार्थं तु वाग्यतः।
सपवित्रैर्जलैः पादौ क्षालयेद्धृदयेन तु।। इत्यादि।। 12।।

The preceptor and his attending priests having touched individually and holding their hands may reply in the affirmative as "let it be so". This is the procedure for selecting the preceptor in the worship of Viṣṇu as well as Durgā (the destroyer of Sumbha). (12)

पाद्याद्यङ्गानि क्रमात् स्वाभिषेके
वक्ष्ये मूलं स्याद् गुरोर्मूर्तिपानाम्।
मन्त्राः स्वे स्वे मूर्तिमन्त्राः शिवादि-
ष्विष्टे पाद्यादिक्रमान्न्यासदाने।। 13।।

विमर्शिनी

पाद्याद्यङ्गानि पाद्यादीनां द्रव्यभेदान्। स्वाभिषेके स्वस्वद्रव्यकलशविधौ क्रमाद् वक्ष्ये। गुरोः मूलं मन्त्रः स्यात्। मूर्तिपानां स्वे स्वे मूर्तिमन्त्राः वासुदेवादयो मन्त्राः स्युः। शिवादिषु देवेषु पाद्यादिक्रमात् पाद्यार्घ्याचमनीयक्रमात् न्यासदाने न्यासं सादनं प्रदानं च इष्टे भवतः।। 13।।

विवरणम्

स्वाभिषेक इति। विष्णुदुर्गयोः शिवादीनामपि स्वपनप्रकरण इत्यर्थः। मूलं स्याद् गुरोरिति शिवाद्यभिप्रायमेव। तेन शिवादिषु मूलपक्ष एवास्ति नत्वङ्गपक्ष इत्यपि प्रतिपादितं भवति। स्वे स्वे मूर्तिमन्त्रा इति। अयमिह मूर्तिविभागः। विष्णौ वासुदेवादयश्चत्वारो विष्ण्वादयोऽष्टौ केशवादयो द्वादश। दुर्गायां पौरुष्याद्याश्चत्वारो जयाद्या अष्टौ। शिवे तत्पुरुषादयश्चत्वारश्शर्वादयोऽष्टौ। उभये द्वादश। शङ्करनारायणे तु शैववैष्णवा व्यामिश्राः। स्कन्दे सनत्कुमारस्कन्दादयः षट्। गणपतौ विघ्नविनायकादयश्चत्वारो गणञ्जयादयोऽष्टौ। उभये द्वादश। शास्तरि प्रभुगोप्तृमहाशास्तृरेवन्ताश्चत्वारो गोप्त्रादयोऽष्टौ। उभये द्वादश। सर्वेष्वपि तु यावतामुपर्यधिवासहोमादिकार्यं तावतामिह वरणम्। वक्ष्यति हि- "स्वहवनाद्यनुसृत्ये"ति। न्यासदाने इति न्यासस्सम्पादनम्। सवेषु मूलमूर्तिमन्त्राः पूजाकर्मशेषभाविन एव।। 13।।

I shall narrate the appropriate hymns for the use of the preceptor as well as the attending priests in connection with sanctification of the potful of holy water. The preceptor shall chant the mūlamantra (the basic hymn) while the assistants shall pronounce the hymns pertaining to the particular deities. In respect of deities like Śiva, Pādya (holy water) Arghya (oblation and ācamana (sipping of water) there shall be a sequence in Nyāsa (ritualistic touching of the various limbs) and propitiatory rituals. (13)

शर्वायक्षित्यादिप्रभिन्नात्मवर्णो
ङेनत्यन्तः स्यान्मूर्तिपाणुर्महेशे।
तेषां नत्यां क्षित्यादिमन्त्रा गुरोस्तु
शैवी गायत्री त्र्यम्बकायेत्यणुर्वा।। 14।।

विमर्शिनी

महेशे शिवे शर्वायक्षित्यादिप्रभिन्नात्मवर्णः 'शर्वाय क्षिति' इत्यादिभिः सम्भिन्नो युक्त आत्मवर्णः आत्म इति वर्णः। ङेनत्यन्तः, ङे चतुर्थ्येकवचनं तद्, नतिः नम इति च अन्ते अवसाने यस्य स तथा। 'शर्वाय क्षित्यात्मने नमः' इति द्रष्टव्यः। मूर्तिपाणुः मूर्तिपानामणुः मन्त्रः। तेषां मूर्तिपानां नत्यां नमस्कारे क्षित्यादिमन्त्राः क्षितीत्यादि[1] यस्य स क्षित्यादिः, क्षित्यादिरादिर्येषां ते क्षित्यादिमन्त्राः। गुरोस्तु तस्यां शैवी गायत्री तन्महेशायेत्याद्या मन्त्राः, त्र्यम्बकायेत्यणुर्वा। त्र्यम्बकायेति मन्त्रः मङ्गलाङ्कुररोपणे वक्ष्यते।। 14।।

विवरणम्

शिवे त्वस्ति विशेष इति मन्यमानस्तस्मिन् मूर्तिमन्त्रानुद्धरति शर्वायक्षित्यादिप्रभिन्नात्मवर्ण इति। यथा–ओं शर्वाय क्षित्यात्मने नमः, ओं रुद्रायाग्न्यात्मने नमः, इत्यादि। मूर्तिपाणुरिति मूर्तिपानां मन्त्राः। त्र्यम्बकायेत्यणुर्वेति बीजवापे वक्ष्यमाणस्य ग्रहणम्।। 14।।

In the worship of Maheśa the hymns shall end with dative case in using the word 'namaḥ'. The attending priests shall chant eight different mantras. While the preceptor is to use 'Śarvāya' (like Sarvāya Kṣityātmanenamaḥ) others shall use eight different hymns including the present one. The preceptor is to use Śaivīgāyatrī while others are to use "Tryambakāya" etc. (14)

शर्वो रुद्रः पशुपतिरथेशानयुक्तौ भवोग्रौ
प्रोक्ताः शर्वादय इति महादेवभीमौ च ते स्युः।
क्षित्यग्न्याख्यौ त्रिपुरजयिनो यज्ञसूर्यौ जलाख्यं
वायुं सोमं समभिदधते व्योम चाप्यष्टमूर्तीः।। 15।।

विमर्शिनी

शर्वादीनाह–शर्व इति। अथ शर्वः रुद्रः पशुपतिः ईशानयुक्तौ ईशानसहितौ भवोग्रौ ईशानो भव उग्रश्चेत्यर्थ। महादेवभीमौ महादेवो भीमश्च ते शर्वादयः प्रोक्ताः स्युः। क्षित्यग्न्याख्यौ क्षितिमग्निं च। यज्ञसूर्यौ यज्ञं सूर्यं व। जलाख्यं जलमित्याख्या यस्य स जलाख्यः, तं च। वायुं सोमं व्योम च। त्रिपुरजयिनः शिवस्य। अष्टमूर्तीः अष्टमूर्तिसंज्ञाः। समभिदधते ब्रुवते। बुधा इति शेषः।। 15।।

विवरणम्

शर्वादिमूर्तिमन्त्रान्तर्गतान् पठति–शर्वो रुद्र इति। क्षित्यादीनपि पठति–क्षित्यग्न्याख्याविति।। 15।।

By 'Śarvāya' the (eight) synonyms are indicated like Śarva, Rudra, Paśupati, Īśāna, Bhava, Ugra, Mahādeva and Bhīma. The eight forms for Tripurajayin (the Victor over Tripuras meaning Śiva) are Kṣiti, Agni, Yajña, Sūrya, Jala, Vāyu, Soma and Vyoman (These eight are supposed to be the

---

1. 'दिः क्षित्यादिरा' क. पाठः

limbs of Śiva in his concept of Aṣṭamūrti). For the worship of the preceptor the first eight are used while for the attending priests the second eight are called for as the respective mantras. (15)

क्षितिर्वै धार्यते लोकान् लोकाः क्षितिमयाः स्मृताः।
सर्वगं क्षितिरूपं ते क्षितिमूर्ते! नमोऽस्तु ते।। 16।।

अग्निर्वै धार्यते लोकान् लोका अग्निमया स्मृताः।
सर्वगमग्निरूपं ते अग्निमूर्ते नमोऽस्तु ते।। 17।।

यज्ञो धारयते लोकान् लोका यज्ञमयाः स्मृताः।
सर्वगं यज्ञरूपं ते यज्ञमूर्ते! नमोऽस्तु ते।। 18।।

सूर्या धारयते लोकान् लोकाः सूर्यमयाः स्मृताः।
सर्वगं सूर्यरूपं ते सूर्यमूर्ते! नमोऽस्तु ते।। 19।।

जलं वै धार्यते लोकान् लोका जलमयाः स्मृताः।
सर्वगं जलरूपं ते जलमूर्ते! नमोऽस्तु ते।। 20।।

वायुर्धारयते लोकान् लोका वायुमयाः स्मृताः।
सर्वगं वायुरूपं ते वायुमूर्ते! नमोऽस्तु ते।। 21।।

सोमो धारयते लोकान् लोकाः सोममयाः स्मृताः।
सर्वगं सोमरूपं ते सोममूर्ते! नमोऽस्तु ते।। 22।।

व्योम धारयते लोकान् लोका व्योममयाः स्मृताः।
सर्वगं व्योमरूपं ते व्योममूर्ते! नमोऽस्तु ते।। 23।।

विमर्शिनी

नमस्कारमन्त्रान् पठति–क्षितिर्वै धार्यत इत्यादि।। 16-23।।

विवरणम्

मूर्तिपानां नमत्कारमन्त्रानपि पठति–क्षितिर्वै इति।। 16-23।।

O god Kṣitimūrti – the one having the form as earth, you support all the worlds which are conceived as the earth and your form as such pervades everywhere and hence I offer my worship to you. (16)

O god Agnimūrti – the one having the form of fire, you support the worlds which are conceived as five and your form pervades everywhere and hence I offer my worship to you. (17)

O god Yajñamūrti – the one having the form of Yajña – the sacrifice, you support the worlds conceived as Yajña and your form pervades everywhere and hence I offer my worship to you. (18)

O god Sūryamūrti – the one having the form of the sun you support all the worlds conceived as the sun and your form pervades everywhere and hence I offer my worship to you. (19)

O god Jalamūrti – the one having the form of water and the worlds are conceived as water and you pervade everywhere and hence I worship you. (20)

O god Vāyumūrti, the one having the form of air and the worlds are conceived as air and you pervade everywhere and hence I worship you. (21)

O god Somamūrti, the one having the form of moon and the worlds are conceived as moon and you pervade everywhere and hence I worship you: (22)

O Vyomamūrti the one having the form of Ākāṣa and all the worlds are conceived as Vyoman and your form pervades everywhere and hence I worship you. (23)

स्वस्वनाम वरणाणुविष्णुशब्दास्पदेऽत्र सुयुनक्तु
युक्तितः।
वास्तुसंग्रहपुरः सराणुना बाहुलेयविषये वृणीत तान्।। 24।।
वास्तुसंग्रहमारभ्य तीर्थस्नानावसानिकम्।
क्रियतां स्कन्दयागो मे प्रार्थयामि प्रसीदत।। 25।।

विमर्शिनी

अत्र वरणाणुविष्णुशब्दास्पदे वरणाणोर्वरणमन्त्रस्य 'मया सम्पूजितैरि'त्यस्य विष्णुशब्दास्पदे विष्णुशब्दस्य स्थाने। स्वस्वनाम शिवादिनाम। युक्तितः पद्याविरोधेन। सुयुनक्तु 'क्रियतां शिवयागो मे' इत्यादिप्रकारेण युञ्ज्यादित्यर्थः। बाहुलेयविषये बाहुलेयः स्कन्दः तद्विषये वरणे। तान् गुरुमूर्तिपान्। वास्तुसंग्रहपुरस्सराणुना वास्तुसंग्रहमिति पुरतः सरति गच्छतीति वास्तुसंग्रहपुरस्सरः। 'वास्तुसंग्रहमि' त्यादिना मन्त्रेण वृणीतेत्यर्थः।। 24-25।।

विवरणम्

सर्वेषु प्रार्थनामन्त्रे विशेषं दर्शयति–स्वस्वनामेति। मया सम्पूजितैरित्ययं वरणमत्रंः, तस्मिन् विष्णुशब्दस्य स्थाने। स्वस्वनाम युक्तितस्सुयुनक्त्वति। पूर्वानुरोधेनेति भावः। यथा दुर्गायागो मे क्रियताम्। शिवयागो मे (क्रियतां) हरीशयागः क्रियतामित्यादि।। 24।।

सङ्ग्रहेण तु मन्त्रान्तरमाह–वास्तुसङ्ग्रहेत्यादि। नाममन्त्रेणेत्यर्थः।। 25।।

Here in the place of the deity of Viṣṇu the respective names of other deities may be used as desired. They may be invoked with the mantra used for Vāstusangraha-selection of plot and so on as for instance in the case of Bāhuleya (Skanda). (24)

"I pray to you the preceptor to perform the Skandayāga the sacricial

ritual for Skanda beginning with the selection of the plot upto the final rite of the holy ablution–the ceremonial bath-culmnninating the rite." (25)

एवं गुरुं गुरुनियोगकृतो विनीतान्
विप्रान् विधानकुशलानपि मूर्तिपालान्।
सर्वेष्वपीह चतुरो द्विगुणान् वृणीत
षड्वा तथा स्वहवनाद्यनुसृत्य कर्ता।। 26।।

विमर्शिनी

वरणकर्मोपसंहरन् मूर्तिपलक्षणमाह–एवमिति। कर्ता सर्वेष्वपि देवेषु एवमुक्तेन प्रकारेण गुरुम्। इह मूर्तिपवरणे। गुरुनियोगकृतः गुरोर्नियोगं कुर्वन्तीति गुरुनियोगकृतः, तान्। विनीतान् स्वतः क्षमाशीलान्। विधानकुशलान् कर्मसु विदग्धान् विधिज्ञांश्च। विप्रान् ब्राह्मणानेव मूर्तिपालानपि। चतुरः चतुः सङ्ख्यान्। द्विगुणान्[1] तद्द्विगुणान् अष्यौ वेत्यर्थः। तथा षड् वा द्वादश वा, यथा चतुः सङ्ख्योक्तिः। स्वहवनादि स्वस्वहोमादिकर्माणि[2]। अनुसृत्य विमृश्य वृणीत।। 26।।

विवरणम्

मूर्तिपानां लक्षणं सङ्ख्यां व वदन् वरणमुपसंहरति–एवं गुरुमिति। षड्वेति स्कन्दविषयम्। वक्ष्यति च–"षाण्मातुरे षट्स्वि"ति। स्वहवनाद्यनुसृत्येति। अधिवासहोमाद्यनुसारेणेत्यर्थः। यावन्तोऽ-धिवासहोमाः तावन्तोऽवश्यं मूर्तिपाः स्युः। यत उक्तम्–

"चतुर्भिर्मूर्तिपैस्सार्धमष्टद्वादशभिस्तु वा।"

इति। एकहोमोपपत्तौ तु अन्यत्रापि मूर्तिपोपयोगाद् एकोऽपि वरणीयः। आदिशब्देन दिशाहोमचतुर्थ-दिनस्नपनादि गृह्यते। तत्रापि बलिपीठद्रव्यकलशबहुत्वात् तत्पूजौचित्येन मूर्तिपसङ्ख्यानियमात् प्रायश्चित्तहोमो वा दिशाशब्देनाभिप्रेतः। तत्राप्यनया रीत्या वरणं कार्यमित्यप्यर्थादवसीयते। यदुक्तम्–

प्रार्थितस्त्वेवमावार्यो मूर्तिपालैः समन्वितः। स्थानशुद्धिं ततः कुर्याद्

इत्यादि। एवं जीर्णोद्धारेऽपि। अथवा स्वहवनाद्यनुसृत्य वृणीतेति। स्वीयहोमपूजादौ स्वस्याधिकारे सति कर्ता स्वयं वृणीतेति। तदनधिकारे तु परेणैव वरणं कारयेत्। तत्रापि वरणमात्रं तु स्वयं कुर्यादिति। शूद्रादेर्न होमादावधिकारः। तदुक्तम्–

व्याख्या(?)स्थापितदेवार्चाहोमेष्वस्य न कर्तृता।
दीक्षितस्यापि किन्त्वेष कामं विप्रैस्तु कारयेत्।। इति।। 26।।

Thus the Yajamana, the institutor of the ritual, shall select his own preceptor as well as his assistants in the act who are well trained in the act under him in all cases; four or eight of them shall be selected or the selection may be restricted to six persons as per the requirement of the sacrificial rite. (26)

---

1. 'न् अ' ख. पाठः,
2. 'र्मणि वि' ग. पाठः

यियक्षुणाचार्यवरो वृतोऽथ समूर्तिपः कर्म समातनोतु।
प्रतिश्रुतं भूमिपरिग्रहादि तीर्थाभिषेकावधिकं क्रमेण।। 27।।

विमर्शिनी

एवं यजमानस्य कर्माभिधाय गुरोः कर्मोद्दिशति–यियक्षुणेति। अथ यियक्षुणा यष्टुमिच्छावता। यजनं नाम भूपरिग्रहादि तीर्थस्नानपर्यन्तं कर्म विवक्ष्यते। यजमानेन वृत आचार्यवर इत्यनेन प्रतिष्ठादिकर्मण्याचार्यश्रेष्ठस्यैवाधिकार इत्युक्तम्। समूर्तिपः मूर्तिपैर्युक्तः। भूमिपरिग्रहादि भूमिपरिग्रहमारभ्य। तीर्थाभिषेकावधिकम् उत्स[1]वान्तगततीर्थस्नानमवधीकृत्य। यत् कर्म स्वेन प्रतिश्रुतं प्रतिज्ञातं, तत् क्रमेण समातनोतु कुर्यात्।। 27।।

विवरणम्

अथ वृतस्य गुरोः कृत्यं वदन् वक्ष्यमाणकर्मसु तस्यैव सम्प्रत्यय इत्यपि नियमयति यियक्षुणेति। भूपरिग्रहादितीर्थस्नपनान्तं कर्मेह यजनम्। प्रतिश्रुतं, वरणसमय ओं तथेति प्रतिज्ञातम्।। 27।।

One who wishes to institute a performance of the ritual shall select an expert preceptor along with his attendants to perform the ritual right from the selection of the plot upto the final holy bath in its proper order. (27)

तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे
शैलाग्रेऽद्रितटे वनोपवनयोरुद्यानदेशे तथा।
सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुरे पत्तने
देशेऽन्यत्र मनोरमे सुरसमिज्यायै क्षितिं कल्पयेत्।। 28।।

विमर्शिनी

सर्वदेवानां सामान्येन प्रतिष्ठास्थानान्याह–तीर्थान्त इति। तीर्थान्ते तीर्थसमीपे। तटिनीतटे नदीतीरे। जलनिधेस्तीरे, जलनिधिंः समुद्रः तस्य तीरे। सरित्सङ्गमे नद्योर्मिथः सङ्गमे नदीसमुद्रसङ्गमे च। शैलाग्रे पर्वतोपरिभागे। अद्रितटे पर्वतस्य पार्श्वप्रदेशे। वनोपवनयोः वने उपवने च। उपवनं ग्रामसमीपस्थारण्यम्। उद्यानदेशे उद्यानं कृत्रिमोपवनम्। वातथाशब्दौ विकल्पद्योतकौ। सिद्धाद्यायतनेषु, सिद्धास्तपआदिभिः कृतकृत्याः, तेषां तादृशानामन्येषां चायतनेष्वाश्रयस्थानेषु। ग्रामे विप्रसमूहस्यावासे। पुरे राजधान्याः समीपे। पत्तने नगराभ्याशे। अन्यत्र मनोरमे च देशे। गुरुवरः सुरसमिज्यायै देवप्रतिष्ठाविधये क्षितिं कल्पयेत्। अत्र पूर्वपूर्वोक्तानि स्थानानि श्रेष्ठानीत्यवगन्तव्यम्।। 28।।

विवरणम्

तत्र प्रथमं भूपरिग्रहं विवक्षन् परिग्राह्याया भुवो लक्षणपरीक्षाभ्यामवधारणमिति तदभिधित्सायाः पूर्वं तावत् तद्भूसमुचितान् प्रदेशानुपदिशति–तीर्थान्त इति। अन्तशब्दः समीपवचनः। तटिनी नदी। सिद्धाद्यायतनेषु वेति। यत्र सिद्धाः सिद्धिं प्राप्तास्तत् सिद्धायतनम्। सिद्धयाद्यायतनेषु वेति वा पाठः। आदिशब्देन धर्मायतनादिग्रहणम्। वेति सर्वत्र योज्यम्।। 28।।

---

1. 'द्वासान्त' ग. पाठः

The preceptor shall select a suitable plot for the installation of the deity in places like holy ghats, banks of river, shores of ocean, confluence of rivers, at the top of a hill or its slope, in forests abounding in trees or gardens, hermitages of siddhas, villages, cities and towns or similar attractive locations. (28)

प्राचि प्रतीचि च हरौ निजदिश्युमेशे
वायौ निसुम्भजिति तारकजित्युदीच्याम्।
ग्रामादिकेषु निर्ऋतौ गणपार्यनाम्नो-
गृह्णातु भूमिमखिलेष्वपि मध्यतो वा।। 29।।

विमर्शिनी

अथ ग्रामे पुरे पत्तन इत्युक्तेषु ग्रामादिकेधु विष्ण्वादीनां देवानां स्थाननियममाह प्राचीति। हरौ ग्रामादिकेषु प्राचि प्राग्भागे प्रतीचि च प्रत्यग्भागे भूमिं गृह्णातु। उमेशे शिवे निजदिशि ईशभागे। निसुम्भजिति दुर्गायां वायौ वायुभागे। तारकजिति स्कन्दे उदीच्यां उदग्भागे। गणपार्यनाम्नोः गणपतौ शास्तरि च निर्ऋतौ निर्ऋतिभागे। अखिलेषु विष्ण्वादिसप्तस्वपि मध्यतो वा मध्यभागे वा।। 29।।

विवरणम्

सुरसमिज्यायै देवप्रतिष्ठापनार्थं ग्रामादिष्वपि प्रदेशविशेषानाह-प्राचीति। ग्रामादिकेषु प्राचि प्रतीचि चेत्यन्वयः। उमेशे निजदिशीति। ऐशान्यामित्यर्थः। अखिलेष्वपि मध्यतो वेति। शिवनारायणे मध्यतः। तदितरेषु सर्वेष्वपि मध्यतो वेत्यर्थः। स्वपदे गिरीशे वायौ निसुम्भजिति इति वा पठनीयम्। तेन प्रागादि सर्वमपि वास्तुपदमिति विशेषो लभ्यते। ग्रामपुरादिभूमण्डला सप्तवर्गकोष्ठतयाष्टवर्गकोष्ठतया नववर्गकोष्ठतया वा विभज्य मध्यतः कोष्ठचतुष्कं कोष्ठनवकं वा ब्राह्मं पदं सङ्कल्प्य तत्परितो दैवमानुषपैशाचावरणान्येकैकपरिपङ्क्त्या कल्पयेत्। तत्र पैशाचे प्राचि प्रतीचि चोद्देशे हरेः स्थानम्। सोमभृशपदोपलक्षणमेतत्। न चैष नियमः। यदाह-

अन्तरालेषु सर्वेषु दिक्षु चैवं विदिक्षु च।
सर्वत्र वैष्णवं गेहं ग्रामस्य नगरस्य च।।

इति। स्वपद इति पर्जन्यजयन्तपदोपलक्षणम्। नाप्येष नियमः। यदप्याहः

अष्टदिक्षु च कर्तव्यं ग्रामादिषु शिवालयम्।
पैशाचिकपदे कुर्यादालयं तु पराङ्मुखम्।। इति।
मानुषे तु पदे वाथ कर्तव्यं शिवमन्दिरम्। इति।
स्वयम्भुदैविकं चार्षं यत्र तत्र स्थितं तु वा।
न दोषाय भवेत् तस्याप्यग्रं वर्ज्यं शुभार्थिभिः।।

इति। वायाविति मुख्यसोमोपलक्षणम्। उदीच्यां सोमपदे यमवरुणेन्द्राग्निपदोपलक्षणमेतत्। निर्ऋताविति। विघ्ने शोषनागमुख्यभल्लाटसोमपदोपलक्षणम्। शास्तरि तु यमादितिपदोपलक्षणम्। शिवोक्तस्थानेष्वपि शिवनारायणः स्यात्। दैवमानुषयोरपि प्रोक्तस्यानेषु स्कन्दस्यापनमिष्यते इति।। 29।।

One may select the plot for Viṣṇu in the east or west, for the husband of Umā (Śiva his own region which is the north east, for Durgā it is the region of Vāyu – the north west location, for Tārakajit- the vanquisher of Tāraka meaning Skanda it is the north, for Gaṇapati and Sastā, it is the corner of Nirti - the south west. For all of them the central region of the village is also suitable. (29)

गोमर्त्यैः फलपुष्पदुग्धतरुभिश्चाढ्या समा प्राक्प्लवा
स्निग्धा धीररवा प्रदक्षिणजलोपेताशुबीजोद्गमा।
सम्प्रोक्ता बहुपांसुरक्षयजला तुल्या च शीतोष्णयोः
श्रेष्ठा भूरधमा समुक्तविपरीता मिश्रिता मध्यमा।। 30।।

विमर्शिनी

अथ भूमेरुत्तमादित्वमाश्रित्य भेदमाह–गोमर्त्यैरिति। गोभिर्मर्त्यैश्चाढ्या आश्रिता। फलपुष्पदुग्धतरुभिः फलवद्भिः पुष्पवद्भिः क्षीरवद्भिश्च वृक्षैराढ्या पूर्णा। समा निस्नोन्नतवर्जिता। प्राक्प्लवा प्राग्भागनिम्ना। स्निग्धा निबिडा। धीररवा गम्भीरस्वरा। प्रदक्षिणजलोपेता प्रादक्षिण्येन नद्यादिनोपलक्षिता। आशुबीजोद्गमा बीजावापे शीघ्रमुद्गच्छदङ्कुरा। बहुपांसुः खात्वा तत्पांसुभिरेव पूरिते गर्तातिरिक्तपांसुयुक्ता। अक्षयजला ग्रीष्मेऽपि प्रभूतजलयुक्ता। शीतोष्णयोस्तुल्या शीतकाले चोष्णकाले व तुल्या, शैत्याधिक्येनौष्ण्याधिक्येन च रहिता। एवम्भूता भूमिः श्रेष्ठा उत्तमा सम्प्रोक्ता। समुक्तविपरीता उक्तलक्षणवैपरीत्ययुक्ता अधमा। मिश्रिता मिश्रलक्षणयुक्ता मध्यमा।। 30।।

विवरणम्

हेयोपादेयभूविशेषलक्षणमाह–गोमर्त्यैरिति। फलपुष्पदुग्धतरुभिरिति। फलतरुभिः पुष्पतरुभिः दुग्धतरुभिश्च। समा निस्तोन्नतरहिता। प्रागतलस्य प्लवो यत्र सा प्राग्प्लवा। प्रागित्युदगैशोद्देशोपलक्षणम्। स्निग्धता चिक्कणता। यस्यां दण्डाद्याघाते गम्भीरो ध्वनिः प्रवर्तते सा धीररवा। आशुबीजोद्गमेति। यदुक्तम्–'यत्र बीजानि त्रिरात्रेण प्रोहन्ति सोत्तमा' इति। बहुपांसुरिति। यदप्युक्तम्–

हस्तमात्रं समं खात्वा तन्मृदा पूरयेत् पुनः।
मृत्सयाधिकया श्रेष्ठा समया मध्यमा हि भूः।।

इति। अक्षयजलेति। यदपि वोक्तम्–

तत्खातं वा जलापूर्णं कृत्वा पादशतं व्रजेत्।
पुनरागच्छतः प्राग्वत् पूर्णं चेद् भूमिरुत्तमा।।

इति। समुक्तविपरीतेति। यथा गोमर्त्यव्यतिरिक्तसत्त्वैरत्यन्ताविद्यमानफलपुष्पदुग्धतरुभिश्च युक्तेत्यादि। मिश्रिता मध्यमेति पूर्ववदूह्यम्। द्वयोर्लक्षणयोर्मध्यभाक्त्वं मिश्रितत्वम्। यदुक्तम्। "समया मध्यमा हि भूः" इत्यादि। किं च नानालक्षणद्वयसन्निपातोऽपि मिश्रितत्वम्। यथा– गोमर्त्यैरफल-पुष्पदुग्धतरुभिश्चाढ्या" इत्यादि।। 30।।

The ground abounding in cattle and humans and having a number of

trees bearing fruits, flowers and juices, flat with water flowing towards the east, thick with shrubs, producing deep sound with water flowing from left to right, generating the germination of seeds without delay, with much dust, with ever present water and appearing pleasant in cold and hot seasons, is said to be the best while, the one with qualities opposing these is the worst and possessing a mixture of these traits is of middle variety. (30)

वृत्तार्धेन्दुनिभा त्रिपञ्चरसकोणा शूलशूर्पाकृति-
र्मत्स्यानेकप[1]कोलपृष्ठकपिलावक्त्रोपमा मेदिनी।
भस्माङ्गारतुषास्थिकेशकृमिवल्मीकादिभिः संयुता
वर्ज्या मध्यनता सगर्भकुहरा विस्रा विदिक्स्थापि च।। 31।।

विमर्शिनी

अथ भूमेर्वर्जनीयलक्षणान्याह–वृत्तेति। वृत्ता स्वत एव वृत्ताकारा। अर्धेन्दुनिभा अर्धचन्द्राकारा। त्रिपञ्चरसकोणा त्रिकोणा पञ्चकोणा षट्कोणा व। शूलशूर्पाकृतिः शूलाकृतियुक्ता शूर्पाकृतियुक्ता च। मत्स्यानेकपकोलपृष्ठकपिलावक्त्रोपमा मीनद्विपवराहाणां पृष्ठसमाना पशुमुखसमाना च। भस्माङ्गारतुषास्थिकेशकृमिवल्मीकादिभिः संयुता भस्मभिः कृष्णाङ्गारैः तुषैः अस्थिभिः केशैः कृमिभिर्वल्मीकैर्युक्ता[2]। (अत्र[3] पृष्ठसमानपशुमुखसमानरधधार्थ तथा च प्रसिद्धे तर्वा?) मध्यनता मध्यभागनिम्ना। सगर्भकुहरा अन्तर्भागे बिलयुक्ता। विस्रा दुर्गन्धयुक्ता। विदिक्स्थापि च कोणगत-दैर्घ्यविस्तारयुक्ता च। एवंभूता मेदिनी भूमिर्वर्ज्या।। 31।।

विवरणम्

स्वतन्त्राधमभूमिमाह–वृत्तेति। अनेकपो गजः। कोलः सूकरः। कपिला गौरेव। सगर्भकुहरेति गर्भवती बिलयुक्ता च। विस्रा आमगन्धिनी। विदिक्स्थेति। आग्नेयादिविदिग्गतपार्श्वचतुष्टया। यदा तु प्रागुक्तोत्तमभूमिरप्येतदधमलक्षणयोगिनी तदा साप्युपेक्षणीयैवेति बोद्धव्यम्। सर्ववर्णसामान्यतः भूलक्षणमेवमुक्तम्।। 31।।

The ground that is of the shape of a circle crescent shaped, having three, four and six corners resembling the shape of a spear and winnowing basket, appearing like a fish, elephant and of shape of the back of a boar as well as like the mouth of a cow and containing in it substances such as ashes, charcoal, chaff of grains, bones, termites ant-hills and the one with its middle part depressed, having a cavity in the centre, giving foul smell and prominent corners should be avoided (in selecting a plot for the installation of deity). (31)

---

1. कूर्मपृ इति मूलकोशपाठः
2. 'क्ता। तथाव प्रसिद्धेर्वा' घ. पाठः,
3. 'त्र धार्थः...द्धेर्वा',

विप्रादिक्रमतः कुशेषुवनदूर्वाकाशयुक्ता भुव-
स्तुल्यातानवितानसिन्धुररसाब्ध्यंशाधिदीर्घा अपि।
श्वेतापाटलपीतमेचकरुचश्चाज्यासृगन्नासवा-
मोदाः स्वादुकषायतिक्तकटुकास्वादान्विताश्च स्मृताः ।। 32 ।।

विमर्शिनी

अथ ब्राह्मणाद्यधिकारिभेदेन भूमेर्लक्षणमाह–विप्रादीति। कुशेषुवनदूर्वाकाशयुक्ताः कुशैरिषुवनेन दूर्वाभिः काशैश्च युक्ताः। भुवः भूभागाः। विप्रादिक्रमतः ब्राह्मणक्षत्रियवैश्यशूद्रक्रमेण स्मृताः। तुल्यातानवितानसिन्धुररसाब्ध्यंशाधिदीर्घाः तुल्यदैर्घ्यविस्तारचतुरश्राः। सिन्धुरा गजाः। सिन्धुररसाब्धि[1]शब्दैः अष्टषट्चतुःसङ्ख्या लक्षिताः। विस्तारादष्टषट्चतुरंशाधिकं दैर्घ्ययुक्ताः। अपिः समुच्चये। समचतुरश्रादिचतस्रो भुवो विप्रादिक्रम[2]तः स्मृता इत्यर्थः। श्वेतापाटलपीतमेचकरुचश्च धवलरक्तपीतकृष्णवर्णाश्च। विप्रादिक्रमतः आज्यासृगन्नासवामोदाश्च घृतरुधिरहविस्सुरागन्धाश्च। स्वादुकषायतिक्तकटुकास्वादान्विताश्च। एते रसाश्च विप्रादिक्रमतः स्मृता इत्यर्थः।। 32 ।।

विवरणम्

अथ वर्णभेदतो भूलक्षणमाह–विप्रादिक्रमत इति। इषुः शरस्तम्बः। सिन्धुरो गजः। विस्तारादष्टमषष्ठचतुर्थांशैरधिकायामाः क्षत्रियादिभूमयः। मेचका कृष्णा। असृग् रुधिरम्। आसवस्सुरा। आमोदस्सौरभ्यम्।। 32 ।।

The ground to be selected for the four castes beginning with Brāhmin shall consist of the growth Darbha grass and the Iṣuvana (the reed sacharum sara) growing ground, for Kṣatriya, the one with the growth of Dūrvā (panic grass) and the one abounding the kuśa (Saccharum spontanium) for Śūdras., The land may respectively be of the shape of a square, and of the size of eight, six or four in the matter of length and width. As for the colour they may be white, reddish, yellowish and variegated with the mixture of colours. Their taste may be sweet, pungent, bitter and that giving burning sensations respectively. (32)

सङ्कीर्णरूपा वसुधात्र वर्णैर्गन्धै रसैर्वाखिलवर्जनीया।
एनामनालक्षितवर्णचिह्नां नक्तं परीक्षेत निमित्ततश्च।। 33 ।।

विमर्शिनी

वर्णसाङ्कर्ययुक्ता सर्ववर्णैर्वर्जनीयेत्याह–सङ्कीर्णेति। अत्र भूपरीक्षायाम्। वर्णैः रूपैः। गन्धै रसैः। वाशब्देन कुशादिभिः समचतुरश्रादिसंस्थानभेदैश्च। सङ्कीर्णरूपा मिश्रिता वसुधा अखिलवर्जनीया सर्ववर्णैस्त्याज्या। चिह्नराहित्ये कथमित्यत्राह–एनामिति। अनालक्षितवर्णचिह्नाम् अपरिस्फुट-

---

1. 'दि',
2. 'मेण स्मृ' ग. पाठः

वर्णलक्षणयुक्ताम्। एनां वसुधाम्। नक्तं रात्रौ। निमित्ततः वक्ष्यमाणनिमित्तेनापि। परीक्षेत परीक्ष्य जानीयात्।। 33।।

विवरणम्

वर्णिनामेव भूमिस्तत्तद्भेदव्यामिश्रणादनुलोमजसूतभूमिरपि स्यात्। वर्णैर्गन्धैरिति। सजातीयसङ्करे तु दोष इति भावः। वर्णाद्युपादानाच्च कुशादिसङ्करे तु न दोषः। अखिलवर्जनीयेति। ब्राह्मणादि-सर्ववर्णैरनुलोमसूतैरपि हेयेत्यर्थः। मानुषीं परीक्षामुक्त्वा दैवीं परीक्षामाचष्टे–एनामिति।। 33।।

If the ground is of a mixed type with colour, smell and taste, it may not be accepted in the case of all castes. If its characteristic is not easily noticeable it should be observed during the night time, by employing omens. (33)

उपलिप्य महीतलेऽवटे घटमामं भृतधान्यकं न्यसेत्।
तदुपर्यपि वर्धमानकं न्यसतु प्राग्वदनो मृदात्मकम्।। 34।।

विमर्शिनी

परीक्षणरीतिमाह–उपलिप्येति। महीतलेऽवटे गर्ते गोमयजलेनोपलिप्य प्राग्वदनो मन्त्री मूलमन्त्रं जपन् मृदात्मकं मृण्मयम् आममपक्वं घटं कलशं न्यसेत्। तदुपरि मृदात्मकं वर्धमानकं शरावं न्यसतु।। 34।।

विवरणम्

अवटे हस्तमात्रखाते। आममपक्वम्। भृतधान्यकं यवमुद्गादिभिर्बीजयोचितैर्धान्यैरापूरितम्। वर्धमानकं शरावम्। मृदात्मकमिति। न लौहम्। प्राग्वदनग्रहणात् सामान्यसिद्धोऽनुष्ठानक्रमोऽपि गम्यते। पूर्वमात्मनः सकलीकरणादि कृत्वा गणपतिं प्रदीपं च सम्पूज्य अवलिप्तेऽवटतले स्वस्तिकाद्यालिख्याक्षतं निक्षिप्य तत्र घटं शरावं च न्यग्बिलं सादयित्वेत्यादि।। 34।।

After having anointed the ground a pit should be dug (with specific measurement) in which is to be placed in earthern pot which is not baked and filled up with certain grain and it should be covered with another bigger earthern vessel, the preceptor occupying a western side of the pit facing the east. (34)

कपिलाघृतमात्ममूलतः शतसञ्जप्तममुत्र सिञ्चतु।
चतसृष्वपि दिक्षु वर्तिकास्तनुयाद् वर्णवशात् सितादिकाः।। 35।।

विमर्शिनी

अमुत्र शरावे। आत्ममूलतः स्वस्वमूलमन्त्रेण। शतसंजप्तं शतवारं संजप्तम्। कपिलाघृतम् कपिलवर्णायाः पशोर्घृतम्। सिञ्चतु पूरयतु। वर्णवशाद् द्विजादिवर्णक्रमेण। पूर्वादिचतसृषु दिक्ष्वपि सितादिकाः श्वेतरक्तपीतकृष्णवर्णाः वर्तिकाः वर्तीकृतांस्तन्तून् तनुयात्।। 35।।

विवरणम्

सितादिका इति। "श्वेतापाटलपीतमेचकरुचः" इति ह्युक्तम्।। 35।।

The preceptor shall sprinkle the milk of a red coloured cow in tune with this chanting of the respective basic mantras for hundred times. He shall also place on the four sides of the pit wicks made of threads having anointed with colours of white and so on in accordance with the respective castes. (35)

प्रज्वाल्य दिश्यस्वकमूर्तिभिस्तास्ततः समभ्यर्चयतु क्रमेण।
देवं निजं वाथ दिवाकरं वा विज्ञापयेच्चैनमनेन मन्त्री।। 36।।

विमर्शिनी

दिश्यस्वकमूर्तिभि[1] : दिग्भवाभिः स्वस्वमूर्तिभिः पूजापटले वक्ष्यमाणाभिः। ताः वर्तिकाः। क्रमेण पूर्वादिक्रमेण प्रज्वाल्य। ततः मध्ये निजं देवं, यं देवं स्थापयितुमेतत् करोति, तं देवमित्यर्थः। दिवाकरं सूर्यं वा समभ्यर्चयतु। अथ प्रसन्नपूजानन्तरम्। एनं देवम्। अनेन मन्त्रेण। विज्ञापयेत् प्रार्थयेत्।। 36।।

विवरणम्

दिश्यस्वकमूर्तिभिरिति। दिश्याः दिक्षु भवाः। विष्णौ वासुदेवादयः, शिवे तत्पुरुषादय इति। तैर्मूर्तिमन्त्रैः। प्रागादिषु ज्वालाःप्रज्वाल्य तैरेव ताः पूजयेत्। निजं देवं वेति। समभ्यर्चयत्विति सम्बन्धनीयम्। मन्त्रीति तत्तन्मन्त्रपूर्वं विज्ञापनमुक्तम्।। 36।।

The preceptor proficient in the mantras shall lit up the wicks to the accompaniment of the required hymns and propitiate the deity intended or the sun god as the case may be and offer worship. (36)

निमित्तं ब्रूहि मे देव! कल्पप्रोक्तं द्विजादिकम्।
वर्णार्थं तु प्रयुक्तेऽस्मिंस्ततो वर्तिचतुष्टये।। 37।।

विमर्शिनी

मन्त्रं पठति–निमित्तमित्यादि।। 37।।

"O god, reveal to me the omen as prescribed in the texts on Kalpa for the respective castes like Brāhmin etc. This may be revealed through the four burning wicks that have been placed here. (37)

आच्छाद्य नीतेऽत्र मुहूर्तमात्रे
यस्योज्ज्वलेद् वर्तिरमुष्य सा भूः।
दीप्तासु सर्वास्वनुवर्णयोग्या
त्याज्या विशीर्णासु समस्तवर्णैः।। 38।।

विमर्शिनी

फलकादिभिराच्छाद्य मुहूर्तमात्रे काले नीते अतीते। अत्र एषु वर्णेषु यस्य वर्तिरुज्ज्वलेद्, अमुष्य वर्णस्य सा भूर्भवति। सर्वासु वर्तिषु दीप्तासु सतीषु अनुवर्णयोग्या सर्ववर्णं प्रति योग्या। विशीर्णासु अनुज्ज्वलितासु समस्तवर्णैस्त्याज्या भवति।। 38।।

1. 'दि' ग. पाठः

विवरणम्

विशीर्णासु उपशान्तासु वर्तिषु। कदाचित्तु विशेषः। यदुक्तम्–

अथ सर्वा विशीर्णास्ताः पुनः प्र(ज्वाल्य? ज्वलि)ता अपि।

वर्जनीया तु सा नित्यम्" इति।। 38।।

After covering them (the wicks) for some moments, the particular wick pertaining to the respective castes may get enhanced with fire to fix the ground as suitable. Once all the wicks are thus enhanced if some of them get extinguished that particular location may be rejected by all castes. (38)

कर्पूरागरुनालिकेरतिलकैर्दर्भैः कदम्बार्जुनै-
र्मालेयैः क्रमुकेक्षुकेतककुशैः कुन्दारविन्दोत्पलैः।
पूर्वोदक्प्लवशालिनी बहुजला वा या दरीदृश्यते
सेयं शान्तिकरी सुरेशयजने सूक्ता सुपद्मा मही।। 39।।

विमर्शिनी

एवं वर्णवशाद् भूमेर्लक्षणमुक्त्वा कामवशादप्याह–कर्पूरेति। या मही कर्पूरादिभिरुपलक्षिता दरीदृश्यतेऽत्यर्थं दृश्यते, सेयं सुपद्मा नाम। सुरेशयजने देवं प्रतिष्ठाप्य यजनात् शान्तिकरी दुरितरोगानर्थादिशान्तिकरी। सूक्ता आगमेष्वभिहिता। कर्पूरः स एव। पूर्वोदक्प्लवशालिनी पूर्वभाग उदग्भागे च निम्नतया युक्ता। बहुजला वा अक्षयजलयुक्ता वा।। 39।।

विवरणम्

अथ फलभेदेनापि भूलक्षणमाह–कर्पूरेति। पूर्वोदक्प्लवशालिनीति। प्राक्प्लवेनोदक्प्लवेनेशानस्तवेन वा युक्तेत्यर्थः। दरीदृश्यते[1] अत्यर्थं दृश्यत इत्यर्थः। सुरेशयजनं प्रतिष्ठापनम्।। 39।।

That particular land where the trees or plants like Karpūra (Camphor (Laurus Camphora), Agaru (Aquilaria Agallocha), Nālikera (cocoanut) Tilaka (Vanguleria spinosa) Darbha (Poa cynosuroides or saccharum spontaneum) Kadamba (Nauclea Cadamba) Arjuna (Pentaptera arjuna or Terminalia alata), Māleya (Sandal), Kramuka (Arecanut tree) Ikṣu (Sugarcane or Sacharum officinarum) Ketaka (Pandanus) Kuśa (Sacrificial grass or Poacynosuroides), Kunda (Gaertnera racemosa) Aravinda (Lotus), Utpala (Blue lotus, Nymphaea caerulea) grows in abundance, where the water flows towards east as well as north with plenty of water, which is most suited for the installation of gods providing solace is termed as Supadmā. (39)

तीरं वारिनिधेः श्रिताथ सरितस्तीर्थस्य वा दक्षिणे
व्रीहिक्षेत्रविचित्रिताप्यदिशि यज्ञार्हाङ्घ्रिपैराङ्किता।

---

1. 'त इति। दृशर्यङि रूपमृ। स्पष्टतरं दृश्यते अ ग. पाठः

कीर्णा पूर्णफलप्रसूनतरुभिर्योद्यानहृद्यापि वा
भद्रा सा परिगीयते वसुमती प्रीतिप्रदा यज्वनाम्।। 40 ।।

विमर्शिनी

या पुनरेवंभूता वसुमती भूमिः, सा भद्रा परिगीयते भद्रेत्यागमेषूच्यते। यज्वनां प्रीतिप्रदा इष्टदा। वारिनिधेः समुद्रस्य तीरं श्रिता आश्रिता। अथवा सरितो नद्यास्तीर्थस्य प्रसिद्धस्य तीर्थस्य तीरं श्रिता। दक्षिणे दक्षिणभागे। व्रीहिक्षेत्रविचित्रिता व्रीहिक्षेत्रेण संयुक्ता। आप्यदिशि पश्चिमभागे। यज्ञार्हाङ्घ्रिपैः पलाशादिभिर्यज्ञयोग्यैर्वृक्षैरङ्किता चिह्निता। पूर्णफलप्रसूनतरुभिः फलपुष्पपूर्णैर्वृक्षैः। कीर्णा सङ्कीर्णा। अपि वा उद्यानहृद्या उद्यानवद्धृद्या।। 40 ।।

विवरणम्

अथ सरितस्तीर्थस्य वेति। तीरं श्रितेत्यनुषङ्गः। यज्ञार्हा अङ्घ्रिपाः पलाशविकङ्कतादयो वृक्षाः। कीर्णा व्याप्ता।। 40 ।।

That particular land located on the shore of an ocean or on the banks of the river ghats, having paddy fields on the southern side and on the western side marked with the presence of trees which are of use in sacrificial purposes, studded with fruit bearing trees and those abounding in flowers as attractive as a garden is agreeable to the perceptors who are in charge of the rituals is termed as Bhadrā (the auspicious one). (40)

प्लक्षन्यग्रोधनिम्बार्जुनबकुलकुलस्थासनाशोकनिष्पा-
वाङ्कोलैर्मालतीचम्पकतिलखदिरैः कोद्रवैर्मुद्रिता वा।
भूमिर्या भूधराधीश्वरशिखरगता पार्श्वसंस्थाथवाद्रेः
पूर्णा सा पुष्टिदात्री सुरनिलयसमाकल्पने स्वल्पतोया।। 41 ।।

विमर्शिनी

या च पुनरेवंभूता भूमिः सा पूर्णा स्यात्। सुरनिलयसमाकल्पने देवालयनिर्माणे। पुष्टिदात्री धनधान्यप्रदानशीला। प्लक्षन्यग्रोधनिम्बार्जुनवकुलकुलस्थासनाशोकनिष्पावाङ्कोलैः एतैर्मुद्रिता अङ्किता वा। मालतीचम्पकतिलखदिरैः कोद्रवैर्वा एतैर्वा। भूधराधीश्वरशिखरगता भूधराधीश्वरः पर्वतश्रेष्ठः तस्योर्ध्वभागस्था वा। अथवा अद्रेः पर्वतस्य पार्श्वस्थिता वा। स्वल्पतोया सुतरामल्पं तोयं यत्र सा।। 41 ।।

विवरणम्

मुद्रिता अङ्किता।। 41 ।।

That particular land abounding in vegetation like Plakṣa (Ficus Venosa) Nyagrodha (Ficus Indica) Nimba (Melia azadirachta) Arjuna (Pentaptera arjuna) Bakula (mi musops elengi), Kulastha (Horse gram or Dolichos uniflorus), Asana (Pterocarpus maisupium or santalinus), Aśoka (Jonesia Asoca) Niṣpāva (cajanus Indicus), Ankola (Alangium hexapetalum) Malati

(Jasminum grandi florum) Campaka (Michetia Champaca) Tila (Sesamum Indicum), Khadira (Mimosa Catechu), Kodrava (Paspalum Scrobiculatum) and located on the top of a hill or on the slopes of a mountain which is prosperous with less water is extremely suitable for the construction of a temple for the installation of God. Such a land is termed as Pūrṇa. (41)

अर्कैर्वेणुविभीतकैः स्नुहियुतैः श्लेष्मातकैः पीलुभिः
संकीर्णा बहुशर्करा च कठिना गर्भान्विता सोषरा।
गृध्रश्येनवराहवायसशिवाशाखामृगैः सन्ततं
जुष्टा यष्टुरनिष्टदा निगदिता धूम्रा मही सूरिभिः।। 42।।

विमर्शिनी

या तु पुनरेवंभूता मही, सा सूरिभिर्विद्वद्‌भिः धूम्रा निगदिता उक्ता। यष्टुः यजमानस्यानिष्टदा दुःखदा। अर्कैः सङ्कीर्णा। वेणुविभीतकैः वेणुभिर्विभीतकैश्च। स्नुहियुतैः श्लेष्मातकैः पीलुभिः एतैर्वा। बहुशर्करा व बह्व्यः शर्करा यत्र सा। कठिना कर्कशा। गर्भान्विता गुहायुक्ता। सोषरा ऊषरयुक्ता। गृध्रश्येनवराहवायसशिवाशाखामृगैः एभिः सन्ततं सदा जुष्य सेविता। एवंभूता मही वर्ज्येत्यर्थः।। 42।।

विवरणम्

शिवा गोमायवः। शाखामृगा वानरा इति।। 42।।

That land abounding in plants like Arka (calotropis gigantea) Veṇu (bamboo) Vibhītaka (Terminalia obekllerica) Snuhi (milkhedge plant, cactus ficus Indica), Śleṣmātaka (Cordia Latifolia). Pīlu (careya arborea) and sprinkled with much pebbles, hard, having cavities, barren and frequented by birds and animals such as Gṛdhra (vulture) śyena (falcon) Varāha (hog) Vāyasa (crow) Śivā (jackal) and Śākhā-mṛga (monkey) is termed as Dhūmra by the wise ones and it is not congenial to the institutor or the patron of the construction. (42)

आचार्योऽथ यथोचितां वसुमतीं लब्ध्वा निशायां समि-
ष्टात्माभ्यर्च्य गणेशमस्त्रमनुनाराध्य स्वधित्यादिकम्।
प्राकारावधिकां प्रकल्प्य परितस्तां देवताभ्योणुना
मध्येऽष्टासु च भूतकूरहविषा दिक्षु प्रदद्याद् बलिम्।। 43।।

विमर्शिनी

एवं भूलक्षणं भूपरीक्षाविधानं चोक्त्वा भूपरिग्रहविधानमाह—आचार्य इति। अथशब्द आरम्भार्थः। अथ आचार्यः यथोचितां यथायोग्याम्। वसुमतीं प्रशस्तां भूमिं लब्ध्वा। निशायां रात्रौ क्वचित् प्रदेश उपविश्य। समिष्यत्मा शङ्खपूरणानन्तरमात्मानमिष्ट्वा। गणेशं गुरुगणेशदीपानभ्यर्च्य अग्रतः स्वस्तिकस्थं स्वधित्यादिकं खड्गपरश्वादिकम्। अस्त्रमनुना स्वस्वास्त्रमन्त्रेण आराध्य। प्राकारावधिकां महामर्यादा-प्राकारावसानभूतां तां भूमिं प्रकल्प्य। देवताभ्योणुना 'देवताभ्य' इति मन्त्रेण। मध्ये भूप्रदेशस्य मध्ये। परितोऽष्यसु दिक्षु च। भूतकूरहविषा भूतकुरयुक्तेन हविषा। बलिं प्रदद्यात्।। 43।।

विवरणम्

एवं परिग्राह्यां भुवमुक्त्वेदानीं तत्परिशोधनप्रकारमाह–आचार्योऽथेति। वसुमती भूमिः लब्ध्वेति। प्रतिष्ठोचिततयावरोधो लाभः। यद्वा तत्र प्रवेशसमये सकृद्भाविप्राकारसीमपर्यन्ते प्रदक्षिणेन तस्याः परिग्रहो लाभः। निशायां बलिं प्रदद्यादिति सम्बन्धः। समिष्ट्वेति। आत्मनः सकलीकरणादिकमुक्तम्। स्नानाद्यर्थसिद्धम्। दृष्ट्यादिपरिमिते आयतने नैर्ऋतोद्देशे क्लृप्ते स्थण्डिले उपविश्यैतत्सकलीकरणादि कार्यम्। स्वधित्यादिकमिति वृक्षशिलागुल्मादिशोधनौपयिकशस्त्राणां ग्रहणम्। तेषामस्त्रप्रोक्षणशोषणादि सर्वमप्यर्थसिद्धम्। तां परितः प्राकारावधिकां प्रकल्प्येत्यन्वयः। तां वसुमतीं दृष्टिपरिमित्या वंश्यादिपरिमित्या वा कथंचिदवधारणमिह कल्पनम्। देवताभ्योणुनेति। 'देवताभ्यः पितृभ्योऽथे'त्यनेन मन्त्रेणेत्यर्थः। भूतकूरहविषेति। वक्ष्यति च–'हारिद्रं दधिलाजसक्तुपललाढ्यं भूतकूराह्वयम्" इति बलिप्रक्रियोत्सवे द्रष्टव्या। प्रवेशबलिरयं भवति।। 43।।

Once the preceptor has fixed the location (for the shrine) and taken possession of it, he shall at night occupy a seat and worship Gaṇeśa using the Astramantra of the God, place articles such as sword, axe etc., to effect the constructions. Then he may fix the plot according to specific measurement and establish the compound wall. Thereafter he shall offer oblations consisting of specific articles to the deities of eight regions chanting a particular mantra beginning with "devatābhyaḥ" etc. (43)

देवताभायः पितृभ्योऽथ भूतेभ्यः सह जङ्गमैः।
एतत्स्थाननिवासिभ्यः प्रयच्छामि बलिं नमः।। 44।।

विमर्शिनी

बलिमन्त्रं पठति–देवताभ्य इति।। 44।।

To the deities, manes, devils which frequent the region and occupy the same I am offering these oblations with salutations. (44)

[1]आचम्य सम्यक् सकलीकृतात्मा
कृतात्मरक्षो रचिताञ्जलिः सन्।
मध्ये स्थितस्तत्स्[2]थतभूतजातं
प्रवासयेतेति निवेदयंस्त्रिः।। 45।।

विमर्शिनी

अथ आचम्य सकलीकृतात्मा सम्यक् कृतात्मरक्षः कृता आत्मरक्षा येन सः। मध्ये स्थितस्तिष्ठन्। रचिताञ्जलिः सन् भूत्वा। इति वक्ष्यमाणमन्त्रेण। त्रिः त्रिशः निवेदयन्। तत्स्थितभूतजातं भूतसमूहम्। प्रवासयेत वियोजयेत।। 45।।

---

1. 'आचम्य मन्त्री' इति विवरणरीत्या पाठः प्रतिभाति।
2. 'त्कृतवासभूतप्रवासनायेति निवेदयेत् त्रिः इति मूलकोशपाठः

विवरणम्

मन्त्रीति प्रतिष्ठापनीयदेवमन्त्राभिज्ञत्वमुक्तम्। कृतात्मरक्ष इति सुदर्शनाद्युदितास्त्र मन्त्रन्यासज़पभावनातालत्रयादिभिरात्मरक्षणमुक्तम्। तत्स्थितभूतजातमिति। त्रिर्निवेदयन् प्रवासयेतेति योजना। इतिशब्दो वक्ष्यमाणमन्त्राभिप्रायः। त्रिरिति मन्दमध्यमताराभिप्रायम्। प्रवासयेतेति। मन्त्रान्तरे पुष्पेणोद्वासनमुद्रया आकाशे समुद्वासनमभिप्रेतम्। यद्वा पुनरस्त्रेणोद्वासनमिष्यते। यदुक्तम्–

इत्यनुज्ञाप्य भूतादीन् पुष्पमस्त्रेण खे क्षिपेदि"ति।। 45।।

The preceptor purifying himself by washing and sipping water and having taken steps for his self protection shall with folded hands occupy the middle of the ground and beseech the group of deities and send them away from the plot. (45)

भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन।
ते सर्वे व्यपगच्छन्तु स्थानं कुर्यामहं हरेः।। 46।। इति।।

विमर्शिनी

प्रार्थनामन्त्रं पठति–भूतानीति।। 46।।

"Spirits or demons, whoever occupy the place, let them all go away from the place which I am making an abode of Hari" (46)

यद्यदर्थमिह गृह्यते मही तत्पदं हरिपदेऽत्र योजयेत्।
स्कन्दभूतपतिसुम्भजित्सु येयेत्रदेवपदपूर्वतोऽर्थयेत्।। 47।।

विमर्शिनी

इह यद्यदर्थं यस्य यस्य देवस्य कृते। मही गृह्यते। अत्र मन्त्रे। हरिपदे हरेरिति पदे। तत्पदं तस्य तस्य देवस्य नाम योजयेत्। स्थानं कुर्यां कपर्दिनः, स्थानं कुर्यां हरीशयोः, स्थानं कुर्यां गणेशितुः इति योजयेदित्यर्थः। स्कन्दभूतपतिसुम्भजित्सु स्कन्दे शास्तरि दुर्गायां च। क्रमेण येयेत्रदेवपदपूर्वतः येपदपूर्वो येत्रपदपूर्वा देवपदपूर्वश्च, येयेत्रदेवपदपूर्वाः तैस्तैः। अर्थयेत् प्रार्थयेत्।। 47।।

विवरणम्

अत्र हरिपद इति। युक्तितः ज्ञेयम्। यथा–स्थानं कुर्यां हरीशयोरित्यादि। येयेत्रदेवपदपूर्वत इति त्रयाणां प्रतीकग्रहणम्।। 47।।

The word Hari in this mantra may be replaced by the name of the deity for whose installation land is procured. Thus the deities like Skanda, Bhūtapati (Śāstā) and Sumbhajid (Durgā) may be replaced with the adjecvtive of god while this appeal is made. (47)

ये वसन्ति वने त्वत्र क्रूताः प्रेताश्च राक्षसाः।
कूश्माण्डाश्च पिशाचाश्च वेताला ब्रह्मराक्षसाः।। 48।।

निर्गच्छस्त्वन्यत; शीघ्रमितः क्रूराः सुखं पुनः।
भवनं कुर्महे त्वत्र गुहस्य परमात्मनः।।49।।

येऽत्राशुभकराः सन्ति भूतवेतालराक्षसाः।
व्यपगच्छन्तु ते शास्तुः कुर्महे भवनं त्विह।।50।।

देवदानवगन्धर्वपिशाचाश्चापि राक्षसाः।
नागाः सर्पास्तथा कीटा येऽत्र तिष्ठन्ति जन्तवः।।51।।

ते सर्वेऽन्ये च जानन्तु प्रयान्त्वस्माद् यथासुखम्।
देव्यर्थं प्रतिगृह्णामि सास्माकं क्षम्यतामिति।।52।।

विमर्शिनी

प्रार्थनामन्त्रान् पठति–ये वसन्तीत्यादि।। 48–52।।

विवरणम्

तानेव क्रमेणाह–ये वसन्तीति। क्षम्यतामितीति। अत्रेतिशब्दो मन्त्रपरिसमाप्त्यर्थ एव। वृत्तानुरुरुत्सायां क्षम्यतामपीत्येवमेषणीयम्।। 48–52।।

Whoever occupies this forest region including spirits, manes, demons, Kūṣmāṇḍas (a class of demons) Piśācas (an yellow demon) Vetālas (Goblins) and Brahmarākṣasas (a class of evil demons (may go away from the place). (48)

From here let the cruel ones go away in all haste from the place so that I may construct a happy abode for Guha (Skanda) the supreme soul. (49)

Whoever inauspicious spirts like manes, goblins or demons are here, they may go away from this place where an abode of Śāstā is intended to be set up. (50)

Gods, Dānavas (Asuras), Gandharvas, Piśācas or Rakṣas, serpents and worms and such other beings (are here they may go away). (51)

Let all those mentioned here may go away with peace, for this land is procured for the abode of the goddess and hence they may excuse me for the act. (52)

तद्वृक्षगुल्मादिकमिष्टशस्त्रै-
रुच्छिद्य संशोध्य निजास्त्रजापी।
क्षमां क्षमीकृत्य दिशश्च सम्यग्
ज्ञात्वेष्टयुक्त्या प्रमिमीत चैनाम्।। 53।।

विमर्शिनी

ततो निजास्त्रजापी स्वस्वास्त्रमन्त्रं जपन्। इष्टशस्त्रैः पूजितैः खड्गादिभिः। तद्वृक्षगुल्मादिकं

तत्रत्यवृक्षवनग[1]ह्वरादिकम्। उच्छिद्य संशोध्य। क्षमां क्षमीकृत्य समीकृत्य। दिशः सम्यक् शङ्कुस्थापनपूर्वकं ज्ञात्वा। एनां भूमिम्। इष्ट्युक्त्या स्वेच्छायोगेन। प्रमिमीत मानं कुर्यात्।। 53।।

विवरणम्

इष्टशस्त्रैरिति। यूजितैः स्वधित्यादिभिः। उच्छिद्येत्युपरिच्छेदनं समूलोन्मूलनमप्युक्तम्। संशोध्येति। विषमप्रस्तरादिपरि[2]हीणत्वमुक्तम्। तृणादि संशोधनं तु कर्षणे कृत एव वा स्यात्। यद्वा संशोध्येति कर्षणादिशोधनमप्युक्तम्। यदुक्तम्–

शतशः कर्षयित्वा च गोकुलं तत्र वासयेत्।
ततो वर्षोषितां कृत्वा तिलादीन्यत्र वापयेत्।।
यदा सस्येषु पुष्पाणि फलान्यपि भवन्ति हि।
तदा कृष्टा पुनर्भूमिः शुद्धिमृच्छत्यसंशयम्।।

इति। क्षमां क्षमीकृत्येति। तां भुवं देवायतनयोग्यां कृत्वेत्यर्थः। भूमेर्ऋजुकरणांद्यभिप्रायमेतत्। दिशश्च सस्याग्विज्ञायेति। तत्र समतले शङ्कुन्यासादिभिर्दिगवधारणं तत्स्थैर्यसिद्धये जगति क्षेत्रबाह्यतः शिलासु तद्दिग्रेखोत्किरणं चोक्तम्। शङ्कुन्यासस्तु कर्मशेषे वक्ष्यते। एनामिष्टयुक्त्या प्रमिमीत चेति। बिम्बजन्यस्वतन्त्रो वा प्रासादः। तदीयदण्डेन प्राकारपर्यन्ता भूमिः प्रमातव्या। ततश्च बिम्बस्य प्रासादस्य वा स्वेष्टमानकल्प्यत्वम्। तदुपपत्त्या व भूमिमानमिति। सर्वं चैतद् द्वितीयपटले वक्ष्यते।। 53।।

Hence the trees, crecper etc,. may be cut off using suitable weapons which are purified all the while chanting appropriate mantras. Thereafter the ground may be cleared and made flat as also the different regions before measuring them with appropriate designs. (53)

पुन्नामैकतरूद्भवान् करमितांस्तत्पादनाहान् दृढान्
शङ्कून् प्राग्वदनोऽस्त्रमन्त्रमहितान् मध्यादिशर्वान्तिमम्।
कृत्वा कल्पितसालसीम्नि परितः शङ्कुद्विसंवेष्टितं
स्वास्त्रेण प्रविसार्य सूत्रमपि गृह्णातु क्षितिं सर्वतः।। 54।।

विमर्शिनी

पुनः सर्वतः सर्वदेवेषु। प्राग्वदनः प्राङ्मुखो भूत्वा। मध्यादिशर्वान्तिमं मध्ये पूर्वाद्यष्टदिक्षु च। पुन्नामैकतरूद्भवान् एकस्मादेव तरोर्वृक्षादुद्भवान्। करमितान् करपरिमितदीर्घान्। तत्पादनाहान् षडङ्गुलपरिधियुक्तान्। अस्त्रमन्त्रमहितान् पूर्वमेवास्त्रमन्त्रेण पूजितान्। दृढान् शङ्कून् स्वास्त्रेण कृत्वा स्थापयित्वा। परितः कल्पितसालसीम्नि कल्पितप्राकारावधौ। सूत्रमपि त्रिगुणितं सूत्रम्। शङ्कुद्विसंवेष्टितं शङ्कौ शङ्कौ द्विद्विसंवेष्टितं यथा भवति तथा। स्वास्त्रेण प्रविसार्य अविच्छिन्नं प्रसार्य। क्षितिं गृह्णातु परिगृह्णीयात्।। 54।।

---

1. 'शबरा',
2. 'रिहरणमु' ग. पाठः

विवरणम्

एवं भूसंस्कारमुक्त्वेदानीं तत्परिग्रहमाचष्टे–पून्नामैकतरूद्भवानिति। पून्नागनागादयः पुन्नामानस्तरवः। न द्विवृक्षजा बहुवृक्षजा वैते शङ्क्वादयः स्युरित्येकग्रहणम्। करमितान् हस्तमात्रायतान्। तत्पादनाहस्तेषां परिणाहः। नाहग्रहणाद् वृत्तत्वमपि लभ्यते। तदनभिधानं तु चतुरश्रविकल्पनार्थम्। यदुक्तम्–

अधोमूलोर्ध्वशाखास्तु चतुरश्राश्च वर्तुला

इति। तन्निशायामेव चेद् एवं स्यात्। दिनान्तरे तु चेत् स्नानसकलीकरणाद्यपि प्राग्वत् कार्यमेव। अग्रतो दर्भसंस्तरे शङ्कून् मुद्गरं त्रिगुणसूत्रं च संसाद्यास्त्रप्रोक्षणशोषणादि– पूर्वकमस्त्रार्चनादिभिर्मन्त्रणं कार्यम्। प्राग्वदनः प्राङ्मुखः। प्राग्वाद्यवादनमप्यनेनोक्तम्। यद्वा वदति शङ्कुताडनतः शब्दं करोतीति वदनो लोहमुद्गरः। प्राङ्मुखतया वदनो यस्येति समासः। मध्यादिशर्वान्तिममिति। प्रासादमध्योद्देशे पूर्वकल्पितप्राकारसीमनि तु पूर्वाद्यष्टदिक्षु चेति भावः। पूर्वादिशर्वान्तिममिति वा पाठः। [1]मित्त्वेति भूमावग्रप्रवेशनेन स्थापयित्वेत्यर्थः। मुद्गरेणाष्टधा ताडनेन कार्यमेतत्। सुलग्ने चैतदिष्यते। तदुक्तम्– "भूपरिग्रहार्थं कर्षणार्थं खननार्थं प्रथमेष्टकार्थं गर्भाधानार्थं प्रतिमाद्रव्यसङ्ग्रहार्थं देवप्रतिष्ठापनार्थम्" इति। स्वास्त्रेणेति सर्वत्र सम्बध्यते। शङ्कुद्विसंवेष्टितं सूत्रमपि प्रसार्येति। सूत्राग्रं मध्यशङ्कौ प्राच्यशङ्कौ वा द्विगुणपरिवेष्टनेन बद्ध्वाग्निकोणान्तं प्रसार्य आग्नेयशङ्कौ द्विगुणपरिवेष्टनेन बद्ध्वेत्यादि बोद्धव्यम्। सर्वत्रान्ततस्तालत्रयादि कार्यमिति सामान्यसिद्धम्। गृह्णातु क्षितिं सर्वत इति। एवमुक्तो भूपरिग्रह इत्यर्थः। यद्वा भूपरिग्रहबुद्ध्या सकृत् प्रदक्षिणकरणमनेनोक्तम्।। 54।।

Spikes may be shaped out of the Punnāga (calophyllum mophyllum) tree with a round shape. The preceptor shall sit facing the east after purifying himself. From the center of the plot he may after sanctifying (all the nine) the spikes they may be planted in all the eight quarters before fixing the cords connecting them to form the exact plot. (54)

आचार्यो मनुभावितोऽह्नि सुशुभे लग्ने वृषाभ्यां मिथ–
स्तुल्याभ्यामसनाहिजैर्हलयुगाद्यैर्दर्भमालासितैः ।
प्रागास्यो मिहिरार्णतस्त्रिरथवा कृष्ट्वा क्षितिं पञ्चधा
मुद्गादीनि समुप्य मूलमनुना सिञ्चेज्जितन्ताणुना।। 55।।

विमर्शिनी

एवं भूमिं परिगृह्यापरस्मिन् मुहूर्ते तस्याः संस्कारं कुर्यादिति वदन् पूर्वं विष्णौ विशेषमाह–आचार्य इति। आचार्यः सुशुभेऽह्नि सुशुभे लग्ने राशौ। मनुभावितः सकलीकरणात्माराधनकृद् भूत्वा। असनादिजैः असनवृक्षादिकृतैः। हलयुगाद्यैः हलयुगयष्ट्यादिभिः। दर्भमालासितैः दर्भपाशेन बद्धैः उपलक्षिताभ्यां मिथः अन्योन्यं तुल्याभ्यां वृषाभ्याम्। प्रागास्यः प्राङ्मुखो भूत्वा। मिहिरार्णतो द्वादशाक्षरं जपन्। त्रिः त्रिधा अथवा पञ्चधा क्षितिं कृष्ट्वा। 'कृषि लेखन' इति धातुः। मुद्गादीनि बीजानि मूलमनुना समुप्य वपनं कृत्वा। जितन्ताणुना सिञ्चेत्।। 55।।

---

1. कृत्वेत्यस्य स्थाने भित्वेति विवरणपाठः। (मित्र् प्रक्षेपणे)

विवरणम्

प्राक्परिग्रहाभावे चैतत् कर्षणं प्रस्तौति–[1]स्नातो गुरुरिति। स्नात्वा गुरुरिति वा पठनीयम्। मन्त्रविदिति। वृषादिपूजने प्रणवो योजने मूलं यष्ट्या ताडने फडन्तप्रणव इत्यादि सर्वं विद्वानित्यर्थः। अञ्चितात्मेति स्नानादिपूर्वकं सकलीकरणादिकमुक्तम्। तत्र पश्चिमत उपविश्यैतत्सर्वं कार्यम्। संस्कृत्येति क्षालनपूर्वकमस्त्रप्रोक्षणादिकमुक्तम्। सुतुल्याविति। मिथः सुसदृशौ वर्णतो यजमानस्य सुसदृशौ।

"श्वेतौ रक्तौ च कपिलौ कृष्णौ जात्यनडुत्क्रमात्"

इति। अयुक्तपूर्वौ पूर्वमन्यत्र वाहनकर्षणादावयोजितौ। असनादिक्लृप्तं हलादीति। सामान्यतोऽ-सनाश्वत्थवटादिकृतम्। वर्णवशात्तु पलाशादिकृतम्।। यदुक्तम्–

हलं युगं व पालाशं ब्राह्मणस्य विधीयते।
न्यग्रोधं क्षत्रियस्य स्यात् प्लाक्षं विट्शूद्रयोर्भवेत्।।

इति। आदिशदेन युगशम्यालाङ्गलयष्टिग्रहणम्। मुद्गादि बीजजातमिति मुद्गतिलसर्षपग्रहणं, सर्वधान्याभिप्रायं वा। वक्ष्यति च–सर्वौषधानि यवमाषेत्यादि- सप्तधान्यानि निजनिजबीजवापोक्तानि वा ग्राह्याणि। चकारः संस्कृत्येत्येतदनुकर्षणार्थः।।

बद्ध्वेति। तयोरुक्ष्णोर्युगहलाद्यं दर्भमालाभिर्बद्ध्वेत्यन्वयः। अलङ्कृतयोरिति। हिरण्मयशृङ्गखुरादि-भिर्गन्धमाल्यादिभिश्च शक्तितोऽलङ्करणमुक्तम्। योगविदिति। युगहलादियोजनाभिज्ञत्वमुक्तम्। वाद्यप्रयोगविदिति वार्थः। यद्वा योगो ध्यानविशेषः। यदुक्तम्–'भूसरोजे च मां ध्यायेद्' इति। तं देवं ध्यायेदिति च तदर्थः। पश्चिमतस्तिष्ठंस्ततः प्रागास्यस्त्रिः कृष्ट्वेत्यन्वयः। प्रागवधि सकृत्कर्षणं कृत्वा पुनः प्रादक्षिण्येन कृषन् पश्चादवधि गत्वा पुनर्द्वितीयं प्रागवधि कृषेदित्यादि बोद्धव्यम्। तदुक्तम्–

"त्रिपञ्चसप्तमार्गेण कर्षयेच्च प्रदक्षिणम्"

इति। स्थलविस्तारापेक्षया सङ्ख्याधिक्यम्।

"पञ्चधा दशधा चापि कर्षयेल्लाङ्गलेन तु।"

इति च। यावदन्तं मण्डलमिष्यते तावदवश्यं कर्षणीयम्। पुनर्दक्षिणतोऽपि प्रक्रम्य तथोदगवधि प्रादक्षिण्येन कर्षणम्। यदाह–'प्राङ्मुखो वाप्युदङ्मुखः कर्षयेदि'ति। सुलग्न इति।

---

1. 'आचार्यो' इत्येतत्पद्यस्थाने
स्नातो गुरुर्मन्त्रविदञ्चितात्मा शुभेऽह्नि संस्कृत्य वृषौ सुतुल्यो।
अयुक्तपूर्वावसनादिक्लृप्तं हलादि मुद्गादि च बीजजातम्।।
बद्ध्वालङ्कृतयोर्नवं युगहलाद्युक्ष्णोस्तयोर्योगवित्
तिष्ठन् पश्चिमतोऽत्र दर्भमयमालाभिः सुलग्ने ततः।
प्रागास्यो मिहिरार्णतस्त्रिरथवा कृष्ट्वा क्षितिं पञ्चधा
बीजानीह समुप्य मूलमनुना सिञ्चेज्जितन्ताणुना।।
इति श्लोकद्वयपाठमवलम्ब्य प्रवृत्तं विवरणव्याख्यानम्। अमुमेव पाठमङ्गीकृत्य गर्तवनस्थ (Kuzhikkāṭṭu) तन्त्रसमुच्चयकेरलभाषाव्याख्यापि प्रवृत्ता। परन्तु पूर्वस्मिन् पद्ये 'स्नातो गुरुः' इत्यस्य 'ततो मुरु' इति 'वृषौ सुतुल्यो' इत्यस्य 'वृषौ तु तुल्यौ' इति चादृतः पाठभेदः।

गोहिरण्यादिदानमपीष्यते। कर्षणे कृते तदायतनेऽस्त्रप्रोक्षणमप्युचितम्। इहेति। कृष्यायां भूमौ। जितन्ताणुना सिञ्चेदिति। तत्र यावदर्थमालवालान् विधाय जितन्तेन सेचनं कार्यम्। ततः प्रतिदिनं यावत्फलनिष्पत्ति सेचनमपि कार्यम्।। 55।।

The preceptor after purifying himself with mantras shall on an auspicious day and time plough the land using two bulls of the same height and yoked to the plough head made up of Asana tree and decorated with the garland of Darbha grass. Facing east he shall pough land in three or five different directions chanting (the hymn having twelve syllables and the seeds of Mudga (a kind of kidney bean) and similar ones chanting the mūlamantra (the basic hymn) and then pour water in the gound chanting the Mantras "jitam te" etc. (55)

चक्रेण संरक्ष्य फलान्वितानि
गोब्रह्मसात्कृत्य च गा निवास्य।
क्ष्मां साधयेदित्यजिते विधिः स्यात्
तदन्यदेवेषु भिदां वदामि।। 56।।

विमर्शिनी

चक्रेण सुदर्शनमन्त्रेण। संरक्ष्य वृतिं कृत्वा। फलान्वितानि फलिते सति तानि बीजानि। गोब्रह्मसात्कृत्य। 'विभाषा साति कार्त्स्न्ये' (5-4-52) इति सातिप्रत्ययः। गोभ्यो ब्राह्मणेभ्यश्च दत्त्वा। गाश्च निवास्य तत्र गवां निवासं कृत्वा। क्ष्मां साधयेत्। एवं कृते सति क्ष्मा साधिता भवतीत्यर्थः। इत्यजिते विष्णौ विधिः स्यात्। तदन्यदेवेषु भिदां भेदं वदामि।। 56।।

विवरणम्

चक्रेण संरक्ष्येति। समन्ताद् वृतिकल्पनं तालत्रयादिकं चोक्तम्। फलान्वितानि गोब्रह्मसात्कृत्येति। तानि बीजानि उत्पन्नानि फलान्वितानि गोभ्योऽर्ध्वं ब्राह्मणेभ्यश्चार्धं विभज्य दद्यादित्यर्थः। तदधीनवचने सातिः। मूलमेव मन्त्रः। गा निवास्येति। एकदिनं त्रिदिनं वा तत्र गोकुलवास उक्तः। सम्भवे ब्राह्मणभोजनमपीष्यते।। 56।।

56. Once the seeds are germinated they may be protected by the chant of cakra (the Sudarśana) Mantra and thereafter be presented to cattles and Brāhmins. Cattles may be made to occupy the land. This is the prescription in the case of Ajita (Viṣṇu) and the difference with regard to other deities shall be narrated by me. (56)

सद्यवामबहुरूपशिवास्यैः कर्षबीजवपनोक्षणरक्षाः।
स्पर्शनं च गिरिशे निजमूलेनाखिलं तदितरेषु विदध्यात्।। 57।।

हरीशेऽपि गिरीशोक्तक्रमाद् गुह्याणुभिर्निजैः।
कर्षणादिक्रियाः पञ्च कुर्यान्मूलेन वा गुरुः।। 58।।

विमर्शिनी

गिरिशे शिवे। सद्यवामबहुरूपशिवास्यैः सद्योजातवामदेवाघोरेशानतत्पुरुषसूक्तैः। कर्षबीजवपनोक्षणरक्षाः कर्षणं बीजवपनमुक्षणं रक्षणं च। स्पर्शनं च। 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनमि'त्यमरः। दानं विदध्यात् कुर्यात्। तदितरेषु देवेषु। तदखिलं कर्म। निजमूलेन स्वस्वमूलमन्त्रेण विदध्यात्।। 57।।

गुरुः विशेषे[1]ण ज्ञातुं शक्तः। हरीशेऽपि निजैर्गुह्याणुभिः पञ्चतत्त्वैः। गिरिशोक्तक्रमात् शिवोक्तमार्गेण। प्रातिलोम्याच्चतुर्थेन दानमित्यभिप्रायः। कर्षणादिपञ्चक्रियाः कुर्याद्, मूलेन वा सर्वमूलमन्त्रेण वा।। 58।।

विवरणम्

बहुरूपोऽघोरः। शिवः ईशानः। आस्यं तत्पुरुषः उक्षणं सेचनम्। स्पर्शनं गोब्राह्मणेभ्यो दानम्।। 57।।

गुह्याणुभिरिति स्वपञ्चतत्त्वग्रहणम्। गिरीशोक्तक्रमादिति। अन्त्यतुर्य मध्यमाद्याद्वितीयक्रमेणेत्यर्थः। यद्वा शिवोक्तं ब्रह्मणां क्रममप्यनुरुध्येति। सद्योजातादितत्तद्ब्रह्मयोगोऽपि गुह्यमन्त्राणामुक्तः।। 58।।

In the case of Śiva the ploughing act may be performed with the chanting of Sadyojāta hymn, sowing be made with the chant of Vāmadeva, hymn watering may be made with the chant of Aghora hymn and protection be made with the use of Īśāna hymn and presentation of the fruits be made with the chanting of Tatpuruṣa hymn. In the case of other Gods hymns relating to each of them are to be employed. (57)

The preceptor shall perform all the five acts beginning with ploughing in the case of Harīśa (Śaṅkaranārāyaṇa) as detailed with regard to Siva. Specific hymns relating to them may be used or with the use of the Mūlamantra relating to them. (58)

खात्वा क्षितिं तां षुरुषप्रमाणं जलान्तमश्मावधि वा सुलग्ने।
पादोनमापूर्य विशुद्धवेद्यां रात्रौ यजेद् दिश्यथ वास्तुमैश्याम्।। 59।।

विमर्शिनी

अथ सुलग्ने शोभने मुहूर्तान्तरे। तां क्षितिं पुरुषप्रमाणं जलान्तमश्मावधि वा खात्वा पादोनं यथा तथा आपूर्य। विशुद्धवेद्यां मार्जनालेपनादिभिः विशुद्धायां वेद्याम्। ऐश्यां दिशि रात्रौ वास्तुं यजेत्।। 59।।

विवरणम्

एवमायतनभूमेर्बाह्यं संत्कारमुक्त्वा आन्तरं संस्कारमाह–खात्वेति। तां क्षितिं सुलग्ने पुरुषप्रमाणं खात्वा पादोनमापूर्याथ रात्रावैश्यां दिशि विशुद्धवेद्यां वास्तुं यजेदित्यन्वयः। स्नानसकलीकरणादि सर्वं सामान्यसिद्धम्। अस्त्रेण तत्संस्कृतखनित्रेण खननमर्थाद् भवति। पुरुषप्रमाणमित्युद्बाहुकपुरुषमात्रम्। पुरुषग्रहणं तदवयवोपलक्षणम्। तदुक्तम्–

---

1. 'षं ज्ञा' ग. पाठः

खात्वा पुरुषमात्रं तु कण्ठहृन्मात्रमेव वा।
तन्नाभिजानुमात्रं वा जलाश्मान्तमथापि वा।।

इति। ब्राह्मणादिवर्णवशाद्वा मुखबाहूरुजानुमात्रं स्यात्। भूम्यन्तर्गतशल्यपरिहारार्थं प्रासादीयस्थलदृढीकरणार्थं चैतत् खननम्। अत एवैतत् प्रासादाभ्यधिकततं स्यात्। तदुक्तम्–

"प्रासादस्य तु विस्ताराद् द्विहस्ताधिकविस्तृतम्।।"

इति। भुवो दृढीभावोपपत्त्या पुरुषप्रमाणादिविकल्पः। स्वतो दृढे तु स्थले शिलाप्रस्तरसम्भवे च यावदर्थं खननं स्यात्। पादोनमापूर्येति। पुरुषप्रमाणविषयमेतत्। शेषेष्वेतन्मानतुल्यं पूरणम्। यद्वा पादोनमिति पादशब्देन पुरुषपादप्रमाणग्रहणम्। तच्च हस्तमात्रम्। यत उक्तं 'हस्तमात्रं खनेद् विप्रः' इति। पूरणक्लृप्तिं तु वक्ष्यति–गर्तंमृत्तिकयेत्यादि। विशुद्धवेद्यां पादोनमापूर्येत्यपि वा योजनीयम्। खातमूलस्थलीमस्त्र-प्रोक्षणेनास्त्रगव्यसेचनेन च विशोध्य तत्रास्त्रप्रोक्षितमृदादिभिरापूरणं कार्यम्। विशुद्धवेद्यामिति मार्जनालेपनाभ्यां मुष्ट्यादिभिर्वा स्थलशुद्धिरुक्ता। स्नानसकलीकरणादि सर्वं सामान्यसिद्धम्।। 59।।

Digging up the earth to the depth of a standard human form or till meeting with water or rock, on an auspicious day it should be filled up three fourth of the pit. Then at night (the preceptor) shall perform Vāstubali – the special rite to propitiate the spirts occupying the plot in its northern side. The altar should be sanctified properly. (59)

क्षेत्रे रन्ध्रंपुटे प्रकल्प्य नवकं मध्येऽस्य बाह्यावृतौ
षट्कं दिक्षु विदिक्षु युग्मयुगलं चैकैकशस्तद्बहिः।
तस्मिन्नर्पितदर्भके महितपीठे सादिवांवास्तुना
वास्तुं प्राक् पुरुषेण ङेनतिमता वामादिकाङ्गैर्यजेत्।। 60।।

विमर्शिनी

रन्ध्रपुटे आयामतो विस्तारतश्च दशभिः सूत्रपातैर्नवपुटं कृत्वा तत्र क्षेत्रे। मध्ये नवकं पदानां नवकं स्वस्तिकत्वेन प्रकल्प्य। अस्य नवकस्य। बाह्यावृतौ दिक्षु पदानां षट्कं, विदिक्षु युग्मयुगलंद्विकद्वयं, तत्राग्निवायुकोणयोः पूर्वापरायतमितरकोणयोर्दक्षिणोत्तरायतं च प्रकल्प्य। तद्बहिरेकैकशश्च पदानि प्रकल्प्य। अर्पितदर्भके दर्भान् विन्यस्य। तस्मिन् महितपीठे पूजित[1]पीठे। प्राक् प्रथमम्। सादिवांवास्तुना आदिवांवास्तुयुक्तेन। आदिः प्रणवः। ङेनतिमता चतुर्थ्येकवचननमोयुक्तेन। पुरुषेण पुरुष इति पदेन, 'ओं वां वास्तुपुरुषाय नमः' इति मन्त्रेण आवाह्य। वामादिकाङ्गैः वां हृदयाय नमः इत्याद्यङ्गैः सह वास्तुं यजेत्।। 60।।

विवरणम्

क्षेत्र इति वास्तुमण्डलकथनम्। सर्वतो नवपुटं क्षेत्रमास्फाल्य तत्र मध्यतो नवपदैरेकं पदं मार्जनतस्सम्पाद्य तत्र स्वस्तिकमष्टदलकमलं वा लिखेत्। ततश्चतुर्दिक्षु द्विद्विपुटगतेन षट्केनैकैकं पदं सम्पाद्यम्। कोणेषु द्विद्विपदतो द्वे द्वे पदे स्याताम्। ततः परितो बाह्यपङ्क्तौ चतुर्दिक्षु पदानि द्वात्रिंशद्

1. 'ते' क. ख. पाठः

भवन्ति। पुनरष्टदिक्षु शर्वस्कन्दादीनामेकैकं पदमुपजनयितव्यमिति। प्रकल्प्येत्यनेनैव रजोभिश्चित्री-करणमप्युक्तम्। पदानां महत्त्वे स्वस्तिकानि कार्याणि। अर्पितदर्भक इति। मुष्टिमात्रैर्दर्भैः प्रतिपदमास्तरणमुक्तम्। दर्भकशब्देन कूर्चोऽपि वा अभिप्रेयते। महितपीठ इति। दैव्येव पीठपूजा प्रासादपुरुषपीठोचितत्वात्। यद्वा महितपीठ इति महीं करोति महयति ततो निष्ठा महिते पीठे इति, तस्य पीठ एव पृथिव्यन्तं पीठं प्रपूज्य। तत्र वास्तुपुरुषं पूजयेदिति भावः। सादीति। प्राग्वास्तुं यजेदिति सम्बन्धः। यजेदित्यावाहनादिपूर्वकं पूजनमुक्तम्। सादिवांवास्तुनाङेनतिमता पुरुषेणेति वास्तुदशाक्षरोद्धारः। आदिः प्रणवः। ओं वां वास्तुपुरुषाय नमः इति मन्त्रः। वां वीं इत्यादीन्यङ्गानि। वामादिकाङ्गैरिति। सहेत्युपस्कारः।। 60।।

By spreading a thread ten times both lengthwise and in width to form (eighty one columns) nine by nine parts, keeping nine columns in the centre, and six in four quarters and four corners, a pair of two in Agni corner and Vāyu corner outside of which creating one each, the darbha grass may be spread. After worshipping the main portion, the preceptor shall chant a mantra beginning with 'Praṇava' and ending with a dative case to which 'namaḥ' is suffixed (thus the mantra "Om Vām Vāstupuruṣāya namaḥ' is got). After that Vāmādi meaning "vām hṛdayāya namaḥ" is chanted for the culmination of the Vāstuyāga. (60)

तत्सन्नमःप्रपुटितं निजनाम ङेन्तं
तारादिकं निजपदाङ्गकमर्कवर्णम्।
ब्राह्मं मनुं विदुरथ प्रणवप्रणाम-
पूर्वं स्वनाम रसवर्णकमक्षराङ्गम्।। 61।।

विमर्शिनी

ब्राह्मं मनुमुद्धरति–तत्सन्नम इति। तारादिकं प्रणवादिकं तत्सन्नमःप्रपुटितं तत्सन्नम इत्यनेन रुद्धम्। ङेन्तं चतुर्थ्येकवचनान्तम्। निजनाम ब्रह्मेति नाम 'ओं तत्सन्नमो ब्रह्मणे तत्सन्नमः' इति। अर्कवर्णं द्वादशाक्षरं ब्राह्मं मनुं विदुः। निजपदाङ्गकम् अस्य मन्त्रस्य निजपदानि अङ्गानि 'ओं हृदयाय नमः' 'तत्सत् शिरसे स्वाहा' इत्यादि। अथेति पक्षान्तरद्योतकमव्ययम्। प्रणवप्रणामपूर्वम् 'ओं नमः' इत्यादिकम्। स्वनाम ब्रह्मेति नाम। चतुर्थ्यन्तमित्यर्थात् सिद्धं भवति। 'ओं नमो ब्रह्मणे' इति। रसवर्णकं षडक्षरम् अक्षराङ्गम् अस्याक्षरैरङ्गानीत्यर्थः।। 61।।

विवरणम्

वास्तुद्वादशाक्षरमाह–तत्सदिति। तत् ङेन्तं निजनाम इति। वास्तुपुरुषायेत्येवं स्थितस्य पूर्वोक्तस्य नाम्नो ग्रहणम्। तारादिकमिति पुटनक्रियाविशेषणम्। 'ओं नमो वास्तुपुरुषाय ओं नम' इति मन्त्रः। निजपदाङ्गकमिति। षड्भिः पदैरङ्गान्युक्तानि। ब्राह्मं द्वादशाक्षरमप्यनेनैवोद्धृतम्। तत् सन्नमःप्रपुटितमित्येकं पदम्। निजनाम ब्रह्मपदम्। 'ओं तत्सन्नमो ब्रह्मणे तत्सन्नम' इति। निजपदाङ्गाकमिति। अत्र तत्सदित्येकमेव पदं द्रष्टव्यम्। रसवर्णं षड्क्षरम्। अक्षराङ्गमिति। अत्र पञ्चमवर्णेन नेत्रद्वयमस्त्रान्ते इष्यते।। 61।।

The mantra related to Brahmā is 'Om tat sannamo Brahmaṇe tat – sannamaḥ" This is the mantra with "arka varṇa", Meaning consisting of twelve syllables. With these syllables a six syllabled (rasavarṇaka) mantra with the prefix of 'om' is formed as "om hṛdayāya namaḥ" etc. Svanāma means the name of 'Brahmā'. (61)

तत्र वास्तुतनुक्लृप्तविष्टरेऽथार्यकादिवृतमात्मसम्भवम्।
सन्निधाप्य मनुनामुनोदितेनाङ्गषट्कसहितं समर्चयेत्।। 62।।

विमर्शिनी

एवं मन्त्रा[1]दिकमुक्त्वा ब्रह्मादीनां पूजामाह–तत्रेति। अथ वास्तुपूजानन्तरम्। वास्तुतनुक्लृप्तविष्टरे वास्तुतन्वा क्लृप्ते विष्टरे। आर्यकादिवृतम् आर्यकादिभिः परिवृतम्। आत्मसम्भवं ब्रह्माणम्। उदितेन उक्तेन। अमुना मनुना। सन्निधाप्य आवाहनादि कृत्वा, अङ्गषट्कसहितं यथा भवति तथार्चयेत्।। 62।।

विवरणम्

तत्र वास्तुतनुक्लृप्तविष्टर इति। वास्तुपुरुषस्य शरीरेणैव कल्पिते पीठे। तदेव ब्रह्मादिदेवतानां पीठमिति भावः। यद्वा वास्तुपुरुषशरीरेऽपि क्लृप्ते पीठे इति। तदुपरि ब्रह्मणः स्वकं धर्माधर्मादिरूपं पीठं पूजयेत्। अणिमादिसर्वसिद्ध्यन्ता नव शक्तयः। 'सर्वज्ञानक्रियाव्यक्तकमलासनाय योगपीठात्मने नम इति समष्टिमन्त्रः। आर्यकादीनां पद्ममात्रं पूजनीयम्। आत्मसम्भवं स्वाङ्गषट्कसहित-मार्यकादिवृतमिति सम्बन्धः। आत्मसम्भवो ब्रह्मा। स च स्रुक्स्रुवदण्डकमण्डलुधरो रक्तः प्रतिपत्तव्यः। सन्निधाप्येति मूर्त्तिकल्पनावाहनादिकमुक्तं स्वस्वमन्त्रेण। आर्यकादीनामाराधनमात्रेण सन्निधापनम्। उदितो मन्त्रो द्वादशाक्षरः षडक्षरो वा।। 62।।

In the altar formed by the limbs of Vāstu, using the previously mentioned mantras Brahmā should be invoked along with his six attendants (Ātma-Sambhava – Brahmā). (62)

आर्यकसावित्राख्यौ सविता सविवस्वदिन्द्रिय इन्द्रः।
मित्रो रुद्रजयाभिधरुद्रमहीधरयुतापवत्सापाः।। 63।।

विमर्शिनी

प्रस्तुतमार्यकादिकं पठति–**आर्यकसावित्राख्याविति**। आर्यकसावित्राख्यौ आर्यकः सावित्रश्च आर्यकाय नमः, सावित्राय नमः, सविता सवित्रे नम इत्यादि। सविवस्वदिन्द्रजयः विवस्वदिन्द्रजयाभ्यां सहितः। इन्द्रः मित्रः। रुद्रजयाभिधरुद्रमहीधरयुतापवत्सापाः रुद्रजयो रुद्रो महीधर आपवत्स आपश्च।। 63।।

विवरणम्

आर्यकसावित्राख्याविति। सविता सावित्र इति केचित्। सविवस्वदिन्द्रजय इति। विवस्वानिन्द्रजयश्च। आपवत्स आपश्च देवताद्वयम्।। 63।।

---

1. 'न्त्रानुक्त्वा' ग. पाठः

Āryaka, Sāvitra, Savitra, Vivasvat, Indrajaya, Indra, Mitra, Rudrajaya, Rudra, Mahīdhara, Āpavatsa and Āpa are invoked by giving their names in the dative case (to which namaḥ is added to form the mantra such as Āryakāya namaḥ etc). (63)

प्रागादीशान्तममी क्रमशः स्युरथापपूर्वयजनविधौ।
कोणगतद्वितयानां स्वक्षेत्राणां क्रमो विपर्येयः।। 64।।

विमर्शिनी

अमी प्रागादीशांत क्रमशः स्युः। अथेति पक्षान्तरद्योतको निपातः। आपपूर्वयजनविधौ बहिरारब्धपूजायाम्। कोणगतद्वितयानाम् आपवत्सापादीनां स्वक्षेत्राणां स्थानैः सहितानां क्रमो विपर्येयः व्यत्यसनीयः। अत्र नमोन्ताश्च मन्त्रा ग्राह्याः।। 64।।

विवरणम्

प्रागादीति। हरिमहिषनिहन्त्र्योरिति वक्ष्यमाणत्वात् तद्विषयमेतत्। क्रमशः स्युरिति। अत एवाग्नेयवायव्यद्विकानां प्रागायतत्वं नैर्ऋतैशानद्विकानामुदगायतत्वं च लभ्यते। अथापपूर्वयजनविधाविति। शिवादिविषयमेतत्। ऐशद्विकयोः पूर्वस्मिन्नापः पश्चिम आपवत्सः पूर्वपद आर्यक इत्यादि।। 64।।

These mantras (twelve in number) may be invoked from eastern direction upto Īśāna – north east corner in its order. If the invocation is to be on the outer side, lords located at two corners each may be invoked changing the sequence. (64)

ईशानः पर्जन्यो जयन्त इन्द्रः ससूर्यसत्यभृशः।
भूयोऽन्तरिक्षवह्नी पूषा वितथो गृहक्षतोऽथ यमः।। 65।।

विमर्शिनी

ईशानः पर्जन्यः जयन्तः इन्द्रः। ससूर्यसत्यभृशः सूर्यः सत्यो भृशश्च। भूयः पुनः। अन्तरिक्षवह्नी अन्तरिक्षो वह्निश्च, अग्नये नमः इति। पूषा वितथः गृहक्षतः अथ यमः यमश्च।। 65।।

विवरणम्

ईशान इति। अत्र ईशानाग्निपितृवाय्वादयोऽग्न्यादिकोणपदमारभ्य प्रतिदिशमष्टाष्ट स्युः। गृहक्षतो गृहरक्षको वा।। 65।।

(Deities on the outer circle are) Īśāna, Parjanya, Jayanta, Indra, Sūrya, Satyaka, Bhṛśa, Antarikṣa, Vahni, Pūṣā, Vitatha, Gṛahakṣata and Yama. (65)

गन्धर्वभृङ्गराजौ मृगपितृदौवारिकाः ससुग्रीवाः।
अथ पुष्पदन्तवरुणासुरशोषा रोगवायुनागाश्च।। 66।।

विमर्शिनी

गन्धर्वभृङ्गराजौ गन्धर्वो भृङ्गराजश्च मृगपितृदौवारिकाः मृगः पितरो दौवारिकश्च। ससुग्रीवाः सुग्रीवश्च। अथ पुष्पदन्तवरुणासुरशोषाः पुष्पदन्तो वरुणोऽसुरः शोषश्च। रोगवायुनागाः रोगो वायुर्नागश्च।। 66।।

विवरणम्

पितृशब्दो बहुवचनान्तः। रोगः पापयक्ष्मा। वा(युः)नाग(श्चे)ति।। 66।।

(Also) Gandharva, Bhṛṅgarāja, Mṛga, Pitṛs, Dauvārika Sugrīva, Puṣpadanta, Varuṇa, Asura, Śoṣa, Roga, Vāyu and Nāga are located in that order). (66)

मुख्यो भल्लाटकसोमार्गलका दित्युदित्युपेताः स्युः।
ईशाद्यैकैकपदे द्वात्रिंशद्देवता बहिः प्रोक्ताः।। 67।।

विमर्शिनी

मुख्यः भल्लाटकसोमार्गलकाः भल्लाटकः सोमोऽर्गलश्च। दित्युदित्युपेताः दितिरुदितिरित्याभ्यां युक्ताः। बहिरीशाद्यैकैकपदे ई[1]शकोणमारभ्य प्रादक्षिण्यक्रमेणैकैकस्मिन् पदे। एता द्वात्रिंशद्देवताः प्रोक्ताः।। 67।।

विवरणम्

दित्युदित्युपेता इत्येकं पदम्। यद्वा भल्लाटकाद्येकं पदं दित्युदिती वान्त्ये देवते। अदितिदिती वा। एवमन्यदप्यवबोद्धव्यम्।। 67।।

Mukhya, Bhallātaka, Soma, Argalaka, Diti and Uditi together thirty two deities beginning from Īśāna (are located in the outer circle). (67)

इति हरिमहिषनिहन्त्र्योरन्तर्बहिरर्चने क्रमोऽन्येषु।
ईशानादिबहिष्ठापादिधरान्तान्तरान्तरजनिष्ठः।। 68।।

विमर्शिनी

हरिमहिषनिहन्त्र्योरन्तर्बहिश्चार्चने इति क्रमः स्यात्। अन्येषु पञ्चसु। ईशानादि-बहिष्ठापादिधरान्तान्तरान्तरजनिष्ठः ईशानादिबहिष्ठ आपादिधरान्तान्तरोऽन्तरजनिष्ठश्च क्रमः स्यात्। ईशानादिद्वात्रिंशद्देवताभिर्बहिष्ठाभिर्युक्तः, आपापवत्सादिधरो महीधरः तदन्तो धरान्तस्ताभिर्द्वादशभिरन्तरे अन्तराले स्थिताभिर्देवताभिश्च युक्तः, अन्तरजनिष्ठः अन्तरस्थितब्रह्मावसितः क्रमः स्यात्।। 68।।

विवरणम्

हरिमहिषनिहन्त्र्योरिति। एवमुक्तप्रकारेणेत्यर्थः। पूर्वमीशानादिबहिष्ठास्तत आपादिमहीधरान्ता आभ्यन्तराः पुनरन्तर्ब्रह्मा। अनया व्यवस्थया युक्तः क्रम इति।। 68।।

This is the sequence in the worship of Hari (Viṣṇu) and Mahiṣaniyantrī (Durgā) both in the inner and outer circles. In the case of others (five of them from Īśāna) first the thirty two deities of the outer ring to be followed by the deities in the inner circle beginning with Āpavatsa to Mahīdhara as well as Brahmā occupying the centre of the maṇḍala are to be invoked. (68)

---

1. 'रुद्रको' ख. पाठः

शर्वस्कन्दार्यमणौ जम्भकपिलिपिञ्छकौ दिशि बहिः स्युः।
विदिशि चरकी विदारी पूतनिका पापराक्षसीशाद्यम्।। 69।।
अथ देवासुरगन्धर्वयक्षपितरः सनागराक्षसकाः।
पूर्वाद्यष्टदिशासु क्रमशः सपिशाचका ग्रहाः सकले।। 70।।

विमर्शिनी

अथ सकले बहिः द्वात्रिंशद्देवतानामपि बहिर्दिशि। शर्वस्कन्दार्यमणौ शर्वस्कन्दश्चार्यमा च, जम्भकपिलिपिञ्छकौ जम्भकः पिलिपिञ्छकश्च स्युः। विदिशि ईशाद्यं यथा भवति तथा। चरकी विदारी। पूतनिका इति पूतना। पापराक्षसी च स्युः। पूर्वाद्यष्टदिशासु क्रमशो देवासुरगन्धर्वयक्षपितरः देवा असुरा गन्धर्वा यक्षाः पितरश्च। सनागराक्षसकाः नागा राक्षसाश्च। सपिशाचकाः पिशाचाश्च। ग्रहा इति देवग्रहेभ्यो नम इत्यादिमन्त्रा उक्ताः।। 69-70।।

विवरणम्

दिशीति। पूर्वादिदिक्षु ईशाद्यम्। विदिशीति। ऐशान्यादिविदिक्षु। पूतनिका पूतना। ग्रहाः सकल इति। ग्रहग्रहणेन देवग्रहेभ्योऽसुरग्रहेभ्य इत्येवं प्रयोग उक्तः।। 69-70।।

Outside the above mentioned outer circle are located (some deities like Sarvaskanda, Aryamā, Jambhaka, Piñchaka all in the quarters like east, south, west and north) while in the corners are located Carakī, Vidārī, Pūtanikā and Pāparākṣasī (on north east, south east, south west and north west). (69)

In the eight directions beginning from east are located in order the deities like Devas, Asuras and Gandharvas, Yakṣas, Pitṛs, Nāgas and Rākṣasas along with Piśācas. They are be invoked by Mantras adding the word graha to each of them like Devagrahebhyo namaḥ etc. (70)

विरिञ्चं द्विपञ्चाशता देवताभिर्वृतं चार्चयित्वा यथोक्तक्रमेण।
अमुष्मै निवेद्याथ तद्देवताभ्यस्त्रिपञ्चाशते तत्र दद्याद् बलिं च।। 71।।

विमर्शिनी

द्विपञ्चाशता देवताभिर्वृतं विरिञ्चं ब्रह्माणम् यथोक्तक्रमेणार्चयित्वा पूजयित्वा। अमुष्मै ब्रह्मणे निवेद्य। अथ त्रिपञ्चाशते तद्देवताभ्यस्तत्र बलिं व दद्यात्।। 71।।

विवरणम्

द्विपञ्चाशतेति देवग्रहाद्युपलक्षणम्। वाद्ययोगो बलिक्लृप्तिश्च सामान्यतो लभ्यते। [1]विद्वानिति ब्रह्मणो निवेद्यविकल्पः सूचितः। यद्वा वास्तुशरीराद्यभिज्ञत्वमुक्तम्। तदुक्तम्-

ईशानेऽस्य शिरः क्षिप्तं पादौ निर्ऋतिगोचरौ।

---

1. अमुष्मै निवेद्याथ विद्वान् प्रदद्याद् बलिं चाखिलाभ्योऽथ तद्देवताभ्यः इति विविरणपाठः

जानुनी कोर्परे (?) चास्य वायव्याग्नेयकोष्ठयोः।।
करौ वक्षसि निक्षिप्य प्रोत्तानः शयितस्तथा।

इति। नीचीनः शयित इत्येके।

मूर्ध्नीशो दितिपर्जन्यौ दृशोरापश्च तन्मुखे।
आपवत्सो गलेऽसस्थौ जयन्तश्चादितिस्तथा।
इन्द्रार्गलादयो बाह्वोः स्तनयोरार्यभूधरौ।
कुक्षौ मित्रविवस्वन्तौ मेढ्रेऽण्डे चेन्द्रतज्जयौ।।
सा(वि)त्रः सविता रुद्रस्तज्जयश्च प्रकोष्ठयोः।
पादयोः पूषपापाद्यास्तदग्रे पितरः स्थिताः।।
शिरोंऽसाद्युपान्तेषु चरकीशर्वस्कन्दादयः।
हृदये ब्रह्मा ....।।

इति। यद्वा तद्देवतारूपाभिज्ञत्वं विद्वच्छब्देनाभिप्रेतं, यदुक्तम्–

ब्रह्मा चतुर्मुखो रक्तो लम्बकूर्चश्चतुर्भुजः।
अक्षमालां स्रुवं दक्षे वामे दण्डं कमण्डलुम्।। इति।।
सर्वे चतुर्भुजा ध्येया वास्तुदेहे व्यवस्थिताः।
हृदञ्जलिपुटास्सर्वे खड्गखेटकपाणयः।।
खड्गं च पानपात्रं च क्षुरिकां कर्तरीं तथा।
दधाना भीमरूपास्ता राक्षस्यः परिकीर्तिताः।।
वज्रं शक्तिं च खड्गं च पाशं च विकृताननाः।
दधाना भीषणाः प्रोक्ता ग्रहा स्कन्दादिकाश्च ते।।

इति। यद्वा विद्वच्छब्देन प्रतिदैवतं बलिद्रव्याभिज्ञत्वमुक्तम्। दध्याज्यगुलमिश्रमन्नं ब्रह्मणः, पायसकृसरमाषान्नगुळान्नघृतान्नदध्यन्नैरेकैकवर्गस्य बलिरिति। अयं संक्षेपबलिः। अथ विस्तारबलिः।

आज्याक्षतैर्यजेदीशमुत्पलाभिः पताकया।
रत्नैर्वितानैः कौसुम्भैर्माषैर्मांसैः स्रुचानलम्।।
लाजैस्सुवर्णैर्भूयोऽपि लड्डुकैः पिशितैरपि।
गन्धैश्च खगजिह्वाभिर्यवैश्च तिलवारिभिः।।
दौवारिकं दन्तकाष्ठैर्धूपैर्दर्भैश्च पङ्कजैः।
सुरया च घृतान्नेन यवैश्च घृतमण्डकैः।।
नागं नागप्रसूनैश्च भक्ष्यैर्मुद्गौदनेन च।
मधुपायसैस्तण्डुलैश्च शाल्यन्नैर्माषसंयुतैः।।
क्षीरेणापमथैशान्यां पादार्धे वा पदद्वये।
तत्पूर्वे सर्पिषा प्राच्यां लड्डुकैश्च कुशोदनैः।।

अग्नौ तु दक्षिणे पुष्पगुलैररुणचन्दनैः।
हरिद्रान्नेन नैर्ऋत्यां चित्रान्नैस्तस्य पश्चिमे।।
घृतान्नेन गुळान्नेन वायव्यां तस्य चोत्तरे।
पक्वामयाभ्यां मांसाभ्यां माषमुद्गौदनैरुदक्।।
मांसैस्सहार्चयित्वा तु ब्रह्माणं मध्यतो यजेत्।
तिलगव्याक्षताज्यान्नैर्बाह्ये शर्वादिकान् यजेत्।।
पायसैः कृसररुधिरैर्वसारक्तप्रसूनकैः।
भक्ष्यमांसैर्मांसपित्तैर्दध्यन्नेन तु पूतनाम्।।
दुग्धपित्तास्थिमांसान्नैर्वायव्यां पापराक्षसीम्।

इति। अत्र सर्वत्राज्याक्षताद्युक्तद्रव्यप्रधानेनान्नेन बलिः। मांसरुधिरादीनां मोदकरक्तजलादयः प्रतिनिधयः स्युः। तत्पूर्वे सर्पिषेत्यापवत्सस्यापपाग्भागेऽवस्थानमुक्तम्। कोणगतद्वितयानां विपर्यासोऽत्राभिप्रेयते। कृसररुधिरैरिति द्रव्यद्वयमुक्तं शैवादिष्वेव। वैष्णवादिषु तु भेदः। सत्यकस्य गोधूमान्नं मृगस्य तिलयवान्नं पितृणां कृसरः सुग्रीवस्य धूपापूपान्नं पुष्पदन्तस्य कुशस्तम्बघृतान्नम्। अर्गलस्य अक्षतशालूकान्नम्, आपवत्सस्य हविर्दध्यन्नमिति।

भक्ष्यान्नाज्यं चरक्यै तु विदार्यै पद्ममांसकम्।
रक्तान्नं दधिमांसं च क्षीरपित्तारुणोदनम्।।
पूतनापापयोर्दिक्षु दद्यान्मांसाज्यपायसम्।
पललापूपकृसरं मांसपित्तासृगान्त्रकम्।।
सरक्तकुसुमान्नं च ततो दिक्षु बलिं हरेत्।
पायसं रक्तमसितं हारिद्रं कृसरं सितम्।।
सभक्ष्यं संतुषोदं च ग्रहेभ्योऽन्नं क्रमाद् भवेत्।।

इति।। 71।।

In the order enumerated Brahmā is to be propitiated along with fifty two deities offering oblation. Thereafter all the fifty three are to be propitiated offering bali (with a part of the food already prepared). (71)

कुशप्रसूनाक्षतवारिहव्यैस्त्रिशः किरेद् वास्तुचतुर्मुखाभ्याम्।
सकृत् सकृत् तत्परितः परेभ्यो वहिर्ग्रहेभ्योऽञ्चितपञ्चकूरैः।। 72।।

विमर्शिनी

कुशप्रसूनाक्षतवारिहव्यैः कुशपुष्पाक्षतजलमिश्रैर्हविर्भिः। **वास्तुचतुर्मुखाभ्यां** वास्तुपुरुषाय ब्रह्मणे च। **त्रिशः** बलिं **किरेत्**। **तत्परितः** तस्य परितः। **परेभ्य** आर्यकादिभ्य ईशानादिभ्यो वा। **सकृत् सकृत्** एकशः। **बहिः** शर्वस्कन्दादीनां बहिः। **ग्रहेभ्यः** देवग्रहादिभ्यः। **अञ्चितपञ्चकूरैः** पञ्चकूरमिश्रैर्हविर्भिरित्यर्थः।। 72।।

विवरणम्

परेभ्य इति। कुशप्रसूनाक्षतवारिहव्यैरित्यनुषङ्गः। एवम् अञ्चितञ्चकूरैरित्यत्रापि। अञ्चनं पूजनं सकलनिवेद्यसंस्कारोपलक्षणमेतत्। ब्रह्मादिहविषामप्येतत् समानम्।। 72।।

The preceptor shall spinkle with Kuśa flowers Akṣata (unhusked powdered rice) water and rice balls as oblations, on all the four openings of the Vāstumaṇḍala. This is to be done thrice. Therefore the deities outside these are to be offered once each along with the oblations consisting of five substances (consisting of turmeric and parched rice, fried rice, powdered and fried sesamum.) (72)

कृत्वा बलिं सलिलमत्र सकृत् सकृच्च
दत्त्वा प्रसन्नयजनं प्रविधाय धातुः।
तद्वास्तुदैवतकदम्बकृतावलम्बं
प्राकारमध्यमवबुध्य करोतु रक्षाम्।। 73।।

विमर्शिनी

बलिं कृत्वा अत्र देवतासु। सकृत् सकृत् सलिलं च दत्त्वा। धातुर्ब्रह्मणः प्रसन्नयजनं प्रविधाय। प्राकारमध्यं महामर्यादान्तर्भागम्। तद्वास्तुदैवतकदम्बकृतावलम्बं पूर्वोक्तवास्तुदेवतानां समूहेन प्राप्ताश्रयम्। अवबुध्य ध्यात्वा रक्षां करोतु।। 73।।

विवरणम्

धातुः प्रसन्नयजनं प्रविधायेति धाता ब्रह्मा। इतरेषामप्यविशेषादेतत् सामान्येन कर्तव्यम्। तद्वास्तुदैवतकदम्बकृतावलम्बमिति। कदम्बः समूहः। प्राकारमध्यं प्राकारचतुष्टयाभ्यन्तरस्थलम्। अयमभिप्रायः–नैषामुद्वासनमस्ति, किंतु वास्तुपुरुषस्य प्राकारपर्यन्ततया प्राग्व्याख्यातवदवस्थानं तदुपरि यथोक्तपदक्लृप्त्या ब्रह्मादीनामवस्थानं व वर्गशो व्यापकपुष्पाराधनभावनाभिः कल्पनीयमिति। यद्वा [1]कृतिः पूजा अलंबो विनिपाताभावः। वास्तुदेवतानामित्थं पूजायां विनिपाताभावः प्राकाराभ्यन्तरस्य विभाव्य इति। अयं भावः। वास्तुदेवतानां प्रसन्नपूजान्ते विघ्नादिभिर्विनिपाताभावादि प्रार्थनीयमिति। तदुक्तम्। 'विहितो वास्तुबलिः स्याद् रक्षोविघ्नोपशान्तिसम्पद्भ्य' इति। कृत्स्नप्रासादादिनिर्माणाङ्गमेष वास्तुयाग इति ज्ञेयम्।। 73।।

Offering oblations and after giving ceremonial water every now and then the deity Brahmā (occupying the center) is to be propitiated with Prasannapūjā (the particular rite to make the deity contented). Thereafter taking into account all the deities occupying the Vāstu fix the centre and protect it. (73)

---

1. 'तद्वास्तुदैवतकदम्बकृतेरलम्बम्' इति पाठमङ्गीकृत्येदं व्याख्यानं प्रतिभाति।

गते तत्र विशोधिते विनिहिताधाराश्ममध्यावटे
धान्याद्याहितविष्टरेऽथ निधिकुम्भं ताम्रजं वाश्मजम्।
मूलेन प्रणिधाय तत्र विधिवद् रत्नादिपूर्णेऽर्णजं
सम्पूज्याब्जमिहाभिराध्य भुवनेशीमर्थयेतामुना।। 74।।

विमर्शिनी

निधिकलशादिस्थापनमाह–गर्त इति। अथ विशोधिते विशेषेण शोधिते तत्र गर्ते। विनिहिताधाराश्ममध्यावटे स्थापिताया आधारशिलाया मध्यस्थे गर्ते। धान्याद्याहितविष्टरे धान्यतण्डुलादिभिः क्लृप्ते पीठे। ताम्रजं ताम्रमयम्। अश्मजं वा शिलानिर्मितं वा निधिकुम्भं निधिकलशम्। मूलेन प्रणिधाय न्यस्य। तत्र पीठे। विधिवत् कलशन्यायेन। रत्नादिपूर्णे रत्नकनकादिभिः पूर्णे निधिकलशे। अर्णजमब्जं ब्रह्मकलशपूजायां वक्ष्यमाणं लिपिपङ्कजं सम्पूज्य। इह लिपिपद्मे भुवनेशीं शक्तिम्। अभिराध्यावाह्य सम्पूज्य। अमुना वक्ष्यमाणेन मन्त्रेण। अर्थयेत प्रार्थयेत्।। 74।।

विवरणम्

इदानीं प्रासादशरीरमूलावयवभूताधारशिलादिनिष्पादनरूपां पातालप्रतिष्ठां प्रस्तौति–गर्ते तत्रेति। विशोधित इति। भुषण्यादिभिः स्थलशुद्धिरुक्ता। स्नानसकलीकरणादि सर्वं दिनान्तरे चेद् अर्थसिद्धम्। विनिहिताधाराश्ममध्यावट इति। आधारशिलादिलक्षणं कर्मशेषे भविष्यति। तत्र गर्ते प्रथमं तावद् भाविनपुंसकशिलासमसूत्रलक्षणे स्थाने सुदृढीकृते प्रासादमूलावयवभूतामाधारशिलां विनिदध्यात्। शिल्पिना प्राग्विनिहितामपि विनिधानधिया स्पृशेत्। तस्यास्तथा विनिहिताया यो मध्यदेशे निधिकलशनिश्चलतार्थं प्रागेव कृतोऽवटस्तस्मिन्नित्यर्थः। यद्वा विनिहित आधारो यस्मिन्नित्यपि समसनीयम्। विनिधानं विशेषतस्सन्निधापनम्। कृत्स्नस्य निधिकलशपृथिवीनपुंसकशिलाद्यभि–मानिशक्तिमण्डलस्य नानाविशेषलक्षणस्य यत् सामान्यं तद्विशेषाणां स्वसामान्याश्रयत्वाद् आधारोऽभिप्रेयते। अयमिहाशयः। यद्दिगभिमुखतया भाविनी प्रतिमाभिमता तद्दिगभिमुखतयैवाधारशिलानिधिकलशादि सर्वं प्रतिष्ठापनीयम्! तथा चोक्तम्।

"द्वारदिग्वीक्षमाणं तु मध्ये मन्त्रघटं न्यसेद्"

इति। निधिकलशाभिप्रायमेतत्। ततश्च स्थलशुद्धौ कृतायामेतदुचिते पूजास्थान उपविश्य आत्मनः सकलीकरणादि सर्वं विधाय गणपतिपूजाद्यनन्तरं तामाधारशिलां गव्यादिभिरस्त्रेण संशोध्य शोषणादि कृत्वा प्रणवेन शक्त्या वा सस्मृज्य तेनैव प्रतिष्ठाप्य "ध्रुवा द्यौ" रित्यभिमृश्य येन पूजिता तेनैव भाविकृत्स्नशक्तिमण्डलसामान्यलक्षणं परं महोऽभिवाह्य संपूज्य सन्निधापयेदिति। यदुक्तम्।

या शिला कलशाधारसंज्ञा तां विद्धि सर्वगाम्।
सामर्थ्यशक्तिं सामान्यां निष्कलां परमेश्वरीम्।। इति।
संस्मरन् मन्त्रचक्रं तु सानन्तं प्रणवेन वै।
बीजभूतं तदन्तस्थमध्वषट्कं स्मरन् यजेत्।।

इति च। धान्याद्याहितविष्टर इति वस्त्रादिग्रहणम्। तदवटे स्वस्तिकमष्टदलकमलं वालिख्य व्रीह्यादिभिर्यथान्यायं पीठं विरचय्य तत्र पीठपूजां विदध्यात्। ताम्रजमश्मजं वेत्यन्वयः। मूलेन प्रणिधायेति। तत्र कुम्भसंस्कारपूर्वकं यथा न पुनश्चलनं स्यात् तथा मूलमुच्चरन् विन्यस्येत्यर्थः। मूलग्रहणं ध्रुवा द्यौरित्यादिजपोपलक्षणम्। विधिवदिति सकलकलशन्यायप्राप्त्यर्थमुक्तम्। रत्नादिपूर्ण इति सुवर्णधान्यादिग्रहणम्। हिरण्मय्याधारशक्तिरपि तस्मिन् विधीयते। अर्णजमब्जं लिपिपङ्कजम्। तच्च स्नपनपटले वक्ष्यते। इह भुवनेशीमभिराध्य हरिहरादिषु सर्वेष्वपि ह्रींबीजेन मूर्तिकल्पनावाहनादि-पूर्वकमाराध्येत्यर्थः। आधारशक्तिरियमिति सम्प्रदायः। त्वमेवासनधारिकेति च तत्र लिङ्गम्। अङ्गलोकपालादिभिः पूजा स्यात्। अर्थयेतामुनेति। त्वमेव परमा शक्तिरित्यमुनेत्यर्थः। प्रागवसानीयार्घ्यदानादियमर्थना।। 74।।

In that pit which is properly cleared a pot containing valuables may be placed on a slab over which seeds and corns are sprinkled. The pot called Nidhikumbha may be made of copper or stone. It is to be put to the accompaniment of the basic hymn (called Mūlamantra). The pot in which valuable substance like gold piece and jewels are deposited is to be offered to Brahmā occupying a ceremonial lotus over which the supreme goddess is to be invoked (for protection). (74)

त्वमेव परमा शक्तिस्त्वमेवासनधारिका।
सन्तृप्तया त्वया देवि! स्थातव्यमिह सर्वदा।। 75।। इति।

विमर्शिनी

मन्त्रमाह—त्वमेवेत्यादि।। 75।।

The invocation of the supreme goddess is in the form of "O goddess, you alone are the supporting basis of the altar (which carries the pot) and as such you be pleased to remain here eternally" (75)

तद्दक्षिणे दर्भमृदादिशोधितं
निधाय कूर्मं क्रतधान्यविष्टरे।
विशोध्य तं धारणयात्ममन्त्रतः
प्राच्याधिवास्येति घटोपरि न्यसेत्।। 76।।

विमर्शिनी

तद्दक्षिणे कृतधान्यविष्टरे धान्यादिभिर्विरचितपीठे, अर्थात् पूजितपीठे। दर्भमृदादिशोधितं दर्भमृत्त्वग्भिः संघृष्य क्षालितम्। कूर्मं शिलापद्मं शिलाकूर्मं रजतपद्मं रजतकूर्मं स्वर्णपद्मं स्वर्णकूर्मं त्र निधाय। धारणया शोषणादिभिः, तानि विशोध्य। आत्ममन्त्रतः कूर्मस्य[1] मन्त्रेण प्राच्य सम्पूज्य। वस्त्रेणाच्छाद्याधि-वास्य। इति वक्ष्यमाणप्रकारेण। घटोपरि निधिकलशस्योपरि न्यसेत्।। 76।।

1. 'स्य मणेर्मन्त्रे' क. पाठः

विवरणम्

दर्भमृदादिशोधितमिति। पूर्वं दर्भमृत्त्वग्भिर्घृष्ट्वा क्षालितं पुनर्घृतेनाङ्क्त्वा मसूरमुद्गादिपिष्टेनोद्वर्तनपूर्वकमपि क्षालितमित्यर्थः। कूर्ममित्येकवचनमेककूर्माभिप्रायम्। स चाश्मजो राजतो हैमो वा। यद्वा द्वयोस्त्रयाणां वा सामान्यतो निर्देशः। पद्ममपि तद्वद् द्रष्टव्यम्। कृतधान्यविष्टर इति। स्वस्तिके पीठं विरचय्य तत्रेत्यर्थः। धारणयेति। भूतसंहारशोषणादि, भूतसर्गाद्यभिधानं जीवाहरणादि सर्वं न्यायसिद्धम्। आत्ममन्त्रत: प्रार्च्येति। प्रणवो वक्ष्यमाणनिजमन्त्रो वा आत्ममन्त्रोऽभिप्रेतः। तेन मन्त्रोदयादिसर्वपूर्वकमावाहनादि कृत्वाङ्गलोकपालादिभिः सह पूजां कुर्यात्। अधिवास्येति। वस्त्रेणाच्छादनादिकं तथा भावनाविशेषश्चोक्तः। इतिशब्दो वक्ष्यमाणप्रकारार्थः। शिलादिपद्मानामपि यथास्वं दर्भमृदादिशोधनं शोषणादिकं प्रणवेन शक्त्या वा पूजनमपि कार्यम्।। 76।।

Towards the right side of the pot the ground may be sanctified by spreading darbha grass and paddy grains. On this ground is to be put the Kūrma (a lid having the shape of tortoise) which is purified by mantras purported to sanctify it. Now the tortoise shaped lid after covering it with cloth may be put atop the opening or mouth of the pot. (76)

शिलापद्मं कुम्भोपरि सुविनिधायार्णकमलं
समर्च्यास्मिन् भाव्यालयवदुपधायाश्मकमठम्।
अकूबारायेति प्रणवनमसोरन्तरभुवा-
णुनावाह्यानेन प्रणवविहिताङ्गं यजतु च।। 77।।

विमर्शिनी

केन प्रकारेणेत्यत्राह–शिलापद्ममिति। कुम्भोपरि निधिकलशोपरि। शिलापद्मं शिलामयं (पद्मं) सुविनिधाय सुस्थितं यथा भवति तथा विनिधाय। अर्णकमलं लिपिपङ्कजं समर्च्य। अस्मिन् पद्मे। अश्मकमठं शिलाकूर्मम्। भाव्यालयवद्, भविष्यत्प्रासादं यन्मुखं तद्वदित्यर्थः। प्रणवनमसोः अन्तरभुवा मध्यस्थेन अकूबारायेत्यणुना। उपधाय सुस्थितं स्थापयित्वा। अनेन मन्त्रेणावाह्य। प्रणवविहिताङ्गं प्रणवेन कृताङ्गं तं यजतु च।। 77।।

विवरणम्

शिलापद्मं कुम्भोपरि सुविनिधायेति। निधिकलशमुखे पल्लवालङ्कृते यथा पूनश्चलनं न स्यात् तथा निधायेत्यर्थः। अर्णकमलं समर्च्येति तस्मिन् पद्मे लिपिपङ्कजपूजोक्ता। यद्वा, अर्णेषु कमला श्रीर्यत्रेत्यपि समसनीयम्। लिपिपङ्कजाकारेऽक्षरजाते मूलप्रकृतिलक्षणा श्रीरप्यावाह्य पूजनीयेति तदाशयः। कमलागृहं वैष्णवप्रस्थानापेक्षमेव। शैवप्रस्थाने तु हृल्लेखोपलक्षणमेतत्। 'त्वमेव परमा शक्तिस्त्वमेव प्रकृतिः परा। सन्तृप्तया त्वया देवि स्थातव्यमिह सर्वदे'त्येवमर्थनापि स्यादिति। भाव्यालयवद् भावी प्रासादो यद्दिङ्भुखः तद्दिङ्मुखमित्यर्थः। अश्मकमठः शिलाकुर्मः। प्रणवनमसोरन्तरभुवा अकुबारायेत्यणुनेत्यन्वयः। वर्णैरष्यङ्गदेहं कल्पनीयम्।। 77।।

Having fixed the Śilāpadma – lotus shaped stone – on the mouth of the

pot the Lipipaṅkaja lotus made with the arrangement of syllables may be propitiated. The tortoise shaped stone is to be directed towards the place where the opening of the shrine is to be located. The mantra 'Akūbarāya namaḥ' profixed with Praṇava is to be used in invoking the deity and then perform the worship as usual. (77)

तदूर्ध्वस्थे पद्मे रजतरचिते सार्णकमले
न्यसेद् रौप्यं कूर्मं प्रयजतु च तेनैव मनुना।
तथा स्वर्णाम्भोजेऽर्चितलिपिसरोजे कनकजं
निधायेष्ट्वा कूर्मं विधिवदमुना प्रार्थयतु च।। 78।।

नमस्ते कूर्मरूपाय विष्णवे विश्वधारिणे।
करिष्यमाणं प्रासादमिह त्वं धर्तुमर्हसि।। 79।।

विमर्शिनी

तदूर्ध्वस्थे शिलाकूर्मोपरिस्थिते रजतरचिते पद्मे। सार्णकमले पूजितलिपिपङ्कजे। रौप्यं रूप्यमयं कूर्मं तेनैव मनुना न्यसेत् प्रयजतु च। तथा तद्वदेव स्वर्णाम्भोजे सौवर्णं पद्मं निधाय। तत्र अर्चितलिपिसरोजे पूजितलिपिपङ्कजे। कनकजं कनकमयं कूर्मम्। विधिवत् पूर्वविधिना निधाय। इष्ट्वा सम्पूज्य। अमुना वक्ष्यमाणमन्त्रेण। प्रार्थयतु प्रार्थनं कुर्यात्।। 78।।

प्रार्थनामन्त्रमाह–नमस्त इत्यादिना।। 79।।

विवरणम्

तदूर्ध्वस्थ इति कूर्मोपरिजराजतपद्मनिधानमुक्तम्। सार्णकमल इति तस्मिन् लिलिपङ्कजपूजोक्ता। तथा स्वर्णाम्भोज इति। राजतकूर्मोपरि निहितं इति भावः। विधिवदिति सर्वत्र स्वमन्त्रेण प्रतिष्ठापनं ध्रुवादिजपश्चोक्तः। पद्मानामपि मूलप्रकृतिपक्षे समानमेतत्। पद्मानामेव त्रित्वे तु हेमपद्मे मूलप्रकृतियागानन्तरमेव कूर्मवदुपस्थानमिति ज्ञेयम्। निवेद्यं प्रसन्नपूजां च कृत्वा अवसानीयार्घ्यदानात् पूर्वमुपस्थानं भवति। कर्मावसानेऽस्त्रेण तालत्रयादिकरणं सर्वत्र समानम्।। 78–79।।

Over the stone (shaped as tortoise) a lotus made of silver (again with the shape of a tortoise) is to be placed to the accompaniment of mantra used earlier. Thereafter another one of golden lotus (shaped as Tortoise) is to be placed with the chant of the mantra (Om Akūbarāya namaḥ). Once again the worship of Lipi Paṅkaja syllables arranged as lotus is to be worshipped properly. Here again an invocation is to be made as follows: (78)

I salute you, O Viṣṇu assuming the form of a tortoise which supported the earth, you be pleased to support the mansion (the temple structure) proposed to be built here. (79)

विघ्नेशापचितिं विधाय यमदिग्द्वार्यग्रतः स्वस्तिके
दे[1]वं च प्रसमर्च्य शेषहविषा हुत्वा प्रसाद्याथ तम्।
कूर्मस्योपरियोगनालमुपधायाजन्मभूम्युद्गतं
गर्तं मृत्तिकयाभिपूर्य दृषदा चाकोट्य दार्ढ्यं नयेत्।। ८०।।

विमर्शिनी

अथ यमदिग्द्वारि भविष्यद्दक्षिणद्वारे स्थाने। विघ्नेशापचितिं गणपतिदक्षिणामूर्त्तिपूजां विधाय। अग्रतः कूर्मस्याग्रतः स्वस्तिके देवं च प्रसमर्च्य निवेद्य। शेषहविषा हुत्वा पू[2]जाङ्गहोमं कृत्वा। तं देवं प्रसाद्य कुर्मस्योपरि। आजन्मभूम्युद्गतम् अजन्मा ब्रह्मा तस्य भूमिः स्थानं, नपुंसकशिलेत्यर्थः, तत्पर्यन्तमुद्गतमूर्ध्वगतं योगनालम्। उपधाय स्थापयित्वा। आजन्मभूभ्युद्गतं जन्मभूमिरुपानट्पर्यन्ता भूमिः, तदन्तमिति केचित्। गर्तं मुत्तिकया दृषदा च शिलयाभिपूर्य। आकोट्याय: कूटेन संताड्य। दार्ढ्यं स्थिरताम्। नयेत् प्रापयेत्।। ८०।।

विवरणम्

यमदिग्द्वारि विघ्नेशापचितिं विधायेति। अपचितिः पूजा। भाविप्रासाददक्षिणद्वारोद्देशे स्वस्तिकमष्टदलं वालिख्य तत्र पूजापटलभाविरीत्या गणपतिपूजां विदध्यात्। कृत्स्नस्य प्रासादादि-विधेस्साक्षितया सकलविघ्नपरिहारार्थमसौ गणपतिस्तत्र स्वायतने सन्निधाप्यत इत्यवबोद्धव्यम्। अग्रतः स्वस्तिके देवं प्रसमर्च्येति भाविप्रासादाग्रियद्वारोद्देशे स्वस्तिकेऽष्टदले वा तत्तद्देवस्य पूजापटल-भाविरीत्यैवाराधनमुक्तम्। कृत्स्नस्य स्वकीयप्रासादादिविधेः साक्षितया सकलप्रवृत्त्यनुग्रहार्थमस्य सन्निधापनमेतदित्यवबोद्धव्यम्। शेषहविषेति निवेद्यावशेषहविषः पूजाङ्गतया होमोऽयमुक्तः। कूर्मस्योपरीति योगनाळलक्षणमपि कर्मशेषे वक्ष्यते। उपधानं विनिधानम्। आजन्मभूम्युद्गतमिति तदीयायामपरिमाण-मुक्तम्। यद्वाजन्मभूमिः प्रासादाधिष्ठानं सैव च पृथिवी तद्धारितयास्यावस्थापनमनेनोक्तम्। तेनास्यानन्तरूपत्वमपि सूचितं भवति। तथा चास्त्रप्रोक्षणशोषणादिपूर्वकमनन्तमन्त्रेणार्चनाद्यपि कार्यम्। 'नमस्तेऽनन्तरूपाय विष्णवे विश्वधारिण' इत्येवमादिना प्रार्थनेति। गर्तं मृत्तिकया दृषदा व अभिपूर्येति सारमृत्साभिर्वृत्तपाषाणैश्च यथोचितमभिपूरणमुक्तम्। निधिकलशे प्रतिष्ठापिते तदवधिपूरणम्। पद्मकुर्मे तु तदवधिपूरणं योगनाले निहिते च। कृत्स्नाभिपूरणमस्त्रप्रोक्षितमृद्दृषद्भिरौचित्यात् कार्यमिति च ज्ञेयम्। आकोटनमुपरिदेशे सम्यगृजूकरणम्। दार्ढ्यं नयेदिति। यथा चिरकालात्ययेऽपि पादुकादेरवनतिर्न स्यात् तथा याज्ञिकैर्हस्तिपादैस्तत्स्थलस्य दृढतापादनम्। जलादिपूरणमप्यर्थात् सूचितम्। यदाह–' पूरयेद्वालुकाभिश्च जलैश्चोपरि पूजयेदि'ति।। ८०।।

After performing the worship of Gaṇeśa in the southern region where the Swastika shaped diagram is drawn, the deity may be propitiated offering the rest of the oblaions to please him. Over the tortoise shaped stone a metalrod made of copper having a legth from the ground upto the top is to

---

1. 'देवेशं च स' क. पाठः,
2. 'पूजां गणहो' ख. पाठः

be fixed. Now the pit is to be filled up using darbhā grass and mud (along with the chant of the mantra an Anantāya namaḥ) over which granite stone is placed before fixing up by hammering to make it firmly. (80)

पूर्णप्रासाददेशे त्रिणयनपदसंप्रीणिताभीष्टवास्तौ
भाव्येतद्द्वारशाखापदमपि परिकल्प्योत्तरेणाथ चैतत्।
उल्लेखादिक्रमेण ज्वलनमुपसमाधाय गव्यादिसिक्ता-
स्तद्याम्येऽष्टेष्टकास्तद्यमदिशि कलशं च न्यसेत् क्लृप्तपीठे।। 81 ।।

विमर्शिनी

अथ पूर्णप्रासाददेशे पूर्णप्रासादस्थाने सत्यपरस्मिन् मुहूर्ते रात्रौ। त्रिनयनपदसंप्रीणिताभीष्टवास्तौ ईशभागकृतस्वस्ववास्तुबलौ च सति। भाव्येतद्द्वारशाखापदं भविष्यत्प्रासाद- द्वारस्य दक्षिणशाखायाः स्थानमपि परिकल्प्य। एतदुत्तरेण तस्योत्तरभागे। उल्लेखादिक्रमेण उल्लेखनमारभ्य क्रमेण। ज्वलनमग्निम्। उपसमाधाय स्थापयित्वा। परिधिस्थापनात् प्राक् तद्याम्ये तद्दक्षिणभागे। क्लृप्तपीठे विरचिते पीठे। गव्यादिसिक्ताः पञ्चगव्याष्टगन्धजलैः सिक्ता अष्टेष्टकाः। तद्यमदिशि तासां दक्षिणे कलशं च न्यसेत्।। 81 ।।

विवरणम्

तावता स्थलस्य दृढताभाव उपपीठबन्धनमपि कर्तव्यमिति पातालप्रतिष्ठामुक्त्वां प्रासादमध्य- मावयवप्रक्रमरूपं प्रथमेष्टकोपधानं प्रस्तौति–पूर्णप्रासाददेश इति। गर्तं मृत्तिकया प्रपूर्य दृषदेत्येवं पूर्णे सति प्रासादोचितोद्देशे यदोपपीठयोगस्तदा पूर्णे तदुपरितने प्रासादोचितोद्देश इत्यर्थः। त्रिनयनपद- सम्प्रीणिताभीष्टवास्ताविति। त्रिनयनपदं तत्र ईशानप्रदेशः। अभीष्टशब्देन स्वस्वोचितग्रहणम्। तत्र रात्रौ वास्तुपूजां प्रागुक्तवत् कृत्वेत्यर्थः। स्नानादि सर्वमर्थसिद्धम्। भाव्येतद्द्वारशाखामपि परिकल्प्येति। एतच्छब्देन प्रक्रान्तप्रासादग्रहणम्। द्वारशाखाकवाटयोगः भाविन्याः प्रासादप्रधानद्वारशाखायाः स्थानमपीष्टकाधानोपयोगितया शिल्पिभिः सहावधार्येत्यर्थः। प्रासादपरिग्रहाच्च गर्भगृहद्वारशाखाया मुखमण्डपोपपत्तौ तदीयद्वारशाखायाश्च न ग्रहणोपपत्तिः। प्रासादद्वारस्य वामेतरस्मिन्नित्यादि वक्ष्यति। ततश्च दक्षिणेयं द्वारशाखावसयिते। अथैतदुत्तरेणेति। एतत्पदसन्निधावुदग्भागे इत्यर्थः। 'एनपा द्वितीये'ति एतच्छब्दस्य द्वितीया। तत्र मण्डपं परिवृत्तं स्थलं वा प्रागेव कृत्वा तत्रेष्टकागर्भहोमौ स्याताम्। ज्वलनमुपसमाधायेति। परिधानादर्वाचीनं सर्वमपि निर्वर्त्येति भावः। तद्याम्ये क्लृप्तपीठे गव्यादिसिक्ता अष्टेष्टकाः, तद्यमदिशि क्लृप्तपीठे कलशं व न्यसेदिति योज्यम्। स्वस्तिकेऽष्टदलपद्मे वा व्रीहिवस्त्रादिभिः पीठं कल्पनीयम्। पच्चगव्येन मृज्जलगोमूत्रपञ्चगव्यैर्हेमरत्नोदकयुतैस्तैर्वेष्टकाः स्वास्त्रेण शोधनीयाः। स्वे पीठे यथादिशं प्रागग्रतया च न्यासः। गन्धविलेपनं सन्धूपनमपि कार्यम्। न्यग्बिलतया च कलशन्यासः।। 81 ।।

Once the plot for the construction of the whole shrine is properly prepared, in the location of portion dedicated to Triṇayana (Śiva meaning Iśānakoṇa) and the deities of the region are propitiated, the place where the door is to be constructed has to be set apart. The northern portion of the

location is to be properly sprinkled and washed before sacred fire is kindled. Once the limit is fixed towards the south of the region eight burnt bricks are to be put on a specific altar and these should be spinkled with Pañcagavya and Aṣṭagandha mixed water. In that southern direction a Kalaśa (pot) shall be placed on a specific altar. (81)

धारणाक्रमविशोधितास्ततः स्वाणुतः समभिपूज्य चेष्टकाः।
प्राच्‍र्य रत्वजलपूरितं घटं प्रारभेत हवनं[1] विधान[2]तः।। 82।।

विमर्शिनी

ततो धारणाक्रमविशोधिताः शोषणादिभिः शोधिताः इष्टकाः। स्वाणुतः स्वस्थापनमन्त्रतः समभिपूज्य। रत्नजलपूरितं रत्नैर्जलैश्च पूरितम्। घटं कलशं प्राच्‍र्य। हवनं होमम्। विधानतः परिधिस्थापनादिक्रमेण प्रारभेत।। 82।।

विवरणम्

ततो धारणाक्रमविशोधिता इति। पीठपूजानन्तरं शोषणदहनप्लावनकाठिन्यकरणैः क्रमतो विशोधिता इत्यर्थः। **स्वाणुतः समभिपूज्य च** इति स्वमूलमन्त्रेणावाह्य साङ्गाराधनमुक्तम्। यद्वा 'ईशेऽष्टाभिरि'ति वक्ष्यमाणमन्त्रैः पूजनं प्रतीष्टकं मूलमध्याग्रेषु भागेषु त्रितत्त्वपूजापि परतत्त्वादिक्रमेण मन्त्रविदा कार्या। प्राच्‍र्येति मूलेनावाहनादिपूर्वकं पूजनमुक्तम्। प्रारभेत हवनमिति ततः परिधि-निधानादिकमुक्तम्। विधानविदिति होमविधानम्। वक्ष्यति च-'प्रारब्धाग्निमुखा स्वगृह्यविहितेने'त्यादि। यद्वा, द्वास्थानोदग्भागे मण्डपस्य संस्करणम्। तद्वेद्यामिष्टकाद्यधिवासस्तदुदगलिन्द एव वा। नागपदे स्वकुण्डे हवनमित्येतदपि सर्वं विधानविदित्युक्तम्।। 82।।

These bricks are to be purified and dried properly and worshipped employing particular mantras. Then the pot filled up with jewels and water needs to be worshipped before the actual Havana – sacrificial ritual is started in the proper way. (82)

पक्वात् प्राग् भर्गदुर्गास्मरमुरभिदि मूलाक्षरैर्विघ्नराजे
पक्कान्ते द्वादशाख्याभिरिह हरिहरे पञ्चतत्त्वैस्त्रिधाम्नि।
मूलार्णैस्त्र्यम्बके ब्रह्मभिरपि घृतमाहुत्य भूराहिमन्त्रै-
राज्यं द्रव्याहुतेः प्राङ् मुरभिदि जुहुयादूर्ध्वतश्चेतरेषु।। 83।।

विमर्शिनी

भर्गदुर्गास्मरमुरभिदि शिवदुर्गाशङ्करनारायणेषु। पक्वात् पक्वहोमात्। प्राक् पूर्वम्। मूलाक्षरैः मूलमन्त्रस्याक्षरैः 'ओं स्वाहा' 'नं स्वाहा' इत्यादिभिः। विघ्नराजे गणपतौ। पक्कान्ते द्वादशाख्याभिः 'ओं वज्रदन्ताय स्वाहा' इत्याद्यैर्द्वादशनामभिः। हरिहरे शङ्करनारायणे। इह पक्वान्ते पञ्चतत्त्वैः। त्रिधाम्नि

---

1. 'नं च मन्त्रवित्।। ' क. पाठः,
2. 'नवित्।।' ख. पाठः

विष्णौ। इह मूलार्णैः मूलमन्त्रस्याक्षरैः। त्र्यम्बके शिवे। इह ब्रह्मभिः पञ्चब्रह्ममन्त्रैः घृतहोमः स्यात्। अथ मुरभिदि विष्णौ। द्रव्याहुतेः प्राक् पुरः। भूरादिमन्त्रैः वक्ष्यमाणैराज्यं जुहुयात्। इतरेषु तदन्येषु। ऊर्ध्वतः द्रव्यहोमादूर्ध्वतश्च जुहुयात्।। 83।।

विवरणम्

तत्र होमे विशेषं दर्शयति–पक्वात् प्रागिति। इह भर्गदुर्गास्मरमुरभिदि पक्वात् प्राङ् मूलाक्षरैर्घृतहोम इति सम्बन्धनीयम्। कर्तव्य इति शेषः। मूलाक्षराणि च सबिन्दुकानि प्रणवपुटितानि स्युः। 'प्रारभेत हवनं व मन्त्रविदित्ये'वं निर्देशेन वैतल्लभ्यते। शिवे पीठमन्त्रैर्मूलाक्षरैश्चाज्यं हुत्वा तत्पुरुषेण पक्वं हुत्वा पुनः सद्यादिब्रह्मभिः प्रणवस्थाणुमन्त्रादिभिः पूजामन्त्रैश्च आज्यं हुत्वा व्योमव्यापिदशार्णेन पूर्णां जुहुयादिति क्रमः। एवं दुर्गादिष्वपि प्रयोगो विवेचनीयः। द्रव्याहुतेः प्रागिति। 'गायत्र्या सकलेष्वि'ति वक्ष्यमाणस्य द्रव्यहोमस्य ग्रहणम्। ऊर्ध्वतश्चेतरेष्विति। शिवादिषु चतुर्द्रव्यहोमं कृत्वा भूरादिमन्त्रैराज्यहोम इत्यर्थः।। 83।।

In the case of Bharga (Śiva), Durgā (Goddess) and Smaramurabhid (Śaṅkaranārāyaṇa) Mūlākṣaramantra is to be chanted before the Pakvahoma. In the case of Vighnarāja (Gaṇapati) the twelve syllablled mantra is to be used at the culmination of the Pakvahoma. In the case of Harihara (Śaṅkaranārāyaṇa) Pañcatattva mantra is to be used at the end of Pakvahoma while in the case of Viṣṇu the Mūlamantra is fixed. In relation to Śiva, ghee should be poured into the sacrificial fire chanting Pañcabrahma mantra. In the case of Viṣṇu the oblations are to be poured chanting Bhūrādimantra (which will be given here). In the case of other deities everything is to be done after the dravyahoma. (83)

भूराद्याः पृथगेव लोकपतयश्चाग्निश्च सोमो ग्रहा
नक्षत्राणि ससंप्रदान[1]ठयुगा भूतानि नागा हरौ।
सर्वाश्चाप्यथ देवतास्तदनु विश्वे चापि देवाः पुन–
र्विष्णुर्व्याहृतयश्च विष्णुपदमूलास्तेऽणवोऽन्येष्वतः।। 84।।

गायत्र्या सकलेषु प्रजुहोतु समिद्घृतान्नसर्पींषि।
पूर्णान्तं साष्टशतं दुर्गायां तानि मूलमन्त्रेण।। 85।।

विमर्शिनी

भूरादिमन्त्रानाह–भूराद्या इति। हरौ भूराद्याश्चत्वारोऽणवः। अथ लोकपतयः इन्द्राद्याः। पृथगेव 'इन्द्राय स्वाहा' 'अग्नये स्वाहा' इत्याद्याः। अग्निः सोमः ग्रहा नक्षत्राणि भूतानि नागाः सर्वाश्चापि देवताः तदनु विश्वे चापि देवाः पुनर्विष्णुश्च। एते ससंप्रदानठयुगाः[2] संप्रदानेन चतुर्थ्या ठयुगेन स्वाहाकारेण

1. 'ठद्वयं स्वाहा। द्विठमेव चेत्यस्य व्याख्याय द्विठं विसर्गस्तस्य बिन्दुद्वयात्मकत्वात्। विसर्गशब्देन च लक्षितलक्षणया स्वाहाकारो लक्ष्यते। स्वाहाशब्देनैव वह्नौ त्यागात् त्यागस्य च विसर्गपर्यायत्वाद् इत्येवं रघुनन्दनादिसम्प्रदायविदः।।' इति बृहदभिधानम्।

2. 'गाः प्रसिद्धवत् सं' ख. पाठः,

च युक्ताः पुनर्व्याहृतयश्च। अत्र 'सर्वाभ्यो देवताभ्य' इत्येक एव मन्त्रः। 'विश्वेभ्यो देवेभ्य' इति व। अतोऽन्येषु देवेषु। विष्णपदमूलाः विष्णुस्थाने मूलमन्त्राः। तेऽणवो मन्त्राः।। 84।।

पुनर्होमशेषमाह–गायत्र्येति। सकलेषु समिद्घृतान्नसर्पींषि चत्वारि द्रव्याणि। गाय[1]त्र्या स्वस्वगायत्र्या। साष्टशत[2]म् अष्टसहितशतं पूर्णान्तं प्रजुहोतु। दुर्गायां मूलमन्त्रेण तानि द्रव्याणि प्रजुहोतु।। 85।।

विवरणम्

भूराद्या इति। चतस्रो व्याहृतयः पृथगेव। लोकपतय इति। इन्द्रादिदशदिक्पालाः। अत एव नक्षत्राणां (न?) पृथक् परिग्रहो भवति। ससम्प्रदानठयुगा इति सर्वत्र सम्बध्यते। सम्प्रदानं चतुर्थी, ठयुगं स्वाहाकारः। सर्वा देवता इति सम्बन्धनीयम्। एवं विश्वे देवा इति। अतोऽन्येषु तेऽणवो विष्णुपदमूला इत्यन्वयः। शर्वादिष्वपि ते एव मन्त्राः, किन्तु विष्णुपदमन्त्रस्थाने स्वं स्वमूलं योज्यमिति भावः।। 84–85।।

For Viṣṇu there are the (four mantras beginning with "bhūḥ", for the lords of the quarters (Lokapatis) there are separate mantras (like Indrāya Svāhā etc., totalling ten) which are to be pronounced in the dative case (Caturthi) along with 'Svāhā', Then there are mantras for Bhūtas, Nāgas and Viśve devāḥ requiring their respective Mūlamantras (which form a total of twenty seven) In the Mantra "Viṣṇave Svāhā" the name of goḍ is to be replaced by that of other deities (as is necessary.) (84)

In the case of all deities samit (sacrificial tinder) ghee with boiled rice anḍ again ghee are to be poured in the sacrificial fire 108 times using Gāyatrī mantra. But these are to be given to Durgā using Mūlamantra. (85)

पक्वान्ते नामद्विषट्केन दिक्पैर्भूतैश्चाज्यं बाहुलेये महद्भिः।
चन्द्रार्काभ्यां कालवह्निग्रहैर्दिङ्नक्षत्रैर्द्रव्यं हुनेन्मूलतोऽन्ते।। 86।।

विमर्शिनी

बाहुलेये स्कन्दे पक्वान्ते। नामद्विषट्केन नाम्नां द्वादशकेन। दिक्पैरिन्द्राद्यैः। भूतैर्महद्भिः चन्द्रार्काभ्याम्। कालवह्निग्रहैः कालेन वह्निना ग्रहैश्च। दिङ्नक्षत्रैः दिग्भिर्नक्षत्रैश्चाज्यं हुनेत्। एतेषां नाममन्त्रैराज्यं हुनेदित्यर्थः। अन्ते मूलतो द्रव्यं हुनेत्।। 86।।

विवरणम्

सर्वेष्वपि सप्तविंशतिरेव मन्त्रा भवन्ति, स्कन्दे तु भेदमाह–पक्वान्त इति। नामद्विषट्कं द्वादशनामानि। वक्ष्यति व–स्कन्दो बाण इत्यादि। अत्र पक्वं हुत्वा द्वादशनामभिराज्यहोमः। पूजामन्त्राज्यहोमं पूर्णाहुतिं च कृत्वा लोकपालादिभिराज्यहोमः। सम्प्रदानठयुगयोगोऽत्रापि स्यात्। महद्भिरिति पृथक्पदम्। पूर्णां हुत्वान्ते मूलतश्चतुर्द्रव्यहोम इति।। 86।।

In relation to Bāhuleya (Skanda = Subrahmaṇya) oblations are to be

1. 'त्र्या सा' क. ख. पाठः,
2. 'तं पू' ग. पाठः

given invoking him with his twelve synonyms. Further he is to be invoked using the respective mantras of the lords of quarters (like Indrāya Svāhā) as also by the ones invoking moon, sun, kāla, vahni, grahas and nakṣatras. At the end using his Mūlamantra the oblations are to be put into the sacred fire. (86)

पक्वान्ते षणमन्त्रकैराज्यमार्ये
हुत्वा गायत्र्या चतुर्द्रव्यकं च।
गोप्त्राद्याख्या षड्युजेन्द्रादिन-
क्षत्रान्तैः स्कन्दोक्तैश्च सर्पिर्जुहोतु।। 87।।

विमर्शिनी

आर्ये पक्वान्ते षण्मन्त्रकैः रेवन्तादिभिः आज्यं हुत्वा गायत्र्या चतुर्द्रव्यकं च हुत्वा। गोप्त्राद्याख्याषड्युजा गोप्त्रादिनामद्वादशकेन। इन्द्रादिनक्षत्रान्तैः स्कन्दोक्तैः स्कन्दस्योक्तैर्मन्त्रैश्च सर्पिर्जुहोतु।। 87।।

विवरणम्

शास्तर्यपि भेदमाह–पक्वान्त इति। षणमन्त्रकैरिति। वक्ष्यति च 'रेवन्तश्च तथा शास्ते' त्यादि। पूजामन्त्रतदीयपूर्णानन्तरमेव द्रव्यहोमः। गोप्त्राद्याख्याषड्युजेति द्वादशनामानि च। वक्ष्यति च–गोप्ता च पिङ्गलाक्षश्चेत्यादि।। 87।।

For Ārya (Śāsta) after the Pakvahoma is finished his six synonyms (like Revanta etc.) are to be used for invoking using the Gāyatrī related to him the four items (samit, ghee etc.) may be poured, using the twelve names as well as those of moon etc., mentioned in the case of Skanda, mantras may be used properly and oblations be given. (87)

स्विष्टकृत्प्रभृतिहोमविरामे प्राप्य सर्पिरपि तासु घटे च।
तद्द्वयं समधिवास्य निशीति स्थापयेत् तदनु ताः सुविलग्ने।। 88।।

विमर्शिनी

स्विष्टकृत्प्रभृतिहोमविरामे स्विष्टकृदादिहोमावसाने। सर्पिः संपातमपि। तास्विष्टकासु। घटे कलशे च प्राप्य। तद्द्वयं निशि समधिवास्य तदनु ताः इष्टकाः। सुविलग्ने शोभने मुहूर्ते। इति वक्ष्यमाणविधिना स्थापयेत्।। 88।।

विवरणम्

सर्पिः प्राप्येति सम्पातस्पर्शनमुक्तम्। पुनस्तन्मन्त्राराधनजपौ न्यायसिद्धौ। तद्द्वयं समधिवास्येति वस्त्राच्छादनादिकमुक्तम्। निशीति। अधिवास्येति सम्बन्धनीयम्। रात्रावेवमधिवास्येत्यर्थः। तदनु ततः पश्चात्। परेद्यवीति यावत्। यदुक्तं 'श्वोभूते प्रासादद्वारदेशं चे' त्यादि। सुविलग्ने मुहूर्ते।। 88।।

At the end of the sacrifice called Swiṣṭakṛt ghee etc., may be sprinkled on the bricks as well as on the pot. Both of them (brick and pot) after covering

with cloth are to be fixed in the proper place at night selecting an auspicious time. (88)

प्रासादद्वारस्य वामेतरस्मिन्
पार्श्वोद्देशे भावितत्पादुकान्तः।
भूमिं कृत्वा सुस्थिरां शोधयित्वा
मात्वा क्षेत्रं कल्पयेदिष्टकानाम्।। 89।।

विमर्शिनी

प्रासादद्वारस्य वामेतरस्मिन् दक्षिणे पार्श्वोद्देशे द्वारशाखाधोभागे। भावितत्पादुकान्तः भविष्यतः पादुकस्यान्तर्भागे। भूमिं सुस्थिरां कृत्वा। शोधयित्वा मार्जनादिभिः संशोध्य। मात्वा मानं कृत्वा। इष्टकानां क्षेत्रं यथा, तथा कल्पयेत्।। 89।।

विवरणम्

वामेतरस्मिन्नित्यसन्देहा[1]र्थमभिधानम्। प्राग्द्वारे प्रासादे याम्याया द्वारशाखाया दक्षिणतः प्रत्यग्द्वारे सौम्याया द्वारशाखाया उत्तरत इति। प्रासादग्रहणान्मुखमण्डपसम्भवे तद्ग्रहो न भवति। भावितत्पादुकान्तरिति। भाविनः प्रासादीयपादुकस्य आभ्यन्तरोद्देशे। भूमिं सुस्थिरां कृत्वेति यत्नतोऽपि स्थलदृढीकरणमुक्तम्। यद्वाधारेष्टका[2]निधानमुच्यते। शोधयित्वेति। मुष्ट्यादिभिः तत्स्थलशुद्धिरुक्ता। मात्वा क्षेत्रं कल्पयेदिति। सवर्ष्टेकाचित्युपपत्त्या चतुरश्रस्य मानमेकैकेष्टकोपधानोपपत्त्या च तदवान्तरचतुरश्राणां मानमिति ज्ञेयम्। क्षेत्रं च तथाविधं गृह्यते। कल्पनं च रेखे लिखेदित्येत-ल्लेखनसौकर्यसिद्धये मूलाग्राद्युचितोद्देशाङ्कनं तदुचितरेखोत्किरणं वा भवति[3]। मानकल्पने चौचित्यात् पुरैव तक्षभिः सह कार्ये।। 89।।

Towards the right side of the door of the (proposed) shrine in the specific space forming the base or foundation the bricks are to be put properly according to measure after digging and clearing the pit which is the proper place. (89)

क्षेत्रे चतुष्पदयुते चतुरश्ररूपे
रेखे लिखेच्छिखिमरुत्पदयोः पुरोग्रे।
तच्छिष्टकोष्ठयुजि पिप्पलशङ्कुनोद-
गग्रेध्रुवेण सकलेषु शिवेऽस्त्रतो वा।। 90।।

विमर्शिनी

चतुष्पदयुते चतुरश्ररूपे क्षेत्रे। शिखिमरुत्पदयोः अग्निवायुकोणगतपदयोः पुरोग्रे प्रागग्रे। तच्छिष्टकोष्ठयुजि तच्छिष्टयोर्नैर्ऋतीशकोष्ठयोः द्वये उदगग्रे। पिप्पलशङ्कुना अश्वत्थवृक्षनिर्मितशङ्कुना।

---

1. 'र्थमित्य' क. ख.,
2. 'काधा' ख.,
3. 'ति। न मा' ग. पाठः

सकलेषु देवेषु। ध्रुवेण प्रणवेन। शिवेऽस्त्रतो वा रेखे लिखेत्। अयं भावः–त्रिकरवर्गभवे प्रासादे चतुरङ्गुलाधिककरमानेन समचतुरश्रं क्षेत्रं कृत्वा 'यद्वार्काहियुगैर्मिता ततिवितत्युत्सेधवत्योऽङ्गुलैरि'ति कर्मशेषे वक्ष्यमाणरीत्या द्वादशाङ्गुलदीर्घा अष्टाङ्गुलविस्तृताश्चतुरङ्गुलोत्सेधाश्चाष्टेष्टका ईशवाय्वोः पूर्वापरायता इतरयोरन्यथारूपाश्च स्थाप्याः। तथा सति मध्ये चतुरङ्गुलसमविस्तारस्य गर्भपात्रस्य गर्तं भवतीति।। 90।।

विवरणम्

क्षेत्रे इति। प्रागादिचतुष्पर्यन्तेषु प्रागुदगग्रतया प्रदक्षिणक्रमेण रेखा लिखंश्चतुरश्रं विदध्यात्। पुनस्तस्मिन्नायतचतुरश्ररूपपदचतुष्टययुततया प्रागेव कल्पिते सत्याग्नेयपदे प्रागग्रे द्वे रेखे नैर्ऋतपदे सौम्याग्रे वायव्यपदेऽपि प्रागग्रे पुनरैशानपदे व उदगग्रे प्रदक्षिणक्रमतो लिखेदिति प्रयोगक्रमोऽभिप्रेतः। तथाच तत्क्षेत्रोदरे परमल्पचतुरश्रं निष्पन्नं भवेदिति। ध्रुवः प्रणवः।। 90।।

In the case of (the temple of all Gods) a square plot is to be fixed by fixing spikes made of Pepul tree. This square is to be divided into four sections. A line is to be drawn in the regious of Śikhi (Vahnī) meaning south east and marut (Vayu) meaning north – west. In the remaining two corners of Nirṭi (South East) and Īśa (North east) a connecting line is to be drawn chanting praṇava or Astramantra. Two lines may be drawn pointing to the north of the ground. And their two lines from the other corners towards east. In these lines bricks (twelve) may be fixed. (By this way the pit for gartanyāsa (sanctum sanctorum) can be decided. (90)

पीठं वर्मसमुक्षितेऽत्र परिपूज्यान्तः स्थितः संस्मरन्
देवं साञ्जलिरीश्वरे गिरिशवारं मूलमष्टावरम्।
अन्येष्वप्यभिजप्य वह्निचितिमासूद्वास्य चाष्टेष्टका-
श्चिन्वीतोन्नतिनिम्नते परिहरंस्तुल्या यथोपानहा।। 91।।

विमर्शिनी

अथ वर्मसमुक्षिते अत्र स्थले पीठं परिपूज्य। अन्तः स्थितः अन्तर्भागे तिष्ठन्। साञ्जलिरञ्जलियुक्तो देवं संस्मरन्। ईश्वरे शिवे। गिरिशवारम् एकादशवारम्, अन्येष्वष्टवरमपि मूलमभिजप्य। वह्निचितिं वह्निचैतन्यम्। आसु इष्टकासूद्वास्याष्टेष्टकाश्च यथा उपानहा तुल्या भवन्ति तथोन्नतिनिम्नते परिहरन् उन्नतिं निम्नतां च परिहरंश्चिन्वीत।। 91।।

विवरणम्

अत्र वर्मसमुक्षिते पीठं परिपूज्येत्यन्वयः। अन्तः स्थितः साञ्जलिर्देवं संस्मरन्निति। प्रासादान्तर्ब्रह्मभागे स्थितस्य देवस्य तत्सन्निधाववस्थितेनाभिध्यानमेतत् प्रासादनिर्माणप्रारम्भाभ्यनुज्ञापनार्थमिति। यद्वान्तर्देवं संस्मरन्निति स्वहृद्येव पश्चात् ब्रह्मस्थानभाजि बिम्बे समावाह्यस्य देवस्यानुसन्धानमुक्तम्। चिन्वीतेति। चयनमुपधानम्। उन्नतिनिम्नते परिहरन्निति परस्परापेक्षं, मिथस्समा यथा स्युः तथा चिन्वीतेति स्वसीमापेक्षं वा। तदेतदाह–तुल्या यथोपानहेति। तथा चिन्वीतेति सोपस्कारमन्वयः। यदुक्तम्–"उपान(ध्व ?द्व)त् प्रयुञ्जीत वर्जयेन्निम्नमुन्नतम्" इति।। 91।।

In the plot purified and protected with (Kavaca) mantras the elevated seat (pitha) may be worshipped by the preceptor who shall stand inside the fixed land and meditate upon the God Śiva with folded hands for eleven times. In the case of other deities it shall be eight times using the mūlamantra. Then kindling sacred fire the eight bricks shall be arranged in a level at the base avoiding uneven appearance. (91)

ईशेऽष्टाभिः सद्यजाभिः कलाभि-
वह्न्यंशादीशांशनिष्ठं क्रमेण।
लक्ष्मीशोमाश्रीशयोर्मूलवर्णै-
श्चिन्वीतान्येषु स्वमूलेन चैनाः।। 92।।

विमर्शिनी

एना इष्टकाः। वह्न्यंशादीशांशनिष्ठं वह्न्यंशमारभ्येशांशेऽवसानं यथा भवति तथा क्रमेण। ईशे सद्यजाभिः कलाभिः अष्याभिः सद्योजातकलाभिः। लक्ष्मीशोमाश्रीशयोः विष्णुशङ्करनारायणयोः। मूलवर्णैर्मूलमन्त्रस्याक्षरैः। अन्येषु स्वस्वमूलेन च चिन्वीत।। 92।।

विवरणम्

क्रमेणेति। वह्निभागे द्वे इष्टके उत्तरदक्षिणपदयोरुपधेये। नैर्ऋतभागे प्राक्पश्चिमपदयोरित्यादिरूपः क्रम उक्तः। प्रणवरुद्धा नमोन्ता इह मन्त्राः स्युः।। 92।।

The bricks are to be arranged from Agnikoṇa to Īśānakoṇa (South east to north east). In the case of Śiva the mantra like Sadyojāta having eight elements, for Viṣṇu and Śaṅkaranārāyaṇa using respective Mūlākṣara mantra numbering eight and in the case of other deities their own respective mantra may be used (for the fixing of the bricks). (92)

आवाह्यात्र निजेन मूलमनुना देवं सहाङ्गं यजेदा-
लिप्यामलया मृदा कलशवारापूर्य गर्भावटम्।
वीक्षेताक्षतसूनमोमिति जपन् क्षिप्त्वा जलावर्तकं
वामावर्तसमुद्भवेऽस्त्रहुतसंपातं व संपातयेत्।। 93।।

विमर्शिनी

अत्र निजेन मूलमनुना देवमावाह्य। सहाङ्गम् अङ्गैः सहीतं यजेत्। अमलया मृदा तद्विवरमालिप्य। कलशवारा कलशजलेन। गर्भावटं गर्भस्थानगर्तमापूर्य ओमिति जपन् अक्षतसूनं तत्र जले क्षिप्त्वा जलावर्तं वीक्षेत। वामावर्तसमुद्भवे वामगत्यावर्ते जाते सति तत्प्रायश्चित्तार्थम् अस्त्रहुतसंपातं चास्त्रेणाज्यं हुत्वा तत्संपातं च संपातयेत्।। 93।।

विवरणम्

यजेदिति मूलजपोपलक्षणम्। ओमिति जपन् अक्षतसूनं क्षिप्त्वा जलावर्तकं वीक्षेतेत्यन्वयः। सूनं पुष्पं, तच्च शुक्लमिति सम्प्रदायः।। 93।।

Here the god is to be invoked using the Mūlamantra and one shall perform the Aṅganyāsa and sacrificial rituals. Thereafter plastering the spot with cleaned mud and the pit should be filled with water. The cavity is created at the centre with the arrangement of bricks. After pouring the water the preceptor should put flowers and Akṣata etc., and find out how the water moves within the cavity. If the water moves towards the left along with the flowers and while Akṣata thrown in it, expiation is needed in the form of pouring oblations with the chanting of Astramantra. (93)

मनुवरमहितं महास्त्रगुप्तं विभुमभिकल्प्य तथेष्टकाश्चतस्त्रः।
तदुपरि विनिधाय धान्यमृद्भिर्दृढमवटं परिपूर्य साधु रक्षेत्।। 94।।

विमर्शिनी

मनुवरमहितं महास्त्रगुप्तं मूलमन्त्रपूजितं स्वस्वमहास्त्रेण रक्षितम्। विभुं देवमभिकल्प्य। तथा तदुपरि तासामिष्टकानामुपरि चतस्त्र इष्टकाश्च विनिधाय। धान्यमृद्भिर्धान्यैर्मृद्भिश्च। अवटं गर्तं दृढं परिपूर्य। साधु यथावद् रक्षेत्।। 94।।

विवरणम्

मनुवरमहितमिति। पुनरपि मूलेन किञ्चिद्यजनमुक्तम्। महास्त्रगुप्तमिति स्वास्त्रेण तालत्रयादिकमुक्तम्। महद्विशेषणं त्वादरार्थम्। साधु रक्षेदिति। पुनरपि तालत्रयादिकं लौकिकपुरुषै रक्षाकरणं चोक्तम्। यदुक्तम्–'त्रिरात्रं रक्षाविधानं कृत्वा ततः कर्म समारभेत' इति। 'त्रिरात्रं विष्णुभूतास्तत्र क्रीडन्तीति' च। विष्णुग्रहणं शिवाद्युपलक्षणार्थमिति।। 94।।

The four bricks sanctified and worshipped with the Mūlamantra may be put above the pit on all sides. Over the same paddy and mud may be put into the cavity and filled up properly and firmly. (94)

ततः समभ्यर्चितवास्तुरत्र शुभेऽह्नि गर्भोचितसाधनानि।
संभृत्य मन्त्री विनिधाय वह्निं समारभेतोत्तरतोऽग्निकार्यम्।। 95।।

विमर्शिनी

ततः शुभेऽह्नि शुभदिवसे रात्रावत्रापि। समभ्यर्चितवास्तुः सम्यग् वास्तुबलिकृत्। मन्त्री आचार्यः। स्वयं गर्भोचितसाधनानि गर्भाधानयोग्यानि साधनानि संभृत्य तस्य गर्भन्यासस्थानस्योत्तरतो वह्निं विनिधाय। अग्निकार्यं होमकर्म समारभेत।। 95।।

विवरणम्

गर्भाधानं प्रस्तौति। तत इति। समभ्यर्चितवास्तुरिति। पूर्वस्यां रात्रावियं वास्तुपूजा भवति। गर्भोचितसाधनानि सम्भृत्येति। दुस्सम्पादसम्भारसम्भवात् सम्भारभूयस्त्वाद् वा एतदभिधानम्। यद्वा नात्र प्रतिनिधानमुचितमिति। मन्त्रीति स्नानादिपूर्वकमात्मनः सकलीकरणादिकमुक्तम्। समारभेतेति परिधिनिधानादर्वाक्तनमुक्तम्।। 95।।

After propitiating the Vāstu on an auspicious day and collecting materials to be put in the so-called Garbhagṛha, the dark cell in the centre of the shrine room, the Preceptor shall lit the sacred fire and proceed to perform the sacrificial ritual. (95)

न्यस्य न्यग्बिलमग्निदक्षिणदिशि व्रीह्यादिमन्मण्डले
पात्रं ताम्रमयं पिधानसहितं गव्यादिसंशोधितम्।
पीठाराधनपूर्वमत्र कृतसंस्कारे समुत्तानिते
कुर्यात् सागरमृद्धृतिं धृतहिरण्येनाग्रदोष्णा सुधीः।। 96।।

विमर्शिनी

अग्निदक्षिणदिशि अग्नेर्दक्षिणभागे। व्रीह्यादिमन्मण्डले व्रीह्यादिभिर्विरचितपीठे मण्डले। ताम्रकृतं ताम्रेण कृतम्। पिधानसहितमुत्तरच्छदेन सहितम्। गव्यादिसंशोधितं गव्याष्टगन्धजलैः क्षालितम्। पात्रं गर्भपात्रम्। न्यग्बिलम् अधोमुखं न्यस्य। पीठाराधनपूर्वं पीठाराधनं पूर्वं यथा भवति तथा। कृतसंस्कारे प्राणायामादिभिः संस्कृते। समुत्तानिते सम्यगुत्तानीकृतेऽत्र। धृतहिरण्येन हिरण्मयपवित्रसहितेन। अग्रदोष्णा कराग्रेण। सागरमृद्वृतिं समुद्रमृत्तिकया वृतिं सीमानं कुर्यात्। सुधीरिति सागरमृदा वृतिकल्पनायां तस्य पात्रस्य भूमण्डलरूपेण ध्यानमुक्तम्।। 96।।

विवरणम्

व्रीह्यादिमन्मण्डल इति। स्वस्तिकमष्टदलकमलं वा मण्डलमालिख्य तत्र वस्त्रान्तरितै-र्व्रीहितण्डुलादिभिः पीठं विधाय तस्मिन्नित्यर्थः। गर्भपात्रलक्षणमपि कर्मशेषे भविष्यति। गव्यादि-संशोधितमिति केवलोदकगोमूत्रगव्यगन्धजलादय उक्ताः। कृतसंस्कार इति, गन्धालेपन-सन्धूपनशोषणादयः। अग्रदोष्णेति। हस्ताग्रेण। सुधीरिति। "भूमण्डलमनन्तस्थं सशैलाम्भोधिदिग्गजम्" इत्येवमंभिध्यानकुशल इति भावः। अनेन तत्र प्रथममनन्तसन्निधानमपि समुचितमिति सूचितम्।। 96।।

Towards the South of the sacred fire candles a copper pot with a suitable lid may be placed in an altar shaped by paddy etc., after clearing the same with Pañcagavya and Aṣṭagandha mixed water. This vessel called Garbhapātra(which is to form the womb of the shrine) is to be placed at first with its mouth drawn and it is to be raised later and its inner part may be rubbed with the mud obtained from the sea shore by the preceptor with his fingers of the palm having a golden ring. (96)

कुड्यश्लेषमिह प्रकल्प्य वृतिमादावन्तरालस्थितं
प्रत्यक्प्राक्स्थमवागुदक्स्थमपि रेखाद्वन्द्वमापादयेत्।
पात्रेऽस्मिन् नवखण्डमण्डितमहीसंस्थानरूपे स्फुर-
द्वर्णाम्भोजचितीति तत्तदुदितद्रव्याणि विन्यस्यतु।। 97।।

विमर्शिनी

इह गर्भपात्रे आदौ वृतिम्। कुड्यश्लेषं कुड्ये श्[1]लष्टं यथा तथा प्रकल्प्य। प्रत्यक्प्राक्स्थं

1. 'श्लेषं य' ख. पाठः

प्राक्प्रत्यग्गतम्। अवागुदक्स्थं दक्षिणोत्तरततमप्यन्तरालस्थितं रेखाद्वन्द्वम्। आपादयेत् कुर्यात्। नवखण्डमण्डितमहीसंस्थानरूपे नवभिः खण्डैर्मण्डितायाः पृथिव्याः संस्थानस्वरूपे। स्फुरद्वर्णाम्भोजचिति लिपिपङ्कजपूजया स्फुरल्लिपिपङ्कजचैतन्ययुक्तेऽस्मिन् पात्रे। तत्तदुदितद्रव्याणि तस्य तस्य देवस्योक्तानि द्रव्याणि। इति वक्ष्यमाणविधिना विन्यस्यतु।। 97।।

विवरणम्

सागरमृद्वृतिप्रकारं दर्शयति–कुड्यश्लेषमिति। क्रियाविशेषणमेतत्। इहेति तस्मिन् पात्रे। गर्भपात्रस्य चतुर्दिशमुन्नतो भित्तिस्थानीयोऽवयवः कुड्यमभिप्रेयते। तत्र श्लेषो यथा भवति तथा प्रथमतः प्रागादिप्रदक्षिणतया वृतिं विधाय पुनस्तदन्तर्भागे पश्चादारभ्य प्राक्संस्थं दक्षिणत आरभ्य उदगन्तं च रेखाद्वयं सागरमृदैव रचयेत्। प्रत्यक्प्रागित्येवमाकारेण तिष्ठतीति प्रत्यक्प्राक्स्थम्, एवमवागुदक्स्थम् इत्येतदपि। अवाग् दक्षिणम्। नवखण्डमण्डितमहीसंस्थानरूप इति। भारतादिनवखण्डैर्मण्डिता मही इयं भूमिः तस्या एवेयं गर्भपात्रतलाकारेण नवखण्डयोगितया स्थितिश्चिन्तनीयेति भावः। पूर्वमिह सन्निधापितानन्तशिरोवर्तितया भूमेस्तन्मन्त्रेणास्मिन् पात्रे सन्निधापनमपि सूचितम्। स्फुरद्वर्णाम्भोजचितीति, लिपिपङ्कजपूजनमुक्तम्। इतिशब्दो वक्ष्यमाणपूजनप्रकारार्थः।। 97।।

Once the mud plastered inside the vessel is firmly set two lines may be drawn inside the vessel one each from west to east and south to north. Now there will be nine columns there which may be conceived as the nine regions of the earth. Thereafter lipipaṅkaja (letters forming the shape of lotus) is to be worshipped and oblatory offerings may be placed according to the preference of the various deities conceived. (97)

मृन्मूलधातुमणिबीजकलोहक्लृप्त्या
द्रव्यार्पणं भवति सर्वसुपर्वगर्भे।
स्कन्देऽथ वाहमणिलोहकधातुबीज-
मृत्कन्दकक्रमतयेत्यपि वा प्रभेशे।। 98।।

विमर्शिनी

सर्वसुपर्वगर्भे सर्वेषां सुपर्वणां देवानां गर्भे। मृन्मूलधातुमणिबीजकलोहस्लृप्त्या मृदः मूलानि धातवः मणयो रत्नानि बीजानि लोहानि इति क्लृप्त्या द्रव्यार्पणं द्रव्याणामर्पणं भवति। अथ स्कन्दे वाहमणिलोहकधातुबीजमृत्कन्दकक्रमतया (स्व?)वाहाः स्ववाहनादीनि मणयः लोहानि धा (तूनि ?तवः) बीजानि मृदः कन्दाः इति क्रमतया भवति। प्रभेशेऽपीति द्रव्यार्पणम्।। 98।।

विवरणम्

अथ तत्तद्द्रव्याणि समुच्चयतो विवक्षन् प्रथमं तेषां हरिहरादिविषयं क्रमं दर्शयति–मृन्मूलेति। मणयो रत्नानि लोहशब्देन सुवर्णादीनां तद्विकृतवाहनादीनामपि ग्रहणम्। सुपर्वाणो देवा हरिहरादयः, कन्दकानि मूलानि इति। अपि वा प्रभेश इति। एवं स्कन्दोक्तक्रमेण वेत्यर्थः।। 98।।

For all deities the objects to be put in the vessel are mud, roots, jewels,

seeds and metals in that order. In the case of Skanda the order of placing things are his vehicle, jewels, metals, seeds, mud and roots. In the case of Śāsta the order may either be the first or the second as desired. (98)

भूभृत्तीर्थतरङ्गिणीह्रदकुलीरावासवल्मीकभू-
धान्यागारगजोक्षशृङ्गजमृदो दिक्कोणमध्ये न्यसेत्।
सेनानीतरदेवतास्वाधिदिशं पाथोजनीलोत्पलो-
त्पन्ने कैरवलोहितोत्पलसमुत्पन्ने च मूलान्यपि।। 99।।

विमर्शिनी

सेनानीतरदेवतासु स्कन्देतरेषु। भूभृत्तीर्थतरङ्गिणीह्रदकुलीरावासवल्मीकभूधान्यागारगजोक्षशृङ्गजमृदः भूभृत् पर्वतः तीर्थं प्रसिद्धं तरङ्गिणी नदी कुरीरावासः कर्कटकगुहा वल्मीकभूः वल्मीकभूमिः धान्यागारं खलः गजोक्षशृङ्गे गजशृङ्गमुक्षशृङ्गं च तेभ्यो जाता मृदः। दिक्कोणमध्ये पूर्वादिदिक्षु अग्न्यादिकोणेषु मध्ये च न्यसेत्। अधिदिशमिति सप्तम्यर्थेऽव्ययीभावः, दिक्ष्वित्यर्थः। तत्पूर्वादीत्यर्थात्। पाथोजनीलोत्पलोत्पन्ने पाथोजं पद्मं नीलोत्पलं कुवलयं ताभ्यामुत्पन्ने द्वे, कैरवलोहितोत्पलसमुत्पन्ने च कैरवं कुमुदं ( ) ताभ्याम् उत्पन्ने च द्वे इति चत्वारि मूलान्यपि न्यसेत्।। 99।।

विवरणम्

भूभृत् पर्वतः तरङ्गिणी नदी धान्यागारं खलं वल्मीकादिभ्यो भवन्ति धान्यागारादिभ्यो जायन्त इति च कृत्समासः। सेनानीतरदेवतासु स्कन्दव्यतिरिक्तेधु देवेषु पूर्वत्रापि सम्बन्धनीयमेतत्। अधिदिशमिति। पूर्वादिचतुर्दिक्षु।। 99।।

In the case of Gods with exception to Skanda in all the four quarters and corners objects like sand collected from hills, holy ghats, rivers, river-depth, place where the crab is located, anthill, paddy field, mud stuck to the task of an elephant and horn of a bull may be deposited. Thereafter on the four quarters beginning with the east the bulbs (roots) of lotus, and blue lotus, water lily and red lotus are to be placed. (99)

न्यस्येन्मनोह्वां हरितालमञ्जनं
श्यामं च पूर्वादिशिवान्तिमं क्रमात्।
ससीससौराष्ट्र्यभिधानरोचनं
सगैरिकं पारतमत्र मध्यतः।। 100।।

विमर्शिनी

अत्र सेनानीतरदेवतासु। पूर्वादिशिवान्तिमं क्रमाद् मनोह्वां मनश्शिलाम्। हरितालं तदेव। अञ्जनं श्यामं च ते एव। ससीससौराष्ट्र्यभिधानरोचनं सीसेन युक्ते सौराष्ट्र्यभिधानरोचने। तत्रैकवद्भावः। सगैरिकं पारतं गैरिकसहितं पारतम्। गैरिकं पारतं चेत्यर्थः। तत्र मध्यतश्च।। 100।।

विवरणम्

पारतं रसम्। सेनानीतरदेवतास्वित्येतदिहाप्यनुवर्तते।। 100।।

Beginning from east upto north – east, may be placed in the proper sequence objects like red arsenic, Haritāla (orpiment) Añjana Collyrium) Śyāma (Panicum millaceum), lead, saurāstri (a kind of turpentine) gorocanā, gairika (a kind of red stone) and pārata (quicksilver), (100)

वज्रं मौक्तिकवैडूर्यकशङ्खस्फटिकपुष्यकं षट्सु।
चन्द्रोपलं महानीलं तद्वन्न्यसतु चाब्जरागमपि।। 101।।

विमर्शिनी

षट्सु स्कन्दरहितेषु षट्सु देवेषु। मौक्तिकवैडूर्य(क)शङ्खस्फटिकपुष्यकम् वैडूर्यं तदेव। शङ्खस्फटिकपुष्यकाणि व तान्येव। महानीलं तदेव। अब्जरागमपि पद्मरागं च। तद्वत् पूर्वादिमध्यान्तेषु न्यसतु।। 101।।

विवरणम्

षट्स्वित्यनुवादमात्रम्। तद्वदिति पूर्वादिशिवान्तिम् क्रमादित्यर्थः।। 101।।

In the case of six deities may be placed from east to the center articles like diamond, pearl, beryl, conch, crystal and topaz. Also may be placed moonstone, sapphire, and ruby. (101)

तथा शालिनीवारकौ कङ्कुमाषौ
कुलस्थं सनिष्पावसंज्ञं तिलं च।
समुद्गं ससिद्धार्थकं सन्निदध्या-
द्धरौ साजितेशार्यसुम्भाभिमातौ।। 102।।

विमर्शिनी

साजितेशार्यसुम्भाभिमातो शङ्करनारायणशास्तृदुर्गासहिते हरौ। तथा क्रमेण। शालिनीवारकौ। () कङ्कुमाषौ () कुलस्थं () सनिष्पावसंज्ञम्। () तिलं च। () समुद्गम्। () ससिद्धार्थकम्। () एतानि सन्निदध्यात् स्थापयेत्।। 102।।

विवरणम्

तथेति। एतदपि तद्वत्। सुम्भाभिमातिर्दुर्गा।। 102।।

In the case of Sankaranarayana, Śāstā, Durgā and Viṣṇu like-wise (from east to north east) the items of Śāli (paddy) Varāka (wild rice) Kanku (Panic seed) māṣa (Phaseolus Radiatus) Kulattha (Dolichos uniflorus) Niṣpava (Cajanus Indicus) Sesamum, Mudga (green grass) or Phaseolus mungo) and siddārtha (mustard) shall be placed. (102)

सुवर्णरजतायसत्रपु निधाय दिक्ष्वन्यतः
सुवर्णमयमर्पयेद् गरुडकूर्मशङ्खारि च।
शरासनगदाम्बुजं न्यसतु हैममन्तर्हरौ
सुपर्णपदसिंहकान्यपि तु तानि सुम्भद्विषि।। 103।।

विमर्शिनी

हरौ दिक्षु सुवर्णरजतायसत्रपू। ( ) एतानि निधायान्यतः कोणेषु। सुवर्णमयं सुवर्णकृतम्। गरुडकूर्मशङ्खारि च गरुडं कूर्मं शङ्खं चक्रं च। अन्तः अन्तर्भागे। हैमं हेमकृतम्। शरासनगदाम्बुजं शरासनं धनुः गदामम्बुजं पद्मं च न्यसतु। सुम्भद्विषि दुर्गायामपि। सुपर्णपदसिंहकानि गरुडस्थाने सिंहयुक्तानि तानि न्यसतु।। 103।।

विवरणम्

अन्यत इति। कोणेषु। अरि चक्रम्। शरासनं धनुः। सुपर्णपदसिंहकानीति। गरुडस्थाने स्ववाहनं सिंहम्। इतराणि तु तान्येवेत्यर्थः। अत्र हरिहरस्य शास्तुश्च व्यावृत्तिः।। 103।।

In the case of Viṣṇu the metal objects like Gold, silver, iron and tin may be placed in four quarters (in that order). In the corners objects made of gold like Garuḍa, Kūrma (tortoise) Śaṅkha (Conch) and Cakra (disc) are to be put. In the centre golden bow, gadā (mace) and lotus are to be placed. For Durgā the same metals are to be placed (as detailed above) but in the places of Garuḍa, the replica of a simha (lion which is the vehicle) is ordained. (103)

त्रप्वन्तं हरिवद् विधाय विदिशास्वार्येशनारायणे
न्यस्येच्छूलपरश्वधं दररथाङ्गं चाथ शार्ङ्गीश्वरे।
खट्वाङ्गार्धविधूक्षताक्ष्र्यकमठाक्षस्त्रगदाब्जं धनु-
हैमं शास्तरि हैमतोमरशराम्भोजं च मध्ये न्यसेत्।। 104।।

विमर्शिनी

आर्येशनारायणे शास्तृशङ्करनारायणे। हरिवत् हराविव। त्रप्वन्तं सुवर्णरजतायसत्रपुपर्यन्तम्। दिक्षु विधाय कृत्वा। विदिशासु कोणेषु। शूलपरश्वधं शूलं कुठारं च। दरथाङ्गं च शङ्खं चक्रं च न्यस्येत्। अथ शार्ङ्गीश्वरे शङ्करनारायणे। हैमं हेमकृतम्। खट्वाङ्ताधविधूक्षताक्ष्र्यकमठाक्षस्राग्गदाब्जं धनुश्च खट्वाङ्गं तदेव अर्धविधुः अर्धचन्द्रः अक्षा ऋषभः ताक्ष्यों गरुडः कमठः कूर्मः अक्षस्त्रग् अक्षमाला गदा सैव अब्जं पद्मं धनुः तदेव एतानि मध्ये न्यसेत्। शास्तरि मध्ये। हैमतोमरशराम्भोजं च हैमानि तोमरशराम्भोजानि। ( ) शरं तदेव। अम्भोजं पद्मं विन्यसेत्।। 104।।

विवरणम्

अनयोस्त्वाह–त्रप्वन्तम् इति। सुवर्णरजतायसत्रप्वित्येतावत् समानमित्यर्थः। दरः शङ्खः। अथेति मध्ये न्यसेदित्यनेन सम्बन्धः। हैममिति सर्वविशेषणम्।। 104।।

For Śāstā and Śaṅkaranārāyaṇa the metals mentioned (gold, silver, tin and iron) are to be placed in the quarters while in the corners a spear and axe, conch and disc (replicas made of gold) are to be put. Śaṅkaranārāyaṇa needs another nine gold items like Khaṭvāṅga (a club or staff with a skull at the top) crescent, bull, garuḍa, tortoise, Akṣamālā (necklace of Elaeocarpus seeds) gadā (a club) lotus and bow are to be placed in the centre. In the case of Śāstā a golden Tomara (javelin) arrow and lotus are to be placed in the middle. (104)

अथ शिवे सर्वमाह–

बीजे तानि न्यसतु नव नीवारकङ्क्वन्तरोद्य–
च्छ्यामानीशे च्युतचरमराजीनि लोहेऽनुरूप्यम्।
ताम्रं सायस्त्रपु कमठपाथोजशूलं च हैमं
खट्वाङ्गार्धेन्द्वृषभधनुरन्तः कुठारं च पञ्च।। 105।।

विमर्शिनी

ईशे बीजात् पूर्वं सर्वं तथा न्यस्य बीजे बीजन्यासे। नीवारकङ्क्यन्तरोद्यच्छ्यामानि नीवारकङ्क्योरन्तरा मध्ये उद्यदुद्गच्छत् श्यामं येषां तानि तथा। ( ) च्युतचरमराजीनिं च च्युतं चरममवसानीभूतं राजि येषां बीजानां तानि च्युतचरमराजीनि। तानि नवबीजानि तथा न्यसतु। लोहे लोहन्यासे। अनुरूप्यं रूप्यानन्तरम्। ताम्रं सायस्त्रपु अयसा युक्तं त्रपु। ( ) त्रपु उक्तम्। हैमं कमठपाथोजशूलं कमठं कूर्मं पाथोजं पद्मं शूलं तदेव। इति दिक्षु न्यस्यान्तः हैमं खट्वाङ्गार्धेन्द्वृषभधनुः कुठारम्। ( ) इति पञ्च न्यसतु।। 105।।

विवरणम्

अथ शिवे सर्वमाह–बीज इति। बीजे प्राप्ते तान्येव शालिनीवारकादीन्येव नव न्यस्येत्। किन्त्विह नीवारं कङ्कुं चान्तरा श्यामं न्यसेत्। चरमम्सन् राजिश्चेह च्युतः स्यादित्यर्थः। लोहेऽनुरूप्यमिति। रूप्यस्य पश्चात् सुवर्णरजतयोरनन्तरमित्यर्थः। अनेन दिगावारणमेव शूलपर्यन्तमिति गम्यते। हैममिति सर्वविशेषणम्। अन्तः पञ्चेति। खट्वाङ्गादिपञ्चकस्य स्थानमुक्तम्। अयमपरो गण इति चार्थादवसीयते।। 105।।

In the case of Siva nine articles may be conceived in his bīja. Instead of the nine seeds (beginning the Nīvāra is enjoined, but instead of mustard, śyāmā (panicum millaceum) may be deposited. In the case of metals after silver, copper, iron and tin are needed as also golden tortoise, lotus and spear. Having put here on the corners five items such as khaṭvāṅga, cresent, bull, bow and a bright axe may be placed in the middle. (105)

बीजानि लोहानि च विघ्नराजे
महेशवन्न्यस्य ततो निदध्यात्।
चाषस्वदन्ताम्बुरुहाङ्कुशानि
दिशासु मध्येऽत्र गजं च हैमम्।। 106।।

विमर्शिनी

विघ्नराजे बीजानि लोहानि च। महेशवत् शिववद् न्यस्य। हैमानि चाषस्वदन्ताम्बुरुहाङ्कुशानि ( ) स्वदन्तं स्वस्य दन्तम् अम्बुरुहं पद्मम् ( ) एतानि दिशासु निदध्यात्। अत्र मध्ये हैमं गजं च निदध्यात्।। 106।।

विवरणम्

चाषो मूषिकः। दिशास्विति चतसृषु। हैममिति सर्वविशेषणम्।। 106।।

With reference to Gaṇeśa, seeds and metals (numbering nine and thirteen respectively) are to be put on various regions as in the case of Siva. Thereafter on the four quarters items like golden rat, and a lotus and spear made of ivory are to be placed. In the centre a replica of an elephant is also to be put. (106)

अथ गुहे सर्वमाह–

शिखिशक्तिताम्रचूडस्वरुकरिणः स्वर्णजान् गुहे न्यस्येत्।
पूर्वादिमध्यनिष्ठं मध्यादीशान्तमथ नवैतानि।। 107।।
वारिजरागं वज्रं मौक्तिकवैडूर्यसंज्ञिते स्फटिकम्।
शङ्खं नीलं पुष्पं प्रवालसंज्ञं च विन्यसेत् क्रमशः।। 108।।

विमर्शिनी

गुहे पूर्वादिमध्यनिष्ठं पूर्वादिचतुर्दिक्षु मध्ये च स्वर्णजान् सुवर्णकृतान्। शिखिशक्तिताम्रचूडस्वरुकरिणः। ( ) अथ मध्यादीशान्तं वारिजरागं पद्मरागम्। ( ) मौक्तिकवैडूर्यसंज्ञिते ( ) वैडूर्यं तदेव। स्फटिकं शङ्खं नीलम्। पूष्यं पुष्यरागम्। ( ) एतानि नव क्रमशो विन्यसेत्।। 107–108।।

विवरणम्

अथ गुहे सर्वमाह–शिखिशक्तीति। शिखी मयूरः। ताम्रचूडः कुक्कुटः। स्वरुर्वज्रः। करी गजः।। 107।।

वारिजरागं पद्मरागम्।। 108।।

In the case of Guha (Skanda) the items to be placed on the various directions from east and ending with the centre, are the golden replicas of peacocks, spear, cock, diamond and elephant. Thereafter beginning with the middle and ending with the north east the following nine items may be deposited. (107)

The items are Padmarāga (lotus coloured ruby,) diamond, pearl, Vaidūrya (beryl), Crystal, Conch, Nīla (sapphire) Puṣya (topaz), Pravāḷa (coral) These (nine) are to be placed. (108)

तद्बाह्ये तपनीयं रजतं ताम्रायसी त्रपु सनागम्।
पित्तलकांस्ये न्वस्येद् दिक्ष्वष्टास्वन्तरष्ट लोहानि।। 109।।

विमर्शिनी

तद्बाह्ये पूर्वाद्यष्यसु दिक्षु ( ) ताम्रायसी उक्ते। त्रपु उक्तम्। सनाग[1]म्। पित्तलकांस्ये। ( ) अन्तरुक्तान्यष्ट लोहानि।। 109।।

विवरणम्

तपनीयं सुवर्णम्। अन्तरष्ट लोहानीति। एतान्येवेति बोद्धव्यम्।। 109।।

Outside of these in all the eight directions the eight metals like gold, silver, copper, iron, tin, nāga (lead), brass and kāmsya (bell metal) are to be deposited and all of them together are to be placed in the centre also. (109)

न्यसतु रसं समनोह्वं हरितालाञ्जनकमाक्षिकश्यामम्।
सौराष्ट्रीं राजावर्तं च तथा गैरिकं च मध्यादि।। 110।।
सिद्धार्थशालियवगोधूमांस्तिलमाषकौ प्रियङ्गुं च।
मुद्गं नीवारकमपि तद्वदिह न्यसतु पञ्चमावरणे।। 111।।
सागरशैलसरित्तीर्थह्रदकेदारदन्तिखलजाताः ।
मृत्स्ना न्यस्येत् परितो दिक्ष्वष्टास्वष्ट मृत्तिकाश्चान्तः।। 112।।

विमर्शिनी

तथा मध्यादीशान्तं, रसं तदेव। समनोह्यं हरितालाञ्जनकमाक्षिकश्यामं ( ) श्यामं तदेव ( ) राजावर्तं तदेव। ( ) एतानि न्यसतु।। 110।।

इह गुहे पञ्चमावरणे सिद्धार्थशालियवगोधूमान्। ( ) तिलमाषको उक्तौ। प्रियङ्गुम्। ( ) मुद्गं नीवारकमपि उक्ते। तद्वद् धातुवद् न्यसतु।। 111।।

परितः पूर्वाद्यष्यसु दिक्षु। सागरशैलसरित्तीर्थह्रदकेदारदन्तिखलजाताः। ( ) तीर्थं तदेव। ( ) एतेभ्यो जाताः। मृत्स्नाः मृत्तिकाः न्यस्येत्। अन्तरुक्ता अष्ट मृत्तिकाश्च न्यस्येत्।। 112।।

विवरणम्

मध्यादीति। ईशान्तमिति शेषः। तद्वदिति। मध्यादीशान्तमित्यर्थः। अष्ट मृत्तिका इति। एता एव।। 110-112।।

Also may be placed in the center and directions and structure beginning with the east the articles like quicksilver, red arsenic, orpiment, collyrium, makṣika (a collyrium), saurastri from the calx of brass, syāmā, (turpentine), Rājāvarta (Lapis Lazuli gem) and gairika kind of redstone.). (110)

---

1. 'गं गगनं पि' ख. ग. घ. पाठः

Also in the fifth line of border (in the matter of Guha) items like Siddhārthaka (mustard) Śāli (paddy) yava (barley) Godhūma (wheat) Tila (Sesamum) māṣa (Phaseolus Radiatus) Priyaṅgu (Panicum Italicum) Mudga (green gram or Phaseolus Mungo) and Nīvāra (wild rice) are to be placed. (111)

Also to be placed in the eight directions (for east to north east) are the mud collected from the shores of ocean, sand from the hill, bank of river, holy ghat, depth of the river, Kedāra (Paddy field) mud attached to the tusk of an elephant and Khala (Plough) and in the centre the bricks (numbering) eight as mentioned earlier) (112)

नीलारुणोत्पलपयोरुहकैरवाणां
मूलानि दिक्षु सकलं च निधाय मध्ये।
प्रोक्ष्यास्त्रतः समवगुण्ठ्य तनुत्रतोऽत्र
तद् द्रव्यजातममृतीकृतमातनोतु।। 113।।

विमर्शिनी

नीलारुणोत्पलपयोरुहकैरवाणाम्। ( ) एतेषां मूलानि दिक्षु, सकलं मूलचतुष्कमपि मध्ये च निधाय। अत्र गुहे। अस्त्रतः प्रोक्ष्य। तनुत्रतः कववमन्त्रेणावगुण्ठ्याच्छाद्य। तद् द्रव्यजातं द्रव्यसमूहम्। अमृतीकृतं सुरभिमुद्रयामृतीकृतमातनोतु।। 113।।

विवरणम्

सकलं चेति। एतदेव मूलचतुष्टयम्। समवकुण्ठ्य तनुत्रत इति कवचेन करद्वयेना[1]च्छादनमुक्तम्। द्रव्यजातं द्रव्यनिचयं, अमृतीकृतमातनोत्विति। सुरभिमुद्रया तद्बीजेनामृतीकृतं भावयेदित्यर्थः। हरिहरादिसर्वेष्वपि कार्यमेतत् सर्वमिति समप्रदायः।। 113।।

In the (worship of Guha) the articles like the bulbs of Nīlotpala (blue lotus) Aruṇotpala (red lotus), Payoduha (lotus) and Kairava (water lily) may be placed on the four quarters and after spirinkling and worshipping with the Astramantra and using Kavacamantra to enclose it, all of them may be conceived as Amrita (nectar) by employing the Surabhimudrā. (113)

गायत्र्या स्मरशासने मुररिपौ सस्वार्णमूलाणुना
शेषेषु द्रविणानि विघ्नगुहयोर्मूलेन च न्यस्यतु।
ईशे व्योमदशार्णवक्त्रबहुरूपाजाध्रुवामेशसू-
क्तोत्पन्नैश्च कलाणुभिर्द्रविणजातानि न्यसेद्वा क्रमात्।। 114।।

विमर्शिनी

उक्तस्य द्रव्यन्यासस्य मन्त्रमाह–गायत्र्येति। स्मरशासने शिवे। मुररिपौ विष्णौ च। गायत्र्या

---

1. 'न' ग. पाठः

स्वस्वगायत्र्या द्रविणानि विन्यसतु। शेषेषु सस्वार्णमूलाणुना स्वाक्षरसहितेन मूलेन। मूलाक्षरैर्मूलेन चेत्यर्थः। विघ्नगुहयोर्मूलेन च। चशब्द एवार्थे। ईशे शिवे। व्योमदशार्णवक्त्रबहुरूपाजान्धुवामेशसूक्तोत्पन्नैश्च कलाणुभिर्द्रविणजातानि न्यसेद्वा। व्योमदशार्णं व्योमव्यापि दशाक्षरम्। वक्त्रं तत्पुरुषः। बहुरूपोऽघोरः। अजः सद्योजातः। अन्धुरन्धुस्थानस्थो वामदेवः। वामश्च देवः। ईश ईशानः। ऐतेषां सूक्तोत्पन्नैः, कलाणुभिः कलामन्त्रैः। तत्र व्योमव्यापिदशार्णस्य दशभिरक्षरैः मृदः, तत्पुरुषकलाभिर्मूलानि, अघोरकलाभिः धातून्, सद्यकलाभी रत्नानि, वामकलाभिर्बीजानि, पुनरपि वामकलाभिं: स्वर्णादीनि, ईशकलाभिः खट्वाङ्गादीनीति विभागः तथा पाशुपते–

व्योमव्यापिदशार्णैस्तु मृत्पिण्डानि निधापयेत्।
भू[1]यः पुरुषकलाभिर्घोरकलाभिस्तथैव सद्याभिः
न्य[2]स्त्वा वामकलाभिर्वामकलाभिस्तथेशसंज्ञाभिः।।

इति।। 114।।

विवरणम्

द्रव्यन्यासे मन्त्रानाह–गायत्र्येति। गायत्री तत्पुरुषा(येति)। मुररिपौ सस्वार्णमूलाणुनेति। स्वाक्षरैः सहितेन मूलमन्त्रेण। तत्र दिक्षु मूलाक्षराणि मध्ये मूलमिति विभागः। दुर्गार्येशहरौ चेति। सस्वार्णमूलाणुनेत्यनुषङ्गः। यद्वा विघ्नगुहयोरित्यनेन सह योजनीयम्। शिवे मतान्तरमाह–ईश इति। व्योमव्यापिदशाक्षरेण मृदः पुरुषाघोरसद्यवामकलाभिर्मूलधातुरत्नबीजानि पुनरपि वामकलाभिर्लोहानि ईशकलाभिस्तु खट्वाङ्गादि पञ्चकमिति विभागः। तुशब्दो विशेषसूचनार्थः। धातुरत्नानामन्त्यकलयैव मध्ये न्यासः, बीजलोहानामवशिष्टकलाभिरन्त्य[3]न्यास इत्यसौ च विशेषः।। 114।।

The prescrifed articles should be placed in the case of Śiva and Viṣṇu chanting their respective Gāyatri, for others (Śankaranarayana, Durgā and Śāstā) using their own mūlamantra, for Gaṇapati and Guha (Skanda) with their mūlamantra. In the worship of Śiva the mantras to be used for Tatpuruṣa,s Aghora, Sadyojāta,Vāmadeva the collection of articles (which includes mud, metals, flower, and jewels) should be deposited in the four directions and the corners in the order. (114)

तद् द्रव्यजातमजिते द्विषडक्षरेण
गव्येन मूलमनुनोक्षतु चेतरेषु।
अभ्यर्च्य मूलमनुना सकलेऽधिवास्य
पक्यावसानमनले तनुयात् पुरोवत्।। 115।।

विमर्शिनी

ततस्तत्संस्कारादिकमाह–तद्द्रव्यजातमिति। अजिते विष्णौ। द्विषडक्षरेण द्वादशाक्षरेण, इतरेषु

1. 'त्र' क. पाठः,
2. 'नि' ख. पाठः,
3. 'न्त्यस्य न्या' ख. ग. पाठः

मूलंमनुना च तद् द्रव्यजातं गव्येनोक्षतु। सकलेऽपि मूलमनुनाभ्यर्च्याधिवास्य। अनलेऽग्नौ। पुरोक्तवद् इष्टकाहोमवत् पक्त्यावसानं तनुयात्।। 115।।

विवरणम्

तद्द्रव्यजातमजित इति। सुरभिमुद्रयामृतीकरणं तावदुक्तम्। ततोनन्तरमेतत् कार्यम्। मूलमनुनाभ्यर्च्येत्यावाहनादिकमुक्तम्। अथ होमं वदन् तत्र प्रागुक्तहोमे विशेषमाह–पक्त्यावसानमिति। पक्वात् प्राग्भर्गदुर्गास्मरमुरभिदि मूलाक्षरैरित्येतत् सर्वमिहापि समानमिति (पूर्व ?पुरो)वदित्यनेनोक्तम्।। 115।।

These group of articles shall be placed in the case of Viṣṇu using twelve syllabled mantras and sprinkling with pañcagavya in the matter of other gods their mūlamantras are required for worship and sacrificial rituals like invoking them till the end of Pakvahoma. (115)

अर्कार्णार्णांश्चतुर्थ्या सह दिगधिपनारायणान् बीजयुक्तान्
सर्वान् धातूंश्च लोहा[1]न्मनुविदथ हुनेत् पर्वतान् वै समुद्रान्।
सर्वाण्युद्दिश्य तीर्थान्यपि तदनु नदीश्च ह्रदांश्च द्विठान्तान्
पातालान् नागकान् दिग्गजवृषभयुतान् व्याहृतीस्तारकं च।। 116।।

विमर्शिनी

होममन्त्रानाह–अर्कार्णार्णानिति। मन्त्रप्रयोगकुशलः अर्कार्णार्णान् द्वादशाक्षरमन्त्रस्य वर्णानुद्दिश्योक्त्वा। चतुर्थ्या सह चतुर्थीविभक्त्या सह। द्विठान्तान् स्वाहान्तान्। दिगधिपनारायणान् दिगधिपान् नारायणं च, इन्द्राय स्वाहा इत्यादी[2]न् नारायणाय स्वाहा इति च। बीजयुक्तान् सर्वबीजेभ्यः स्वाहा इति। सर्वान् धातून् सर्वधातुभ्यः स्वाहा इति। लोहानिति। चकारेण सर्वं क्षिप्यते सर्वत्र, सर्वलोहेभ्यः स्वाहा इति। अत्र लोहपदे लोकपदं केषुचिदागमेषु दृश्यते। तत्र सर्वलोकेभ्यः स्वाहा इति मन्त्रः। पर्वतान् सर्वपर्वतेभ्यः स्वाहा इति। वै समुद्रान् सर्वसमुद्रेभ्यः स्वाहा इति। सर्वाणि तीर्थान्युद्दिश्य इति सर्वतीर्थेभ्यः स्वाहा इति। तदनु नदीश्च सर्वनदीभ्यः स्वाहा। ह्रदान् सर्वह्रदेभ्यः स्वाहा। पातालान् सर्वपातालेभ्यः स्वाहा। नागकान् सर्वनागेभ्यः स्वाहा। दिग्गजवृषभयुतान् सर्वदिग्गजेभ्यः स्वाहा, सर्ववृषभेभ्यः स्वाहा इति। व्याहृतीस्तारकं चोद्दिश्य हुनेत्।। 116।।

विवरणम्

अर्कार्णार्णानिति। द्वादशाक्षरवर्णान्। दिगधिपा अष्याविन्द्रादयः। मनुविदित्यस्यायमाशयः–द्वादशाक्षरवर्णाः प्रणवपुटिताः बीजानि पूथग् देवता सर्वशब्दो धातुविशेषणं वृषभशब्दो बहुवचनभागित्यादि ज्ञेयमिति।। 116।।

Now the preceptor proficient in the mantras shall offer oblations and ghee in the sacrificial fire. In the case of the lords of quarters (Indra etc) and Nārāyaṇa (Viṣṇu) the devādaśākṣaramantra (the twelve syllabled hymn

---

1. 'का',
2. 'दि ना' ख. पाठः

for bīja (seeds), loha (metals), Parvata (hills), Samudras, Tīrtha, Nadi (river), Hrada (depth of river), Pātāla, Nāga, Diggaja and Vṛṣabha, mudras using their name as adjectives and ending in dative case suffixing their invocation of 'Namaḥ' svāhā' etc, may be appropriately used. (116)

एतैर्मन्त्रैः प्राग् घृतं शार्ङ्गपाणौ हुत्वा गायत्र्या चतुर्द्रव्यहोमम्।
कृत्वा संपातैधिते गर्भपात्रे प्रोद्वास्याग्निं मूलमावर्तयेच्च।। 117।।

विमर्शिनी

शाङ्र्गपाणौ विष्णौ। एतैर्मन्त्रैः प्राक् पूर्वं घृतं हुत्वा। गायत्र्या 'नारायणाय विद्महे' इत्याद्यया। चतुर्द्रव्यहोमं समिदाज्यहविराज्यानां होमं कृत्वा। सम्पातैधिते सम्पातस्पृष्टे। गर्भपात्रेऽग्निं प्रोद्वास्य मूलमावर्तयेच्च जपेत्।। 117।।

विवरणम्

सम्पातैधित इति। सम्पातो नाम द्रव्यकर्मापूर्वं तद् द्रव्यं येन कर्मणा देवतायामुपह्रियते तदेव तदैकात्म्यतस्तदीयफलरूपेण प्रत्यावृत्तमपूर्वं भवति। तेनैधनं स्वकार्यसमर्थतेति।। 117।।

Using these mantras at first ghee shall be offered to Viṣṇu as oblation and using the Gāyatrī the offering of the four things (tinder, ghee, etc.) Now worshiping and blowing the fire the objects maybe put in the central vessel and repeat the mūlamantra. (117)

दुर्गार्ये स्वेष्टकावद् द्रविणहवननिष्ठं सशार्ङ्गीशविघ्ने
कृत्वेन्द्राद्यैश्च नारायणपदविलसत्स्वस्वमूलैर्जुहोतु।
मूलेनैकादशाज्याहुतिमिह सुविधायाथ लोकेशपूर्वै-
रुक्तैर्मन्त्रैश्च नारायणपदबहुसच्छङ्करैः शङ्करे तु।। 118।।

विमर्शिनी

सशार्ङ्गीशविघ्ने दुर्गार्ये शिवनारायणगणपतिदुर्गाशास्तृषु। द्रविणहवननिष्ठं चतुर्द्रव्यहोमान्तम्। स्वेष्टकावत् स्वस्वेष्टकाहोमवत् कृत्वा। इन्द्राद्यैः 'दिगधिपे'त्याद्युक्तैः। नारायणपदविलसत्स्वस्वमूलैः नारायणमन्त्रस्थाने स्वस्वमूलेन च जुहोतु। शङ्करे तु इह द्रव्यहोमान्ते। मूलेनैकादशाज्याहुतिं सुविधाय। अथ तदनन्तरं लोकेशपूर्वैरुक्तैर्मन्त्रैः नारायणपदबहुसच्छङ्करैः नारायणपदे बहुवचनेन सता शङ्करपदेन च 'ओं शङ्करेभ्यः स्वाहा' इति मन्त्रेण जुहोतु।। 118।।

विवरणम्

नारायणपदविलसस्त्वस्वमूलैरिति। नारायणपदस्थाने स्वं स्वं मूलं योज्यमिति भावः। नारायणपदबहुसच्यङ्करैरिति। तत्पदस्थाने बहुवचनान्तं सच्छङ्करपदं योज्यम्। शङ्करेभ्यः स्वाहेतीत्यर्थः।। 118।।

For Durgā, Śaṅkaranārāyaṇa, Gaṇapati and Śāstā rituals may be carried out as in the case of laying bricks. Then for Indra and others mūlamantra

may be, employed for sacrifice. Thereafter eleven invocations using the names of the lords of quarters etc., oblation may be given in sacred fire. The whole ritual may be ended with an invocations to Śaṅkara and offering oblations to him. (118)

स्वेष्टकोदितवर्त्मनोडुहुतान्तकृज्जुहुयाद् घृतं
हेतिरत्नकलोहधातुकबीजकान्यपि मृत्तिकाः।
मूलकान्यपि चोद्दिशन्निजनामतोऽथ समिद्घृता-
द्याहुतिं च करोतु तारकसूदने निजमूलतः।। 119।।

विमर्शिनी

तारकसूदने स्कन्दे। स्वेष्टकोदितवर्त्मना स्वेष्टकाहोमोक्तमार्गेण। उडुहुतान्तकृत् नामद्विषट्केनेत्यादि-दिङ्नक्षत्रैरित्यन्तैर्होमकृद् भूत्वा। हेतिरत्नकलोहधातुकबीजकान्यपि मृत्तिकाः मूलकान्यपि च निजनामतः। उद्दिशन् उच्चरन् 'ओं हेतिभ्यः स्वाहा' 'रत्नेभ्यः स्वाहा' 'लोहेभ्यः स्वाहा' 'धातुभ्यः स्वाहा' 'बीजेभ्यः स्वाहा' 'मृत्तिकाभ्यः स्वाहा' 'मूलेभ्यः स्वाहा' इति मन्त्रानुच्चरन् घृतं जुहुयात्। अथ निजमूलतः समिद्घृताद्याहुतिं चतुर्द्रव्यहोमं च करोतु।। 119।।

विवरणम्

स्कन्द आह–स्वेष्टकेति। पक्वान्ते नामद्विषट्केनेत्युक्तैर्द्वाशनामादिनक्षत्रान्तैर्हुत्वा हेतिरत्नादिमूलान्तैरपि हुत्वा पूर्णां जुहुयादित्यर्थः।। 119।।

In the matter of Tārakasūdana (Skanda) the ritual may be performed as described in relation to the sanctification of bricks etc. Items like Heti, (Weapon) gold, metals etc., may be invoked using their respective names and offering the invocation word 'svāhā'. In such a case the respective Mūlamantra may be resorted to. Usual oblation of ghee, ghee rice, tinder etc,. shall also be put in the fire. (119)

शिखिशक्तिपविस्थलस्थिताश्व-
क्षुरिकासीनि गुहोदितानि वार्ये।
न्यसनेऽत्र निजेष्टकोडुहोमा-
वसितौ हेतिमुखाहुतिस्तथा[1] स्यात्।। 120।।

विमर्शिनी

आर्ये न्यसने द्रव्यन्यासे। शिखिशक्तिपविस्थलस्थिताश्वक्षुरिकासीनि मयूरशक्तिवज्र स्थानेषु अश्वक्षुरिकाखड्गानि। गुहोदितानि स्कन्दोक्तानि वा स्युः। अत्रैतत्पक्षे। निजेष्टकोडु- होमावसितौ स्वस्येष्टकाहोमवन्नक्षत्रहोमान्ते। हेतिमुखाहुतिः हेत्यादीनामाहुतिः। तथा तद्वदेव स्यात्।। 120।।

---

1. 'दा' इति मूलकोशपाठः

विवरणम्

अथ यत् पूर्वमित्यपि वा प्रभेश इत्युद्दिष्टं तदिदानीं विवृणोति–शिखिशक्तीति। पविर्वज्रम्। असिः क्षुरिका। न्यसने स्युरिति शेषः। अत्र निजेष्टकोड्डुहोमावसिताविति। सम्पातैधित इत्यादि सर्वेष्वपि कार्यमिति।। 120।।

In the worship relating to Śāstā, the objects like peacock, javelin and diamond mentioned in connection with Guha may be replaced by horse, dagger and sword and rituals may be performed as described earlier. The mantra also may be slightly replaced by appropriate ones till the end of the sacrifice. (120)

हृत्वेष्टकागर्तगतं मृदाद्यं संशोध्य गव्यादिसमाप्लुतेऽत्र।
सविष्टरेऽभ्यर्चितयोगपीठे शक्तिं समावाह्य निजां यजेत।। 121।।

विमर्शिनी

एवं होमानन्तरं गर्भन्यासं कुर्यादित्याह–हृत्वेति। इष्टकागर्तगतम् इष्टकानां मध्यस्थगर्तगतं मृद्धान्यादिकं हृत्वा त्यक्त्वा। संशोध्य मार्जनादिकं कृत्वा। गव्यादिसमाप्लुते गव्याष्टगन्धजलादिभिश्चाप्लुते। सविष्टरे विष्टरं निधायात्राभ्यर्चितयोगपीठे निजां शक्तिं समावाह्य यजेत।। 121।।

विवरणम्

गव्यादिसमास्तुतेऽत्रेति गोमूत्रपञ्चगव्यगन्धोदकग्रहणम्। निजां शक्तिं समावाह्येति। वक्ष्यति हि–श्रीबीजेन प्रकृतिमभिवाह्याजितेऽन्येषु शक्त्येति। यद्वा, विष्णौ श्रियं शिवे गौरीं स्कन्दे देवसेनामित्याद्यभिप्रायमेतत्।। 121।।

After cleaning the mud etc., put in the sacrificial pit created by arranging the bricks on sides and purifying it with the splash of pañcagavya and altar may be put there for worship. Then divinity may be invoked with the Śrībījamantra for Viṣṇu and Bhuvaneśwarī mantra for other deities. Now the deity may be offered worship. (121)

प्राज्ञाज्ञातः पिधानोत्तरमखिलजगद्गर्भि तद् गर्भपात्रं
तिष्ठन् कृत्वाञ्जलौ तत्तदणुशतजपं मन्त्रवित् संविधाय।
गर्भीयन्तीं जगन्मण्डलमखिलमनुध्याय शक्तिं स्वयं त-
द्गर्भाकारेऽत्र गर्ते न्यसतु निशि शनैः स्वोक्तमन्त्रप्रजापी।। 122।।

सर्वभूतधरे! कान्ते! इति सर्वत्र तन्मनुः।
सर्वभूतालये! भद्रे! इति स्कन्दप्रभेशयोः।। 123।।

सर्वभूतधरे! कान्ते! पर्वतस्तनमण्डिते!।
समुद्रपरिधाने! त्वं देवि! गर्भं समाश्रय।। 124।।

सर्वभूतालये! भद्रे! सागराम्बरभूषिते!।
उत्तुङ्गाद्रिस्तनभरे! देवि! गर्भं समाश्रय।। 125।।

विमर्शिनी

प्राज्ञाज्ञातः प्राज्ञैः विद्वद्भिराज्ञातः, विदुषां ब्राह्मणानां दानं कृत्वा तैः कृतं स्वस्तिकवचनं परिगृह्येत्यर्थः। पिधानोत्तरं पिधानेनोपर्याच्छादितम्। अखिलजगद्गर्भि अखिलजगत् तदन्तर्गतं स्मरन्। तत् प्रस्तुतं गर्भपात्रम् अञ्जलौ कृत्वा तिष्ठन् मन्त्रवित्। तत्तदणुशतजपं तत्तन्मूलमन्त्रमष्टोत्तरशतजपं संविधाय। शक्तिं स्वयं सर्वकारणभूतां स्वयं शक्तिम्। अखिलं जगन्मण्डलं गर्भीयन्तीमात्मनो गर्भत्वेन काङ्क्षमाणाम् अनुध्याय। तद्गर्भाकारे तस्या गर्भाधानस्थाने गर्तेऽत्र। शनैः स्वोक्तमन्त्रप्रजापी स्वस्वोक्तमन्त्रं जपन् निशि निशायामेव न्यसतु।। 122।।

स्वोक्तमन्त्रप्रजापीत्यत्र को मन्त्र इत्याकाङ्क्षायामाह–सर्वभूतेत्यादिना। सर्वत्र सर्वदेवेषु। सर्वभूतधरे कान्ते इतीति इत्यादीत्यर्थः। तन्मनुः गर्भन्यासमन्त्रः। स्कन्दप्रभेशयोः सर्वभूतालये भद्रे इति। इतीति पूर्ववद् व्याख्येयम्।। 123।।

तौ मन्त्रौ पठति–सर्वभूतधर इत्यादिना।। 124–125।।

विवरणम्

प्राज्ञाज्ञात इति। प्राज्ञैर्हिर[1]ण्यदानादिभिरनुज्ञातः। यद्वा प्राज्ञैरप्यज्ञातः। सर्वान् दूरतो विसृज्य रहो गर्भनिधानं कार्यमिति। अथवा प्राज्ञा वाद्यविदः तेषामाज्ञा च वाद्यध्वननमेव,तत इति। पिधानोत्तरमिति। तदा स्वपिधानविहितम्। अखिलजगद्गर्भीति। सकलजगत्सारवस्तूनां तस्मिन् निहितत्वात् सकल-जगदण्डसूक्ष्मदशाया गर्भरूपत्वाद् वैराजविग्रहरूपस्य प्रासादमूर्तेस्तत्समुत्पत्त्यभिधानाच्चैवमुक्तम्। मन्त्रविदिति कवचेन पिधानमुक्तम्। तथा विष्णावष्टक्षरद्वादशाक्षरजपादिकं चोक्तम्। गर्भीयन्तीमिति। गर्भमात्मन इच्छन्तीम्। अखिलजगन्मण्डलमिति। यत् प्रासादपूरुषतया परिणामिनीति वक्ष्यमाणत्वादिदमवसीयते। सकलभुवनात्मा विराडेवात्रोत्पादनीयः। स एव प्रासादमूर्तिरूपेण परिमितो भवतीति। बिम्बवच्चैतदवगन्तव्यम्। यद्वक्ष्यति–तदेतदण्डं प्रणवेन बिम्बमिति। अभिध्यायेति। पृथिवीं ब्रह्माण्डरूपिणीं तद्गर्भकामामादिशक्तिं च ध्यात्वेत्यभिप्रायः। तद्गर्भाकार इति। तस्या आदिशक्तेर्मूलप्रकृतेर्गर्भाशयाकारे। इह गर्भं समाश्रयेति। अयमपि गर्भशब्द एतदभिप्राय एवेत्यर्थलभ्यम्।। 122–125।।

The learned preceptor shall after obtaining the permission of the knowledgeable persons proficient in the subject take hold of the vessel with its covering lid and stand in the centre of the pit. The pit conceived as the womb shall be placed inside the pit mediating upon the power that is the sole controlling force of the universe. This action of depositing the vessel conceived as the womb shall be performed at night chanting the required mantra a hundred times with devotion and concentration. (122)

The mantra for all deities is like "O goddess who supports all and pleasant one." In the case of Skanda and Śāstā, the mantra is like O auspicious one who is the support of all beings etc." (123)

---

1. 'ण्या'

O pleasant one who supports all beings and whose hearts are the mountain and loin-cloth is the ocean, O goddess be pleased to conceive. (124)

O auspicious one, who is wearing ocean as her cloth and whose breasts are the lofty mountains, O goddess be pleased to conceive. (125)

प्रासादपूरुषतया परिणामिनीह
मूलेन देवमभिवाह्य समर्च्य गर्भे।
किञ्चिन्निवेद्य परितोष्य सुरक्ष्य तक्ष्णा
प्रासादमारचयतां सहमन्त्रबिम्बम्।। 126।।

विमर्शिनी

प्रासादपूरुषतया प्रासादपूरुषत्वेन। परिणामिनि परिणाममाधास्यमाने। इह अस्मिन् गर्भे। मूलेन देवमभिवाह्य समर्च्य किञ्चिन्निवेद्य परितोष्य सुरक्ष्य। तक्ष्णा शिल्पिना। सहमन्त्रबिम्बं मन्त्रमूर्त्या प्रतिमया सहितं प्रासादम्। आरचयतां कारयेत। सहमन्त्रबिम्बमित्यनेन बहुवे[1]रे प्रासादेन सह मन्त्रबिम्बरचना सूचिता।। 126।।

विवरणम्

प्रासादपूरुषतया परिणामिनीहेति। तदीयजीवरूपेण तत्र देवसन्निधापनमिति सूचितम्। सुरक्ष्येति तालत्रयादिकं लौकिकपुरुषे रक्षाकरणं चोक्तमिति। प्रासादमारचयतां सहमन्त्रबिम्बमिति प्रासाद-बिम्बकरणप्रस्तावः। किं च समनन्तरमेव प्रासादरचनमारब्धव्यमित्यपि सूचितम्। तदुक्तम्– प्रासादप्रारम्भकाले गर्भाधानं कुर्यादिति।। 126।।

The pregnancy which is to result in the birth of the god as the deity of the shrine is to be worshipped with the Mūlamantra of the particular divinity. Thereafter an architect may be entrusted with the task of shaping a mantra bimba along with the temple structure. In between the deity is to be pleased with offerings as required. (126)

आलिख्य मण्डलमिहाहितसन्निधानं
मूलेन देवमभिपू[2]ज्य चरुं निवेद्य।
तद्वामतोऽस्त्रमपि तत्सविधे नि[3]धाय
शस्त्राणि चास्त्रमनुना प्रयजेत तक्ष्णाम्।। 127।।

विमर्शिनी

एवं प्रासादकरणात् पूर्वगतं क्रियाकलापमुक्त्वा बिम्बरचनात् पूर्वगतं क्रियाकलापमाह–आलिख्येति। कस्मिंश्चित् प्रदेशे मण्डलमालिख्य इह आहितसन्निधानं कृतावाहनं देवं मूलेनाभिपूज्य चरुं पायसं

1. 'वरप्रा' ख. पाठः,
2. 'वाह्य च',
3. 'वि' इति मूलकोशपाठः

हविर्निवेद्य। तद्वामतः तस्य मण्डलस्य वामे अस्त्रमपि स्वास्त्रमन्त्रेणापि तथा सम्पूज्य। तत्सविधे पूजितास्त्रस्य समीपे। तक्ष्णां शस्त्राणि आयुधानि निधायास्त्रमनुना च तथा प्रयजेत।। 127।।

विवरणम्

तत्र पूर्वं तावत् तदीयद्रव्यसम्पादनमभिधत्ते–आलिख्य मण्डलमिति। यद्यप्येतत् प्रासादबिम्ब-करणशेषत्वाद् उत्तरपटले वक्तुमुचितं, किन्तु पूजादिसद्भावादिह पटलान्तेऽभिधानमिति ज्ञेयम्। स्वस्तिकमष्टदलं वालिख्य मण्डलमित्युक्तम्। आहितसन्निधानमिति। आहितं कृतपीठपूजादि-पूर्वकमावाहनादि कृत्वेत्यर्थः। चरुमिति। पयोन्धसेति वक्ष्यमाणत्वात् पायसं निवेद्यमिति लभ्यते। तद्वामतोऽस्त्रमपीति। अपिशब्देनालिख्य मण्डलमित्यादिसर्वमनुकृष्यते। देववामभागे स्वस्तिकमालिख्य तत्र स्वस्वमस्त्रं पीठपूजापूर्वकमावाह्य पूजयेदित्यर्थः। तत्सन्निधाविति। तस्यास्त्रमूर्तेः सन्निधौ वामभाग एव स्थण्डिल इति भावः।। 127।।

After drawing a Maṇḍala (mystical diagram for invoking divinity) on as pot in the house and having invoked the presence of the God chanting Mūlamantra and offering oblation of cooked rice towards its left prepare an altar (using powder of rice etc.) and worship it using Astramantra. On its proximity place the tools of the mason (or carpenter) and offer worship to the same using the Astramantra. (127)

निवेद्यशिष्टेन पयोन्धसाग्नौ
हुत्वाशयित्वा मुखजान् प्रसाद्य।
दध्यन्नमश्नातु गुरुः सकर्ता
तत्रार्चनीयः स्थपतिश्च तद्वत्।। 128।।

विमर्शिनी

निवेद्यशिष्टेन पयोन्धसा पायसहविषाग्नौ हुत्वा। मुखजान् ब्राह्मणान्। आशयित्वा भोजयित्वा। तान् दानेन च प्रसाद्य देवस्य प्रसन्नपूजां कृत्वा। सकर्ता कर्त्रा सहितो गुरुः। दध्यन्नं दधिविशिष्टमन्नम् अश्नातु। तत्र कर्मणि स्थपतिः तक्षा च तद्वदर्चनीयः, तस्याप्यन्नदानादिना प्रसादं कुर्यादित्यर्थः।। 128।।

विवरणम्

निवेद्यशिष्टेनेति पूजाहोमोऽयमवबोद्धव्यः। आशयित्वेति। भोजयित्वा तस्य पायसस्य एकं भागमित्यर्थाद् अवसेयम्। मुखजा ब्राह्मणाः। प्रसाद्येति। देवं अस्त्रदेवता ब्राह्मणांश्चेति ज्ञेयम्। ब्राह्मणादीनां तु गोहिरण्यदानादि -प्रसादनसाधनम्। स्थपतिस्तक्षा। तद्वदर्चनीय इति। पायसभोजनं वस्त्रालङ्कारैः प्रसादनमित्येतदुक्तम्।। 128।।

Having poured the remains of the milk pudding offered to the God and feed the Brahmin properly (with gifts) and completed the worship the preceptor and the owner of the sacrifice along with the carpenter shall partake the leftover in a sumtuous manner. (128)

रक्षामङ्गलपूर्वकं शूभनिमित्तर्क्षे शिलार्थं व्रजे-
न्मन्त्री शस्त्रिभिरन्वितः स्थपतिभिः कर्त्रापि चैन्द्र्यादिषु।
आसाद्याथ शिलाकरं सुमहितात्माणुं त्रिनेत्राहिकं
जप्त्वान्विष्य शिलां निजेष्टमनुबिम्बादिक्षमां कल्पयेत् ।। 129।।

विमर्शिनी

अथ मन्त्री। शस्त्रिभिः शस्त्रपाणिभिः स्थपतिभिः शिल्पिभिः। कर्त्राप्यन्वितो युक्तः। रक्षामङ्गलपूर्वकं रक्षां कृत्वा कनिक्रदादिमङ्गलानि जपन्। शुभनिमित्तर्क्षे शुभे निमित्ते शकुनादिके च शुभे मुहूर्ते च। शिलार्थं शिलां ग्रहीतुम् ऐन्द्र्यादिषु पूर्वादिषु दिक्षु। व्रजेद् गच्छेत्। अथ शिलाकरं शिलायाः क्षेत्रमासाद्य। सुमहितात्मा आत्माराधनादिकृत्। शिवे त्रिनेत्रादिकम् अन्येष्वपि स्वस्वयोग्यमणुं जस्त्वा शिलामन्विष्य निजेष्टमनुबिम्बादिक्षमां स्वस्येप्सितानां मन्त्रबिम्बपीठादीनां शक्तां शिलां कल्पयेत्।। 129।।

विवरणम्

रक्षामङ्गालपूर्वकमिति। ऐन्द्र्यादिषु शिलार्थं व्रजेदिति सम्बन्धः। रक्षेह स्वास्त्रभावना तच्छतावर्तनमग्रतोऽर्घ्यहस्ताया विद्याराज्याः स्मरणं च। मङ्गलं कनिक्रदत्स्वस्त्यादिजपः, शङ्खध्वानं प्रदीपपूर्णकुम्भादि चेति। मन्त्रीति। प्रतिष्ठापनीयदेवतानुसन्धानमस्त्रेण दिग्विरेचनमप्युक्तम्। ऐन्द्र्यादिष्विति। प्राच्युदीच्यैशानी च दिगुक्ता। तदसम्भवे याम्यादयोऽपि ग्राह्याः। सुमहितात्मेति। स्नानाद्युपलक्षणम्। जप्त्वेति। जपन्नित्येवार्थः। निजेष्टमनुबिम्बादिक्षमामिति पीठशिलादिग्रहणम्।। 129।।

On an auspicious day the preceptor along with the carpenters or masons holding their tools and accompanied by the owner shall, after chanting auspicious mantras having the power and protection move towards east and other regions in search of stones suitable for making idols. Once the particular spot is reached he should purify himself washing the feet and chanting the mantra pertaining to Trinetra (Śiva) and select proper granites (for store as well as idol the stone belonging to the neuter gender) (129)

त्रिनेत्राय च रुद्राय ध्वजाधिपतये नमः।
शिलां दर्शय देवेश! प्रसन्नो मे वृषध्वज।। 130।। इति।।

सिद्धाद्र्याकरसम्भवा वसुमतीमग्ना स्ववर्णोचिता
स्निग्धा शस्त्रसहा गभीरनिनदा दिश्याहिताग्रा शिला।
ग्राह्या बिम्बविधौ स्फुलिङ्गबहुलं तस्याः शिरोऽधो मुखं
यत्काष्ठामिमुखी समुत्थितवती स्थाप्या च तद्दिङ्मुखी।। 131।।

विमर्शिनी

त्रिनेत्रमन्त्रं पठति–त्रिनेत्रायेत्यादिना।। 130।।

शिलालक्षणमाह–सिद्धेति। बिम्बविधौ शिला ग्राह्या। सिद्धाद्र्याकरसम्भवा प्रसिद्धपर्वतस्थक्षेत्रे सम्भवो यस्याः सा। वसुमतीमग्ना भूम्यां तिरोहिता। स्ववर्णोचिता ब्राह्मणादिस्वस्ववर्णस्योचिता

शोभनैरकाराद्यक्षरैरुपलक्षिता च। स्निग्धा निबिडा न तु कर्कशा। शस्त्रसहा शस्त्रप्रहारक्षमा। गभीरनिनदा गाम्भीर्यवन्नादयुक्ता। दिश्याहिताग्रा दिग्गताग्रभागा च। तस्याः शिलायाः स्फुलिङ्गबहुलं स्फुलिङ्गबाहुल्यं यस्मिन् भागे तच्छिरोऽवगन्तव्यम्। अधो मुखम् अधोभागं मुखमवगन्तव्यम्। समुत्थितवती यत्काष्ठाभिमुखी तस्यामुत्थितायां यस्यां दिशि मुखं भवति तद्दिङ्मुखी स्थाप्या च।। 131।।

विवरणम्

शिलालक्षणमपि दिङ्मात्रेणाचष्टे–सिद्धाद्र्याकरसम्भवेति। लोकसिद्धेषु अद्रिष्वाकरेषु च सम्भविनीत्यर्थः। सह्यमलयादयो लोके प्रसिद्धाः पुण्यगिरयः। शिलाकरास्तु शिलाक्षयादयः। वसुमतीमाग्नेति। भूम्यन्तर्गता। सिद्धाद्याकरेषु आहितापि ग्राह्या। तदन्यत्र भूमिमात्रे तु भूम्यन्तर्हिता ग्राह्येति भावः। स्ववर्णोचितेति। तदुक्तम्–

श्वेताब्जाभा मृगे ग्राह्या सौम्या विप्रस्य सा शिला।
ऐन्द्री रक्ता कुलस्थाभा ज्येष्ठायां क्षत्रियस्य तु।।
फल्गुन्यां भगदेवत्या पीता वा हरिता विशाम्।
कृष्णा मुद्गनिभाश्विन्यां शूद्रस्यैवाश्विदेवता।।

इति। अत्रानुलोमा अपि ग्राह्याः। प्रतिलोमास्सङ्कीर्णाश्च न ग्राह्याः। वर्णानवधृतौ पुरोक्तपरीक्षया स्वप्नदर्शनेन विनिर्णय इति। शस्त्रसहेति। शस्त्रस्पर्शे तदनुकूलैव न तु तदा स्फुटति जीर्यति वेत्यर्थः। दिश्याहिताग्रेति। स्फुलिङ्गबहुलमित्येतदग्रलक्षणम्। दिशि ऐन्द्र्यादौ न तु विदिशि। आहितमग्रं यस्याः सा तथोक्ता। बिम्बविधाविति पीठाद्युपलक्षणम्। यद्वा, स्ववर्णोचितेत्येतद् बिम्बविधावेव आवश्यकमिति भावः। स्फुलिङ्गबहुलमिति। तदुक्तम्–

ध्वनिर्घण्टानिभा यत्र स्फुलिङ्गाश्छेदने तथा।
दृश्यन्ते तच्छिरस्तस्याः पृष्ठमूर्ध्वमधो मुखम्।।

इति। शिरोविज्ञानेऽर्थात्तद्विपरीतदिशि पादप्रदेशो विज्ञायते। यत्काष्ठाभिमुखीति। यद्दिगभिमुखी। समुत्थितवतीति। बिम्बोचितायाः शिलायाः समन्ततो भित्त्वा समूत्थाप्यमानाया यद्दिक्सम्मुखं मुखं भवतीत्यर्थः।। 131।।

O god, who rides a bull be pleased to show me the stone. O Trinetra (having three eyes). O Rudra, O master of the flagstaff, I bow to you. (130)

For shaping an idol stone located in a mountain where there are holy hermitages, buried in the earth, suitable for the particular caste of the master, smooth, withstanding the impact of tools, providing deep sound and having its top directed towards a particular region may be chosen. The idol is to be installed in a region towards which the spark is produced by the impact of tools. (131)

दुष्टोद्देशसमुद्भवान्यपरिशिष्टा दुर्ग्रहाद्याश्रिता
वाताग्न्यर्ककराहतातिविपुला बाला च वृद्धासती।
दूरेखाक्षरगर्भमण्डलयुता रूक्षस्वरा जर्जरा
दुःस्पर्शापदिशं निवेशितशिरोदेशा च वर्ज्या शिला।। 132।।

विमर्शिनी

वर्ज्यां शिलामाह–दुष्येद्देशेति। दुष्येद्देशसमुद्भवा दुर्देशजाता। अन्यपरिशिष्य अन्यत्र गृहीताया अवशेषिता। दुर्ग्रहाद्याश्रिता वेतालादिग्रहैराश्रिता। वाताग्न्यर्ककराहता वायुनाग्निनादित्यकरैर्वा तप्ता। अतिविपुला उद्धर्तुमश(क्ता?क्या)। बाला दुर्बला। वृद्धासती[1] च जीर्णावयवा च। दूरेखाक्षरगर्भमण्डलयुता शास्त्रेषु निन्दिताभी रेखाभिरक्षरैश्च गभैरन्तश्छिद्रैस्तथा निन्दितैर्मण्डलैश्च युता। रूक्षस्वरा परुषस्वरा। जर्जरा शस्त्रे किञ्चिन्मात्रस्पर्शे शीर्णा। दुस्पर्शा परुषा। अपदिशं निवेशितशिरोदेशा च दिग्भ्योऽन्यत्र निवेशितशिरोभागा च शिला वर्ज्या स्यात्।। 132।।

विवरणम्

अथ पादुकादिविषये शिलां दुष्यां वदन् शिष्यं ग्राह्यां दर्शयति–दुष्येद्देशसमुद्भवेति। दुष्टोद्देशाः प्रेतवनादयः। अन्यपरिशिष्टेति। अन्यत्र विनिंयुक्तशेषा शिला। दुर्ग्रहाद्याश्रितेति। ब्रह्मराक्षसादयो दुर्ग्रहाः। वाताग्न्यर्ककराहतेति। सदा वातेन अग्निंनातपेन वा स्पर्शतो दूषिता। बाला च वृद्धासतीति। तदुक्तम्–

बाला शस्त्रासहा मृद्वी पिच्छिला पल्लवास्थिरा।
सा हि मण्डूकखण्डा च वृद्धा रूक्षातिजर्जरा।।
बहुवर्णातिनीला च धूम्रा च स्थूलरोमिका।
हीनस्वरा च निन्द्याङ्गी सोष्णा चण्डालिका स्मृता।।

इति। चण्डालिकैवासती। दूरेखाक्षरगर्भमण्डलयुतेति। दुरित्येतद् रेखाक्षरपदाभ्यां सम्बध्यते। दूरेखा वक्रादिका दुरक्षराणि रेखादीनि। तदुक्तम्–

वक्रस्थूलकृशा रूक्षाश्छि[2]न्नाग्राश्च न शोभनाः।
सङ्कीर्णा बहुवर्णाश्च यस्यां नेष्टा च सा शिला।।

इति। रोदोभिः पुष्टिशान्तयः या योगवाहेषूच्चाट(?) इत्यादि।

सगर्भोत्पाट्यमाना या भिद्यते शिथिलध्वनिः।
"मण्डलादियुतोष्णा वा विवर्णा वापि तां त्यजेत्।" इति। दुस्पर्शेति।

कण्टकितवदवस्थानादेतत्। अपदिशं निवेशितशिरोदेशेति। अदिक्ष्वाहिताग्रेत्यर्थः। इहैतदर्थादवसेयम्। शिष्टदेशोद्भवासु रेखाक्षरयुता ग्राह्येत्यादि।। 132।।

Such a stone is to be avoided or rejected, if it is located in a place where wicked people live, left over after the use of some other purpose, resorted to by evil forces like demons, broken by typhoon, fire or heat too large in size, not mature in time or too much old and dilapidated, having unauspicious lines with illegible markings of alphabet producing harsh sound and brittle at the strike of tools and pointing towards some corners. (132)

---

1. असतीशब्दस्य व्याख्यात्र न दृश्यते। चण्डालिकेवासतीति विवरणे दर्शनात् वृद्धा सतीति मुद्रितपाठो नादृतः।
2. 'भिन्नाङ्गाश्च' क. पाठः

गुर्वी धीररवा स्फुलिङ्गबहुला न्यग्रोधबोधिच्छद-
प्रख्या बिम्बविधौ विशालबहुला ग्राह्या शिला पौरुषी।
रम्भापत्रनिभा नचातिबहला स्निग्धस्वरा शीतला
स्त्रैणी पीठविधौ द्विलक्ष्मभिदुरा क्लैबी पदाब्जार्पणे।। 133।।

विमर्शिनी

तत्र बिम्बविधौ पौरुषी शिला ग्राह्या। सा तु गुर्वी गुरुत्वयुक्ता। धीररवा गम्भीरनादा। स्फुलिङ्गबहुला बहुस्फुलिङ्गयुक्ता। न्यग्रोधबोधिच्छदप्रख्या वटपत्रवद् वा अश्वत्थपत्रवद् वाकारयुक्ता। विशाल-बहुलातिविस्तारा च। पीठविधौ स्त्रैणी स्त्रीशिला ग्राह्या। सा तु रम्भापत्रनिभा कदलीपत्राकारा। न चातिबहला अतिघनरहिता। स्निग्ध्नस्वरा माधुर्यस्वरयुक्ता। शीतला शैत्ययुक्ता च। पदाब्जार्पणे पीठस्याधोगतनपुंसकशिलार्थम्। क्लैबी नपुंसकलक्षणयुता शिला ग्राह्या। सा तु द्विलक्ष्मभिदुरा पुंसः स्त्रियश्च लक्षणभेदिता च।। 133।।

विवरणम्

पुरुषशिलादिलक्षणमाह-गुर्वीति। पौरुषी शिला बिम्बविधौ ग्राह्येत्यन्वयः। न्यग्रोधबोधिच्छदप्रख्या वटाश्वत्थपत्रानुकारा। विशालबहला विस्तृता घना च। स्त्रैणी पीठविधौ ग्राह्येति योज्यम्। क्लैबी पदाब्जार्पणे इति। नपुंसकरूपा शिला पच्छिलाविधौ ग्राह्येत्यर्थः।। 133।।

For making an idol such a stone belonging to the male gender may be accepted, which is heavy, producing deep sound, having sparks where it is broken, appearing like the leaves of Nyagrodha (Ficus Indica) and Bodhi (sacred figtree) and extensive in shape. For making the altar or seat the stone should be the one resembling the leaves of plantains not too large, producing gentle sound, cool at touch and belonging to the gender of female. For making the base for resting the lotus feet, the one with the neuter gender and showing difference from both the above mentioned is suitable. (133)

लब्धायां शूभलक्ष्मलक्षितशिलायां शोधयित्वाञ्जसा
सम्पाद्य ध्वजपट्टिकादिपरिवीतं मण्डपं मूलतः।
मध्ये दिक्षु दिगीश्वरानपि यजेत् सर्वेष्वथो बीजमु-
ख्यासिभ्यामपि मृत्युजिन्मनुवरेणेशे स्वमूलान्ततः।। 134।।

विमर्शिनी

शिलापरिग्रहमाह-लब्धायामिति। शुभलक्ष्मलक्षितशिलायां शुभैर्लक्षणैर्युक्तायां शिलायां लब्धायां सत्यां दर्भमृदादिभिरञ्जसा शोधयित्वा। ध्वजपट्टिकादिपरिवीतं ध्वजैस्तत्पताकाभिश्च परिवृतं मण्डपं सम्पाद्य सर्वेषु देवेषु मध्ये मूलतो दिक्षु दिगीश्वरानिन्द्रादीनपि यजेत्। अथो ईशे स्वमूलान्ततः स्वमूलयजनानन्तरम्। बीजमुख्यासिभ्यां द्वादशपटले वक्ष्यमाणेन बीजमुख्यमन्त्रेण क्षुरिकया च। मृत्युजिन्मनुवरेण मुत्युञ्जयाभिधानेनापि यजेत्।। 134।।

विवरणम्

शिलापरिग्रहक्लृप्तिमाह–लब्धायामिति। शिलान्वेषणस्यैव प्रकृतत्वादिदानीं लब्धायामित्यभिधानम्। भूम्यन्तर्हितायां तु शिलायां खात्वा लब्धायामित्यपि द्रष्टव्यम्। अञ्जसा शोधयित्वेति दर्भादिभिर्घर्षणपूर्वकं बहुजलैर्युक्तितः शोधनमुक्तम्। गन्धजलेनापि क्षालनं, प्राक् पूजितेन कलशेन अभिषेचनं, पञ्चगव्येन पवमानीभिः प्रोक्षणमप्युक्तम्। मूलतो मध्ये यजेदिति। शिलायामपि यत्र प्रतिमा गृह्यते स एव प्रदेशो मध्य इत्यभिप्रेतः। तत्र देवं विधिवत् सम्पूज्य पायसं निवेदयेदिति भावः। दिक्षु दिगीश्वरानपि यजेदिति। स्थण्डिलेषु स्वस्तिकादिषु कलशेषु वेति भावः। शिवे त्वधिकमाह–अथो[1] बीजमुख्यासिभ्यामिति। असिः क्षुरिका। एतन्मन्त्रोद्धारस्तु कर्मशेष एव। कल्पविदिति देवसन्निधावेव बीजमुख्यादिपूजा तद्बहिरङ्गाद्यावरणपूजेत्युक्तम्।। 134।।

Once a stone with auspicious signs is located it is to be cleaned (with darbhā grass and a water) and shelter is built over it with small flag staff in all sides. Thereafter using Mūlamantra the main deity and those divinities of the quarters are to be worshiped with sacrificial rituals. Bījamantra, kavaca mantra and Mṛtyuñjaya mantra are to be made use of in such rituals. (134)

तत्पश्चिमेऽस्त्रमनुनाष्टशताज्यहोमं
कृत्वार्प्य सर्पिरधिवास्य च शस्त्रजातम्।
तद्देवताप्युदसनाय सभूतकूर-
मों देवताभ्य इति दिक्षु बलिं किरेच्च।। 135।।

विमर्शिनी

अथ सर्वेषु तत्पश्चिमे अस्त्रमनुनाष्टशताज्यहोमं कृत्वा सम्पातसर्पिरार्प्य संस्मृश्य। शस्त्रजातं शस्त्रसमूहम् अधिवास्य। तद्देवताव्युदसनाय तत्रत्यानां देवतानामपासनार्थम्। सभूतकुरं भूतकूरैः सहितं बलिं दिक्षु ओं देवताभ्य इत्यादिना पूर्वोक्तेन मन्त्रेण। किरेत् विक्षिपेत्।। 135।।

विवरणम्

शस्त्रजातं चाधिवास्येत्यन्वयः। देवस्याधिवासनं चकारेण सूचितम्। यदुक्तं–'इष्ट्वाहतवस्त्रेण दर्भैरप्याच्छाद्ये'ति। शस्त्राणामपि वस्त्रेणाच्छाद्याधिवासः। तद्देवताव्युदसनायेति। तद्गतानां भूतादीनां वनदेवतानां चेत्यर्थः। शिलाशोधनतोऽपि प्रागेव वेदानीं वा बलिहरणमेतत् स्यात्। बलिहरणान्तरं वोत्तरेद्युर्वास्त्रेण तद्देवतापासनमपि व्युदसनग्रहणेनोक्तम्। ओं देवताभ्य इति। भूपरिग्रह उक्त एव गन्त्रः। प्रणवेन सहोपादानं प्रदर्शनार्थम्। मया सम्पूजितैरित्यादिमन्त्रेष्वपि प्रणव आदितः स्यादिति।। 135।।

Thereafter using the Astramantra oblations are to be given in sacrificial fire chanting the Astramantra for a hundred and eight times. Touching the ghee and sprinkling the same on the tools which are to be covered with cloth, one should offer oblations, of Bhūtakūra preparations are to be offered to manes and spirits to ward of their presence. The mantra should be in the form of 'om devatābhyaḥ". (135)

1. 'बीजमुख्यासिभ्यामपि कल्पवित् त्रिनयने मृत्युञ्जयेनापि तद्' इति विवरणपाठः

देवाग्रतो जपतु निश्यधिशय्य दर्भ-
शय्यां नमः सकललोकमनुं त्रिधाम्नि।
शम्भौ नमः शमितिमन्त्रयुजार्थयित्वा
स्वप्नार्थमों हिलिहिलीति मनुं जपेच्च।। 136।।

नमः सकललोकाय विष्णवे प्रभविष्णवे।
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः।। 137।।

नमः शम्भो! त्रिनेत्राय रुद्राय वरदाय च।
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः।। 138।।

आचंक्ष्व देव! देवेश! प्रपन्नोऽस्मि तवान्तिकम्।
स्वप्ने सर्वाणि कार्याणि हृदयस्थानि यानि वै।। 139।।

ओं हिलिहिलि शूलपाणये स्वाहा। इति।

विमर्शिनी

पुनर्निशि देवाग्रतः। दर्भशय्यां दर्भमयीं शय्याम्। अधिशय्याश्रित्य। त्रिधाम्नि विष्णौ। नमस्सकललोकमनुं नमः सकललोक इत्यादिमनुं मन्त्रं जपतु। शम्भौ शिवे। नमश्शमितिमन्त्रयुजा नमः शम्भो इत्यादिमन्त्रद्वयेन अर्थयित्वा प्रार्थ्य। स्वप्नार्थं स्वप्नदर्शनार्थम्। ओं हिलि हिलि इत्यादिमनुं जपेच्च। अन्येषु स्वस्वमूलमन्त्रं जपेत्, ततः स्वप्नं पश्येत्।। 136-139।।

विवरणम्

निशि देवाग्रतो दर्भशय्यामधिशय्य जपत्वित्यन्वयः। निशीत्यनेन प्रागुक्तं सर्वं दिवेत्यन्तुक्तम्। दर्भशय्यायां शयित्वेत्यर्थः।। 136।।

स्थित्वैवार्थनेष्यते। नमः सकललोकायेति, नमश्शम्भो त्रिनेत्रायेति च स्वप्नमाणवको नाम मन्त्रः। हरिहरादिषु कथमिति। तेष्वपि यथास्वं विष्णुं शिवं वापि सम्पूज्य तदग्रतो यथोक्तं[1] स्वप्नं कार्यमिति ज्ञेयम्।। 137-139।।

After spending the night sleeping on a bed of darbhā grass the preceptor should worship Viṣṇu using the mantra beginning with "Sakalalokas" etc. Śiva should be propitiated with the two mantra"namaśśam' etc. Then he should chant the Mantra like "hili hili' etc., for favour of obtaining a dream. (136)

I bow to all the worlds. I bow to Viṣṇu, the all powerful, who is the universe and represent the form of the Universe and the master of dreams. (137)

I bow to Śambhu, the three eyed god who is Rudra and capable of giving boons.'He is the universe and is of the form of a universe to that master of dreams,. I offer my salutations. (138)

1. 'क्तं दर्भस्व',

O god, O god of Gods I have come to your side. Tell me in a dreams all that is in your mind. "Om hili hili" I offer worship to Śūlapāṇi one who holds a javelin. (139)

दुःस्वप्नेऽस्त्र[1]शताज्यहोमकृदथ प्रातः समभ्यर्च्य ता-
मुद्बुध्यस्वमनुं जपन् वहनपादाद्यङ्गकेष्वङ्कयेत्।
तक्ष्णा तां सहपीठपाददृषदं प्रोद्धार्य कृत्वा रथे
नीत्वात्रोत्तरक्लृप्तशिल्पि[2]निलयं बिम्बादिकं कारयेत्।। 140 ।।

विमर्शिनी

पुनः प्रातर्यदि दुःस्वप्ने दृष्टे। अस्त्रशताज्यहोमकृद् अस्त्रमन्त्रेणाष्टशतमाज्यं हुत्वा। मूलमन्त्रेण समभ्यर्च्य। तां शिलाम्। वदनपादाङ्गकेषु वदनपादादिसर्वाङ्गेषु। उद्बुध्यस्वाग्न इति मनुं जपन् अङ्कयेत् चिह्नं कुर्यात्। पुनस्तक्ष्णा सहपीठपाददृषदं पीठशिलापादशिलाभ्यां सहितां तां शिलां प्रोद्धार्य प्रकर्षेणोद्धरणं कारयित्वा। रथे रथस्थानीये शकटे वा। कृत्वा स्थापयित्वा। अत्र देवालयसमीपे। उत्तरक्लृप्तशिल्पिनिलयं देवालयस्योत्तरभागे कल्पितं शिल्पिनो गृहं नीत्वा। बिम्बादिकं बिम्बपीठादिकं सर्वं कारयेत्।। 140 ।।

विवरणम्

दुःस्वप्न इति। सुस्वप्ने तु सा ग्राह्यैव। यदुक्तम्-

ज्वलन्तीं वा शिलां पश्येत् स्वप्ने स्वां देवतां तु वा।
अन्यद्वा शोभनं ग्राह्या सा शिला।। इति।

अथ प्रातरिति। प्रातः स्नानादि कृत्वा तस्यां शिलायां प्राग्वन्मूलमन्त्रेण देवं पूजयेत्। उद्बुध्यस्वमनुं जपन्निति। सर्वाङ्कनेष्वयमेव मन्त्र इति भावः। वदनपादाद्यङ्गकेष्विति। यदुक्तम्-'स्फुलिङ्गबहुलं तस्याः शिर' इत्यादि। अङ्कयेदिति। यदुक्तम्-'हेमसूच्यष्ठालाभ्यां तु छिन्द्यात् प्रथममस्त्रतः'। इति। सकृदुद्बुध्यस्वेत्युक्त्वा नरत्रमुच्चारणीयमिति ज्ञेयम्। पीठपच्छियलयोरस्त्रेणैवाङ्कनम्। नीत्वात्रेति। यत्र प्रासादादि निर्मेयं तत्र, आयतनभूमावित्यर्थः।। 140 ।।

In case a bad dream is seen, he should perform in the morning the pouring of oblations in a sacrificial pit one hundred and eight times chanting the Astramantra. Then awakening from the effect and chanting the Mūlamantra the mason (or Carpenter) should be made a to mark down on the stone the location of the idol regarding, face, foot and other limbs both in and outside of the stone. Thereafter lifting up that stone which is to form the altar (seat) and feet and placing it on a cart it should be taken to the shed of the mason constructed at the north side of the proposed temple and idol and seat may be carved suitably. (140)

---

1. 'ष्ट',
2. 'ल्प' क. पाठः

इति तन्त्रसमुच्चयेऽर्चकोर्वी-
ग्रहवास्त्विष्टिनिधीष्टकाक्रियाढ्यः।
सहगर्भशिलाहृतिप्रकारः
प्रथमोऽयं पटलः प्रगुम्भितोऽभूत्।। 141।।


अथ ग्रन्थकृत् प्रथमे पटले प्रकाशीकृतानर्थान् स्मारयति–इतीति। एवं तन्त्रसमुच्चये तन्त्रसमुच्चयाख्ये ग्रन्थे। अयं प्रथमः पटलः परिच्छेदविशेषः। प्रगुम्भितः विरचितोऽभूत्। कथंभूतः, अर्चकोर्वी-ग्रहवास्त्विष्टिनिधीष्टकाक्रियाढ्यः अर्चक आचार्यः उर्वी भूमिः तयोर्ग्र (हणं ?हः) परिग्रहणं तेन वास्त्विष्टिर्वास्तुयागः तेन च निधिः निधिकलशस्थापनं तेन च इष्टकाक्रिया इष्टकानिधानं तेन वाढ्यः परिपूर्णः। सहगर्भशिलाहृतिप्रकारः गर्भस्य गर्भाधानस्य शिलाहृतेः शिलाया आहरणस्य च यौ प्रकारौ ताभ्यां च सहित एष पटलः।। 141।।

Thus the first Paṭala of Tantrasamuccaya dealing with the selection of preceptor, fixing of the plot, Vāstubali (offering to the manes occupying the ground), deposit of the copper pot, laying of bricks, Gartanyāsa (putting of the cell forming the womb) selection of stone etc, has come to an end. (141)

इति तन्त्रसमुच्चयविवरणे प्रथमः पटलः।



अथ द्वितीयः पटलः



पादोनत्रिकरादिपञ्चदशहस्ताशाङ्गुलान्तोत्तरे-
ष्वष्टाष्टाङ्गुलवृद्धितोऽन्तरभवद्योनिप्रभेदेष्वथ ।
प्रत्यक्प्राग्वदनक्रमेण विहितेष्वल्पेषु वान्येषु वा
प्रासादेषु विशिष्टजातिषु निजेष्टं कारयेत् कारुभिः ।। 1 ।।

विमर्शिनी

'प्रासादमारचयतां सहमन्त्रबिम्बम्' इति पूर्वपटलेन प्रस्तुतानां प्रासादादीनां लक्षणं वदन् प्रथमं सामान्येन प्रासादानुद्दिशति – पादोनत्रिकरेति। अथा[1]ल्पेष्वन्येषु वा प्रासादेषु निजेष्टं कारुभिः कारयेदिति सम्बन्धः। तत्राल्पप्रासादान् विशिनष्टि पादोनेत्यादिविशेषणैः। अथ गर्भाधानान्ते कर्मणि कृते। पादोनत्रिकरादिपञ्चदशहस्ताशाङ्गुलान्तोत्तरेषु पादोनत्रिकरादीनि पञ्चदशहस्ताशाङ्गुलान्तान्युत्तराणि येषां प्रासादानां ते तथोक्ताः। आशाशब्देन दशसङ्ख्या लक्ष्यते। अष्टाष्टाङ्गुलवृद्धितः पादोनत्रिकरा-दष्टाष्टाङ्गुलवर्धनेन। अन्तरभवद्योनिप्रभेदेषु अन्तरे मध्ये भवन्तो योनिप्रभेदाश्च येषां ते तथोक्ताः। प्रत्यक्प्राग्वदनक्रमेण विहितेषु क्रमात् पश्चिममुखत्वेन प्राङ्मुखत्वेन च कल्पितेषु। पादोनत्रिकरः प्रासादः प्रत्यग्वदनो ध्वजयोनिश्च, सद्व्यङ्गुलस्त्रिकरः प्राग्वदनो वृषयोनिश्च, सदशाङ्गुलस्त्रिकरः प्रत्यग्वदनो ध्वजयोनिश्च, पादोनचतुष्करः प्राग्वदनो वृषयोनिश्चेत्यादिक्रमेण सदशाङ्गुलः पञ्चदशहस्तः प्रासादः प्रत्यग्वदनो ध्वजयोनिरित्यन्तं विहितेष्वि[2]त्यर्थः। अन्येषु विशिष्टजातिषु वा। जातिच्छन्द-विकल्पाभाससंज्ञेष्वित्यर्थः। यथा प्रयोगमञ्जर्याम्–

आरभ्य त्रिकराच्च पचदशकाद्धस्तादधस्तात् क्रमात्।
प्रत्येकं प्रवदामि लक्षणमहं संक्षेपतो वेश्मनाम्।।

इति। भास्करीये च–

त्रिचतुः पञ्चहस्तं तु षट्सप्ताष्टनवा दश।
एकादश द्वादश च त्रयोदश चतुर्दश।
पञ्चदशान्तविस्तारमेतेन विधिना विदुः।।

इति।। 1।।

विवरणम्

एवं तावद्यागभूमेः शिलायाश्च प्रासादप्रतिमायोग्यतासम्पादनं प्रतिपादितम्। सम्प्रति तन्निष्पादनप्रकारः।

1. 'योक्तेष्व' क. पाठः
2. 'ष्वपीत्य' ख. पाठः,

तत्र प्रथमं प्रासादलक्षणप्रतिपादनायारभते – पादोनत्रिकरेति। अथ अल्पेषु वान्येषु विशिष्टजातिषु च प्रासादेषु निजष्टे कारुभिः कारयेदित्यन्वयः। यतश्च निर्धारणमित्यत्र सप्तमी। अत्राल्पप्रासादेषु योज्यानि विशेषणानि पादोनत्रिकरमारभ्य पञ्चदशहस्ताङ्गुलमवसानानि येषामुत्तराणां ते तथोक्ताः। आशाशब्दो दशसङ्ख्यावाची। अष्ट्यष्ट्यङ्गुलवृद्धितः अन्तरे अन्तराले भवन्तो वक्ष्यमाणा योनिप्रभेदा येषां ते तथोक्ताः। प्रत्यक्प्राग्वदनक्रमेण विहितेष्विति। पादोनत्रिकरः प्रासादः प्रत्यग्वदनः, व्यङ्गुलसहितस्त्रिकरः प्राग्वदनः, तथा दशाङ्गुलसहितस्त्रिकरः प्रत्यग्वदनः, पादोनचतुष्करः प्रा[1]ग्वदनः, एतत् क्रमेण पञ्चदशहस्ताशाङ्गुलान्तं योजनीयमित्यभिप्रायः। विशिष्टजातिष्विति जातिच्छन्दविकल्पाभासादयो गृह्यन्ते। निजेष्टमिति। स्वाभीष्टदेवतास्थापनयोग्यमित्यर्थः।। 1।।

The owner shall employ carpenters to construct a Prāsāda (Temple) according to his liking from among the various types of Alaprāsāda small temples or one among Viśiṣṭajāti (Special types) called Mahāprāsāda (larger ones). There are four types called Jāti, Cchanda, Vikalpa and Ābhāsa.

Such types are seen facing towards east or west (as the case may be). The measurements of these differ from Pādonatrikara (a quarter less than three karas – meaning two and three – fourth of hastas (a measure of 24 angulas an angula meaning three centi-meters), onwards upto fifteen hastas with regard to the Uttaravistāra – the length of wall plate or beam, chiefly that which supports the lower roof). In between these intermediary types are there with the increase of eight angulas each in the matter of yoni (architectural formula for orientation). (1)

ईशादिप्रेतेशपर्यन्तदिक्स्थाः
प्रासादा ग्रामादिकेषु ध्वजोत्थाः।
गोयोन्युत्थाः शेषदिक्संस्थिताः स्यु-
स्तत्स्थाप्यार्चा चेष्यते तत्सयोनिः।। 2।।

विमर्शिनी

उक्तानां प्रासादानां प्रत्यक्प्राग्वदनक्रमेण कल्पनीयत्वे विषयविभागमाह – ईशादीति। ग्रामादिकेषु ग्रामपुरनगरादिषु। ईशादिप्रेतेशपर्यन्तदिक्स्थाः ईशकोणमारभ्य यमपर्यन्तदिक्षु स्थिताः प्रासादाः। ध्वजोत्थाः ध्वजयोनिसंभूताः शेषदिक्संस्थिताः निर्ऋत्यादिसोमान्तदिक्स्थिताः।। गोयोन्युत्थाः वृषयोनिसंभूताः स्युः। तत्स्थाप्या तत्र तत्र स्थाप्या अर्चा प्रतिमा। तत्सयोनिः तत्समानयोनिरिष्यते। प्रासादो ध्वजयोनिश्चेत् प्रतिमापि ध्वजयोनिः, वृषयोनिश्चेद् वृषयोनिरित्यर्थः। तथा पाशुपते–

ईशपूर्वाग्नियाम्यस्थ पश्चिमाभिमुखं शुभम्।
उत्तरानिलवारीशराक्षसस्थं पुरोमुखम्।।

इति। तथाच मञ्जर्यां–

1. 'प्रत्यग्व' क. पाठ

"लिङ्गध्वजस्थमृ[1]षभाश्रितमेव शस्तं तत्रापि मुख्यमनुरूपतया गृहस्य।"

इति।।2।।

विवरणम्

तत्र तत्साधनभूतानेकविधप्रमाणप्रकृत्यात्मकपरिधिमानमूलभूतयोनिमुपदिदिक्षुर्योनीनां हेयोपादेय-भेदेनावस्थानादुपादेयां योनिं प्राचि प्रतीचि च हराविति पुरोदीरितग्रामादिदिग्विशेषवशाद् दर्शयति – ईशादीति। ध्वजोत्थाः गोयोन्युत्था इति। तत्कारणभूततत्तत्परिधिमानजन्यानेकविधप्रमाणसाध्यतया तत्कार्यभूता इत्यर्थः। तत्सयोनिः तेन प्रासादेन समानयोनिः। तत्तत्परिधिमानावच्छिन्न-द्रव्योचितानेकविधप्रमाणसाध्येत्यर्थः। प्रासादप्रतिमयोः परस्परसमयोनित्वं चैवं प्रतिपादितमवगन्तव्यम्। तेन प्रासादस्य प्रतिमाजन्यत्वेऽपि योनिसिद्धिर्भवति।। 2 ।।

In localities like villages (as also in town and cities) the temples to be located in different quarter from north upto south shall be of Dhvaja Yoni, (location of a vāstu east of the focal point) and Ekayoni (facing/towards the west) while those in the other quarters from Goyoni (from the north corner– South west direction – upto North) shall be Vṛṣayoni (location of Vāstu – west of focal point and Pañcayoni (facing towards east). The idols constructed in such temples should be commensurate with the particular yoni (architectural formula for orientation (meaning that the idol of the temple facing west shall be of Ekayoni and those facing east shall have an idol of Pañcayoni). (2)

इष्टातानवितानमाननिचये त्रिघ्नेऽष्टभिर्भाजिते
शेषो योनिरिह व्ययो मुनियुजाथायोऽष्टनिघ्नेऽरुणैः।
ऋक्षैरृक्षमवाप्तिरत्र तु वयो ज्ञेयं तिथिस्त्रिंशता
वारो भूमिधरैर्निधिप्रगुणिते धर्माहृते वा व्ययः।।3।।

विमर्शिनी

कीदृशी योनिरित्याकाङ्क्षायां योन्यादिकमाह–इष्टतानेति। इष्टतानवितानमाननिचये इष्टस्य प्रासादादेरातानवितानयोर्दैर्ध्यविस्तारयोर्माननिचये प्रमाणसमूहे। त्रिघ्ने त्रिभिर्गुणिते। अष्टभिर्भाजिते हृते सति। यः शेषः स योनिरित्युच्यते। इहेत्यनेन इष्टतानवितानमाननिचये त्रिघ्ने इत्यनुवादः क्रियते। मुनियुजा चतुर्दशभिर्भाजिते सति शेषो व्यय इत्युच्यते। अथेत्यारम्भभेदे। इष्टतानवितानमाननिचये अष्टनिघ्नेऽष्टभिर्गुणिते। अरुणैर्द्वादशभिर्भाजिते शेष आय इत्युच्यते। इहेति अत्राप्याकृष्यते। इहाष्टनिघ्ने ऋक्षैः सप्तविंशत्या भाजिते शेष ऋक्षं नक्षत्रम्। अत्र त्विति तुशब्दो विशेषद्योतकः। अत्र ऋक्षैर्भाजिते। अवाप्तिः आवृत्तिः फलमिति यावत्। तद् वयो ज्ञेयम्। इहाष्टनिघ्ने त्रिंशता भाजिते शेषस्तिथिरित्युच्यते। इहैव भूमिधरैः सप्तभिर्भाजिते शेषो वारः। व्ययस्य पक्षान्तरमाह – निधीति। इष्टतानवितानमाननिचये निधिप्रगुणिते नवभिर्गुणिते धर्माहृते दशभिर्हृते शेषो वा व्ययः। तथाहुः–

1. 'वृ' ख. पाठ.

विस्तारायामराशौ वसुगुणित इनैर्भाजिते शेष आयो
रामघ्ने मन्ववाप्ते व्यय इह वसुभिर्भक्तशेषस्तु योनिः।
अष्टाभिर्वर्धितेऽस्मिंस्त्रिनवहृतफलं तद्वयः शेष ऋक्षं
पर्यन्ते त्रिंशदाप्ते तिथिऋषिभजिते वार आदित्यपूर्वः।।

इति। मयमते च–

व्यासायामसमूहे वसुनिधिगुणिते दिनेशधर्महृते।
आयव्ययमपि शिष्टं रामघ्नेऽष्टाहृते योनिः।।

इति।। 3।।

विवरणम्

एवमुपादेयाया योनेः कार्यभूतं तत्तत् परिधिमानमुपायविशेषेणोपदिशति इष्यतानविताननेति। प्रासादो बिम्बमन्यद्वा निर्मित्सितं सामान्येन इष्टशब्देन गृह्यते। आतान आयामः, वितानो विस्तारः, मानं प्रमाणविशेषसाध्यं सङ्ख्यालक्षणं मानं, निचयशब्दः समूहपर्यायः। तेनातानवितानयोरभितो वर्तमानयोः परिग्रहोऽपि द्योतितः। भाव्युपचारेण वायमातानवितानव्यपदेशः। येन मानेन प्रासादस्य प्रतिमाया वातानवितानौ यथालक्षणं परिकल्पनीयौ तादृशं मानमित्यर्थः। ननु यद्येवं परिधिमानमित्येव साक्षाद् ग्रहीतव्यमिति चेत्। नैष दोषः, प्रीतमार्थत्वात्। तत्र हि परिधिमानग्रहणे विवक्षितं परिधिमानं न प्रतीयेत। वृत्तषट्कूटयदिप्रासादानां तु चतुरश्रप्रासादप्रकृतित्वादेव तत्परिधिमानग्रहणं भवतीत्यर्थः। त्रिघ्नेऽष्टभिर्भाजिते शेषो योनिरिति त्रिगुणितं कृत्वा अष्टयवष्टौ यथायोगमपनयेत्। तदा शेषोऽष्टभेदा योनिः स्यात्। तस्य परिधिमानस्य योनिस्तत्रावगन्तव्या। यावत् तत्रावशिष्यते तावती योनिरित्यर्थः। नक्षत्रतिथिवारेष्वपि समानमेतदिति द्रष्टव्यम्। किं पुनः प्रमाणसाधनमिति चेत् प्रासादे हस्तः प्रतिमायामङ्गुलम्। प्रमाणसाधन-व्यवस्थापनाच्च परिधिमानसङ्करो न शङ्कनीयः। योनिवशादुपजायमानं परिधिमानमेवमुपदिष्टम्। तस्यैव परिधिमानस्य गुणविज्ञानार्थमायव्ययादिविज्ञानोपायमाह–इह व्यय इत्यादिना। इहेति त्रिघ्न इष्यतानवितानमाननिचय एवेत्यर्थः। मुनियुक् चतुर्दश। अथाष्टनिघ्नेऽरुणैर्द्वादशभिरायः। अवाप्तिरत्र तु वय इति। सप्तविंशत्या ह्रियमाणे यो भागोऽवाप्यते तद् वयः स्यात्। वसुप्रगुणिते धर्माहृते वा व्यय इति। विकल्पान्तरप्रदर्शनार्थमेतत्। धर्मा दश।। 3।।

The measurements of the length and breadth of th temple which is preferred by the owner may be multiplied by three and divided by eight and what is left is termed as yoni. By dividing the same (which is multiplied by three) by fourteen one could arrive at the balance. What is called Vyaya (loss). at the yoni is multiplied by eight and divided by twelve one could arrive at the balance called Āya (gain). If the same yoni is multiplied by seven and divided by twenty seven the balance is Nakṣatra (like Aświni - an asterism). This is also called Vyayas. Divided by Thirty one could find out the Tithi (the Lunarday) and by seven one one get the Vāra (the day of the week). Also the resultant balance of the multiplication of yoni by nine which is divided by ten is called Vyaya (loss). (3)

ध्वजधूमसिंहकुक्कुरवृषखरगजवायाः क्रमेण स्युः।
[1]प्रागादियोनयोऽष्टौ तेष्वयुजः सम्पदे युजो विपदे।। 4।।

विमर्शिनी

अष्यनां योनीनां नामानि कथयति – ध्वजेति। प्रागादिक्रमेण ध्वजधूमसिंहकुक्कुरवृषखरगजवायसाः ध्वजधूमेत्यादिसंज्ञाः। तेषु ध्वजादिषु अयुजः दिग्भवाः सम्पदेऽभ्युदयाय, युजः कोणभवा नाशाय। तथा पाशुपते–

तत्रैकाद्यष्टपर्यन्ता ध्वजधूमादयः क्रमात्।
ध्वजो धूमश्च सिंहश्च शुनको वृषभस्तथा।।
खरश्चैव गजश्चैव वायसो वास्तुयोनयः।
आदिप्रभृतिचत्वार एकैकान्तरिताः शुभाः।।
द्वितीयाद्यास्तथैवान्ये चत्वारस्त्वशुभाः स्मृताः।

इति।। 4।।

विवरणम्

नक्षत्रादीनां प्रसिद्धत्वादप्रसिद्धा योनिर्गणयति – ध्वजेति। पूर्वादियोनयः पूर्वाद्यष्टदिक्षु वर्तमाना योनयः। परिमण्डपादीनां दिग्योनिपरिग्रहपक्षे दिग्विशेषाभिधानस्योपयोगात्। तेष्वयुजः सम्पदे युजो विपद इति। ध्वजसिंहवृषगजा अभ्युदयहेतवः, शेषा विनाशहेतवश्च विज्ञेयाः। ननु किमर्थोऽयं फलोपन्यासः यावता प्रासादप्रतिमानां ध्वजवृषमात्रपरिग्रहात् परिमण्डपादीनां च पक्षे दिग्योनिनियमाच्च धूमादिपरिग्रहप्रसङ्गो न भवतीति चेत्। अथवा युज्यन्तेऽवयवैरिति युजः। अवयवभूताभिः सङ्ख्याभिः सहिता ध्वजादयः, ते न ग्राह्याः। ये त्वयुजः निरवयवाः पूर्णा एव, त एव ध्वजादयो ग्राह्याः स्युः। परिधिमानस्य सर्वसङ्ख्यास्वनियमात् कदाचिदेकैकयोनिः पूर्णो भवति। कदाचित् कतिपयावयवात्मकस्सत्रपूर्णश्च। तथा च तिथिनक्षत्रेष्विवापूर्णतायामपि ग्रहणप्रसङ्गः स्यात्। तन्निवृत्त्यर्थमेतदुक्तम्।। 4।।

The eight yonis beginning with east in the order are respectively called Dhvaja (flagstaff) Dhūma (smoke) Simha (lion), Kukkura (dog), Vṛṣa (bull), Khara (ass), Gaja (elephant) and Vāyasa (crow) of these, those with odd numbers (Dhvaja, Simha, Vṛṣabha and Gaja) are productive of wealth and those with even numbers (Dhūma, Kukkura, Khara and Vaya) are indicative of misfortune. (4)

आयाधिक्यं व्ययतः सम्पाद्यं सर्वथान्यथापत्तिः।
नक्षत्रादिशुभत्वं ज्योतिः शास्तादि[2]भिः सुविज्ञेयम्।। 5।।

---

1. 'पूर्वादियोनयो' इति विवरणरीत्या पाठः
2. 'त' क. पाठ

विमर्शिनी

व्ययतः व्ययात्। आयाधिक्यम् आयस्याधिकत्वम्। सर्वथा सर्वप्रकारेण सम्पाद्यं ग्राह्यम्। अन्यथा चेदापत्तिः नाशः स्यात्। नक्षत्रादिशुभत्वं नक्षत्रतिथ्यादीनां शुभत्वं ज्योतिः शास्त्रादिभिर्लोकत एव सुविज्ञेयः। तथा मयमते–

"आयाधिकमथ वसुदं व्यया[1]धिकं सर्वनाशः स्यात्।"

इति।। 5।।

विवरणम्

आयव्ययोरितरेतरापेक्षं शुभाशुभत्वमाह – आयाधिक्यमिति। सर्वथेति। यद्यपि तिथिनक्षत्रादिषु किञ्चिदशुभमुपेक्ष्यते, तथापि व्ययाधिक्यमनुपेक्ष्यमित्यभिप्रायः। इत्थं प्रासादप्रतिमयोः परिधिमानमशुभं प्रतिपादितम्।। 5।।

One should strive for gain over and above the loss, otherwise it will result in calamity. As for the auspicious men of the asterism one has to find it from the science of astrology (5)

बालत्वं कौमारं यौवनमथ वार्धकं व निधनं च।
पञ्च वयांस्येष्वन्त्यं नेष्टं शिष्टानि वास्तुनीष्टानि।। 6।।

विमर्शिनी

वयांसि कथयति – बालत्वमिति। अथ बालत्वं कौमारं यौवनं वार्धकं निधनं मरणं चेति पञ्च वयांसि। एषु वयन्तु। अन्त्यं मरणमेव नेष्टम्। वास्तुनि शिष्यनीष्यन्येव।। 6।।

Boyhood, childhood, youth, old age and death are the five stages of life and the last one is not at all desirable. The other situations are desirable (for temples). (6)

धाम्नो व्यासे शक्वरीद्वन्द्वभक्ते
मित्रेन्द्रेध्मांशैः समस्तांशतश्च।
विस्तृत्या संयुक्तया पादुकादि-
स्तूप्यग्रान्तोऽभ्युच्छ्रयः स्याच्चतुर्धा।। 7।।

विमर्शिनी

प्रासादस्योन्नतेर्नियममाह – धाम्न इति। धाम्नः प्रासादस्य। व्यासे विस्तारे। शक्वरीद्वन्द्वभक्ते अष्यविंशतिधा कृते सति। मित्रेन्द्रेध्मांशैः मित्रा द्वादश इन्द्राश्चतुर्दश इध्मा एकविंशतिः तत्सङ्ख्यैरंशैः समस्तांशतःसमस्तेन च विस्तारेण संयुक्तया विस्तृत्या मानेन प्रासादस्य। पादुकादिस्तूप्यग्रान्तः पादुकमारभ्य स्तूप्यग्रमवधीकृत्य योऽभ्युच्छ्रय उत्सेधः स चतुर्धा स्यात्। तथा निबन्धने–

---

1. 'यमधि' ख. पाठः

सप्तांशत्र्यर्धि[1]कोऽध्यधः पादोनद्विगुणोऽपि वा।
द्विगुणो वोच्छ्रयः प्रोक्तो विस्तारात् सर्ववेश्मनाम्।।

इति।। 7।।

विवरणम्

अथ प्रासादस्य भूयस्तरकालसाध्यत्वेन प्रागेव प्रक्रमणीयत्वात् प्रथमं प्रासादप्रकारमभिदधानः समचतुरश्रं प्रासादं प्रकृतित्वेन च मन्यमानः तस्य प्रतिदिशं वितानस्य परिधिमानस्य चतुर्थांशलक्षणस्य स्पष्टतरत्वात् प्रथममुन्मानं जनयितुमाह धाम्नो व्यास इति। यद्यपि समचतुरश्रे विस्तारो नाम न कश्चित् सम्भाव्यते, तथापि व्यासग्रहणमायतचतुरश्रसमवृत्तादीनामपि विस्तारादेवोन्मानं जनयितव्यमिति ज्ञापनार्थम्। शक्यरीद्वन्द्वमष्यविंशतिः। विस्तारप्रमाणमष्याविंशतिधा भङ्क्त्वा तेषु भागेषु मित्रांशाद् विस्तारप्रमाणे योजयेत्, तदेकमुन्मानम्। एवमितरत्रयं द्रष्टव्यम्। मित्रा द्वादश, इन्द्राश्चतुर्दश, इध्मा एकविंशतिः, समस्तांशा अष्यविंशतिः। ननु उन्मानेन अवच्छेद्यः कस्मिन् प्रदेशे प्रासाद इत्याह - पादुकादिस्तूप्यग्रान्त इति। पादुकादीत्युपलक्षणम्। पादुकाभावे जगत्याद्यपि ग्राह्यम्। समस्तोन्मान-मेवमुक्तम्।। 7।।

The diameter of a shrine divided by twenty eight, twelve, twelve or twenty one and added with the width could be the four types of height from the basement upto the stūpi (finial). (7)

गेहे त्रिदोर्वर्गभवे द्विदोर्मितान्
[2]स्तम्भांस्ततोऽब्ध्यङ्गुलवर्धितान् क्रमात्।
चतुष्कराद्युत्तरवर्गजेषु तान्
[3]करोत्वधिष्ठानमतोऽर्धसंमितम् ।।8।।

विमर्शिनी

एवं समस्ताया उन्नतेः प्रमाणमुक्त्वा स्तम्भाधिष्ठानयोरुन्नतेर्नियममाह - गेह इति। त्रिदोर्वर्गभवे पादहीनः त्रिकरः सव्यङ्गुलः त्रिकरः सदशाङ्गुलः त्रिकरश्च त्रिदोर्वर्गः तद्भवे गेहे। द्विदोर्मितान् द्विकरसम्मितान् स्तम्भान् करोतु। चतुष्कराद्युत्तरवर्गजेषु पादोनचतुष्करादिश्चतुष्करवर्गः पादोनपञ्चकरादिः पञ्चकरवर्गः एवं षट्करादावप्यूह्यम्। तेषु चतुष्करादिवर्गजेषु गेहेषु। क्रमेण ततः द्विकरात्। अब्ध्यङ्गुलवर्धितान् चतुश्चतुरङ्गुलवर्धितान् स्तम्भान् करोतु। अतः स्तम्भाद् अर्धसम्मितमधिष्ठानं करोतु। तथा निबन्धने-

त्रिहस्ते द्विकराः स्तम्भा गोलकद्वयवर्धिताः।
हस्ते हस्ते स्थिता गेहादापञ्चदशहस्तकात्।।

इति।। 8।।

---

1. 'न्तितो ह्यर्धः' ख. पाठः
2. 'स्तम्भान् युगाश्न्यङ्गुलवर्धितान्' इति,।।
3. 'कुर्यात्' इति च विवरणरीत्या पाठः

विवरणम्

अथाधिष्ठानस्यापि जनकं स्तम्भोन्मानं विस्तारादेव जनयति – गेह इति। त्रिदोर्वर्गभवे गेहे द्विदोर्मितान् स्तम्भान् कुर्यादित्यन्वयः। दोश्शब्दो हस्तपर्यायः। त्रिहस्तस्य वर्गः त्रिहस्तवर्गः तत्र भवम्। त्रिवर्गशब्दोऽयं पारिभाषिकोऽभिप्रेतः। पादोनत्रिकरो द्व्यङ्गुलाधिकत्रिकरो दशाङ्गुलधिकत्रिकरश्च। सोऽयं त्रिकरश्शिल्पिभिः परिभाषितः। एवं चतुष्करादयो विज्ञेयाः। परिधिमानस्य चतुर्थो भागस्समचतुरश्रः प्रासाद इति पूर्वमेवोक्तम्। द्विदोर्मितान् द्विहस्तोन्मितान्। अधिष्ठानमतोऽर्धसम्मितमिति। तदर्धमधिष्ठानोन्मानमित्यर्थः। चतुष्कराद्युत्तरवर्गके गेह इत्यनुषज्यते। युगाश्व्यङ्गुलवर्धितानिति यथासङ्ख्यं सम्बन्धः। चतुष्करवर्गप्रासादे द्वीद्यंगुलाधिकद्विहस्ताः स्तम्भाः पञ्चकरवर्गप्रासादे चतुरङ्गुलाधिकाः[1]। एवमन्यत्रापि द्रष्टव्यम्। चतुष्करवर्गप्रासादे एकाङ्गुलाधिकहस्तमानमधिष्ठानं स्यात्। शेषमप्येवं नेयम्।।8।।

A shrine (or house) having the length of wall plate (or beam) of three hastas (a hasta standing for 24 angula). This proportion may be kept in measuring the height from four hastas onwards. The adhiṣṭhāna (basement) shall have a height of half the length of the pillar. The increase in length the cases of wall or base may be at a ratio of four angulas each. (8)

अङ्गाद्यैरुदयोत्तरान्तरगतोन्मानं विभज्य क्रमात्
सङ्ख्यानैः शिवपश्चिमैर्निगदिते स्तम्भोच्छ्रये खेच्छया।
अंशं योजयतु क्वचित् त्यजतु वा मासूरके स्वोच्छ्रयं
भङ्क्त्वाङ्गादिनवान्तिमैर्विरहयेद् वांशं यथोक्तोच्छ्रयात्।।9।।

विमर्शिनी

'स्तम्भार्धोच्चमधिष्ठानं पादबन्धं प्रतिक्रममि'ति च प्रोक्तयोः स्तम्भाधिष्ठानयोरौचित्यवशान्न्यूनाधिकत्वमप्याह – अङ्गाद्यैरिति। उदयोत्तरगतोन्मानम्, उदयो भित्तेर्मूलप्रदेशः पादुकस्य मूलप्रदेशो वा, उदयोत्तरयोरन्तरगतमुन्मानम्। अङ्गाद्यैः षडाद्यैः। शिवपश्चिमैरेकादशान्तिमैः। सङ्ख्यानैर्विभज्य पूर्वनिगदिते स्तम्भोच्छ्रये एकमंशं योजयतु क्वचित् पक्षे। क्वचित् पक्षे त्यजतु च। तथैव मासूरके अधिष्ठाने। स्वोच्छ्रयमङ्गादिनवान्तिमैः षडादिनवपर्यन्तैः। सङ्ख्यानैः क्रमाद् भङ्क्त्वा यथोक्तोच्छ्रयादेकमंशं विरहयेत् त्यजेद्वा। तथा मयमते–

जन्मोत्तरान्तरगतं गृहपादमानं षट्सप्तनागनवपङ्क्तिहरांशमेकम्।
न्यूनं करोतु गृहसंधृतिपादतोऽथ यद्वाधिकं निखिलसालगतेषु चैवम्।।
स्तम्भार्धोच्चं वा मसूरोच्चमानं षट्सप्ताष्टाङ्गेषु वा भागहीनः।
वास्त्वाधारोच्चं भवेत् सर्ववास्तुष्वेवं पूर्वं शम्भुना सम्यगुक्तः।।

इतिं।।9।।

1. 'स्योत्रेयम्' ग. पाठः

विवरणम्

अथ स्तम्भाधिष्ठानयोरुन्मानपरिसमाप्त्याद्यपेक्षया क्वचिदुन्मानप्रक्षेपशोधने दर्शयति – अङ्गाद्यैरिति। उदय उपपीठं, अङ्गाद्यैश्शिवपश्चिमैः सङ्ख्यानैरित्यन्वयः। निगदिते प्राग् द्विदोर्मितानित्यादिना अभिहिते। अंशमेकं भागम्। मासूरकशब्दोऽधिष्ठानपर्यायः।। 9।।

The height of the shrine from the base of the wall or from the Pāduka (base of the pillar) may be divided by numbers six to eleven to decide the final height. This divided measurement in length may be added or deducted for finalizing the ultimate height of the floor may also be fixed similarly by deducting or adding the respective measurement. For the latter the devision may be four to nine parts. (9)

भक्ते प्रत्युत्तरान्तर्गतचरणसमुन्मानकेऽष्टाङ्कदिग्भि
स्तेष्वेकांशात्तमूलप्रततितदुरगांशादिहीनाग्रतानान्।
दारुस्तम्भांस्तदर्हे विहिततत्तिदलाग्न्यब्धिभागोनतानान्
कुड्यस्तम्भांश्च कुड्ये रचयतु चरणाग्रप्रतानोऽत्र दण्डः।। 10।।

विमर्शिनी

स्तम्भानां विस्तारमाह – भक्त इति। प्रत्युत्तरान्तर्गतचरणसमुन्मानके, प्रतिरधिष्ठानाग्रे कल्पितोऽवयवः, प्रतेरुत्तरस्य चान्तर्गतः स्तम्भोच्चोयस्तस्मिन् अष्टयङ्कदिग्भिरष्टभिर्वा नवभिर्वा दशभिर्वा भक्ते। तेष्वंशेषु एकांशात्तमूलप्रततितदुरगांशादिहीनाग्रतानान् एकांशेनात्ता परिगृहीता मूलप्रततिर्मूलविस्तृतिः तदुरगांशो मूलविस्तृतेरष्ट्यंशः, आदिशब्देन नवांशो दशांशो वा विवक्षितः, तद्रहिताग्रविस्तारान् दारुस्तम्भांस्तदर्हे करोतु। तथैव कुड्यस्तम्भान् विहिततत्तिदलाग्न्यब्धिभागोनतानान् विहितस्य दारुस्तम्भस्य ततेर्विस्तारात् दलेनार्धेनाग्निभागेन त्रिभागेनाब्धिभागेन चतुर्भागेन विहीनविस्तारान् कुड्ये रचयतु। अत्र दारुस्तम्भे। चरणाग्रप्रतानः स्तम्भाग्रविस्तारो दण्ड इत्युच्यते। तथा मयमते–

पादोच्चपङ्क्तिनन्दाष्टभागैकं वाङ्घ्रिविस्तरम्।
दारुस्तम्भगतं ह्येतत् कुड्यपादमथोच्यते।।
तदर्धं वा त्रिभागोनं चतुर्भागोनमेव वा।
कुड्यस्तम्भविशालं स्यादेतत् सवेषु धामसु।।
तन्मूलतारमाख्यातं तत्तारं तु तथा भजेत्।
एकभागविहीनं तु शेषमग्रविशालकम्।।

इति। मञ्जर्यां च "स्तम्भाग्रविष्कम्भमुशन्ति दण्डम्" इति।। 10।।

विवरणम्

इदानीं जनितानां स्तम्भानां द्रव्यभेदापेक्षया विस्तारमाह – भक्त इति। प्रतिः पटी अन्तर्गतं मध्यगतम्। एकेनांशेन मूलविस्तारः मूलविस्तारादष्टमांशेन हीनः स एवाग्रे विस्तारः। आदिशब्देन...। तदर्हे दारुमये प्रासादे मण्डपगोपुरादिषु च। अत्र प्रासादद्रव्यभेदः अधिष्ठानस्य शोधनमेव। विहिततत्तिद–

लाग्न्यब्धिभागोनतानानिति। ततिस्तानश्च विस्तार एव। दारुस्तम्भविस्तारादर्धेन तृतीयांशेन चतुर्थभागेन वा यथायोगं कुड्यस्तम्भविस्तार: कार्य:। मूलविस्तार एवायम्। अग्रविस्तारस्तु पूर्वोक्तनयेन कार्य:। चरणाग्रप्रतानोऽत्र दण्ड इति संज्ञा विधीयते। अत्रेति प्रासादप्रकरण इत्यर्थ:। स्तम्भपरिमाणमेवं निर्दिष्टम्।। 10।।

[1]स्तम्भ एव निधिकलशादीनां प्रकृति:। अत इदानीं निधिघटादीनां प्रमाणमाह – स्तम्भोच्चस्येति। तदङ्कांश: विस्तारादेव नवमो भाग: तस्य मुखोदरादिकमुपपत्त्या योज्यम्। पद्म इति कूर्मास्पदं पद्मं गृह्यते। स्तम्भोच्चस्येत्यनुवर्तनीयम्। तस्याष्टमभावोनोच्छ्रय: उच्छ्रयात् षष्ठमंशमपनीय शेष: पद्मस्य समवृत्ताकारस्य व्यास:। तदवयवक्लृप्तिश्च प्रतिमापद्मनयेन साधनीया। अर्धोच्छ्रय: प्रथाशब्दोऽपि विस्तारवाचक:। प्रथमेष्टकामाह – अत्रेति। आरिप्सितं वक्ष्यमाणेन चिकीर्षितम्। तैव्यमपि पिण्डं विस्पष्टपृष्ठाग्रका इति। तदुत्पादनसमय एव न्यासे पृष्ठाग्रयो: परिज्ञानार्थं लक्षणं कार्यमिति भाव:। पुटपाक:। शैल्य: शिलामय्य:। चतुरूनिताश्चतस्र एव। चतुरुपेता द्वादश। गृहौचित्यत इति। स्वतन्त्रमिष्टकामानमाह – क्वापीति। क्वापि स्मृता इत्यन्वय:। क्वचनमित्राशागजै: क्लृप्तायामा: तदर्धविस्तृता: तदर्धोच्चाश्चेत्येवं योजनीयम्। क्वचिदा भूमभूमेर्द्विधा एकभूमित आरभ्य नवभूमिप्रासादपर्यन्तं द्विधा इष्टका उक्ता:। कथमित्याह नागाङ्काङ्गुलतोऽङ्गुलद्वयविवृद्धयेति। अत्रापि क्लृप्तायामेत्यादि सम्बध्यते। अष्टयङ्गुलायामा नवाङ्गुलायामा वा तदर्धविस्तृता: तदर्धोत्सेधा एकभूमे: स्यु:। दशाङ्गुला एकादशाङ्गुला वा द्विभूमेरित्यादि द्रष्टव्यम्। इदानीमिष्टकानामपि निदानं गर्भपात्रप्रमाणमाह भङ्क्त्वेति। इह स्तम्भस्य मूलविस्तारमानं चतुर्विंशत्या विभज्य समस्तेन एकविंशत्यंशैरष्यदश-भिष्षोडशभिर्द्वादशभिर्वांशै: समचतुरश्रस्य गर्भपात्रस्य विस्तार:। विस्तारेण सम उत्सेध:। अथवाष्टमांशेन षष्ठेन पञ्चमेनांशेन हीन: स एवं विस्तारार्धं वेत्यर्थ:। स्वोत्सेधानलसागरांशर-हितोऽसधोज्ज्वलोर्ध्वच्छदमिति। ऊर्ध्वच्छदमुपरिगतं पिधानपात्रं तद्गर्भपात्रोन्मानतृतीयांशेन तुरीयांशेन वोन्मितं समचतुरश्रं स्यात्। अखिलेष्विति। सर्वेषां साधारणमेतदित्यर्थ:। गोभिरजिते षट द्वाविति। गोभिर्विभज्य षड् बाह्येंऽशकानन्तद्वौं च विहा[2]येति सर्वमनुषञ्जनीयम्। भूतैस्त्रीनपि चैककमित्यत्रापि तद्वद् योज्यम्। परांशस्थितं गर्भं वितनुयादिति सर्वशेष:। परस्मिन्नवशेषितेंऽश इत्यर्थ:।।

Wooden pillar may be shaped in such a manner so that the measurement from the base to the top touching the beam may be divided by eight, nine or ten and this measurement shall be lesser than the circumference of the base (meaning the top is slender while the base is larger). But in the case of the pillar in bricks in the case of the wall should have a wider top technically referred to as daṇḍa. The difference between the wooden pillar and the pillar of brick consists in the shape will be slender to extent of one fourth or three fourth of the circumstances, but with the larger top. (10)

1. अस्या व्याख्याया मूलश्लोका न दृश्यन्ते।

2. 'ह्या' घ. पाठ:

मासूरोच्चे विभक्ते शिखिविशिखकरैः क्ष्मेक्षणेन्द्वंशतोऽर्धा-
शोर्ध्वं पादांशवृद्ध्या द्विगुणितचरमं योजयेद् वोपपीठम्।
दिग्भक्तेंऽशैः शशाङ्कादिभिरिषुचरमैरेकसार्धाद्विलोकै-
र्दण्डैर्वा निर्गतं चारचयतु विलसत्स्वाङ्गभङ्ग्याभिरामम्।। 11।।

विमर्शिनी

अथाधिष्ठानादिप्रासादावयवान् वदन्नधिष्ठानादप्यधोदेशे पक्षान्तरेण कल्पनीयस्योपपीठस्य क्लृप्तिमाह – मासूरोच्च इति। (मासूरोच्चे) अधिष्ठानोच्छ्रये। शिखिविशिखकरैः त्रिभिः पञ्चभिर्द्वाभ्यां वा विभक्ते। क्रमेण क्ष्मेक्षणेन्द्वंशतः एकद्व्येकांशकैः। अर्धांशोर्ध्वम् अर्धांशादुपरि। पादांशवृद्ध्या पादांशवर्धनेन। द्विगुणितचरमं द्विगुणान्तमुपपीठं योजयेद्वा। तस्य निर्गममाह – दिग्भक्त इति। अधिष्ठाने दिग्भक्ते दशधा कृते। शशाङ्कादिभिः एकादिभिः। इषुचरमैः पञ्चपर्यन्तैरंशैर्वा। एकसार्धद्विलोकैः एकेन सार्धैकेन द्वाभ्यां त्रिभिर्वा दण्डैश्चरणाग्रप्रतान इत्युक्तैः निर्गतमधिष्ठानाद् बहिर्गतम्। विलसत्स्वाङ्गभङ्ग्याभिरामं विलसन्त्या स्वाङ्गभङ्ग्या मनोहरं चारचयतु। तथा मयमते–

आत्ताधिष्ठानतुङ्गाद् द्विगुणमथ समं सार्धमर्धं त्रिपादं
पञ्चांशद्व्यंशकं वानलसमभजिते द्व्येकमत्रोपपीठम्।

इति। काश्यपीये च–

स्वाधिष्ठानसमोच्चं वा त्रिपादं वार्धमेव वा।
पञ्चभावोऽग्निभागं वा सपादं सार्धमेव वा।।
पादोनद्विगुणं वाथ द्विगुणं वा विशेषतः।
एवमष्टविधं ख्यातमुपपीठोच्छ्रयं द्विज!।।
दशधाभज्याधिष्ठानमेकद्वित्रिचतुष्टयम् ।
पञ्चांशं वाथ निष्काममधिष्ठानस्य पादुकात्।।
दण्डं वा सार्धदण्डं वा द्विगुणं वा त्रिदण्डकम्।
अधिष्ठानाज्जगत्या वा समन्तात् पादबाह्यतः।।

इति।। 11।।

विवरणम्

प्रासङ्गिकं समाप्य प्रकृतमनुसरन् अधिष्ठानस्याप्यधः प्रासादोन्नत्यादिसिद्धये कर्तव्यमुपपीठमाह – मासूरोच्च इति। वाशब्दो भिन्नक्रमः। द्विगुणितचरमं वेत्यन्वयः। अर्धांशेन त्रिपदांशेनेत्यारभ्य पादोनद्विगुणेन वेति यावद् इत्यर्थः। शशाङ्कादिभिरिषुचरमैरिति। एकेन द्वाभ्यां त्रिभिश्चतुर्भिः पञ्चभिर्वांशैः। दण्डैरिति। चरणाग्रप्रतानोऽत्र दण्ड इति ह्युक्तम्। स्थलशैथिल्याद्यपेक्षया विकल्पानामुपयोगो द्रष्टव्यः। विलसत्स्वांश भङ्ग्याभिराममिति।। 11।।

There can be an Upapīṭha – platform below the base called socle. The height of this can be arrived at by dividing the height of the pillar by three,

five or two and then by increasing by one, two and one parts. Other possibilities for shaping attractive socles are by shaping the same as equal to the top of the pillar (referred to as daṇḍa) or by the increase of one and a half, two or three times in measurement. Thus it may be overlapping the base portions. (11)

इष्टाधिष्ठानोच्छ्रयं संविभज्य
सङ्ख्याभिः श्रुत्याहिनन्दान्तिमाभिः।
कुर्यादेकांशेन तूपान(ड?द)न्ते
पद्मं धामोत्सेधतोऽदोऽधिकं स्यात्।। 12।।

विमर्शिनी

अधिष्ठानात् पृथक्कल्पनीयस्य पद्मनाम्नोऽवयवस्य क्लृप्तिं चाह – इष्टेति। इष्याधिष्ठानोच्छ्रयम् इष्टस्य कल्पितस्याधिष्ठानस्योच्छ्रयम्। श्रुत्यादिनन्दान्तिमाभिः चतुरादिनवान्तिमाभिः सङ्ख्याभिः, संविभज्यांशीकृत्य। तेष्वेकांशेन उपान(ड?द)न्ते पादुकादधोभागे। पद्मं पद्मलाकारमवयवं कुर्यात्। अदः एतत्तु। धामोत्सेधतो गृहोच्चादधिकं स्यात्। तथाहुः–

अधिष्ठानसमुत्सेधाद् वेदांशं दर्शनाष्टकम्।
नन्दपातालभूतांशमेकांशं पद्मायतम्।।
पूर्वभूमिगतं पद्मं प्रासादानां प्रशस्यते।।

इति।। 12।।

विवरणम्

उपान(ड?द)न्ते उपानद्... धामोत्सेधतोऽदोधिकं स्यात्। अदः पद्मं पद्मस्योन्मानमिति यावत्। तत्कृत्स्नोन्मानांशेन न कार्यम्। किं तर्हि, बहिरेव योज्यमित्यर्थः।। 12।।

The height of the socle or base as already fixed may be divided by the numbers four to nine and by lowering by any other divisions, one may give shape to Padma (Padmapāduka) with the form of a lotus) which is to be constructed under the socle and this element will not affect the height of the total structure (from socle to the beam), (12)

मासूरे मिहिरद्वयांशिनि तर्तोऽशैः पादुकं पावकै-
रष्टाभिर्जगतीं स्वरैः कुमुदकं शेषे दशांर्शेऽशकैः।
त्रिद्व्यग्न्यश्विमितैर्गलं विरचयेत् कम्पान् गलं पट्टिकां
प्रत्युद्यन्मकरास्यकादिरुचिरां सिंहादिभिश्चोज्ज्वलाम्।। 13।।

विमर्शिनी

अधिष्ठानक्लृप्तिमाह – मासूर इति। मासूरे अधिष्ठाने। मिहिरद्वयांशिनि चतुर्विंशतिधा कृते। तस्मात्। पावकैस्त्रिभिरंशैः। पादुकं पादुकाख्यमवयवं विरचयेत्। अष्याभिर्जगतीं च। स्वरैः सप्तभिः कुमुदकं च। शेषे दशांशे शेषैः षड्भिरंशैर्दशांशीकृते सति। त्रिद्वयग्न्यश्विमितैः त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यां

चांशकैः। क्रमेण गलं कम्पान् पुनर्गलं पट्टिकां च विरचयेत्। तत्र प्रत्युद्यन्मकरास्यकादिरुचिरां प्रतेरुद्यद्भिर्मकरास्यादिभिर्मनोहरां सिंहादिभिश्चोज्ज्वलां च विरचयेत्। तथा काश्यपीये–

अधिष्ठानोत्सेधमत्र चतुर्विंशतिभागतः।
त्रियंशं पादुकं विद्यादष्टांशं जगती भवेत्।।
कुमुदं सप्तभिः कुर्यात् षड्भागं प्रति चोच्छ्रयम्।
प्रतेरुच्छ्रयमेवं तु दशभागे कृते पुनः।।
त्रिभागं कुमुदं पट्टं स्याद् द्वयंशे कण्ठपट्टिका।
त्रियंशेऽन्तरितं तस्या वाजनं च द्वियंशकम्।।
सिंहव्यालगजेन्द्रैः स्यात् प्रतिभूषणसंयुतम्।
प्रतिक्रममिदं चैव अधिष्ठानोत्तमं विदुः।।

इति।। 13।।

By dividing Masūra (socle or adhiṣṭhāna) by twenty four Pāduka basement may be made with three parts by using eight divisions Jagati (plinth) and by seven parts Kumuda (part of basement above (jagati) are made. The rest six divisions split up into ten parts of which three forms Gala (recessed portion) basement above Kumuda) and the last two to shape Paṭṭikā (or Paṭi – fillet next to recessed moulding, shingle or a bath. The last mentioned part may be made attractive by moulding replicas of the heads of Makara (a fish like shark) and Simha (lion),. (13)

वास्त्वाधारसमुच्छ्रये प्रकृतिभक्ते वा त्रिभिः पादुकं
छन्दोभिर्जगतीं रसैः कुमुदकं चैकेन तत्पट्टिकाम्।
भागाभ्यां गलपादकान् विरचयेदर्धांशतः पट्टिकां
क्षुद्रां सार्धधरांशकेन महतीं स्वांशोल्लसद्वाजनाम्।। 14।।

विमर्शिनी

पक्षान्तरेणाप्यधिष्ठानविभागमाह–वास्त्वाधारेति। वास्त्वाधारसमुच्छ्रये अधिष्ठानोच्चे। प्रकृतिभक्ते एकविंशतिधा कृते सति। त्रिभिः पादुकं विरचयेत्। वेति पक्षान्तरद्योतकः। छन्दोभिः सप्तभिर्जगतीम्। रसैः षड्भिः कुमुदकम्। एकेन तत्पट्टिकां[1] कुमुदपट्टिकाम्। भागाभ्यां गलपादकान् गलकान् पादान्। अर्धांशतः क्षुद्रामल्पां पट्टिकाम्। सार्धधरांशकेन अर्धसहितैकेन। महतीं स्वांशोल्लसद्वाजनां स्वार्धांशादिना कृतवाजनां महत्पट्टिकां च। तथा मञ्जर्यां–

कुर्यादधिष्ठानमथैकविंशै(रंशै)र्विभक्तं तिथिहस्तगेहे।
अंशत्रिकैः कल्पितपादुकं च सप्तांशक्लृप्तां जगतीं विदध्यात्।।
षड्भिर्विदध्यात् कुमुदं तथैकभागेन कुर्यादथ पट्टिकां च।
आलिङ्गरूपां गलपादमांशद्वयेन सम्यग् विदधीत भूयः।।

1. 'कां भा' ख पाठः

साधांशक्लृप्तामथ पट्टिकां च क्षुद्राभिधानां च महाख्यपट्टिम्।
अध्यर्धक्लृप्तां विदधीत सम्यक् कर्तव्यमेवं विधिवत् क्रमेण।।

इति।। 14।।

विवरणम्

[1]सम्प्रत्यधिष्ठानालङ्कारान् दर्शयति–वास्त्वाधारसमुच्छ्रय इति। जगती नामोन्नतचतुरस्राकारा। कुमुदकं कुम्भवद् वृत्तं, तत्पट्टिका कुमुदकाङ्गभूता पटी। शेषेषु अंशेषु एकैकशोऽन्त- रिवाजनप्रतिमुखानीत्यन्वयः। वेति। अथवा शेषेष्वंशेषु एवं कुर्यादित्यर्थः। सार्धधरांशतः खण्डान् त्रयो ह्यंशा अर्धादवशिष्यः। तेष्वेकेन मध्यमांशदलमिश्रितेन खण्डान् विदध्यात्। तावता सार्धांशेनेत्यर्थः। अथवा तस्मिन्नुच्छ्रयणे प्रकृतिसम्भक्त इत्यन्वयः। प्रकृतिरेकविंशतिः छन्दोभिः सप्तभिः। भागाभ्यां गलपादुकानिति। अष्यदशेन गलं एकोनविंशेन अर्धांशतः क्षुद्रां पट्टिकामित्यन्वयः। सार्धधरांशकेन महतीमिति। महापट्टिकामित्यर्थः। स्वांशोल्लसद्वाजनामिति। स्वोचितेनांशेन वाजनामपि तस्या विरचयेदित्यर्थः।। 14।।

By dividing the floor at the base by twenty one three portions make Pāduka, with seven parts Jagati, by six parts, Kumudaka and with one the Paṭṭika (fillet) with two Gala and Pāduka could be made Half a portion a smaller fillet and by one and a half a bigger fillet may be shaped. Above that with one and a half divisions Vājana the bigger pillar (stepped protection) having recesses be made. (14)

मासूरे[2]ऽशैर्दिनेशांशिनि सति जगतीकैरवे श्रुत्युपायै-
स्तिछष्टैः पट्टिकामन्तरिमपि रचयेद् वाजनं च प्रतिं च।
प्रत्युत्पन्नक्रमाख्ये क्रम इति कथितः पट्टिकान्तं तथातः
दण्डान् सार्धैकतो वाजनमपि सदलैकांशतः पादबन्धे।। 15।।

विमर्शिनी

पुनरप्यधिष्ठानान्तरयोर्विशेषमाह–मासूर इति। मासूरे दिनेशांशिनि द्वादशधा कृते सति। श्रुत्युपायैश्चतुभिरंशैः। जगतीकैरवे जगतीं कुमुदकं च रचयेत्। तच्छिष्टेश्चतुर्भिरंशैः। क्रमेण पट्टिकामन्तरिं वाजनं प्रतिं च प्रत्युत्पन्नक्रमाख्ये प्रतिक्रमाख्ये अधिष्ठाने। क्रमः अवयवक्रमः। इति उक्तविधि[3]ना कथित[4]ः। पादबन्धे अधिष्ठाने। पट्टिकां तथा कृत्वा तत ऊर्ध्वं सार्धैकतः खण्डान्, सदलैकांशतः अ[5]र्धसहितैकांशतो वाजनं च। तथाच मञ्जर्याम्–

उत्सेधं विभजेत् त्रिधान्तिममथो भङ्क्त्वा चतुर्धा क्रमा-
देकांशे जगतीं परे कुमुदकं भागे विदध्यात् ततः।

1. समनन्तरश्लोकव्याख्यापि पाठभेदेनात्रैव सङ्घटिता प्रतिभाति।
2. 'रां' इति मूलकोशपाठ.
3. 'धानक' क.पाठः,
4. 'त' ख. पाठः,
5. 'र्धसिहस' क. पाठः।

भागौ द्वावथ पट्टिकान्तरिगतावन्त्यौ प्रतेः स्यान्मुखं
कर्तव्यं विधिवत्प्रतिक्रममिदं वृद्धिप्रदं वेश्मनः।।
एकेन कुर्यादथ पट्टिकां च सार्धेन खण्डान् विदधीत सम्यक्।
शिष्टेन कुर्यादथ वाजनं च कर्तव्यमेवं खलु पादबन्धे।।

इति।। 15।।

By dividing the height of the base by twelve, with four divisions Jagati and will another four divisions the Kumuda and with the remaining four Paṭṭikā (fillet), Antari (a peg), Vājana (architrave) and Prati (top most mould or socle) should be made. This mode in technically called Pratikrama. Thereafter with one and a half portion Gala, Vājana and Paṭi (with half a divisions each) the socle shall be made. This is called Padabandha. (15)

यावत् [1]स्वायोच्चमानं गमयतु जगतीं बाह्यतो मानसूत्रात्
तत्तुल्यं कैरवं चोच्छ्रयसमचरणोनार्धपादांशकं च।
शिष्टं तत्पट्टिकाब्जादिकमपि [2]गमयेन्मानसूत्रात् समन्तात्
तत्तच्छोभानुरूपं गमयतु जगतीसूत्रतः पादुकं च।। 16।।

विमर्शिनी

अधिष्ठानावयवानां निर्गममाह – यावदिति। मानसूत्रात् प्रमाणसूत्रादुत्तरबाह्यादिति यावत्। यावत् स्वायोच्चमानं यावत् स्वायमानं यावत् स्वोच्चमानं वा। अत्रायशब्देन योनिरुच्यते। यावत्प्रमाणे स्वस्योपरिगता योनिर्भवति तत्स्वायमानं यावत् पुनर्जगत्या उच्चं त(द्याव?)त् स्वोच्चमानमित्युभयथा जगतीं बाह्यतो गमयतु। तत्तुल्यं जगतीतुल्यम्। कैरवं कुमुदं च पट्टिकाब्जादिकं तच्छिष्टमपि उच्छ्रयसमचरणोनार्धपादांशकम् उच्छ्रयसमं वा पादोनं वा अर्धांशकं वा पादांशकं वा। तत्तच्छोभानुरूपं तस्य तस्यावयवस्य शोभाय आनुरूप्यं यथा भवति तथा। मानसूत्रात् समन्ताच्चतुर्दिशं बहिर्गमयेत्। पादुकं च जगतीसूत्रतो यथायोगं गमयतु। तथाहुः–

"यावत्स्वयोनिरूर्ध्वस्था भवेत् तावद्धि निष्क्रमः"

इति। तथाच–

"तत्समं निष्क्रमं चैव अर्धं पादोनमेव च"

इति। मयमते च–

यावज्जगति सूत्रान्तस्तावत् कुमुदनिर्गमः।
अम्बुजानां तु सर्वेषामुत्सेधसमनिर्गमः।।
वेत्राणां चैव सर्वेषां चतुर्भागैकनिर्गमः।
एवं नीप्रक्रमं शोभावशात् प्रोक्तं स्वयंभुवा।।

1. 'स्वोत्सेधमानं' इति,।।
2. 'गमयेदन्तरावेशयेद् वा' इति च विवरणरीत्या पाठः।

प्रवेशं निर्गमं कुर्यात् सर्वाङ्गानां मसूरके।

इति।। 16।।

विवरणम्

पादुकाद्यवयवान्तरावयवानामुन्मानमुक्तं, तेषां निष्क्रममाह – यावत् स्वो[1]त्सेधमानमिति। मानसूत्राद् बाह्यतो जगतीं गमयतु। परिधिमानजनितायामविस्तारप्रमाणस्थैर्याय दिक्कोणेषु शङ्कून्मित्वा चतुर्दिशं सूत्राणि प्रसारणीयानि स्युः। तदिह मानसूत्रं गृह्यते। यावत् स्वोत्सेधमानमिति प्रमाणकथनम्। स्वस्या जगत्या उत्सेधमानं यावद्भवति तावद् गमयत्वित्यर्थः। तत्तुल्यमिति। यावज्जगतीनिर्गमनं तावदित्यर्थः। कैरवं कुमुदकम्। शिष्टं गमयेदन्तरावेशयेद् वेति। पादुके विशेषमाह–गमयतु जगतीसूत्रतः पादुकं चेति।। 16।।

The overlapping of Jagati from the centre or socle of the shrine called yoni could be equal to its height. This overlapping or projection Kumuda shall also have the same projection. For all other divisions like Paṭṭika, Kampa, Paṭi etc., the projection towards all sides may be three fourth, half or a quarter of this respective the heights Pāduka the base shall be overlapping from the measurement of Jagati. (16)

चित्वेत्यधिष्ठानमिहानुरूपं
समं तलीकृत्य शिलाप्रतानैः।
विभज्य गर्भान्तरबाह्यभित्ति-
तन्मध्यनाडी रचयेद् यथार्हम्।। 17।।

विमर्शिनी

अधिष्ठानविधिमुक्त्वा गर्भभित्त्यादिकमाह – चित्वेति। इह इति उक्तप्रकाराणामन्यतमेनापि विधिना। अनुरूपं योग्यमधिष्ठानम्। चित्वा चयनं कृत्वा। शिलाप्रतानैः शिलाप्रस्तरैः समं यथा भवति तथा तलीकृत्य। गर्भान्तरबाह्यभित्तितन्मध्यनाडीः गर्भगृहमान्तरभित्तिं बाह्यभित्तिं तन्मध्यगतां नाडीं च यथार्हं विभज्य रचयेत्।। 17।।

विवरणम्

गर्भ आन्तरबाह्यभित्ती तयोर्भित्त्योर्मध्यनाडी च गर्भान्तरबाह्यभित्तितन्मध्यनाड्यः।। 17।।

After constructing a suitable base according to one in aptitude the floor area should be made level by laying stones. Then the Garbhagraha (sanctum sanctorum) and the inner and outer walls of the same as well as a corridor in between shall be constructed. (17)

वह्न्यादितिथ्यवधिकौजविभागभक्ते
व्यासे गृहस्य नयनाद्युरगान्तिमांशैः।

---

1. 'स्वायोच्चमानम्' इति ख. पाठः

पञ्चांशकैश्च वसुभागयुतेऽर्धतश्च
गर्भालयस्य विततिर्नवधोदितेति ।। 18 ।।

विमर्शिनी

तत्र गर्भगृहस्य विभागमाह–वह्न्यादीति। गृहस्य मूलगृहस्य। व्यासे वह्न्यादितिथ्यवधिकौजविभागभक्ते त्र्यादिपञ्चदशान्तिमैस्त्रिपञ्चसप्तादिविषमविभागैर्भक्तेंऽशिते सति। नयनाद्युरगान्तिमांशैः क्रमेण द्वयाद्यष्यन्तिमैरंशैः। तथा वसुभागयुतेऽष्टधा विभक्ते। पञ्चांशकैश्च अर्धतः गृहस्यार्धतश्च। इति गर्भालयस्य विततिर्विस्तृतिर्नवधा उदिता। तथा निबन्धने–

त्र्याद्या पञ्जदशौजांशे[1] व्यासे द्वयाद्यैर्यथाक्रमम्।
पञ्चाष्टांशेऽखिलार्धं वा गर्भं तु नवधा स्मृतम्।।

इति ।। 18 ।।

विवरणम्

विभागप्रकारं दर्शयति – वह्न्यादीति। वसुभागयुते पञ्चांशकैरित्यन्वयः। अर्धतश्चेति नवमः प्रकारः ।। 18 ।।

[2]अथ गर्भगृहस्य स्तम्भप्रमाणं प्रथमस्तम्भेभ्यो जनयितुमाह – ब्राह्यस्तम्भसमुच्छ्रय इति। गर्भाधिष्ठानार्थमाह – गर्भेति ।।

The width of the sanctum can be fixed in nine modes. The circumference of the shrine can be divided by even numbers choosing odd numbers from three, five, seven etc., upto fifteen. Then number two to eight (even numbers) may be applied to divide the area of which five parts as also by half the circumference can be accepted. (18)

बाह्या गृहव्यासगजांशतः स्याद्
भित्तिः परा गर्भगजांशतश्च।
नाडी समन्तादुभयान्तराले
संमेल्य वा भित्तियुगं गृहेऽल्पे ।। 19 ।।

विमर्शिनी

भित्तिलक्षणमाह – बाह्येति। गृहव्यासगजांशतः मूलगृहव्यासस्याष्टांशतो बाह्या[3] भित्तिः स्यात्।

---

1. 'शैव्यांसे' ख. पाठः,
2. बाह्यस्तम्भसमुच्छ्रये विदलिते भूतादिवस्वन्तिमै–
   रेकांशाभ्यधिकोच्छ्रयान् विरचयेत् स्तभांस्ततो गर्भगान्।
   गर्भस्तम्भसमुच्छ्रये विदलिते भूतादिवस्वन्तिमै–
   र्गर्भागारमसूरकं विरचयेदेकांशतः सम्मितम्।।
   इत्यधिकपाठमनुसृत्य प्रवृत्तेयं व्याख्या।
3. 'ह्य',

परा अन्तर्गता भित्तिः। गर्भगजांशतः गर्भगृहस्याष्टांशेन स्यात्। उभयान्तराले भित्तिद्वयस्यान्तराले। समन्तात् परितो नाडी स्यात्। अल्पे गृहे भित्तियुगं भित्तिद्वयम्। सम्मेल्यैकीकृत्य वा स्यात्। तथा मञ्जर्याम्–

आरूढभित्तिर्विहि[1]ताष्टमांशैरेषां बहिः शि[2]ष्टमलिन्दमस्य।
अष्टांशमानादथ बाह्यभित्ति[3]र्भित्तिर्घना स्यादथवाल्पगेहे।।

इति।। 19।।

विवरणम्

सम्प्रति बाह्यान्तरभित्त्योर्वितानमाह – बाह्येति। बाह्या भित्तिः स्याद् इति सम्बन्धः। आयतिरायामः। गर्भवाजांशतः परा चेति। भित्तिरित्यनुषङ्गः। गर्भगृहवितानमष्टधा विभज्यैकं भागं गर्भभित्तेर्वितानं कल्पयेत्। परिशेषो नाडीगृहवितानस्सम्पद्यते। अल्पगृहे भित्तियुगं सम्मेल्य वा कार्यमिति शेषः। द्वयोर्भित्त्योरेकीकरणेन घनभित्तिर्वा स्याद् इत्यर्थः।। 19।।

The outer wall of the shrine shall have a thickness of one eighth of the perimeter, of the shrine while inner wall shall be of one eighth of the Garbhagrha. In between the two walls there shall be corridor all around or in the case of a smaller shrine both the walls may be joined together (without any intervening space). (19)

विस्तारेऽल्पगृहे क्वचिद् विशिखभक्ते ऽन्तः पदे पीठिकां
पङ्क्त्या गर्भगृहं करोतु परितः पङ्क्त्या च भित्तिं घनाम्।
तस्मिन् नन्दविभाजिते सति विधायैवं ततो वीथिकां
भित्तिं चोभयपङ्क्तितो विरचयेद् द्वारं च कोष्ठेऽग्रतः।। 20।।

विमर्शिनी

पक्षान्तरेण तेषां विभागमाह–विस्तार इति। क्वचिदल्पगृहे विस्तारे विशिखभक्ते आयामतो विस्तारतश्च पञ्चविभक्ते। तत्रान्तःपदे पीठिकां देवस्य पीठं करोतु। पङ्क्त्या तदावरणपङ्क्त्या गर्भगृहं च। परितस्तदावरणे पङ्क्त्या घनां भित्तिं च। तत्रापि प्रकारान्तरमाह – तस्मिन्निति। तस्मिन् गृहे। नन्दविभाजिते आयामतो विस्तारतश्च नवधा कृते सति। एवमुक्तक्रमेण पीठिकां गर्भगृहमान्तरभित्तिं च विधाय। तत उभयपङ्क्ति आवरणपङ्क्तिद्वयेन। क्रमाद् वीथिकां नाडीं बाह्य[4]भित्तिं च विरचयेत्। बाह्यभित्तावन्तर्भित्तौ च अग्रतः कोष्ठे अग्रकोष्ठप्रमाणेन द्वारं च विरचयेत्। तथाहुः–

व्यासेऽभिकृतिकोष्ठे स्यात् पीठं कोष्ठेन मध्यतः।
तद्बहिर्वसुकोष्ठानां पङ्क्त्या गर्भगृहं भवेत्।।

---

1. 'ह',
2. 'शिल',
३. 'त्तिभित्ति', ख. पाठः
4. 'ह्ये'

कोष्ठपङ्क्त्या बहिर्भित्तिस्तत्र द्वारं तु कोष्ठतः।
एकभित्त्येकतलकं दैवं धामेदमीरितम्।।
तद्वत् प्रासादविस्तारस्यैकाशीतिपदस्य तु।
मध्यस्थनवकोष्ठैः स्यात् सपीठं गर्भमन्दिरम्।।
तद्बाह्ये कोष्ठपङ्क्त्या तु भित्तिं द्वारं च कल्पयेत्।
तद्बाह्यपङ्क्त्याः परितः कल्पयेन्मध्यनाडिका[1]म्।।
प्रासादभित्तिस्तद्बाह्ये पङ्क्त्या द्वारं च कल्पयेत्।
त्रिहस्ते तु घना भित्तिः पञ्चहस्तेऽपि वा तथा।।

इति।। 20।।

विवरणम्

अथापरं विभागप्रकारमाह – विस्तार इति। द्वारं च कोष्ठेऽग्रत इत्युभयपक्षसाधारणमेतत्।। 20।।

इदानीं तलीकृते गर्भगृहे प्रतिष्ठास्थानजिज्ञासायामाह–[2]कृत[3]वा गर्भगृहमिति। गर्भगृहप्रस्तारे प्रागग्राण्युदगग्राणि चाष्याष्ट सूत्राण्यास्फाल्य सप्तवर्गपदोपेतं सम्पादयेत्। तत्र मध्यमं पदं ब्राह्मं ततोऽनन्तरा परितः पङ्क्तिर्दैविकपदानि ततोऽपि परितो मानुषपदानि ततः परितस्त्वासुरपदानि च विज्ञेयानि। ब्राह्मे पदे पञ्चदशांशकान् विरचयेत्। मध्यगतं पदं दक्षिणोत्तरसूत्रैः त्रयोदशभिः पञ्चदशायतभागान् विदध्यात्। सौम्याग्रसूत्रैरिति सर्वत्र सम्बध्यते। तद्बाह्यस्थितेति। प्राग्द्वारप्रासादे पश्चिमतः पश्चिमद्वारे तु पूर्वत इत्यर्थः। आवारकान्यावराणानि। पङ्क्तय इति यावत्। विश्वे त्रयोदश। उमेशा एकादश।।

महत्यल्पे चेशलिङ्गे ब्राह्मे अन्तः अनन्तरे चांशे प्रतिष्ठितपदं प्रोक्तमित्येवं सर्वत्र सम्बन्धनीयम्। अन्तरिति। मध्ये पञ्चदशसु भागेषु अष्टमे भागे। अनन्तरे ततो बहिर्द्वितीयभागे इत्यर्थः।

---

1. 'का:',
2. कृत्वा गर्भगृहं कुलाद्रिकृतिकोष्ठाढ्यं समन्तात् पदे
ब्राह्मे पञ्चदशांशकान् विरचयेत् सौम्याग्रसूत्रैः समम्।
तद्पृष्ठस्थितदेवमानुषपिशाचावारकेषु क्रमाद्
विश्वोमेशनवांशकानपि ततः स्वं स्वं पदं कल्पयेत्।।
ब्राह्मेऽ शेऽन्तरनन्तरे महति चाल्पे चेशलिङ्गे हरौ
तार्तीये द्रुहिणांशमध्यपदतस्तुर्ये गुहेशाच्युते।
षष्ठे सुम्भजिति प्रतिष्ठितिपदं शार्ङ्गीश्वरे वाष्टमे
प्रोक्तं शास्तरि षोडशे गणपतौ विंशे तथैकोत्तरे।।
कृत्वोदङ्मुखमत्र सूत्रमथ मध्याद् द्वारविस्तारत–
स्तूकृत्याढ्यशतांशकान् प्रतिगमय्योदीचि चैन्द्राग्रकम्।
सर्वेष्वीशहरीशयोः पुनरिदं वार्चांशतोऽथाखिले
दिश्यैश्यां गमयेद् यवं यवयुगं वार्चोद्भवं सन्धितः।।
इत्यधिकपाठमनुसृत्य प्रवृत्तेयं व्याख्या।
3. पङ्क्त्या इति, ख. पाठः

पृष्ठगमनमुक्तं तत्र उदग्गमनमाह – कृत्वेति। अत्रोदङ्मुखं सूत्रं कृत्वेत्यन्वयः। यत्र भागविशेषे प्रतिष्ठापदं मध्येऽङ्कितं तत्र तस्मिन्नङ्के उदगग्रमपरमृजुसूत्रं सूत्रयेदित्यर्थः। द्वारस्य विस्तारमानं षड्विंशत्यधिकशतांशितं कल्पयित्वा तदेकांशमात्रं तस्मादङ्कादुत्तरतो नमयित्वात्र प्रागग्रं सूत्रमापातयेत्। सर्वत्रेति पूर्वत्रान्वयः। ईशहरीशयोः पुनरिदं वार्चांशत इति। ईशे तावल्लिङ्गविष्कम्भप्रमाणं सप्तधा भङ्क्त्वा सप्तमं भागं पञ्चधा भजेत्। स यावान् भागः तावन्तमुत्तरेण नयेद्वा। हरीश्वरेऽपि बिम्बमध्यपरिधिमानं चतुर्विंशतिधा भङ्क्त्वा एकांशमुत्तरेण गमयेदित्यभिप्रायः। अथाखिले दिश्यैश्यां गमयेदिति प्रागुदग्गमनमुक्तम्। कियदित्याह – सन्धितोऽर्चोद्भवं यवं यवयुगं वेति। ननु किमिदं अर्चोद्भवत्वं नाम यवस्येति चेद् उच्यते।... ... ...।।

[1]एवं प्रतिष्ठास्थानं प्रतिपादितम्। अथ गोमुखस्थानं प्रतिपादयति – सर्वत्रेति। उदीच्यसूत्रेऽम्बुसूत्रं कल्पयित्वा विवरं सूत्रं रचयत्वित्यन्वयः। उदीच्यसूत्रं नाम समदक्षिणोत्तरसूत्रं विवक्षितम्। विवरकल्पनं भित्तिनिर्माणसमये द्रष्टव्यम्।।

In a smaller shrine called Alpa Prasāda the perimeter shall be divided lengthwise and broad wise and in its center the pīṭha the elevated square seat be made. Around this the Garbhagrha may be constructed around the same with sixteen divisions and an equally thick wall be made. The length and breadth of the shrine be divided into eighty one parts and the inner wall and outerwall as also the inner corridor in between the wall shall be shaped. In the front portion shall be made the door in tune with the measurement of the divisions. (20)

[2]प्रत्यन्ते वा गलान्ते रचयतु तदुदङ्मध्यसूत्रेऽम्बुमार्गं
सोमेशानान्तरोद्यद्वसुनवदशभागादिकं वा व्यतीत्य।
मासूरोत्सेधमात्रं चरणविरहितं वार्धवृद्धं प्रणालं
निर्यातं बाह्यतोऽन्तर्विनिहितमधिकुड्यं तदर्धांशमात्रम्।। 21।।

विमर्शिनी

ततः प्रणाललक्षणमाह – प्रत्यन्त इति। प्रत्यन्तेऽधिष्ठानस्य प्रतेरन्ते गलान्ते वा। तदुदङ्मध्यसूत्रे गर्भगृहस्योदग्गतमध्यसूत्रे। सोमेशानान्तरोद्यद्वसुनवदशभागादिकं सोमेशानयोरन्तरगतदैर्घ्यस्याष्टभागं वा नवभागं वा दशभागं वा, आदिशब्देन शिवादिमूर्तिवशाद् विहितं प्रमाणं वा। व्यतीत्य मध्यसूत्रात् पूर्वतोऽतिक्रमय्य। अम्बुमार्गं जलयात्रामार्गयुक्तं प्रणालं रचयतु। तत्तु प्रणालं मासूरोत्सेधमात्रम् अधिष्ठानोच्चमानम्। तस्माच्चरणविरहितं वा तथार्धवृद्धमर्धाधिकं वा। बाह्यतो निर्यातं निर्गतम्। तदर्धांशमात्रमन्तरधिकुड्यं कुड्ये विनिहितं स्थितं च रचयतु। तथा तन्त्रान्तरे–

धाम्नः प्रतिग्रीवगसोमसूत्रात् प्रागन्तभागं प्रविधाय तेषु।
द्व्येकं शिवे द्वित्रिहरौ त्रिपञ्च शेषेष्वतीत्योदकमार्गसूत्रम्।।

1. अस्या व्याख्याया आधारभूतं पद्यं न दृश्यते।,
2. विवरणरीत्यात्र पाठभेदोऽस्तीति प्रतीयते।

प्रतेः पुरोऽर्धं वसुनन्ददिग्भिर्विभज्य भागेष्वखिलामराणाम्।
एकैकभागं समतीत्य कुर्याद् विचक्षणो गोमुखमध्यमत्र।।
स्यात् कुट्टिमं गोमुखदीर्घमानं पादोनितं वा तदथार्धयुक्तम्।
व्यालाननं स्यादिह शुण्डुभे[1]दो मणिश्च वल्लीपरिशोभितं च।।

काश्यपीये च–

भान्वङ्गुलं समारभ्य गुणाङ्गुलविवर्धनात्।
चतुर्विंशाङ्गुलं यावत् तावत् पञ्चविधायतम्।।
भित्तिबाह्यगतं ह्येतत् तस्यार्धं गर्भगेहके।
वेशयित्वाथवा भित्तेरभ्यन्तरगतं तु वा।।

इति।। 21।।

विवरणम्

अम्बुसूत्रं गर्भगृहभाविजलस्यन्दनसूत्रम्। प्रत्यन्ते गळान्ते वा इति सर्वशेषो योज्यः। गळान्ते पट्टिकान्ते वेत्यर्थः। शिवशशधरसूत्रान्तराळेऽष्ट्यङ्काशाभिर्विभक्तेंऽशमतीत्य वा रचयत्वित्यन्वयः। उदग्दिक्सूत्रस्य सोमेशयोरन्तरमष्टधा नवधा दशधा वा भङ्क्त्वा सोमसूत्रादेकांशेन प्रागगमयित्वा तत्राम्बुसूत्रं कार्यमित्यर्थः। अथवा एकं अंशमिति गिरिश एवैतत्। त्रिशरपरिग्नितान् त्रीन् वा पच्व वांशानित्यर्थः। गोमुखमानं स्वतन्त्रमाह–आरभ्येति। बहिर्निर्यातं गळात् प्रतेर्वा बहिर्निर्गतम्। अतोऽर्धमिति। द्वावंशौ बहिरेकस्त्वन्तरित्यर्थः।। 21।।

A Praṇāla – spout for draining the water used for abhiṣeka be made from the centre of the sanctum towards the northern side between the directions of Soma (north- hence called Somasūtra), and Īśāna (north east) with a slight directional tilt of of eight, nine or ten towards east. It shall have only the height of the top of the base portion extending outside about one and a half length of the height of the same. The extended portion shall have a similar length towards the inner part of the wall (thus half projecting and half covered by wall). (21)

[2]स्वायामाग्न्यंशकादिप्रविततनिजमूलानलांशादिविस्ती–
र्णाग्रं विस्तारतुल्यत्रिपददलघनं त्र्यंशक्लृप्ताम्बुमार्गम्।
व्यात्तव्यालास्यमध्यप्रसृमरनिजमूलोज्जवलं गोमुखं त–
न्मुक्तादामादिवल्लीवलयपरिगतं शुण्डुभिर्मण्डितं च।। 22।।

विमर्शिनी

स्वायामाग्न्यंशकादिप्रविततनिजमूलानलांशादिविस्तीर्णाग्रं स्वायामात् स्वदीर्घात् त्र्यंशकादिना

1. 'भोक्तो म' ख. पाठः
2. विवरणरीत्यात्रापि पाठभेदोऽस्तीति प्रतीयते।

विस्तीर्णस्य निजमूलस्य त्र्यंशादिना विस्तीर्णमग्रं यस्य तत्। तथा विस्तारतुल्यत्रिपददलघनं विस्तारतुल्[1]यं त्रिपदमर्धं वा घनं यस्य तत्। तथा त्र्यंशक्लृप्ताम्बुमार्गं विस्तारस्य त्र्यंशेन क्लृप्तमम्बुनो मार्गं यस्य तत्। तथा व्यात्तव्यालास्यमध्यप्रसृमरनिजमूलोर्ज्ज्वलं व्यात्ताद् विशेषेण विवृताद् व्यालाननमध्यात् प्रसरणशीलेन निजमूलेनोज्ज्वलं यत् तत्। तथा मुक्तादामादिवल्लीवलयपरिगतं मुक्तादामादिरूपाभिर्वल्लीभिर्वलयैश्च परिगतं व्याप्तं यत् तत्। तथा शुण्डुभिरलङ्कारविशेषैश्च मण्डितं च गोमुखापराख्यं प्रणालं रचयतु। तथा काश्यपीये–

वस्वङ्गुलं समारभ्य द्विव्यङ्गुलविवर्धनात्।
कलाङ्गुलावसानं तु विस्तारं पञ्चधा क्रमात्।।
तन्मूलतारपञ्चांशत्रिभागं चा[2]ग्रविस्तृतम्।
तद्विस्तारसमं वाथ त्रिभागं वार्धकं घनम्।।
विस्तारस्य त्रिभागै[3]कच्छिद्रतारं नतं यथा।
ना[4]लं मध्ये तु कर्तव्यं निम्नोन्नतविवर्जितम्।।
मूलादग्रं नतं किञ्चिन्मूलं सिंहास्यबन्धितम्।

इति।। 22।।

विवरणम्

तत्समाङ्घ्र्यूनदलघना ततित्र्यंशक्लृप्ताम्बुकुल्या चेति विग्रहः।। 22।।

Gomukha (the drain resembling a cow's mouth) shall be designed as if coming out of the mouth of a Vyāla (grotesque animal figure with protruding eyes) with the base large and it and tapering (with a diminution is width) and emulating the trunk of an elephant. It shall be decorated with the figures of pearl necklaces and creepers. The starting point shall be one third, one fourth or one fifth broader than the end. The thick stony drain shall have a channel for flowing water uninterruptedly. (22)

स्तम्भाः कोणचतुष्कमध्यविनिवेश्याः स्युः प्रतेरूर्ध्वतः
सामान्येन समान्तराः सुरविमानेषूदिता द्वादश।
एते विंशतिरीशदोः प्रभृतिकेष्वेतेषु ते नैकधा
चोक्ताः स्वाकृतिभूषणक्रमवशादेष्वर्पयेच्योत्तरम्।। 23।।

विमर्शिनी

कुड्यस्तम्भस्थापनेनियममाह – स्तम्भा इति। सुरविमानेषु देवालयेषु। प्रतेरूर्ध्वतः प्रतेरुपरिभागे।

---

1. 'ल्यत्रि' क. ख पाठः,
2. 'त्व',
3. 'गे कं छिद्र',
4. 'लम' क. पाठः

सामान्येन त्रिकरादिषु कोणचतुष्कमध्यविनिवेश्याः कोणानां चतुष्के तन्मध्ये द्वौ द्वौ च निवेश्याः स्थाप्याः। समान्तराः समभक्तेनान्तरेण युक्ताः द्वादश स्तम्भा उदिताः स्युः। ईशदोः प्रभृतिकेषु एकादशकरादिषु। एतेषु सुरविमानेषु। एते स्तम्भा विंशतिरुदिताः। ते स्तम्भाः। स्वाकृतिभूषणक्रमवशात् स्वाकृतिवशात् स्वभूषणवशाच्च। नैकधा अनेकधा चोक्ताः। एषु स्तम्भेषूत्तरमर्पयेच्च। तथा निबन्धने–

द्वादशैव चतुष्कोणमध्यस्थाः कुड्यपादकाः।
एकादशकरे स्तम्भा विंशतिर्मण्डनान्विताः।।
समाः स्तम्भान्तराः सर्वे [1]प्रासादे सार्वदेशिके।
विषमस्तम्भभागं तु वास्तु वस्तुविनाशनम्।।

इति।। 23।।

विवरणम्

[2]इदानीं स्तम्भानां स्थानानि सङ्ख्याश्च दर्शयति – स्तम्भा इति। चतुर्षु कोणेष्वेकैकमन्तरा द्वौ द्वाविति द्वादश स्तम्भाः स्युः। यद्वा कोणचतुष्कमन्तरा त्रयस्त्रयः स्तम्भाः स्युः। तत्र पक्षे मध्यमस्तम्भं द्विधा कल्पयित्वा घनद्वारमभितो द्वौ द्वावर्धस्तम्भौ भवतः। ईशदोःप्रभृतिकेष्वेतेषु एते विंशतिरित्यन्वयः। एकादशकरप्रभृतिप्रासादेषु स्वाकृतिभूषणक्रमवशात् ते नैकधेत्यन्वयः।। 23।।

There shall be twelve pillars constructed above the base one each in four corners and two each between each pillar (making a total of twelve-) their distance being equal. For bigger shrine having eleven daṇḍa (called kola measurement of 28 inches each) there could be twenty pillars with different shapes and decorations. Over these pillars beams shall be fixed. (23)

कार्याः स्युश्चरणा युगाष्टनृपकोणाः सर्वतो वर्तुला
विस्तारत्रिगुणोपरित्रिगुणविस्तारोन्मिताष्टाश्रकाः।
मूलोद्भावितकर्णसूत्रचतुरश्रोर्ध्वांशवृत्ताः पुनः
शुण्डोद्भेदविचित्रवृत्तरुचिरा वारब्धगेहोचिताः।। 24।।

विमर्शिनी

स्तम्भानामाकृतिभेदमाह–कार्याः स्युरिति। चरणाः स्तम्भाः। सर्वतो युगाष्टनृपकोणा वा सर्वतश्चतुष्कोणाः तथाष्टकोणाः षोडशकोणाश्च। सर्वतो वर्तुला वा वृत्ताकाराः। विस्तारत्रिगुणोपरित्रिगुणविस्तारोन्मिताष्ट्यश्रका वा विस्तारेण त्रिगुणितोपरिभागे त्रिगुणितेन विस्तारमानेनोन्मितेनाष्ट्यश्रेण युक्ताः। मूलोद्भावितकर्णसूत्रचतुरश्रोर्ध्वांशवृत्ता वा मूलगतचतुरश्रस्य कर्णसूत्रमानं चतुरश्रं कृत्वा तदूर्ध्वतो वृत्ते[3]नाकारेण युक्ताः। पुनः शुण्डोद्भेदविचित्रवृत्तरुचिरा वा शुण्डोद्भेदैर्भिन्नवेत्राकारैरलङ्कारविशेषैर्विचित्रेण वृत्तेन सुन्दराः। आरब्धगेहोचिताः आरब्धस्य गृहस्य योग्याः स्युः। तथा निबन्धने–

---

1. 'प्रसारे सा' क. पाठः
2. 23, 24, 25 श्लोकव्याख्याः विवरणरीत्या 34 श्लोकानन्तरं पठिताः।
3. 'त्ताका',

पञ्चाश्रिजास्त्रयो वृत्तास्तुर्यश्रः पोतिकान्वितः।
स्तम्भः साधारणो धाम्नां कुम्भमण्ड्यादिमण्डितः।।
विस्तारत्रिगुणादूर्ध्वमष्टाश्रस्तावता कृतः।
स्तम्भः सपोतिकाकुम्भस्तथा मध्याश्रकः स्मृतः।।
आमूलतः कृतोऽष्टाश्रः सर्वाष्टाश्रः सपोतिकः।
षोडशाश्रि[1]कृतश्चैव वीरकाण्डसमुज्ज्वल[2]ः।।
कुम्भतन्मण्डनैर्युक्तः षोडशाश्रः सपोतिकः।
मूले कर्णस्थमानेन चतुरश्रोऽथ वर्तुलः।।
कुम्भमण्डनसंयुक्तो मूलाश्रश्च सपोतिकः।
सर्वत्र वर्तुलो युक्तः कलशेन च मण्डनैः।।
पोतिकासहितो मूर्ध्नि वृत्तपादस्तु कीर्तितः।
कुम्भमण्डनसंयु[3]क्तो वीरकाण्डस्थपोतिकः।।
शुण्डभे[4]दसमो वृत्तः शुण्डपाद इति स्मृतः।

इति।। 24।।

विवरणम्

तदीयं दिङ्मात्रं दर्शयति - कार्याः स्युरिति। शुण्डोद्भेदविचित्रवृत्तरुचिरा वेति।। 24।।

The pillars could be of quare shape, with eight angle (rectangular or sixteen angles and round in shape. They shall be three times bigger than the perimeter of the shrine. The base of the pillar shall have square shape to begin with and then circular thereafter. Diagonal base and circular top with decorations resembling the trunk of an elephant and so on. The pillars shall be appropriate to the structure at hand. (24)

ओमां कुर्वीत दण्डद्वयततचरणोच्चां घटं दण्डयुग्म-
व्यासं साङ्घ्र्यादिदण्डोन्छ्रयमुदधिततां दण्डतोऽङ्घ्र्यूनतीव्राम्
मण्डिं दण्डप्रथाङ्घ्र्यंशकरहितघनोवीरकाण्डं त्रिसार्धे-
षूदन्वद्दण्डदीर्घां चरणततदर्धोच्छ्रयां पोतिकां च।। 25।।

विमर्शिनी

स्तम्भावयवभूतानामोमादीनां लक्षणमाह–ओमामिति। दण्डद्वयततचरणोच्चां दण्डद्वयविस्तारां द[5]ण्डपादेनोच्चामोमां स्तम्भपीठत्वेन कुर्वीत। घटं घटाकारेण कल्पनीयमवयवम्। दण्डयुग्मव्यासं

1. 'श्रकृतं चैव',
2. 'लाः' क. पाठः,
3. 'क्ते' ख. पाठः,
4. 'दे' क. पाठः
5. 'कु' ख. पाठः

दण्डद्वयविस्तारं साङ्घ्र्यादिदण्डोच्छ्रयं सपादादिदण्डोत्सेधं च। मण्डिं घटस्योपरि स्थाप्यां फलकाम्। दण्डतः उदधिततां चतुर्दण्डसमविस्ताराम्। अङ्घ्र्यूनतीव्राम्। अङ्घ्र्यूनेन दण्डेन घनां च। वीरकाण्डं मण्ड्या उपरि कल्पनीयमवयवम्। दण्डप्रथाङ्घ्र्यंशकरहितघनं दण्डविस्तारं तत्पादांशहीनतीव्रं च। पोतिकां वीरकाण्डोपरि उत्तरस्याधः कल्पनीयाम्। त्रिसार्धेषूदन्वद्दण्डदीर्घां त्रिदण्डेन वा सार्धपञ्चदण्डेन वा चतुर्दण्डेन वा दीर्घाम्। चरणतततदर्धोच्छ्रयां स्तम्भमूलविस्तारेण विस्तीर्णां तदर्धोत्सेधयुक्तां च। तथाहुः–

स्तम्भमूलघनाः शैला ओमा द्विगुणविस्तराः।
तुर्यश्रा मध्यतोगर्ता दण्डपादेन चोद्गताः।।
दण्डपादेन तीव्रा च तच्चतुर्गुणविस्तरा।
मण्डिः पद्मविचित्रा च माल्य[1]नागफणाकृतिः।।
पादोनतीव्रं तुर्यश्रं वीरकाण्डं च दण्डतः।
पोतिकास्त्वायता दण्डैः सार्धपञ्चचतुस्त्रिभिः।।
अर्धत्रिभागपादस्था तलिः स्याद् दण्डविस्तरा।

तथाच काश्यपीये–

विस्तारसदृशोत्सेधाः पञ्चदण्डायतान्विताः।।
उत्तमाः पोतिकाः ख्यातास्तारद्वित्र्यंशमुन्नताः।
चतुर्दण्डायतोपेता मध्यमा सा प्रकीर्तिता।।
विस्तारस्यार्धतुङ्गा तु गुणदण्डायतान्विता।
कन्यसा पोतिकाख्याता.......................
मूलपादसमव्यासा श्रेष्ठा मध्ये तु मध्यमा।
अग्रपादविशालस्य समा कन्यसपोतिका।।

इति।। 25।।

विवरणम्

ओमा स्तम्भस्य पीठं स्तम्भविस्तारद्विगुणविस्तारं स्तम्भविस्तारार्धघनम्। घटस्तम्भोर्ध्वभागगतः कुम्भः। साङ्घ्र्यादिदण्डोच्छ्रयमिति। पादसहितो दण्डः स्वार्धसहितो दण्डः एवमादि यथाशोभमवगन्तव्यम्। मण्डिः स्तम्भाग्रफलका। उदधितताभिति। फलकोपरि पोतिकाधो वीरकाण्डं नामावयवः। घनमुन्नतिरूपम्। दण्डपञ्चकचतुष्कत्रिकायामा पोतिका उत्तरसमविताना दलाद्युच्छ्रिता उत्तरदलादिमानेन घना।। 25।।

Oma the pedestal or base of a column with an extension of two daṇḍas in height (like an elevated altar) and then a Kumbha – moulding is the shape of a pot with a circumference of one and one fourth or one and one and half daṇḍa in height. Then there shall be a Maṇḍi – a plank put over a door or window – above which shall be constructed the a Vīrakāṇḍa – part of a pillar above Kumbha with three fourth of daṇḍa in height and a circumference of one daṇḍa. Thereafter may be built a potikā – the capital

1. 'ल्या' क. ख. घ. पाठः

of a pillar (a decorated bracket) at the top. (Oma is at the base of a pillar and Kumbha, Maṇḍi, Vīrakāṇḍa and Potikā are parts upto the beams). (25)

[1]भित्तिव्यासमिनैर्विभज्य बहिरन्तः पञ्चसप्तांशकान्
कृत्वा कल्पितसूत्रसंस्थनिजमध्यद्वारयोगान्यथ।
मध्यान्मध्यमतीत्य दिक्षु रचयेद् द्वाराणि तूर्ध्वं प्रते-
ख्ग्रयद्वारमृते घनानि कृतशोभान्यूर्ध्वतस्तोरणैः।। 26।।

विमर्शिनी

द्वारकल्पनमाह – भित्तीति। भित्तिव्यासं भित्तेर्विस्तारम्। इनैः द्वादशभिर्विभज्य बहिः पञ्चांशकान् अन्तः सप्तांशकांश्च कृत्वा। कल्पितसूत्रसंस्थनिजमध्यद्वारयोगानि तत्र कल्पिते सूत्रे संस्थितानि निजमध्यानि निजाया द्वारशाखाया मध्यगतसूत्राणि द्वारशाखाभिधानि द्वारयोगानि। तथाविधानि द्वाराणि चतसृषु दिक्षु तु प्रतेरूर्ध्वम्। मध्यान्मध्यमतीत्य प्रासादमध्यसूत्राद् द्वारमध्यसूत्रं किञ्चिदतीत्य नीत्वा रचयेत्। अग्रयद्वारमृते अग्रयद्वारं वर्जयित्वा। घनानि बन्धद्वाराणि। ऊर्ध्वतस्तोरणैः कृतशोभानि च रचयेत्।

योगं तु स्थापयेद् विप्र! शान्तिहोमपुरःसरम्।
भित्तिव्यासे तु भान्वंशे बाह्यात् पञ्चावसानकम्।।
अभ्यन्तरात् तु सप्तांशसमं योगस्य मध्यमम्।

इति। तन्त्रान्तरे च-

मुहूर्ते स्थापयेद् विद्वान् मध्यान्मध्यं विमुच्य च

इति। तथा व गुरुदेवः-

सर्वत्र प्रत्युपर्येव द्वारं कुर्याद् विचक्षणः

इति[2]। मध्यान्मध्यमतीत्येत्यस्यायमाशयः- वक्ष्यमाणमग्रयद्वारविस्तारमेकविंशतिभागं कृत्वा एकांशं वामतस्त्यक्त्वा तत्र द्वारमध्यं यथा भवति तथा रचयेत्। अपराण्यपि त्रीणि द्वाराणि प्रदक्षिणक्रमेण षट्त्रिंशद्भागं चतुष्षष्टिभागमेकाशीतिभागं च कृत्वैकैकभागमतीत्य द्वारमध्यानि रचयेत्। अथवा घनद्वारि त्रीण्यपि षट्त्रिंशं भागं वा चतुष्षष्टिभागं वा एकाशीतिभागं वातीत्य द्वारमध्यानि रचयेदिति। तथाहुः-

स्वव्यासमूर्छाघृतियुतियुग्ददद्वन्द्वेन्दुजांशकैः।
द्वारं प्रदक्षिणश्चाल्यां स्वेष्वेकेनैव वा घनाः (?)।। 26।।

विवरणम्

[3]अधिष्ठानजन्यमपि मानमाह – वास्त्विति। वास्त्वाधारोऽधिष्ठानं साधारणमलङ्कारादिकं द्रष्टव्यम्। अथ द्वारस्थानानि कथयति – अतीत्य मध्यमिति।। 26।।

---

1. 'वास्त्वाधारमिनैः' इति विवरणरीत्या पाठः।
2. 'ति। कादृशा' क. ख. पाठः
3. इतः प्रभृति 34 पद्यपर्यन्तव्याख्या विवरणे 22 पद्यानन्तरं पठिताः।

There shall be constructed four doors above the Prati – top most moulding of adhiṣṭhāna. For this the width of the wall may be divided by eleven divisions of which five may be inside the door step and seven parts outside – all marked from the centre of the sanctum with exception to the main door others shall be of solid rock put into the pillars of door with supporting pillars and door space. The top of the door shall be decorated with embellishments. (26)

गर्भागारप्रताने शिववसुदिनकृच्छैलतिथ्यंशितेऽशै-
बिम्बद्वारोच्छ्रयः स्याद् गिरिशरतुरगाम्नायमातङ्गसङ्ख्यैः।
उत्सेधेऽत्रैकविंशत्यतिधृतितिथिविश्वाङ्कभक्ते प्रक्लृप्ते
व्यासो दिङ्नन्दशैलोर्म्युदधिपरिमितांशैः क्रमात् कल्पनीयः ।। 27 ।।

विमर्शिनी

कीदृशौ द्वारोत्सेधविस्तारावित्याकाङ्क्षायामाह–गर्भागारेति। गर्भागारप्रताने गर्भगृहविस्तारे। शिववसुदिनकृच्छैलतिथ्यंशिते एकादशधाष्टधा द्वादशधा सप्तधा पञ्चदशधा भक्ते। क्रमेण गिरिशरतुरगाम्नायमातङ्गसङ्ख्यैः सप्तभिः पञ्चभिः सप्तभिश्चतुर्भिरष्टभिश्चांशैः। बिम्बद्वारोच्छ्रयः बिम्बे स्थाप्ये द्वारोच्छ्रयः स्यात्। अत्रैवं प्रक्लृप्ते उत्सेधे एव क्रमेण। एकविंशत्यतिधृतितिथिविश्वाङ्कभक्ते एकविंशतिधैकोनविंशतिधा पञ्चदशधा त्रयोदशधा नवधा वा भक्ते। क्रमाद् दिङ्नन्द-शैलोर्म्युदधिपरिमितांशैः दशभिर्नवभिः सप्तभिः षड्भिश्चतुर्भिश्चांशैर्व्यासः कल्पनीयः स्यात्। तथाह भास्करः–

प्रतिमाद्वारमानं तु गर्भागारेण चोच्यते।
एकादशात् सप्तोत्सेधमेकविंशाद् दशविस्तरम्।।
अष्टांशे पञ्चभागोच्चं नवदशे नवविस्तरम्।
द्वादशांशे सप्तोत्सेधं त्रिपञ्चे सप्तविस्तरम्।।
सप्तभागे चतुष्कोच्चं त्रयोदशे षड्विस्तरम्।
तिथिभक्तेऽष्टसङ्ख्योच्चं नवभक्ते चतुर्विस्तरम्।।

इति।। 27 ।।

विवरणम्

प्रधानद्वारप्रमाणं गर्भगेहाज्जनयितुमाह–गर्भागारप्रतान इति।। 27 ।।

The height of the door of the shrine where an idol is to be installed may be fixed with particular measurement. The circumference of the sanctum may be divided by eleven, eight, twelve, seven or fifteen. Out of this seven. five, seven, four and eight portions shall be considered for the height of the door. Once the height is fixed, it may be divided by one of the following (27)

व्यासे गर्भनिकेतनस्य दहेनषुद्वारनेत्रांशिते
लिङ्गद्वारसमुच्छ्रयं वितनुयाद् द्वित्रीषुचन्द्रांशकैः।
तस्मिन् द्वारसमुच्छ्रयेऽथ नयनात्यष्टीशशैलांशिते
तद्विस्तारमिलामहोरगशराग्न्यंशैः क्रमात् कल्पयेत्।। 28।।

विमर्शिनी

लिङ्गे स्थाप्ये द्वारोत्सेधविस्तारयोर्विशेषमाह–व्यास इति। गर्भनिकेतनस्य गर्भगृहस्य व्यासे। दहनेषुद्वारनेत्रांशिते त्रिभिः पञ्चभिर्नवभिर्द्वाभ्यां वा भक्ते। क्रमाद् द्वित्रीषुचन्द्रांशकैः द्वित्रिपञ्चैकांशकैर्लिङ्गद्वारसमुच्छ्रयं वितनुयात्। तस्मिन्नेव द्वारसमुच्छ्रये। क्रमेण नयनात्यष्टीशशैलांशिते द्विधा सप्तदशधा एकादशधा सप्तधा च भक्ते। क्रमाद् इलामहोरगशराग्न्यंशैः एकेनाष्टभिः पञ्चभिस्त्रिभिर्भागैस्तद्विस्तारं कल्पयेत्। तथाच भास्करः–

अथ तद् द्वारमानं तु गर्भागारेण चोच्यते।
त्रिभागद्वयमुत्सेधमुत्सेधार्धं तु विस्तरम्।।
पञ्चभागत्रिभागोच्चं सप्तदशाष्टविस्तरम्।
नवांशात् पञ्चोत्सेधं दशैकांशात् पञ्चविस्तरम्।।
विस्तारार्धं कनिष्ठोच्चं सप्तभागं त्रिविस्तरम्।
गर्भागारप्रमाणेन लिङ्गद्वारस्य मानकम्।।

इति।। 28।।

The circumference of the Garbhagṛha may be divided by one among three, five, nine, two parts and then the length or height of the shrine where the idol of Śiva could be found. Then that height may be divided by one of the numbers two, seventeen, eleven or seven (to ascertain the width of the door). Then again taking one, eight, five or three division may be chosen to fix the width of the door. (28)

कुर्यात् सर्वसुरेषु शैलवसुनन्दाशांशितेऽङ्घ्र्युच्छ्रये
द्वारोत्सेधमिहैकभागरहितं वि[1]स्तीर्णमात्मार्धतः।
योगौ स्तम्भसमाधिपाददलविस्तीर्णौ स्फुरद्राजनौ
विस्तारार्धघनौ भुवङ्गमपतङ्गाढ्यौ च मूलाग्रयोः।। 29।।

विमर्शिनी

स्तम्भवशादपि द्वारभेदमाह–कुर्यात् सर्वसुरेष्विति। सर्वदेवेषु अङ्घ्र्युच्छ्रये स्तम्भोच्चे। शैलवसुनन्दाशांशिते सप्तधाष्टधा नवधा दशधा वा विभक्ते। इह एकभागरहितम् एकांशहीनं द्वारोत्सेधं कुर्यात्। आत्मार्धतः आयामार्धतो विस्तीर्णं व। द्वारशाखालक्षणमाह योगाविति। योगौ द्वारशाखाख्यौ। स्तम्भसमाधिपाददलविस्तीर्णौ। स्तम्भविस्तारसमेन वा सपादस्तम्भविस्तारेण वा सार्धस्तम्भविस्तारेण

1. 'स्तारमा' इति मूलकोशपाठः

वा विस्तीर्णौ। स्फुरद्वाजनौ वाजनेन स्फुरन्तौ। विस्तारार्धघनौ स्वविस्तारार्धतीव्रौ। मूलाग्रयोर्मूले अग्रे च। क्रमाद् भुवङ्गमपतङ्गाढ्यौ भुवङ्गमेन पतङ्गेन च युक्तौ च कुर्यात्। तथाह गुरुदेवः–

स्तम्भायामे तु दिङ्नन्दवसुसप्तांशके क्रमात्।
नन्दवस्वृषिषड्भागैर्द्वारोत्सेधं प्रकल्पयेत्।।
तदर्धविस्तृतं च स्याद् द्वारं देवालयेषु वै।
सपादपादविस्तारस्तदर्धबहलो दृढः।।
कवाटयोगस्तत्पार्श्वे वाजनं पूर्ववद् भवेत्।

इति। तथाच काश्यपः–

पादविष्कम्भमानं वा सपादं सार्धमेव वा।
द्वारयोगस्य विस्तारं तस्यार्धं घनमुच्यते।।

इति।। 29।।

विवरणम्

[1]धरा भूमिः। द्वाराङ्गभूतानां योगादीनां प्रमाणमाह–योगा इति। योगा द्वारपार्श्वयोरध उपरि च स्थाप्याः। दण्डो हि पूर्वमुक्तः। तत्र भुवङ्गमः कार्यः। अयमधस्ताद्योगयोर्मध्ये शाययितव्यः। कराग्नीति। निजविस्तारं दण्डमितं करादिभक्तं कृत्वा शक्त्यादिभागं गृहीत्वा तेनोच्छ्रयं कल्पयेत्। अथ फलकेति। उत्तरादधोऽयमलङ्कारः। अष्टमङ्गलानि मण्डपसंस्कारे वर्तन्ते।।

बहिर्द्वारप्रमाणमाह–स्तम्भोच्च इति। अत्रेति स्तम्भोच्चग्रहणं तच्छेषिताङ्घ्र्युच्छ्रये दिग्दलिते षड्भिरनिभक्ते ससभिश्चांशकैः पतङ्गं तच्छिष्टेन भुवङ्गमं च रचयेदित्यन्वयः। स्तम्भोच्चाज्जनितं यद्द्वारोच्चं तन्मानं स्तम्भोच्चमानं जह्यात्। तत्र यावदवशिष्यते सोऽयं तच्छेषिताङ्घ्र्युच्छ्रय उक्तः। तद्दशधा भङ्क्त्वा षड्भिः पतङ्गमं शिष्टैश्चतुर्भिः भुवङ्गमं चेत्यर्थः।। 29।।

In the case of the temples of all Gods the height of the pillar (from the basement) shall be divided by one of the number like eight, nine or ten from which one division may be made less to fix the height of the door. The width may be half of the measure of the height. There shall be a cross piece (door still) and at the base another 'cross piece with stepped projection (called Vājana) suitable to the size of the pillar in width. (29)

द्वारोत्सेधनियुक्तशेषचरणोत्सेधे शरांशीकृते
द्व्यंशेनाधरपट्टिकां मितघनां सार्धेन वाङ्कांशिते।
हीनां वाजनकेन योगवितता शिष्टांशतः पट्टिका-
मूर्ध्वस्थामथ मङ्गलाढ्यफलकां युक्त्योर्ध्वपट्ट्यूर्ध्वतः।। 30।।

1. अनयोर्व्याख्ययोर्मूलपाठोऽन्य इति प्रतिभाति।

विमर्शिनी

द्वारोच्छिष्टांशविनियोगमाह–द्वारोत्सेधेति। द्वारोत्सेधनियुक्तशेषवरणोत्सेधे स्तम्भोत्सेधाद् द्वारोत्सेधं त्यक्त्वा शिष्टे। शरांशीकृते पञ्चधा कृते। द्व्यंशेन मितघनां कृततीव्राम्। अधरपट्टिकां भुवङ्गमाख्याम्। वाजनकेन हीनां योगवितताां द्वारशाखासमविस्तृतां च कुर्यात्। अङ्कांशिते नवधा कृते। सार्धेनार्धसहितेन द्व्यंशेन वा कुर्यात्। शिष्यंशत ऊर्ध्वस्थां पट्टिकां पतङ्गाख्यां च। ऊर्ध्वपट्ट्यूर्ध्वतो युक्त्या मङ्गलाढ्यफलकां मङ्गलया लक्ष्म्या संयुक्तां फलकां च। तथाच गुरुदेवः–

द्वारोच्चशेषे पञ्चांशे भवेदंशद्वयं त्वधः।
ऊर्ध्वं त्रयोंऽशास्तत्र स्युः फलका चात्र चित्रिता।।

इति।। 30।।

Deducting the height of the door from the height of the pillar and dividing it by five, take two of the portions to decide upon the thickness of the cross plank at the base of the door. By dividing the above by nine and without the stepped portions one may shape the cross plank at the top of the door (lintel) with equal thickness of the base door still plank). From the cross bar above upto the top of the beam one may fix a plank with the figure of the goddess to augur auspiciousness. (30)

दण्डाब्ध्यङ्गमतङ्गजांशबहलं तावद्युतद्वार्दल-
व्यासं मूलशिखायुतं दृढतरं कार्यं कवाटद्वयम्।
कार्या वामकवाटरोपितपराग्मागार्धतीव्रा तत-
स्तद्विघ्नप्रतता च सूत्रफलका सूद्यत्स्तनाद्युज्ज्वला।। 31।।

विमर्शिनी

कवाटलक्षणमाह–दण्डेति। दण्डाब्ध्यङ्गमतङ्गजांशबहलं दण्डस्य चतुर्भागेन वा षड्भागेन वाष्टभागेन वा घनेन युक्तम्। तावद्युतद्वार्दलव्यासं यावान् बहलस्तावद्युतेन द्वारार्धेन विस्तारयुक्तम्। मूलशिखायुतं मूलगतनालेनाग्रगतया शिखया च युक्तम्। दृढतरं सारदारुनिर्मितं च कवाटद्वयं कार्यं स्यात्। वामकवाटरोपितपराम्भागा वामकवाटश्लिष्टपृष्ठभागा। ततः कवाटात्। अर्धतीव्रा कवाटार्धबहला। तद्विघ्नप्रतता कवाटतीव्रद्विगुणितविस्तारा च। सूद्यत्स्तनाद्युज्ज्वला सुष्ठूद्यद्भिः स्तनाकृतिभिरन्यैश्चालङ्कारविशेषैः उज्ज्वला सूत्रफलका च कार्या स्यात्। तथाव गुरुदेवः–

दण्डाच्चतुष्षडष्टांशं कवाटफलकाघनम्।
श्रेष्ठमध्याधमं ज्ञेयं क्रमात् सर्वेषु धामसु।।
स्तम्भाष्टांशघनौ रम्यो कवाटौ विस्तरेऽधिकौ।
तदर्धबहलो दण्डो मध्ये द्विगुणविस्तरः।। इति।। 31।।

विवरणम्

बहलं घनम्। तावद्युतद्वार्दलव्यासमिति। द्वारविस्तारमानस्यार्धं कवाटघनमानं चैकीकृतं कवाटविस्तारं

कल्पयेदित्यर्थः। मूलशिखायुतम्। मूलं च शिखा च मूलशिखे। [1]तत्सन्धिगुप्तिक्षमामिति तद्विन्यासमानमपि सूचितम्।। 31।।

There shall be two leaves of the door with a thickness of one fourth, one sixth or one eighth of a daṇḍa and a width of the half of the door. It should have projections at the top as well as at the base. On the left plank of the door leaf there shall be sūtraphalaka, a runner used to cover the gap between the two leaves of a door with breast-like projections with a thickness of double the plank with three, five or seven such items. (31)

ऊर्ध्वाधरभ्रमरकार्गलसन्धिपाल-
प्रक्षेपणीयवळयान्यपि पत्रकाणि।
तिर्यञ्च्युदञ्चि पुलकार्तवकुड्मलानि
सश्रीमुखेन्दुशकलानि कवाटयोः स्युः।। 32।।

विमर्शिनी

कवाटभूषणान्याह—ऊर्ध्वाधरेति। कवाटयोर्द्वयोरपि ऊर्ध्वांघरभ्रमरकार्गलसन्धिपाल- प्रक्षेपणी-यवलयानि ऊर्ध्वे अधरे च भ्रमरकौ भ्रमणसाधकौ यन्त्रविशेषौ[2] अर्गलं कवाटस्यान्तर्भागस्थः कवाटस्य विवृतिनिरोधको यन्त्रविशेषः सन्धिपालः कवाटयोः सन्धिं पालयतीति[3] सूत्रफलका प्रक्षेपणीयः कवाटस्य बहिर्भागस्थः कवाटविवृतिनिरोधको लोहमयो यन्त्रविशेषः वलयानि कवाटकर्षणार्थं कल्पितानि वलयाकाराणि लोहविकाराणि। पत्रकाणि च कवाटयाः स्थैर्यसिद्धये बद्धानि लताकारेण निर्मितानि लोहानि भूषणितानि। पुनस्तिर्यञ्चि तिर्यग्गतानि। उदञ्चि ऊर्ध्वगतानि च। पुलकार्तवकुड्मलानि पुष्पाणामवस्था विशेषद्योतकानि भूषणानि। सश्रीमुखेन्दुशकलानि श्रीमुखाः श्रीदेव्यादीनामाकाराः तैः सहितानीन्दुशकलानि चन्द्रखण्डाकाराणि एतदादीनि भूषणानि स्युः। तथाहुः—

श्रीमुखं वामदण्डं च प[4]ञ्जरी पुलकार्गलौ।
क्षेपणं सन्धिपालं च दण्डकुण्डलकौ तथा।।
अन्तर्गतविषाणौ च फ[5]ल्गुभ्रमरकौ तथा।
वला[6]हः परिधश्चैव भूषणानि कवाटयोः।।

इति।। 32।।

The door panels should have decorations like metallic rings, runner between the two panels sliding latch sandhipāla (metal gadget) that prevents

1. विवरणरीत्या पाठभेदाऽस्तीति प्रतीयते।
2. 'षकौ अ' ख. पाठः,
3. 'ति त्सुत्र' ख. घ. पाठः
4. 'पि' ख. पाठः,
5. 'गुल्फभ्र' ख. घ. पाठः,
6. 'हापरिधं चैव' ख. पाठः

the opening of the panels, cropper shaped metallic divider to keep the door panels steady, fixed cross wise and lengthwise nails resembling flowers or birds and figurines of the goddess, cresents of the moon and the like. (32)

अग्रयद्वारभुवङ्गमस्थलसमारब्धान्यधोऽधः क्रमात्
सोपानानि समानि सारशिलया चिन्वीत यावत्तलम्।
अध्यर्थद्विगुणात्तदण्डविपुलानि द्वारशाखाद्वयी
पार्श्वोद्यन्मकरास्यनिःसृतलतारुद्धोभयान्तानि च।। 33।।

विमर्शिनी

सोपानलक्षणमाह–**अग्रयद्वारेति**। अग्रयद्वारभुवंगमस्थलसमारब्धानि अग्रभवस्य द्वारस्य यों भुवंगमः तत्स्थलात् समारब्धानि। क्रमादधोधोभागस्थितानि। यावत्तलं तलपर्यन्तं यथा तथा। द्वारशाखाद्वयीपार्श्वोद्यन्मकरास्यनिस्सृतलतारुद्धोभयान्तानि द्वारशाखा द्वय्याः पार्श्वादुद्यतो मकरास्यान्निःसृतया लतया प्रतिरुद्धोभयपार्श्वानि। अध्यर्धद्विगुणात्तदण्डविपुलानि अध्यर्धेन द्विगुणेन वा गृहीतेन दण्डेन विस्तृतानि। समानि युग्मानि समविस्ताराणि च सोपानानि सारशिलया चिन्वीत। गुरुदेवः–

समखण्डानि कुर्वीत सोपानानि यथाक्रमम्।
द्विदण्डं वाध्य(र्ध)दण्डं (वा) भवेत्।।

इति च।। 33।।

विवरणम्

तलप्रवेशनिर्गमनार्थं सोपानमाह – अग्रयद्वारेति। प्रधानद्वारे यो भुवंगमः तत्स्थलात् समारब्धानि। तलं भूतलमेव। असमानि त्रिपञ्चाद्योजसङ्ख्यानि द्वारशाखे योगौ तत्पार्श्वे सोपानहस्तौ स्याताम्।। 33।।

There shall be a flight of steps starting from the base of the shrine door and extending upto the ground. Built of solid rocks and looking as if coming out of the mouth of Makara (the crocodile or shark) on both the sides and ending with the designs of creepers. The height and the width of the structure shall be one and a half or two daṇḍas. (33)

अग्रयद्वारप्रततिमहिभिः संविभज्याशुगांशैः
क्लृप्तव्यासं रचयतु घनद्वारमन्यत्रिदिक्स्थम्।
द्विघ्नव्यासायतमधिदलद्विघ्नतत्यातातं वा
सूद्यद्योगप्रकटितकवाटादिकस्वाङ्गदीप्तम् ।। 34।।

विमर्शिनी

अन्यस्य घनद्वारत्रयस्य लक्षणमाह–**अग्रयद्वारेति**। अग्रयद्वारप्रततिम् अग्रयद्वारस्य विस्तारम्। अहिभिरष्टभिः संविभज्य। आशुगांशैः पञ्चभागैः। क्लृप्तव्यासं क्लृप्तविस्तारम्। द्विघ्नव्यासायतं द्विगुणितेन विस्तारेणायामयुक्तम्। अधिदलद्विघ्नतत्यातातं वा अध्यर्धद्विगुणविस्तारं वा। सूद्यद्योग-प्रकटितकवाटादिकस्वाङ्गदीप्तं सुतरामुद्यति योगे प्रकाशितेन कवाटादिना स्वाङ्गेन सुन्दरं च। घनद्वारं द्वारप्रतिरूपम्। अन्यत्रिदिक्स्थम् अग्रयद्वारादन्यत्रिदिक्षु स्थितं रचयतु। तथाहुः–

पुरोद्वारस्य विस्तारे त्वष्टभक्तेऽत्र पञ्चभिः।
घनद्वारस्य विस्तारं ततो द्विगुणदैर्घ्यकम्।।
द्विगुणार्धं तु वा दैर्घ्यं घनद्वारगतं शुभम्।

इति।। 34।।

विवरणम्

अथ घनद्वारमाह – अग्रयद्वारप्रततिमिति। अन्यत्रिदिक्स्थम्। अत्र दिशि हि प्रधानद्वारमुक्तम्। पार्श्वदिशोः पृष्ठदिशि च घनद्वारमित्यर्थः।। 34।।

By dividing the width of the main door by eight and taking five portions on the width and twice or two and half of the size one may construct replicas of the door on the other three sides of the shrine. In all these others shall be the items like door, its frame, panels, cross beams and the like with embellishments. (34)

स्तम्भे दिङ्नन्दनागांशिनि झषमनलांशेन शेषेण पादौ
व्यासं स्तम्भार्धतोऽब्ध्याशुगरसमितदण्डेन वा तत्र कुर्यात्।
पत्रादीद्धार्धचन्द्रात्मकमथ मकरास्यादिमत् पञ्चभुग्नं
कर्तव्यं तोरणं तद् विविधखगलसन्नक्रतुण्डोज्ज्वलं च।। 35।।

विमर्शिनी

तोरणलक्षणमाह–स्तम्भ इति। स्तम्भे स्तम्भोच्चे। दिङ्नन्दनागांशिनि दशधा नवधाष्टधा वांशिते। अनलांशेन त्र्यंशेन। झषं मत्स्यरूपं द्वारोपरिगतावयवं कुर्यात्। शेषेण[1] शिष्टैरंशैः। पादौ तोरणपादौ। स्तम्भार्धतः स्तम्भार्धमानेन वा। अब्ध्याशुगरसमितदण्डेन वा चतुर्भिः पञ्चभिः षड्भिर्दण्डैर्वा। तत्र तोरणे व्यासं कुर्यात्। अथ पत्रादीद्धार्धचन्द्रात्मकमिति पत्रतोरणमुच्यते। पत्रलतादिभिर्दीप्तमर्धचन्द्राकारं च। मकरास्यादितम् पञ्चभुग्नमिति मकरतोरणमुच्यते। मकरास्यादिभिर्युक्तं पञ्चधा वक्रीकृतं च। विविधखगलसन्नक्रतुण्डोज्ज्वलमिति चित्रतोरणमुच्यते। विविधैः पक्षिभिर्लसद् नक्रतुण्डेन चोज्ज्वलं च। इति तत् प्रशस्तं तोरणं त्रिविधं कर्तव्यं स्यात्। तथाह काश्यपः–

अथ वक्ष्ये विशेषेण तोरणानां तु लक्षणम्।
पादोदयदशांशेषु सप्तांशं चरणोदयम्।।
शेषांशं गुणमानं तु झषमानमुदाहृतम्।
नवांशे पादतुङ्गे तु षडंशं चरणोदयम्।।
शेषं झषोदयं ख्यातमष्टांशे चाङ्घ्रितुङ्गके।
पञ्चांशं चरणोत्तुङ्गं झषोत्सेधं गुणांशकम्।।
तुङ्गार्धविपुलो वाथ वेदभूतरसाङ्घ्रि वा।
तोरणस्य तु तद्वाह्ये व्यासमेवं चतुर्विधम्।।

---

1. 'अविशि' क. पाठः

प्रासादमण्डपादीनां मध्यभागे तु तोरणम्।
अनेन विधिना विप्र! कर्तव्यं कुड्यबाह्यके।।
पत्राख्यतोरणं चादौ द्वितीयं मकरतोरणम्।
तृतीयं चित्रसंज्ञं च त्रिविधं तोरणाकृति।।
अर्धचन्द्रमिवाकारपत्रराजिविराजितम् ।
पत्रतोरणमाख्यातं ततो मकरमुच्यते।।
पञ्चवक्रसमायुक्तं पार्श्वयोर्मकरान्वितम्।
मध्ये पुरिसमायुक्तं नानाविधलतान्वितम्।।
नानालङ्कारसंयुक्तं यत्तन्मकरतोरणम्।
तदेव पार्श्वयोर्मध्ये पुरि मत्स्यद्वयोरपि।।
नक्रतुण्डं प्रकर्तव्यं भूतविद्याधराङ्गकम्।
सिंहेभव्यालहंसाद्यैर्बालस्त्रङ्मुक्तदामकैः ।।
मत्स्यैश्च विविधैश्चित्रै रत्नबन्धैश्च भूषितम्।
चित्रतोरणमेतत् स्यात्।।

इति।। 35।।

The height of the side post of the door may be divided by nine or eight of which three may be taken as height, over which the replica of a fish may be made upto the basement to support. For dividing its width half, the size of the side pillar, or four, five or six dandas may be taken. There may be a crescent shaped Toraṇa (fenestration) decorated with the designs of leaves, or like the head of a crocodile or makara toraṇa with five projections or indentations. The decorated gateway may have replicas of birds or crocodile heads. (35)

प्रत्युत्तरान्तर्विरचय्य भित्तिं ततः समन्तात् सुदृढैः शिलाद्यैः।
तां भूषयेद् वेदिकयाङ्घ्रिमूले तदूर्ध्वतश्चोज्ज्वलपञ्जराद्यैः।। 36।।

विमर्शिनी

भित्तिलक्षणमाह—प्रत्युत्तरान्तरिति। प्रत्युत्तरान्तः प्रतेरुत्तरस्य चान्तर्मध्यभागे। समन्तात् परितः। सुदृढैः सुतरां सारतरैः। शिलाद्यैः शिलेष्टकादिभिः भित्तिं विरचय्य। तां भित्तिम्। अङ्घ्रिमूले स्तम्भाधोभागे। भित्तेरधोभाग इत्यर्थः। तत्र वेदिकया भूषयेत्। तदूर्ध्वतः वेदेरुपरिभागे। उज्ज्वलपञ्जराद्यैः उज्ज्वलैः पञ्जराद्यलङ्कारविशेषैश्च भूषयेत्। तथाहुः—

प्रत्त्युत्तरान्तरे भित्तिर्जालेष्टकशिलामयी।

इति। तथाच गुरुदेवः—

कुड्येषु तोरणानि स्युस्तत्कुड्यं पञ्चधा स्मृतम्।
शिलामयं चैष्टकं च (ज?जा)लकामयमित्यपि।।
फलकामयमित्यन्यन्मृण्मयं चापरं क्रमात्। इति।। 36।।

विवरणम्

[1]अन्तः अन्तरा। पञ्जराद्यैरिति कूटशालादिग्रहराम्।। 36।।

A wall around the shrine shall be constructed from the base upto the beam above with solid substances like hard stone (or bricks etc.) The wall may be embellished right from the Vedkā (altar) to be followed above with attractive niches). (36)

प्रत्युत्सेधेन पादायतिवसुमुनिषड्भागतोऽध्यर्धकेन
द्वित्रिघ्नेनाङ्घ्रितारेण च भवतु समोऽभ्युच्छ्रयो वेदिकायाः।
उत्सेधे द्व्यंशितेऽधोवधि गुणरशनान्तर्यथाष्टादिषड्भा-
गेंऽशैः कम्पाब्जकम्पाः शशिकरशशिभिः शेषतोऽधो गलं च।। 37।।

विमर्शिनी

वेदिकालक्षणमाह–प्रत्युत्सेधेनेति। प्रत्युत्सेधेन प्रतेरुत्सेधप्रमाणेन वा। पादायतिवसुमुनिषड्भागतः स्तम्भायामस्याष्टभागेन वा सप्तभावोन वा षड्भावोन वा। अध्यर्धकेनाङ्घ्रितारेण अर्धसहितैकेन स्तम्भविस्तारेण। द्वित्रिघ्नेन च द्विगुणितेन वा त्रिगुणितेन वा स्तम्भविस्तारेण समो वेदिकाया अभ्युच्छ्रयो भवतु। अथोत्सेधे व्द्यंशिते अधोवधि अधः पर्यन्तम्। गुणरशना तिस्रो मेखला अन्तरी च भवतु। अथवाष्यद्रिषड्भागे अष्टधा सप्तधा षोढा वा भक्ते। शशिकरशशिभिरेकद्वयेकांशैः। क्रमेण कम्पाब्जंकम्पाः शेषतोऽधोभागे गलं च। तथाहुः–

"प्रतेरुपरि वेदिः स्यात् प्रत्युत्सेधेन सम्मिता।"

तथा च काश्यपीये–

स्तम्भोदये तु षट्सप्तवसुभागविभाजिते।
एकांशं वेदिकामानं क्रमाच्छ्रेष्ठान्तराधमम्।।

मयमते च–

"प्रतेरुपरि वेदिः स्यात् सार्धद्वित्र्यङ्घ्रिणोदिता।"

इति। मुरारिश्च–

"मेखलात्रयसंयुक्ता वेदिकान्तरिभूषिता।"

इति। काश्यपीये च–

अष्टांशे वेदिकेत्सेधे वेदाङ्गं गलमानकम्।
गलोर्ध्वकम्पमेकांशं व्द्यंशेनाब्दं प्रकल्पयेत्।।
तदूर्ध्वकम्पमेकांशं कर्तव्यं द्विजसत्तम!।।
स्वरषडंशे वेद्युच्चे त्रिव्द्यंशे च क्रमात् गलम्।।
कम्पं पद्मं च कम्पं च प्रागिवैवं प्रकल्पयेत्।।

1. इयं व्याख्या 25 पद्यानन्तरं दृश्यते।

इति ।। 37 ।।

The height of the Vedikā (altar) shall be upto the basement (floor level of the shrine). It can also be of the dimension of one eighth, one seventh or over sixth of the height of the pillar. Dividing the height of the Vedikā into two the two third of upper portion may be made use of to shape three girdles and the last to form a Gala – a rececessed portion. Then dividing the height of the Vedikā into eight, seven or six, portions may be made use of to form a Kampa, Padma again Kampa and Gala. (37)

प्रासादः सकलोऽङ्घ्रितोरणचतुर्द्वारान्वितो मण्डित-
स्तम्भाभ्यन्तरजालपञ्जरयुतो वा पञ्चहस्तादिकः ।
युक्तो मूलतले विदिक्स्थितचतुष्कूटैः परस्तत्परः
शालाकूटकनासिकादिविलसज्जालोज्ज्वलत्पञ्जरः ।। 38 ।।

विमर्शिनी

भित्तिभूषणान्याह–प्रासाद इति। सकलः प्रासादोऽङ्घ्रितोरणचतुर्द्वारान्वितः अङ्घ्रिभिस्तोरणैश्चतुर्भिर्द्वारश्चै युक्तः स्यात्। पञ्चहस्तादिकस्तु मण्डितस्तम्भाभ्यन्तरजाल पञ्जरयुतो वा। मण्डितानां स्तम्भानामन्तराले जालसहितपञ्जरयुतः। परः तत उपरि मूलतले भित्तेर्मूलप्रदेशे विदिक्स्थितचतुष्कूटैः कोणेषु स्थितैश्चतुर्भिः कूटैर्युक्तः। तत्परस्तु शालाकूटकनासिकादिविलसज्जालोज्ज्वलत्पञ्जरः शालाभिः कूटैर्नासिकादिभिश्च शोभमानजालकैश्च दीप्तिमद्भि पञ्जरैश्च युक्तः। तथाहुः–

त्रिहस्ते दण्डविस्तीर्णास्तदर्धबहलाः शुभाः ।
द्वादशैव चतुष्कोणमध्यस्थाः कुड्यपादकाः ।।
पार्श्वयोः पृष्ठतो युक्तास्तोरणैरुज्ज्वलैस्त्रिभिः ।
तोरणत्रयसंयुक्ते[1] पञ्चहस्तेऽष्टपञ्जरे ।।
जालकानि त्रिभिर्दण्डैर्नन्द्यावर्तादिकानि च ।
तुर्याश्राणि गवाक्षाणि गजेन्द्रनयनानि च ।।
लताश्च विविधास्तत्र कारयेत् स्वस्तिकानि वा ।
कुड्यस्तम्भांस्तथा कुर्यान्मूलाश्रान् कुम्भमण्डितान् ।।
सप्तहस्ते च चित्राढ्यं तोरणं मकरोज्ज्वलम् ।
पत्रैश्चित्रीकृतं कुर्यान्मध्ये रत्नादिमण्डितम् ।।
मण्डितान् कुड्यपादांश्च द्वादशैवात्र पूर्ववत् ।
कर्णकूट[2]ांश्च परितः शालापञ्जरकाष्टकम् ।।
पूर्ववन्मण्डितान् स्तम्भान्नवहस्ते तु मन्दिरे ।
कर्णकूटैश्च संयुक्ते शालापञ्जरतोरणैः ।।

---

1. 'क्तेः' ख. पाठः,
2. 'ठा' क. पाठः

एकादशकरे स्तम्भा विंशतिर्मण्डितान्विताः।
दिक्षु चत्वारि चत्वारि पञ्जराणि शुभानि च।।
नास्योऽत्र षोडशोर्ध्वं च शिखरे हारकांस्तथा।
त्रयोदशकरे स्तम्भा विंशतिर्मण्डितास्तथा।।

इत्यादि।। 38।।

विवरणम्

पञ्जराद्यैरिति यदुक्तं तदीषद्विवृणोति–प्रासादः सकल इति। पञ्चहस्तादिकोऽसौ स्तम्भाभ्यन्तरजालपञ्जरयुत इति सम्बन्धः। [1]अतोऽधिक इति त्रिभूम्यादिको गृह्यते।। 38।।

All shrines should have pillars, gateways and doors on all the four sides. For those with more than five daṇḍas of height there should be pillars with decorations and lattice windows on bigger shrines the four corners of the walls there should be pendants. For more bigger ones there shall be Rectangular halls, (Kūṭas) pendants, and pavilions dormer windows and lattices executed with artful decorations. (38)

कुड्ये पङ्क्त्यादिभक्ते विदिशि विरचयेत् कूटमेकांशविस्ता–
रायामं द्व्यंशदीर्घां दिशि दिशि विततामेकभागेन शालाम्।
शालाकूटान्तराले चरणविरहितांशोन्मितां नासिकां त–
त्पार्श्वद्वन्द्वे सजालं चरणविरहितांशादितः पञ्जरं च।। 39।।

विमर्शिनी

भीत्त्यलङ्काराणां विभागमाह–**कुड्य** इति। कुड्ये पङ्क्त्यादिभक्ते दशधाष्टधा वा भक्ते। विदिशि कोणेषु एकांशविस्तारायामम् एकांशेन विस्तारमायामं च कूटं विरचयेत्। दिशि दिशि चतसृषु दिक्षु। द्व्यंशदीर्घां द्व्यंशाभ्यां दीर्घाम्। एकभागेन विततां विस्तृतां शालां च। शालाकुटयन्तराले शालाकूटयोर्मध्ये चरणविरहितांशोन्मितां पादोनांशमितां नासिकां च। तत्पार्श्वद्वन्द्वे नासिकयाः पार्श्वद्वन्द्वे चरणविरहितांशादितः पादोनांशादिनाः। सजालं जालमार्गसहितं पञ्जरं च। तथाच गुरुदेवः–

कर्णमध्येऽन्तरे भित्तेरथवा मानसूत्रतः।
निर्गतैरुक्तमानेन कूटकोष्ठकपञ्जरैः।।
गजपृष्ठादिभिश्चोक्तैः कुर्यादवयवैर्युतम्।

इति।। 39।।

By dividing the outer circumference of the wall by ten, nine or eight pendants shall be constructed with one of the above portions on all the four corners in a rectangular shape with a slight length than the width, in all with two portions in length and one in width halls shall be made on all four

1. मण्डितपदस्थाने 'तोऽधिक' इति विवरणरीत्या श्लोकपाठः।

directions. In their centre mahānāsikā – big dormer windows shall be made with lattices on both the sides with one fourth of the divisions of measurement. (39)

धाम्नोऽष्टांशमितोऽथवा प्रतिमुखैः स्तुप्यन्तिमैः संयुतः
प्रासादाकृतिकश्च कूट उदितो मध्यस्फुरन्नासिकः।
शाला तत्समसूत्रगा मुखपटीशक्तिध्वजाद्युज्ज्वला
स्तूपीत्रय्युपशोभिता परिलसन्नासा च सङ्कीर्तिता।। 40।।

विमर्शिनी

कूटादीनां लक्षणमाह–धाम्न इति। अथवा तत्र धाम्नो गृहस्याष्टांशमितः प्रासादाकृतिकः प्रासादवदाकारेण युक्तः। तत्र प्रतिमुखैः स्तुप्यन्तिमैः प्रतिमारभ्य स्तुपीपर्यन्तैरवयवैः संयुतः। मध्यस्फुरन्नासिकः मध्ये स्फुरन्त्या नास्या युक्तश्च कूट उदितः। तत्समसूत्रगा कूटसूत्रस्था। मुखपटी[1] शक्तिध्वजाद्युज्ज्वला मुखपट्या शक्त्या ध्वजादिभिश्चोज्ज्वला स्तूपीत्रय्युपशोभिता स्तूपिकात्रयेणोज्ज्वला च परिलसन्नासा च परितो लसन्तीभिर्नासीभिश्चोज्ज्वला शाला सङ्कीर्तिता। तथाच गुरुदेवः–

कूटोऽष्टांशेन सद्मनः।
शाला च तावती रम्या विस्तारद्विगुणायता।
कर्णाश्रितं मध्यमैकनासिकं स्तूपकान्वितम्।।
प्रासादावयवं प्राज्ञाः कूटं नाम प्रचक्षते।
सायतं समुखपट्टिकमर्धस्पष्टकोटियुतमध्यमनासम्।
शक्तिमद्ध्वजमपि त्रिशिखं तत् पार्श्वयोर्बहुशिखं खलु कोष्ठम्।।

शिखाशब्देन स्तूपिकोच्यते कोष्ठमिति शाला च।। 40।।

The circumference of the shrine divided by eight to which one division added to make it rectangular one portion may added to form the wall from base upto the final portions and there a Kūṭa-pendant may be made. In the structure of a Śālā (rectangular hall) the same measures can be adopted generally but in the center a small door or window a Mukhapaṭi – a frontal piece of plank, replicas of a spear and flagstaff may be constructed and there shall be three finials (stūpi) at the top. (40)

दण्डैर्द्वित्रिचतुर्मितैर्मितवितानातानकं पञ्जरं
नासाद्युज्ज्वलितं च जालकमथो वेद्यूर्ध्वतः संस्थितम्।
दण्डैर्द्व्यादियुगान्तिमैस्ततमतो दण्डर्द्धितश्चायतं
कर्तव्यं द्विगुणान्तिमं सुषुरितं गोमूत्रकादिक्रमात्।। 41।।

---

1. 'दी' घ. पाठः,

विमर्शिनी

पञ्जरजा[1]लकयोर्लक्षणमाह–दण्डैरिति। द्वित्रिचतुर्मितैदण्डैर्मितवितानातानकं द्वयादिदण्डैर्मितविस्तारदैर्घ्यं नासाद्युज्ज्वलितं नासादिभिरुज्ज्वलितं च पञ्जरं कर्तव्यं स्यात्। अथो जालकं वेद्यूर्ध्वतः वेदेरूर्ध्वभागे संस्थितम्। ततुद्यादियुगान्तिमैः द्वयादिचतुरन्तै र्दण्डैः ततं विस्तृतम्। अतो विस्ताराद् दण्डर्द्धितो द्विगुणान्तिममायतं गोमूत्रकादिक्रमात् सुषिरितं कृतसुषिरं च कर्तव्यम्। पराशर आह–

द्वाभ्यां त्रिभिश्चतुर्भिर्वा कुड्यस्तम्भेऽस्तु पञ्जरम्।
मुखे शालामुखे चैकस्तूपिकं हस्तिपृष्ठवत्।।
पञ्जरं नाम तत्प्रोक्तम्

इति। तथाः काश्यपः–

द्विदण्डं कन्यसव्यासं त्रिदण्डं मध्यमं भवेत्।
चतुर्दण्डविशालं तु उत्तमं परिकीर्तितम्।
विस्तारसदृशोत्सेधादेकदण्डविवर्धनात् ।
विस्तारद्विगुणं यावत् तावत् वै जालकोन्नतम्।।

इति।। 41 ।।

Construct a Pañjara-lattice with two to four daṇḍas in width. It shall have dorner windows, Then windows above the altar again with two to four daṇḍas in width. By increasing a daṇḍa each and upto twice one may fix the length, There shall be seven holes in the Gomūtrika (zigzag) pattern. (41)

स्तम्भान्तरे महित धामनि पादविस्ता–
रोच्चाधिपादततपद्मगकुम्भसंस्थाम्।
पादायतां घटमुखोद्गतपत्रचित्र–
मूलां प्रकल्पयतु कुम्भलतां समन्तात्।। 42 ।।

विमर्शिनी

कुम्भलताख्यमलङ्कारविशेषमाह–स्तम्भान्तर इति। महति धामनि समन्तात् स्तम्भान्तरे पादविस्तारोच्चाधिपादततपद्मगकुम्भसंस्थां स्तम्भविस्तारोच्चं सपादस्तम्भविस्तारततं च पद्मं कृत्वा तद्गतं कुम्भं तत्सदृशं च कृत्वा तस्मादुद्गतां पादायतां स्तम्भपर्यन्तदीर्घां घटमुखोद्गतपत्रचित्रमूलां घटस्य मुखादुद्गतैः पत्रैर्विचित्रमूलां कुम्भलतां प्रकल्पयतु। तथा काश्यपीये–

स्तम्भमूले तु वेद्यूर्ध्वे पद्मासनं प्रकल्पयेत्।
पादव्याससमुत्तुङ्गं सपादं पद्मविस्तरम्।।

---

1. 'शा' ख. पाठः

पद्मोच्चं वसुधाभज्यकम्पमेकांशमुच्यते।
अधः पद्मं गुणांशं तु एकांशं गलमुच्यते।।
ऊर्ध्वपद्मं द्विभागं तु कम्पमेकेन कल्पयेत्।
तदूर्ध्वे कुम्भतुङ्गं तु पद्मस्योच्चसमं भवेत्।।

इति। मञ्जर्यां च–

"प्रत्युत्तरान्तरसमां विदधीत सम्यक् पादाधिकामपि च कुम्भलतामतोऽपि" इति।। 42।।

In the centre of the pillars in a big shrine there shall be the decorations called Kumbhalatā- potshaped moulding with height equal to the circumference of the pillar and one and one fourth measure in width. It should appear as though placed in the middle of a lotus and with protruding leaves which actually starts from the belley of the pot. (42)

भङ्क्त्वा प्रत्युत्तरान्तर्गतचरणमितिं भोगिभिर्भागतोऽधो
वेदिं वेदैश्च पादान् दलरचितवलभ्युत्तरं भागतोऽथ।
[1]यावतस्वोत्सेधनीप्रप्रसरवलभितः स्वार्हनीप्रं कपोतं
गेहेऽल्पे सप्तमेनोज्ज्वलपदगृहपिण्डिं करोत्वष्टमेन।। 43।।

विमर्शिनी

अल्पगेहे विशेषकल्पनमाह–भङ्क्त्वेति। प्रत्युत्तरान्तर्गतचरणमिति प्रतेरुत्तरस्य चान्तर्गतं स्तम्भमानं भोगिभिरष्टधा भङ्क्त्वा अधः एकभागतो वेदिकां वेदैश्चतुर्भागैः पादान् अथैकभागतो दलरचितवलभ्युत्तरम् अर्धेन रचितया वलभ्या सह मृन्मयोत्तरम् अथ सप्तमेन भागेन यावत्स्वोत्सेधनीप्रप्रसरवलभितः यावान् स्वोत्सेधस्तावता नीप्रप्रसरेण युक्तया वलभ्या उपरि स्वार्हनीप्रं स्वयोग्यनीप्रयुक्तं कपोतम् अष्टमेन भागेन उज्ज्वलपदगृहपिण्डिम् उज्ज्वलैः स्तम्भैर्युक्तां गृहपिण्डिं च करोतु।। 43।।

विवरणम्

भोगिनो नागाः। अथ भागतो दलरचितवळभ्युत्तरमिति। षष्ठं भावामर्धयित्वा अधोदले वलभिमुपरिदले चोत्तरमित्यर्थः। स्वोपानत्तुल्यनीप्रमरयुतकपोतमिति। उपानाहो यावान्निर्गमः कृतः तावान् कपोतनीव्रस्यापि निर्गमः कार्यः।। 43।।[2]

In a smaller shrine the length of the pillar between the base and beam above may be divided by eight. By one division Vedikā- the altar or platform and by another four divisions the height of the pillar and again by one division split into two may be designed wall plate with stone and Valabhi – frieze. With the seventh division a Kapota (cornice) – starting from the Valabhi shall be designed with proper height and starting with the eighth part the Grhapindi – a portico in front of the door shall be made. (43)

---

1. स्वोपानत्तुल्यनीव्रप्रसरयुतकपोतमि 'ति विवरणरीत्या पाठः
2. इत उत्तरं 38 तमश्लोकव्याख्या दृश्यते

खण्डोत्तरं चरणविस्तृतितुल्यविस्ता-
रोत्सेधमुत्तममतश्चरणोनतीव्रम् ।
पत्रोत्तरं दलविहीनघनं कनिष्ठं
रूपोत्तरं घनतती विपरीततो वा।। 44।।

विमर्शिनी

उत्तरमाह–खण्डोत्तरमिति। चरणविस्तृतितुल्यविस्तारोत्सेधं स्तम्भविस्तृत्या तुल्याभ्यां विस्तारोत्सेधाभ्यां युक्तं खण्डोत्तरमुत्तमं स्यात्। अतः खण्डोत्तरात् चरणोनतीव्रं पादोनघनं पत्रोत्तरं मध्यमम्। दलविहीनघनम् अर्धेन विहीनघनं रूपोत्तरं कनिष्ठं च। घनतती विपरीततो वेति चूलिकास्थापनमुच्यते। तत्र घनतती तीव्रविस्तारौ विपरीततो व्यत्यासेन स्याताम्। तथाच गुरुदेवः–

उत्तरं विन्यसेदूर्ध्वं तच्चापि त्रिविधं मतम्।
खण्डोत्तरं पत्रबन्धं ततो रूपोत्तरं भवेत्।।
स्तम्भविस्तारविस्तीर्णमुन्नतं चाङ्घ्रिजातिजम्।
खण्डोत्तरं स्यादेतस्मात् पादोनं पत्रबन्धकम्।।
स्तम्भव्याससमोत्सेधमुत्सेधार्धेन विस्तृतम्।
विपरीतं तु वा नीचं रूपोत्तरमिदं भवेत्।।

इति।। 44।।

विवरणम्

एष्वर्पयेच्चोत्तरमिति पूर्वमुक्तं तस्योत्तरस्य कलृप्तिमधुना कथयति – खण्डोत्तरमिति। खण्डोत्तरपत्रोत्तररूपोत्तरभेदेन त्रिविधमुत्तरं भवति। चरणविस्तारेण तुल्या खण्डोत्तरस्य विततिः। तस्येन्नतिरपि तत्समा। अस्माच्चतुर्थभागहीनं पत्रोत्तरघनं खण्डोत्तरदलमात्रघनं रूपोत्तरं तच्च कनिष्ठम्। अर्थात् खण्डोत्तरमुत्तमम्, इतरन्मध्यमं चोक्तम्। घनतती विपरीततो वेति। स्तम्भाग्रमाना स्याद् रूपोत्तरस्योन्नतिः। तदर्धं च तत्र घनमित्यर्थः।। 44।।

Khaṇḍottara – one of the three profiles for wall plates with a thickness equal to its width is regarded as the best. Pattrottara – one of the three profiles where the thickness a three fourth of its width and is regarded as average (madhyama) Rūpottara wall plate with the thickness a half of its width is regarded as inferior Kaniṣṭha or adhama). (44)

उत्सेधे विशिखांशिते द्वितयतो रूपोत्तरे वाजनं
षड्भक्तेऽल्पमिलांशतो द्वितयतो वा स्यान्महावाजनम्।
एतन्निर्गमनं [1]निजांशविहितं न्यस्येदुपर्युत्तर-
स्यैतत्तीव्रसमुच्छ्रयोच्छ्रयदलांशव्याततां पट्टिकाम्।। 45।।

---

1. 'निजांशसुसमम्' इति विवरणरीत्या पाठः

विमर्शिनी

रूपोत्तरे वाजनविन्यासमाह–**उत्सेध** इति। रूपोत्तरस्योत्सेधे घने विशिखांशिते पञ्चांशिते द्वितयतो द्व्यंशेन वाजनं स्यात्। अथवा षड्भक्ते इळांशत एकांशेनाल्पं वाजनम्। द्वितयतो महावाजनं च। एतन्निर्गमनं वाजननिर्गमनं निजांशविहितं निजांशेन कल्पितं स्यात्। पुनरुत्तरस्योपरि एतत्तीव्रसमुच्छ्रयोच्छ्रयदलांशव्याततां उत्तरतीव्रसमुच्छ्रयाम् उच्छ्रयार्धविस्तीर्णां पट्टिकां न्यसेत्। तथाच गुरुदेवः–

उत्तरोच्छ्रयषड्भागत्रिभागं घनमानकम्[1]।
एकांशं वाजनोत्सेधं द्व्यंशं चैवार्धवाजनम्।। 45।।

विवरणम्

षड्भक्त इत्यादिप्रकारभेदः। अल्पवाजनं महावाजनं च। निजांशसुसमं स्वोन्नतितुल्यम्।। 45।।

By dividing the thickness of the Rūpottara by five, a Vājana stepped projection could be made by two parts of the divisions or by dividing the same by six one may shape a Mahāvajana - by taking two parts of the division. The starting point of this shall be suitably shaped with its own division. Over the wall plate a beam or rafter may be placed with half of its thickness. (45)

एकाङ्घ्र्यूनादिदण्डोच्छ्रितमुपरि निधायोत्तरे वाजनं प्राक्
तिर्यग्दण्डोच्छ्रिताङ्घ्र्यूनितविततितुलास्तासु वंशानुवृत्त्या।
स्वार्धाक्रान्ता [2]जयन्तीस्तदुपरि सुसमीकृत्य कृत्वानुमार्गं
निश्छिद्रं छादयेत् स्वोचितघनफलकाप्रस्तरेणोर्ध्वभागम्।। 46।।

विमर्शिनी

फलकाप्रस्तरेणाच्छादनक्रममाह–**एकाङ्घ्र्यूनेति**। एकाङ्घ्र्यूनादिदण्डोच्छ्रितं वाजननामानं प्राक्पूर्वमुत्तरे निधाय पुनर्दण्डोच्छ्रिताङ्घ्र्यूनितविततितुलाः दण्डोच्छ्रितास्तदङ्घ्र्यूनविततीस्तुलास्तिर्यग् निधाय तासु तुलासु वंशानुवृत्त्या उत्तरानुसारेण स्वार्धाक्रान्ताः स्वार्धेनाक्रान्ता जयन्तीर्निधाय तदुपरि अनुमार्गं कृत्वा स्थापयित्वा सुसमीकृत्य स्वोचितघनफलकाप्रस्तरेण स्वयोग्यघनानां फलकानां प्रस्तरेणोर्ध्वभागं निश्छिद्रं छादयेत्। तथाच गुरुदेवः–

उत्तरोपरि कुर्यात्तु वाजनं तस्य कथ्यते।
त्रिचतुष्पञ्चदण्डानामायामस्तस्य सम्मतः।।
स्तम्भविस्तारपादं वा त्रिपादं वोच्छ्रितं भवेत्।
दण्डोच्चं वा त्रिपादं वा वाजनं पूर्ववत् स्मृतम्।।

इति। निबन्धने च–

---

1. 'म्। निबन्धने च ए' क. ख. ग. पाठः
2. 'जयन्तीरधितुलमनुमर्गैस्समीकृत्य चैता' इति च विवरणरीत्या पाठः

दण्डतीव्राश्च पादोनबहलास्तिर्यगुत्तरे।
न्यसेद् भारतुला रम्या जयन्तीश्चानुवंशतः।।
तत्पार्श्वेष्वनुमार्गाः स्मृर्दण्डार्धेनार्धतीव्रकाः।
प्रस्तरस्तेषु दण्डोच्चश्चित्रतोऽधस्तले समः।।

इति। गुरुदेवश्च–

वाजनस्योपरिष्टात्तु कुर्याद्भारतुलावलीः।

इत्यादि।। 46।।

विवरणम्

उत्तरे उपरि। वाजनं प्राङ्निधायेति। उत्तरबहिर्निर्गतं दारु वाजनं प्रागित्युत्तरानुसारित्वमुक्तम्। ऊनत्र्येकाङ्घ्रिदण्डोन्मितमिति तल्लक्षणम्। तृतीयांशेन चतुर्थांशेन हीनं दण्डमानं तदीयमुन्मानं स्यात्। द्वित्रिदण्डमानमातानः। तिर्यक् तुलाः। दक्षिणोदग्गतोत्तरविन्यस्तोभयाग्रपादा इत्यर्थः। बहलशब्दो विस्तारपर्यायः। निधायेति चानुषङ्गः। तास्विति। तुलासु जयन्त्यः खण्डदारुः (?)। वंश उत्तरम् तदनुवृत्त्या तिरश्चीनासु तुलासु प्राचीना इत्यर्थः। अधितुलमनुमार्गैस्समीकृत्य चैता इति। तुलानामुपरि तुलानुसारिणोऽनुमार्गाः ते च जयन्त्यन्तरसाम्यसिद्धये कार्याः।। 46।।

Over the wall plate (uttara stepped projection and or three fourth of a danda, cross beams both lengthwise and breadthwise may be fixed. These should be either of one daṇḍa in height and three fourth of it in width. Thereafter shorter beams may be fixed on the wall plate making them in perfect slope. Thus making the upper part smooth, planks of proper thickness may be fixed with nails without leaving any holes. (46)

द्वारार्धतः कदलिकाकरणेन गर्भ–
कुड्यं क्रमान्मुकुलयेदथवा शिलाद्यैः।
द्वारोर्ध्वतोऽष्टपुटचारुलसत्तरङ्ग–
गर्भार्धतुङ्गमपिधानशिलाभिरामम् ।।47।।

विमर्शिनी

पक्षान्तरेण शिलादिभिराच्छादनक्रममाह–द्वारार्धत इति। द्वारार्धतो द्वारःर्धतो द्वारार्धात् कोणत आरभ्य[1] कदलिकाकरणेन उपर्युपर्यन्तरन्त[2]: प्रवेशनं कदलिकाकरणं, तेन। गर्भकुड्यं गर्भगृहे कुड्यं क्रमाच्छिलाद्यैः शिलादिभिरिष्टकादिभिर्वा मुकुलयेत् मुकुलीकुर्याद्वा। द्वारोर्ध्वतः द्वारोर्ध्वभागे तु अष्टपुटचारुलसत्तरङ्गम् अष्टपुटय्श्रितैश्चारुभिः शोभमानैस्तरङ्गैर्युक्तं गर्भार्धतुङ्गं गर्भार्धेन तुङ्गम् अपिधानशिलाभिरामं उपर्याच्छादनशिलया मनोरमं व। तथाहु[3]:–

1. 'भ्यारभ्य क',
2. 'तः',
3. 'ह' क. पाठः

द्वारार्धात् कदलीकारं द्वारसीमान्तमर्धपुटम्।
गर्भार्धं कदलिकोत्सेधमथ पूर्णेष्टकं भवेत्।। इति।। 47।।

विवरणम्

वैमानिकप्रासादसम्भवं प्राकारान्तरमाह–द्वारार्धंत इति। पूर्वमभिततो न्यासः ततस्तदुपर्यन्तर्मुखं ततस्तदुपरि ततोऽप्यभ्यन्तरमेवंविधा प्रक्रिया कदळिकेति व्यवह्रियते। अष्टपुटचार्वित्यादिकं विशेषणत्वेन योज्यम्। दिग्विदिग्गता मूर्धशिलान्ता अष्टौ पुटः स्गुः। प्रतिपुटं च तरङ्गैरेकपङ्क्तिभाग्भिर्भाव्यम्।। 47।।

From the centre of the door the wall covering the sanctum may be constructed conically by Kadalīkākaraṇa (corbelled vault construction) using stones (bricks etc.) so as to appear like a bud. From above the door level the structure may be of eight turrets and appearing like waves till the last stone or brick above. (47)

कुर्यादुत्तरपट्टिकोपरि लुपाः कूटप्रविष्टाग्रकाः
स्वस्वांशाहितकर्णसूत्रकमिता मध्यादिकर्णावधि।
स्तम्भोच्चे शरशैलनन्दनयनैर्भक्ते चतुर्धोत्तरात्
तासां स्यादवलम्बनं नयनवह्न्यब्ध्युर्वरांशैः क्रमात्।। 48।।

विमर्शिनी

शिखरनिर्माणविधिमाह–कुर्यादिति। उत्तरपट्टिकोपरि उत्तरस्थितायाः पट्टिकाया उपरि कूटप्रविष्याग्रकाः कूटे प्रविष्टेनाग्रभागेन युक्ताः स्वस्वांशाहितकर्णसूत्रकमिताः स्वस्वांशतः कूटसूत्रपर्यन्तस्य भुजासूत्रं यावत् तावन्मानेन सूत्रेण चतुरश्रं कृत्वा तत्कर्णसूत्रमिता लुपा मध्यादिकर्णावधि कुर्यात्। निजाङ्कोर्ध्वाङ्कोत्तरमध्यकर्णवातवाहाः (?) कूटकर्णोन्मिता इति पाठेऽप्येवमेवार्थो ग्राह्यः। स्तम्भोच्चे शरशैलनन्दनयनैः पञ्चधा सप्तधा नवधा द्वेधा वा भक्ते क्रमाद् नयनवह्न्यब्ध्युर्वरांशैः द्वित्रिचतुरेकांशैश्चतुर्धा उत्तरात् तासां लुपानामवलम्बनम् अधोगमनं स्यात्। तथा निबन्धने–

मध्यादारभ्य कर्णान्तमनन्तरलुपाक्रमात्।
स्वैः स्वैः कर्णस्थितैः सूत्रैर्लुपानां मानमादिशेत्।।

इति। तथाव मञ्जर्यां–

"पञ्च द्विभागमथ सप्तभिदि त्रिभागं पादस्य चार्धमिति (तत्) त्रिविधं लुपान्तम्" इति।। 48।।

विवरणम्

न्यसेदुपर्युत्तरस्येति पूर्वमुक्त्वोत्तरपट्टिकालुपावनतिमाह–स्तम्भोच्च इति।। 48।।

Over the fillet attached to the beams rafters may be fitted with their tips joined to the top of the pyramidal roof. There should have sufficient length from the start upto the Karṇasūtra – diagonal axis. The rafter shall extend from the centre of the house over which fillets are to be fixed. The projections of these can be of four types. The height of the pillar divided by one among

five, seven, nine or two parts. Their support at the top shall consist of one of the divisions made by two, three, four and one. (48)

अष्टांशकादिकृशविस्तृतिपावकांश-
तीव्रा च नीप्रफलकोत्तरतो लुपानाम्।
द्वित्राङ्गुलादिविततं चतुरश्ररूपं
कर्तव्यमासु वलयं च निजानुरूपम्।। 49।।

विमर्शिनी

नीप्रफलकादिकमाह–**अष्टांशकादीति**। उत्तरतः उत्तराद् अष्टांशकादिकृशविस्तृतिपावकांशतीव्रा अष्टांशकादिना कृशविस्तारा त्र्यंशेन घना च नीप्रफलका नीप्रस्थानगता फलका स्यात्। आसु लुपासु द्वित्राङ्गुलादिविततं द्व्यङ्गुलत्र्यङ्गुलादिविस्तृतं चतुरश्ररूपं निजानुरूपं द्वित्र्यादिसंख्यावशाद् यथायोग्यं वलयं कर्तव्यं स्यात्। तथाहुः–

"स्यादङ्गुलत्रयमितं वलयं द्व्यङ्गुलं वाप्यर्धमङ्गुलमिति त्रिविधं लुपायाम्।" इति।। 49।।

विवरणम्

नीव्रफलका लुपामुखलग्ना फलका।। 49।।

At the tip of the rafters one may fix the Nīpraphalaka – a fillet attached to the ridge of the rafters with a width of one eighth, one seventh or one sixth or the wall plate and the thickness shall be one third of the same. Valaya the lierne (the spins connecting the rafters, with two or theee angular in width may also be fixed depending on the size of the shrine. (49)

शाकाद्युत्तमदारुक्लृप्तफलकैरेताः समन्ताल्लुपाः
सञ्छाद्योपरि तत्पिधानफलकां कृत्वोल्लसत्कीलकाम्।
वास्त्वाधारसमोन्नतां प्रथितततपाथोजकुम्भादिकां
विन्यस्येन्नवपुण्डरीकमुकुलाग्रामूर्ध्वतः स्तूविकाम्।। 50।।

विमर्शिनी

लुपानामुपरिगतावयवमाह–**शाकादीति**। एता लुपाः शाकाद्युत्तमदारुक्लृप्तफलकैः शाकादिभिरुत्तमवृक्षक्लृप्तफलकैः समन्तात्, शाको जातिवृक्षः, सर्वतः सञ्छाद्य। तदुपरिभागे तत्पिधानफलकाम् अवसानफलकाम्। उल्लसत्कीलकाम् ऊर्ध्वभागोद्गतकीलयुक्तां च कृत्वा। तदूर्ध्वतो वास्त्वाधारसमोन्नताम् अधिष्ठानसमोच्छ्रयाम्। प्रथितततपाथोजकुम्भादिकां प्रकाशितपदमकुम्भादिकाम्। नवपुण्डरीकमुकुलाग्रां नवीनपद्ममुकुलवदग्रभागयुक्तां स्तूपिकां विन्यस्येत्।। 50।।

विवरणम्

उल्लसत्कीलकामिति। स्तूपिकाग्रहणार्थोऽयं कीलकः। प्रथितततपाथोजकुम्भादिकामिति।। 50।।

With the planks of solid woods, like Teak etc., the rafters may be covered

on all sides over which the plank at the topmost portion shall be nailed. Over this two or three finials with pot like belly having tip like a lotus bud are to be fixed. Its height should be equal to the height of the basement. (50)

वर्षातपादिवारणकल्यैः शूल्बादिकल्पितैः फलकैः।
सारेष्टकादिभिर्वा विमानशिखरं ततः सुपिदधातु।। 51।।

विमर्शिनी

ततो विमानशिखरं प्रासादोपरिप्रदेशम्। वर्षातपादिवारणकल्यैः वर्षातपहिमादिनिवारणक्षमैः। शुल्बादिकल्पि[1]तैः ताम्रादिनिर्मितैः। फलकैः सारेष्टकादिभिर्वा सारैरिष्टका विशेषैर्वा। पिदधातु[2] आच्छादयतु।। 51।।

विवरणम्

इदानीमुत्तमतले शिखरप्रक्रियामुपदिशति वर्षेति[3]।। 51।।

The roof of the shrine may be well covered with planks or sheets of copper or hard bricks capable of withstanding rain or the heat from the sunrays. (51)

अल्पे धामनि विस्तृतिद्विगुणितप्रायोच्छ्रयेऽष्टांशिते
मूलांशेन मसूरकोच्छ्रयमथ स्तम्भोच्छ्रयं द्व्यंशतः।
भूयः प्रस्तरमंशते गलमिलांशेन प्रक्लृप्तोच्छ्रयं
भागाभ्यां शिखरोच्छ्रयं विरचयेदेकांशतः स्तूपिकाम्।। 52।।

विमर्शिनी

पक्षान्तरेण क्वचिदल्पप्रासादे नियममाह – अल्प इति। अल्पे धामनि विस्तृतिद्विगुणितप्रायोच्छ्रये विस्तारद्विगुणाद्युक्तोत्सेधे अष्टांशिते सति। मूलांशेन अधोगतांशेन। मसूरकोच्छ्रयम् अधिष्ठानोच्छ्रयम्, विरचयेत्। अथ तदुपरि व्द्यंशतः स्तम्भोच्छ्रयं, भूयोंऽशतः प्रस्तरं वक्ष्यमाणप्रस्तरोच्छ्रयम्, इलांशेन एकांशेन प्रक्लृप्तोच्छ्रयं, भागाभ्यां शिखरोच्छ्रयम्, एकांशतः स्तूविकां च विरचयेत्। तथा च गुरुदेवः–

उच्छ्रयेऽथाष्टधा भक्ते स्यादधिष्ठानमंशतः।
स्तम्भोत्सेधस्तु भागाभ्यां प्रस्तरश्चैकभागतः।।
कण्ठश्चांशेन शिखरं द्वाभ्यां स्तूबी तथांशतः।
एवं धामैकतलकं द्वितलं च समूहयेत्।।

इति।। 52।।

1. 'तैः फ',
2. 'तु छाद' क. पाठः
3. इयं व्याख्या 61 तमश्लोकानन्तरं दृश्यते।

विवरणम्

क्यविदुन्मानविभागे भेदमाह – अल्प इति।। 52।।

In a small temple the height of the masūraka (socle) should be equal the lower part of the one eighth of width that is arrived by dividing the height by eight after doubling the same. Then and with two divisions the Prastara (entablature) be made. Another part forms the Gala (recessed part above Prastara) and the next two for the Śikhara (the roof) and with the last one part for the Stūpikā – the finial. (52)

स्तम्भार्धादिसमुच्छ्रये प्रकृतिभक्ते प्रस्तरे वातिधृ-
त्यंशे चोत्तरवाजने त्रिशशिभिर्भूतालिरंशैस्त्रिभिः।
क्ष्मादीन्दुक्षितिभिः सवाजनकपोतालिङ्गपट्ट्यन्तरी-
स्त्र्येकांशैः प्रतिवाजने प्रतिकपोते क्ष्मांशहान्यावरे।। 53।।

विमर्शिनी

तत्र प्रस्तरस्य विभागमाह–स्तम्भार्धादीति। स्तम्भर्धादिसमुच्छ्रये स्तम्भार्धादिना प्रमाणेन कृतोत्सेधे प्रस्तरे। प्रकृतिभक्ते एकविंशतिधा कृते वा। अतिघृत्यंशे एकोनविंशतिधा[1] च वा कृते। त्रिशशिभिः त्र्यंशैरेकांशेन च। क्रमेण उत्तरवाजने मृन्मयोत्तरं तद्वाजनं च[2]। विरचयेदिति पूर्वश्लोकादायाति। त्रिभिरंशैर्भूताळि। क्ष्मादीन्दुक्षितिभि[3]: एकससैकैकांशैः क्रमात् सवाजनकपोतालिङ्गपट्ट्यन्तरीः वाजनसहितं कपोतमालिङ्गपट्टिमन्तरिं च। त्र्येकांशैः त्र्यंशैरेकांशेन च। प्रतिवाजने प्रतिं वाजनं च विरचयेत्। अवरे अधमे एकोनविंशतिधा कृते पक्षे। प्रतिकपोते प्रतिं कपोतं च। क्ष्मांशहान्या एकैकांशोनेन विरचयेत्। तथाहुः–

अथ वक्ष्ये विशेषेण प्रस्तरस्य तु लक्षणम्।
स्तम्भार्धमुच्चमानं वा आत्तोत्सेधांशमेव वा।।
तदुच्चमेकविंशांशं कृत्वा गुणांशमुत्तरम्।
वाजनं त्वेकभागेन भूतमालोन्नता त्रिभिः।।
भूतमालोपरिष्टात् तु वाजनं त्वेकभागया।
सप्तांशं तु कपोतोच्चमालिङ्गं त्वेकभागया।।
अंशेनान्तरिकां कुर्यात् प्रत्युत्सेधं गुणांशकम्।
वाजनं त्वेकभागेन अथवान्यप्रकारतः।।
तुङ्गमेकोनविंशांशं कृत्वोत्तरं त्रिभागया।
भागेन वाजनं कुर्यादग्न्यांशैर्वलभी भवेत्।।
वाजनं त्वेकभागेन कपोतोच्चं रसांशकम्।

---

1. 'धा वा' ख. पाठः,
2. 'च स्यात्। त्रि',
3. 'भिः स' क. पाठः

आलिङ्गमानमंशेन अन्तरिं तु प्रकल्पयेत्।।
प्रत्युत्सेधं द्विभागेन वाजनं त्वेकभागया।

इति।। 53।।

If the height of the entablature is divided by twenty one, parts may form a wall plate of bricks, one part of its Vājana – fillet, three parts for a smaller beams with Bhūtāli- – figures of beasts, one part for its fillet, seven parts for Kapota (cornice), one part for a flat rafter, another part for Antari – a peg, three parts for the Prati (topmost moulding of adhiṣṭhāna) and another part for fillet. If on the other hand by dividing into nineteen parts, one part each may be deducted from Paṭis and Kapota (cornice). (53)

इत्येकभूमौ चतुरश्ररूपे सुरालयेऽल्पे विधिरभ्यधायि।
अथाभिधास्ये द्वितलादिजातिच्छन्दादिवृत्तादिगतं विशेषम्।। 54।।

विमर्शिनी

इति उक्तप्रकारेण। एकभूमौ एकतले। चतुरश्ररूपे अल्पे सुरालये विधिः विरचनाकर्म। अभ्यधायि उक्तः। अथ द्वितलादिजातिच्छन्दादिवृत्तादिगतं विशेषम् अभिधास्ये वक्ष्ये।। 54।।

Thus I have narrated the rules regarding the smaller temples of square shape with a single storey. Herefter I shall explain the features of two storeyed and those belonging to Jāti (with more than three stories height) and Cchandas (with more than three stories) as well as those with bigger sizes such as (circular, octagonal and Gajapṛṣṭha (combinations of square and semicircle. (54)

त्र्याद्याशाकरपश्चिमं शशितलं बाणादिमार्ताण्डदोः-
पर्यन्तं द्वितलं हयादिनृपहस्तान्तं त्रिभूम्यन्वितम्।
कुर्याद् धाम निजोचितोच्छ्रययुतं प्रोक्तोच्छ्रयेष्वेष्वतो
युक्त्या पाददलत्रिपादकरसंयोगक्षयौ च क्वचित्।। 55।।

विमर्शिनी

तत्रैकतलद्वितलत्रितलानां नियममाह–त्र्यादीति। त्र्याद्याशाकरपश्चिमं त्रिकरादिदशकरान्तं धाम। शशितलं एकतलम्। बाणादिमार्ताण्डदोः- पर्यन्तं पञ्चादिद्वादशकरान्तं द्वितलम्। हयादिनृपहस्तान्तं सप्तादिषोडशकरान्तं त्रिभूस्यन्वितं त्रितलयुक्तम्। निजोचितोच्छ्रययुतं पूर्वप्रोक्तोच्छ्रयसंयुक्तं धाम कुर्यात्। एषु प्रोक्तोच्छ्रयेषु उक्तोत्सेधेषु प्रासादेषु। युक्त्या औचित्येन। पाददलत्रिपादकरसंयोगक्षयौ करं वा त्रिपादं वा अर्धं वा पादं वा क्वचित् पक्षे संयोगं क्वचित् क्षयं वा कुर्यात्। तथाहुः–

भूमिलम्भमिति प्रोक्तं त्रिचतुर्हस्तमानतः।
द्विद्विहस्तविवृध्यैकभूमेर्मानं चतुष्टयम्।।
पञ्चषड्हस्तमारभ्य द्विद्विहस्तविवर्धनात्।
द्वितले तु चतुर्मानं रुद्रभानुकरान्तकम्।।

सप्ताष्टहस्तमारभ्य द्विद्विहस्तविवर्धनात्।
पञ्चदशविकारान्तं त्रितले पञ्चमानकम्।।

इति। ग्रन्थान्तरे च-

प्रत्युन्नतायतकरेषु च हस्तमाना-
द्धीनं त्रिपादकरमर्धमथापि पादम्।
तत्रैव वास्तुनि यथोचितमाचरेद्वै
हानं च वर्धनमनिन्द्यमनेकशास्त्रे।।

इति।। 55।।

विवरणम्

इदानीमुन्मानविभागप्रदिदर्शयिषया तलसङ्ख्यामाह-त्र्यादीति। पञ्चकरादिषु सामर्थ्याद्विकल्प उक्तो द्रष्टव्यः। युक्त्येति। यत्र तादृशमुन्मानमीषदूनमीषदधिकं वा स्यात् तत्र तदुपपत्त्यनुसारेणेत्यर्थः।। 55।।

Single storeyed shrines may have width varying from three hastas to ten hastas. Two storeyed building may have width from five hasta to twelve hastas. Three storeyed shrines may have width from eight to sixteen hastas. These should have appropriate height. The height in these could be increased or decreased by a quarter, a half, three fourth or one has as desired. (55)

आरूढभित्तिमुपचित्य लुपाग्रधानीं
युक्त्या तलान्तरविधौ प्रविधाय तस्याम्।
बाह्योत्तराहितलुपा विनिवेश्य कृत्वा
तत्पट्टिकां च[1] तलितेऽथ गलं विदध्यात्।। 56।।

विमर्शिनी

तलान्तरविधिप्रकारमाह - आरूढेति। तलान्तरविधौ आरूढभित्तिम् अन्तर्भित्तिम्। उपचित्य वर्धयित्वा। तत्र. युक्त्या औचित्येन। लुपाग्रधानीं लुपाग्राणां धारणीं फलकां प्रविधाय। तस्यां बाह्योत्तराहितलुपाः बाह्योत्तरेषु स्थापिता लुपा विनिवेश्य। तत्पट्टिकां तदुपरिपट्टिकां च कृत्वा। तलिते तलीकृते अथ गलं विदध्यात्।। 56।।

विवरणम्

एवमेकतलविषयमुक्तम्। अथानेकतलविषयं वदन् पूर्वतलावसानप्रकारं दर्शयति आरूढेति। तलान्तरविधाविति। कर्तव्ये सतीति शेषः। यदा स्वमुन्मानमधिष्ठानस्तम्भशिरोमात्रेण प्रायः परिसमाप्तं स्यात्, तदा तलान्तरे नापेक्षा यदा तु न परिसमाप्यते भूयः शिष्यते तु तदावशेषपरिसमीप्सया तलान्तरं निर्मित्सितव्यं भवति। युक्त्या प्रविधायेति। यावान्नाडीगृहविस्तारस्तावत्युत्तरसमानभागादारूढ-भित्तिस्थादुपरिभागे इतीयं युक्तिः सुतलिते सम्यक्तले क्लृप्ते[2]।। 56।।

---

1. सुतलित इति विवरणरीत्या पाठः
2. इत उत्तरं 55 तमश्लोकव्याख्या दृश्यते।

In two storeyed building the ārūḍhabhitti – the main wall shall be raised appropriately over which a ridge beam is to be fixed. Rafters may be attached to it and fillets are to be marked. Then a ridge plank is to be put to make it level. The Gala (recessed portion) is to be placed over the wall. (56)

स्तम्भे प्राथमिकेऽनलादिशिवनिष्ठैरंशितेंऽशैः क्रमा-
न्नेत्राग्नित्रिगुणेषु शैलशरनागाङ्कोन्मितैः सम्मिता।
ग्रीवोक्ता नवधा ततोऽपि तलक्लृप्तौ पूर्वपूर्वाङ्घ्रितः
प्रोन्नेया च तदुन्नतिः प्रतितलं स्यात् प्रस्तरप्रक्रिया।। 57।।

विमर्शिनी

ग्रीवालक्षणमाह–**स्तम्भ** इति। प्राथमिके स्तम्भे[1] प्रथमस्तम्भे। अनलादिशिवनिष्ठैः त्र्याद्येकादशान्तैरंशैरांशिते। क्रमाद् नेत्राग्नित्रिगुणेषुशैलशरनागाङ्कोन्मितैः द्वित्रित्रित्रिपञ्च-सप्तपञ्चाष्टनवभिरंशैः सम्मिता इति नवधा ग्रीवोक्ता। ततोऽपि तलक्लृप्तौ पूर्वपूर्वाङ्घ्रितः पूर्वस्मात् पूर्वस्मात् स्तम्भात्। तदुन्नतिः तस्यास्तस्या ग्रीवाया उन्नतिः। प्रोन्नेया ज्ञेया। प्रतितलं तले तले च। प्रस्तरप्रक्रिया प्रस्तररचना च स्यात्। तथाहुः–

त्रिचतुष्पञ्चषट्सप्तभागेऽष्टांशे नवांशके।
दशैकादशभागे च दारुस्तम्भे यथाक्रमम्।।
द्वाभ्यां त्रिभिस्त्रिभिर्भागैस्त्रिभिर्वै पञ्चसप्तभिः।
पञ्चाष्टनवभिश्चैव नवग्रीवा विमानना।।

इति। तथा च मुरारिः–

त्रिकाद्येकादशान्तांशा दारुस्तम्भे द्वयादिभिः।
कल्पयेन्नवधा ग्रीवा विमानानां विधानतः।।

इति।। 57।।

विवरणम्

[2]गळं जनयति स्तम्भायाममिति। ततोऽपि तलक्लृप्ताविति। तृतीयादितलकल्पने कार्ये सति। प्रतितलं स्यात् प्रस्तरप्रक्रियेति प्रागुक्ताभिप्रेयते।। 57।।

The height of the pillar of the first storey (from base to wall plate) divided by nine from three to eleven parts, the height of Gala can be fixed in nine types by two, three, three, three five seven, five, eight and nine divisions. In further floors also the height of Gala may be fixed with the same measurement by dividing the length of the pillar. On all floors proper Prastara entablature may be designed. (57)

---

1. 'म्भे अ' क. पाठः
2. अस्या व्याख्याया आधारभूतं मूलं च दृश्यते।

ग्रीवायामुपरि त्रिदण्डपरिशिष्टांशे चतुर्भाजिते
मूलांशं च तृतीयकं च दशधा तुर्यं च कृत्वांशकम्।
आलिङ्गाह्वयपट्टिकां त्रिभिरुभाभ्यामन्तरिं पञ्चभिः
स्वद्व्यंशाहितवाजनां प्रतिमधः पङ्क्त्यंशके कल्पयेत्।। 58।।

विमर्शिनी

ग्रीवायां प्रस्तरकल्पनामाह[1] द्वाभ्यां श्लोकाभ्याम्। ग्रीवायां ग्रीवाप्रदेशे उपरि। त्रिदण्डपरिशिष्यंशे त्रीन् दण्डान् विहाय शेषांशे। चतुर्भाजिते चतुर्धा कृते। मूलांशं तृतीयकमंशं[2] तुर्यं चतुर्थमंशं च दशधा कृत्वा। अधः पङ्क्त्यंशके अधोगतदशांशे। त्रिभिरंशैरालिङ्गाह्वयपट्टिकाम्, उभाभ्यामन्तरिं पञ्चभिः स्वद्व्यंशहितवाजनां स्वस्य व्द्यंशेन कृतवाजनां प्रतिं च क्रमात् कल्पयेत्।। 58।।

विवरणम्

ग्रीवोन्मानमात्रमुक्तं तत्रापि विभागमाह – ग्रीवायामुपरीति। तुर्यं च दशधा कृत्वेत्युपरि योज्यम्। आलिङ्गाह्वयपट्टिकां त्रिभिरित्यादि प्रथमभागविभागः।। 58।।

At the top portion of the Gala (Grīvā) leaving aside three daṇḍas the height may be divided by four. First, third and fourth divisions may be further divided into ten sections each. In the first of ten divisions three may be set apart for Ālingapaṭṭikā (fillet attached to ridge pole) two for Antarī (peg)(like moulding) and further two for Vājana. The next five parts may be set apart for Paṭi (step) over which two shall consist of another Vājana. (58)

शालाकूटगवाक्षकादिरुचिरां भित्तिं द्वितीये तृती-
येंऽशे पञ्चभिरुत्तरं च वलभिं भूतद्विपाद्युज्ज्वलाम्।
तुर्येंऽशे दशभिर्द्विक्लृप्तमुखपट्ट्याढ्यं कपोतं ततः
सस्वाङ्घ्रिं ग्रहपिण्डिमूर्ध्वनिहितैर्दण्डैस्त्रिभिः कल्पयेत्।। 59।।

विमर्शिनी

द्वितीयेंऽशे शालाकूटगवाक्षकादिरुचिरां शालाभिः कूटैर्गवाक्षादिभिश्च सुन्दरां भित्तिं कल्पयेत्। तृतीयेंऽशे पञ्चभिरुत्तरं, पुनः पञ्चभिः भूतद्विपाद्युज्ज्वलां वलभिं कल्पयेत्। पुनः तुर्येऽशे दशभिरंशैर्द्विक्लृप्त-मुखपट्ट्याढ्यं व्द्यंशेन क्लृप्तया मुखपट्ट्या युक्तं कपोतं कल्पयेत्। ततः ऊर्ध्वनि[3]हितेः ऊर्ध्वभागे प्राक् त्यक्तैः त्रिभिर्दण्डैः। सस्वाङ्घ्रिं स्वपादैर्युक्तां गृहपिण्डिं च कल्पयेत्। तथाच प्रयोगमञ्जरीव्याख्याने प्रद्योते 'त्रिंशद्भाग विभक्तमि'त्यादिना ग्रीवालङ्कारमाह–"भित्तेरुपरि त्रिदण्डं विहायाधश्चतुर्धा विभज्याधोंऽशं दशधा विभजेत्। द्वितीयभागं भित्तिसंज्ञं विधाय तदूर्ध्वद्वयं प्रत्येकं दशधा विभजेत्। अयं त्रिभागप्रकारः। प्रस्तरसंज्ञे तृतीयभागे भित्त्युपरि पञ्चभागेनोत्तरं विदध्यात्। पञ्चानां त्रिभागान्यन्तः स्थितानि अन्तःप्रविष्यनि घनसंज्ञयोक्तानि। तदुपरि[4]संश्लिष्टद्विभागं वाजनं, तदुपरि पञ्चभागा

1. 'ह ग्रीवायामिति द्वा' घ. पाठः,
2. 'शकं तु' ख. पाठः
3. 'वि',
4. 'रि प' ख पाठः

वलभिरुपरिनिम्ना, तदुपरि चतुर्थे कपोतं दशभिर्बहिर्निम्नं, द्वाभ्यां मुखपट्टिर्दशभ्य एव, अधोदशकस्य त्रयेणालिङ्गपट्टिका, द्वाभ्याम् अन्तरिः, पञ्चभिः प्रतिर्भवेत्। प्रतेर्भाग एव द्वाभ्यां वाजनम्" इति।। 59।।

विवरणम्

द्वितीये अकृतविभागे पूर्वमन्तरिते भागे। चकारः पञ्चभिरित्यनुकर्षार्थः।· सस्वाङ्घ्रिमिति दिग्विदिगादिषु पादाः।। 59।।

In the second part of the Gala a decorated a wall enclosing – halls, pendant at the top of rafters, and Gavākṣa (window) shall be made. In the third part divided into ten portions, five may form the wall plate and the next five to form a Valabhī (frieze) with figurines of beasts and elephants. In the fourth part divided by ten, a cornice with two sections and with another three above pillar shall be designed supporting a Gṛhapiṇḍi – a portion in front. (59)

तले द्वितीये विदिशासु कूटान्
दिशासु शालाश्च तदन्तरेषु।
नासीर्द्विशो वा रचयेद् दिशासु
मूर्तीरजाद्याः शिखरे च नासीः।। 60।।

विमर्शिनी

द्वितीये तले विशेषेण भूषणान्याह–तले द्वितीय इति।। द्वितीये तले विदिशासु कूयन्, दिशासु शालाश्च, तदन्तरेषु शालाकूटयोर्मध्येषु द्विशो नासीर्वा रचयेत्। पुनर्दिशास्वजाद्या ब्रह्माद्या मूर्तीश्च, तदूर्ध्वगतशिखरे महानासीश्च रचयेत्। तथाच निबन्धने–

ऊर्ध्वं कूटचतुष्कं च दिक्षु शालाचतुष्टयम्।
नास्यः षोडश कर्तव्याः

इति। तथाच–

द्वितीयभूमौ संस्थाप्या दिक्षु दिङ्मूर्तयोऽथवा।
ब्रह्मा वोमापतिः प्राच्यामाचक्षाणस्तु दक्षिणे।।
प्रतीच्यां नरसिंहस्तु कृष्णः स्कन्दोऽथवोत्तरे।

इत्यादि।। 60।।

विवरणम्

शालाकूटगवाक्षकादिरुचिरां वेदिं द्वितीय इति यत् सामान्येनोक्तं तद् विवृणोतितले द्वितीय इति।। 60।।

In the second storey of the shrine there shall be Kūṭas – pendants – on corners and halls on the four directions. In between these there shall be pairs of nāsikās – dormer windows. On the four sides there shall be the figurines of Brahmā (in the east), Dakṣiṇāmūrti (in the south), Narasimha

(in the west) and Kṛṣṇa (in the north) all of which could be made by wood or stone. At the conical roofs there could be dormer windows. (60)

बाह्योत्तरेण रहिते विगतोर्ध्वकूटे
ग्रीवान्तरे निजगजांशकृशाग्रकुड्ये।
न्यस्योत्तरं न्यसतु तत्र लुपास्तुलास्थ-
पादेषु लग्नशिरसश्चरणार्थलम्बाः।। 61।।

विमर्शिनी

मध्यमशिखराणां क्लृप्तिमाह–बाह्योत्तरेणेति। बाह्योत्तरेण रहिते बाह्योत्तरेणहीने। विगतोर्ध्वकुटे ग्रीवान्तरे निजगजांशकृशाग्रकुड्ये स्वाष्टांशकृशे भित्त्यग्रे। उत्तरं न्यस्य तत्र तुलास्थपादेषु अन्तः स्थितासु तुलासु स्तम्भान् न्यस्य तेषु। लग्नशिरसः लग्नशिरांसि लुपाग्राणि च कृत्वा। चरणार्धलम्बाः उत्तरात् स्तम्भार्धमाननीचा लुपाश्च न्यसतु।। 61।।

विवरणम्

द्वितीयादितलानाम् उत्तरतलैः सह सन्धिं दर्शयति – बाह्योत्तरेणेति। बाह्योत्तरं नाडीगृहोत्तरम्। ऊर्ध्वं कूटं च एतत् प्रथमोत्तमतलयोरेव भवति। तुलास्थपादेष्विति। पूर्वतलतुलासूपरितलपादान् निमिनुयात्, तेषु पादेषु लुपा निवेशयेत्।। 61।।[1]

In such a structure of Gala where the outer beam or pendant (as in the construction of the third storyed the thickness of the wall in the second storey should be lesser than that of the first one. Now a wall plate and a beam is to be put over which rafters shall be fixed so as to unite with the tip of the first one and such rafters shall have height to overlap half of the height of the pillars. (61)

प्रासादास्त्रितलादिभानुतलनिष्ठाः जातयः स्थाणुसू-
र्याद्यैरोजसमैः करैः परिमिताश्चासप्ततेर्वर्धितैः।
षोढा वह्नितलादयो द्व्यधममध्यश्रेष्ठक्लृप्त्या पृथग्
व्यासाद्य्रंशगुणांशकाधिकसमुत्सेधाश्च ते प्रायशः।। 62।।

विमर्शिनी

जात्यादिमहाप्रासादानां क्लृप्तिमाह–प्रासादा इति। त्रितलादिभानुतलनिष्ठाः त्रिभूम्यादिद्वादशभूम्यन्ताः प्रासादाः जातय इति प्रसिद्धाः। ते च स्थाणुसूर्याद्यैः एकादशाद्यैर्द्वादशाद्यैश्च। करैरोजसमैः एकादशाद्योजकैर्द्वादशादीभिर्युग्मकरैश्च। आ सप्ततेः सप्ततिकरपर्यन्तं वर्धितैः करैः परिमिताश्च। वह्नितलादयः त्रितलादयः। पृथग् द्व्यधममध्यश्रेष्ठक्लृप्त्या प्रत्येकमोजयुग्मभेदादधममध्यमोत्तमभेदाच्च षोढा भवन्ति। ते पुनः प्रायशो व्यासाद्य्रंशगुणांशकाधिकसमुत्सेधाः व्यासस्य विस्तारस्य अद्य्रंशे सप्तांशे गुणांशाधिकेन [2]त्र्यंशाधिकेनोत्सेधेन युक्ताश्च। सप्ततिकरे प्रासादे शतकर उत्सेध इत्यादिक्रमेणावगन्तव्या इत्यर्थः। तथा पितामह आह–

1. इत उत्तरं 51 तमश्लोकव्याख्या दृश्यते।
2. 'त्रिं' क. पाठः

हस्तसप्ततिविस्तारं शतहस्तोच्छ्रितं भवेत्।
उत्तमं द्वादशतलं विमानं जातिरुच्यते।।
भवेन्नवतिषष्टिभ्यां स्त्र्युत्तराभ्यां यथाक्रमम्।
उच्चविस्तारयोः श्रेष्ठमेकादशतलं गृहम्।।
उन्नतं चतुरशीत्या सप्तपञ्चाशदायतम्।
श्रेष्ठं दशतलं धाम विज्ञेयं जातिसंज्ञितम्।।
उच्छ्रितं पञ्चसप्तत्या चैकपञ्चाशदायतम्।
नवभौमं विमानं तु विज्ञेयमतिशोभनम्।।
षट्षष्ट्युच्चं तथा पञ्चचत्वारिंशत्समायतम्।
हस्तानां कीर्तितं धाम जातिरष्टतलं शुभम्।।
सप्तपञ्चाशदुत्तुङ्गं नवत्रिंशत्करायतम्।
सप्तभौमं विमानं तु जात्यं सर्वफलप्रदम्।।
त्रयस्त्रिंशत्करव्यासं चत्वारिंशद्भिरुत्तरैः।
नवभिश्चोच्छ्रितं धाम षट्तलं परिकीर्तितम्।।
नवत्रिंशत्करोत्तुङ्गं सप्तविंशत्करायतम्।
पञ्चभौमं गृहं प्रोक्तं जातिभेदसमुद्भवम्।।
त्रिंशता वैकविंशत्या तुङ्गव्यासं चतुस्तलम्।
एकविंशत्करोत्तुङ्गं दशपञ्चकविस्तृतम्।।
त्रिभौमं भवनं प्रोक्तं मुख्यं जातिसमुद्भवम्।
एवं त्रितलमारभ्य यावद्द्वादशभूमिकम्।।
उक्तमानात् प्रतितलं ह्रासयेद् द्विकरं क्रमात्।
मध्यमानि विमानानि भवन्तीह दश क्रमात्।।
मध्येभ्यो द्विकरह्रासात् कनिष्ठानि पृथक् क्रमात्।
संभवन्ति विमानानि तिमिरारितलादिह।।
अथवा युग्महस्तैस्तु षोडशादिक्रमेण तु।
ससत्यन्तविमानानि त्रितलादीनि वै दश।।

इत्यादि।। 62।।

Temples having three to twelve stories are called 'Jāti'. They are designed to have eleven and twelve hastas (with odd and even hands) with an increase upto seventy hastas in measurements of wall plates or beams. They are classified into six types and also into Uttama, Madhyama and Adhama, varieties based on the number of hastas. Thus there are temples having upto twelve stories in height. The height is to be fixed multiplied by three seventh of the total circumference. (62)

विश्वेन्द्राद्येषुषट्षष्ट्यसमसमकरैरब्धिभौमादयः स्यु-
श्छन्दा हस्तैर्नवाशादिभिरिषुरसपञ्चाशदन्तैर्विकल्पाः।
पञ्चक्ष्माद्याश्च सर्वे प्रतितलमृतुभिन्नाः विवस्वत्तलान्ता
रुद्राद्येकोनतानावधिभिरुदधिभूम्याद्यथाभाससंज्ञाः ।।63।।

विमर्शिनी

छन्दप्रासादानां नियममाह–विश्वेति। विश्वेन्द्राद्येषुषट्षष्ट्यसमसमकरैः विश्वेन्द्राद्यैरिषुषट्षष्ट्यन्तैरसमसमकरैः त्रयोदशहस्तादिपञ्चषष्ट्यन्तैरोजकरैः चतुर्दशहस्तादिषट्षष्टिकरान्तैर्युग्मकरैर्युक्ताः अब्धिभौमादयः चतुस्तलादयः छन्दाः स्युः। विकल्पप्रासादानां नियममाह – हस्तैरित्यादिना। नवाशादिभिः नवदशादिभिः। इषुरसपञ्चाशदन्तैः नवादिपञ्चपञ्चाशदन्तैरोजसङ्ख्यैः दशादिपट्पञ्चाशदन्तैर्युग्मसङ्ख्यैः हस्तैर्युक्ताः। पञ्चक्ष्माद्याः पञ्चतलादयो विकल्पाः स्युः। तेषां छन्दानां विकल्पानां च साधारणनियममाह सर्वं इत्यादिना। ते सर्वे प्रतितलम् ऋतुभिन्नाः षोढा भिन्नाः। विवस्वत्तलान्ताः द्वादशतलान्ताश्च स्युः। अथ आभासप्रासादानां नियममाह – रुद्राद्येकोनेत्यादिना। रुद्राद्येकोनतानावधिभिः रुद्राद्यैरेकोनतानान्तैः तत्रैकादशहस्तादिसप्तचत्वारिंशद्धस्तान्तैरसमकरैः द्वादशहस्ताद्यष्टचत्वारिंशदन्तैः समकरैश्च युक्ताः। उदधिभूम्यादि चतुस्तलादिद्वादशतलान्तं यथा भवन्ति तथा आभाससंज्ञाश्च स्युः।। 63।।

Those Prāsādas with thirteen and fourteen hastas upto sixty five and sixty six hastas from four stories to twelve stories by even and odd numbers in the width of beams are called by the term Chanda. From nine and ten hastas upto fifty five and fifty six hastas in the width of beams with even and odd numbers from five to twelve stories are termed as Vikalpas. All these types have six modes each in even and odd numbers. From eleven and twelve hands upto fortyseven and forty eight hastas in beams from four to twelve floors are called of Ābhāsaprāsāda. (63)

आभासेऽत्र चतुस्तलादिशिवभूम्यन्तं पृथग् वेदभे-
दाढ्यं द्वादशमन्तिमं द्व्यधममध्यादिक्रमात् षड्भिदम्।
षष्टिर्जातिगृहे भिदाः करवशाच्छन्दे षडूनास्ततः
षट्कोनाश्च विकल्पधामनि तथाभासे दशोनास्ततः।। 64।।

विमर्शिनी

आभासप्रासादेषु प्रतितलं प्रासादानां भेदमाह–आभासेऽत्रेति। आभासे प्रासादे। चतुस्तलादिशिवभूम्यन्तं चतुस्तलाद्येकादशतलान्तम्। पृथक् प्रतितलम्। वेदभेदाढ्यं चतुश्चतुर्भेदयुक्तम्। अन्तिमं द्वादशतलं द्व्यधममध्यादिक्रमाद् द्व्यधममध्यमोत्तमक्रमेण। षड्भिदं षड्भिर्भेदैर्युक्तम्। पुनर्जात्यादीनां करवशाद् भेदा गण्यन्ते षष्टिरित्यादिना श्लोकशेषेण। जातिगृहे जातिप्रासादे। करवशात् षष्टिर्भिदाः भेदाः। छन्दे छन्दप्रासादे। ततः षडूनाश्चतुष्पञ्चाशत्। विकल्पधामनि विकल्पप्रासादे। ततः षट्कोनाः अष्टचत्वारिंशत्। आभासे ततो दशोनाः अष्टत्रिंशद्भेदाः स्युः। तथाच काश्यपीये–

छन्दमानमथो शृणु।
त्रिचतुर्दशहस्तादिद्विद्विहस्तविवर्धनात् ।।
पञ्चषट्षष्टिहस्तान्तं व्यासं वै सप्तविंशतिः।
वेदभूमिं समारभ्य भानुभूमावसानकम्।।
अधमं मध्यमोत्कृष्टं मानानि स्युस्तलं प्रेति।
सप्ताष्टादशहस्तादि त्रित्रिहस्तविवर्धनात्।।
पञ्चषण्णवतिर्यावदुच्चं प्रागिव सङ्ख्यया।
छन्दमेवं समाख्यातम्

इति। तथा विकल्पप्रासादमधिकृत्य काश्यपः–

विकल्पमधुना शृणु।
नवपङ्क्तिकरात् पञ्चषट्पञ्चाशत्करान्तकम्।।
द्विद्विहस्तविवृद्धया तु चतुर्विंशतिसङ्ख्यया।
पञ्चभूमिं समारभ्य यावदर्कतलान्तकम्।।
अधमं मध्यमोत्कृष्टं त्रयो भेदास्तलं प्रति।
सप्ताष्टादिकपङ्क्त्यादि त्रित्रिहस्तविवर्धनात्।।
षट्सप्ताधिकाशीत्यन्तमुच्चं प्रागिव सङ्ख्यया।

इति। आभासप्रासादमधिकृत्य पितामहः–

एकादशकरा[1]सप्तचत्वारिंशत्करातते[2] ।
द्विहस्तवर्धनात् प्राग्वदूनविंशतिसङ्ख्यया।।
चतुर्भौमादार्कभौममाभासाख्यानि तानि वै।।64।।

Among the Ābhāsa type of Prāsādas from four to eleven stories each category has four varieties each while the twelfth one has six varieties each measured by hastas of even number and odd number belonging to Adhama, Madhyama and Uttama divisions which are of six categories from forty three to forty eight hastas. Jāti Prāsādas from three stories to twelve are of sixty varieties. Cchandaprāsādas are six less than the fifty four varieties from fom the fifty four categories. Vikalpaprāsādas are further less six meaning five to twelve stories with fortyeight types. The Ābhāsaprāsādas are a further ten lesser having a total of thirty eight types. (64)

स्वाभीष्टमाने दशयुक्तसप्तशतांशिते विश्वलसच्छतांशः।
यस्तेन मानेन परिभ्रमय्य वृत्तात्मकं वेश्म समातनोतु।।65।।

---

1. 'रा न्' ङ. पाठः,
2. 'तेः' ङ. पाठः

विमर्शिनी

अथ वृत्तादिप्रासादानां क्लृप्तिमाह–स्वाभीष्टमान इति। स्वाभीष्टमाने स्वाभीष्टस्य प्रासादस्य माने। विस्तारायामराशौ दशयुक्तसप्तशतांशिते दशयुतेन सप्तशतसङ्ख्येनांशिते भेदिते सति। तेषु विश्वलसच्छतांशः त्रयोदशयुतशतांशो यः तेन मानेन परिभ्रमय्य वृत्तीकृत्य वृत्तात्मकं वृत्तस्वरूपं वेश्म प्रासादं समातनोतु।। 65।।

विवरणम्

[1]उपसंहरति–इति समचतुरश्रेति। प्रकृतिसत इति। प्रकृतिस्तदिति विग्रहः। वृत्तादीनां प्रकृति–रूपेणाऽस्माभिरङ्गीकृतस्येत्यर्थः। तत्र तावत् समवृत्तप्रक्रियामाह–आकृतिद्वितयेति। परिधिमानं च चतुश्चत्वारिंशता विभज्य यावानंशो लभ्यते तावद्भिः सप्तभिः परिमितं सूत्रं गृहीत्वा तेन मध्यलग्नमूलेन परितो मण्डलमालिखेत्। तत् समवृत्तसीमा भवति। शेषं चतुरश्राद[2]धिगन्तव्यम्।। 65।।

After multiplying the circumferences of the desired Prāsāda by seven hundred and ten, a section consisting of one hundred and thirteen may be taken and by making a circular movement one may construct shrine. (65)

नाहार्धमानप्रचये हरिद्भिर्भक्तेऽर्णवांशैर्विततिं तनोतु।
आयाममंशैर्ऋतुसम्मितैश्च तुर्यश्रदीर्घस्य सुरालयस्य।। 66।।

विमर्शिनी

चतुरश्रदीर्घस्य प्रासादस्य क्लृप्तिमाह–नाहार्धेति। तुर्यश्रदीर्घस्य दीर्घचतुरश्रस्य। सुरालयस्य प्रासादस्य। नाहार्धमानप्रचये स्वपरिधेरर्धं हरिद्भिर्दशभिर्भक्ते। अर्णवांशैः चतुरंशैर्विततिं तनोतु। ऋतुसम्मितैः षडंशैरायामं च।। 66।।

विवरणम्

[3]दीर्घचतुरश्रलक्षणमाह – नाहार्धेति।। 66।।

For a temple of oblong shape the circumference of the desired structure may be split up into two halves and one half is to be divided by ten. By four of these the width and by six the length may be conceived. (66)

स्वाभीष्टे परिणाहमाननिचये धाम्नश्चतुःषष्टिभा–
गोनेऽष्टादशधा कृतेऽर्णवमितैरंशैः पूथक् कल्पयेत्।
पार्श्वद्वन्द्वसमायती मुखततिं च द्व्यंशसूत्रभ्रमात्
प्रायः साङ्घ्रिरसांशनाहमपि पृ[4]ष्ठं हस्तिपृष्ठात्मनः।। 67।।

---

1. अस्याः व्याख्याया आधारभूतं मूलं न दृश्यते।
2. 'दागमयितव्यम्' घ. पाठः,
3. इयं व्याख्या 67 श्लोकानन्तरं दृश्यते।
4. 'ष' इति मूलकोशपाठः,

विमर्शिनी

हस्तिपृष्ठात्मप्रासादस्य क्लृप्तिमाह–स्वाभीष्ट इति। हस्तिपृष्ठात्मनो धाम्नः हस्तिपृष्ठप्रासादस्य। स्वाभीष्टे परिणाहमानननिचये स्वाभीष्टप्रासादस्य परिधौ। चतुष्षष्ठिभागोने परिवृत्त[1]स्य चतुष्षष्टिभागं त्यक्त्वा। शिष्टे अष्टादशधा तु कृते। अर्णवमितैः चतुर्भिरंशैः पृथक् पार्श्वद्वन्द्वसमायती मुखततिं च पार्श्वद्वयदैर्घ्यं मुखविस्तारं च कल्पयेत्। पुनः पृष्ठे द्व्यंशसूत्रभ्रमात् प्रायः साङ्घ्रिरसांशनाह सपादषडंशपरिधियुक्तं पृष्ठं च कल्पयेत्।। 67।।

विवरणम्

अर्धवृत्तलक्षणामाह – स्वाभीष्ट इति। परिधिमानं चतुष्यष्ट्या विभज्य एकमंशं परिधिमानादपनयेत्। शेषमष्यदशधा विभजेत्। तत्र चतुर्भिरंशैर्दक्षिणं पार्श्वं चतुर्भिरंशैरुत्तरं पार्श्वं च कल्पयेत्। चतुभिरेव मुखविस्तारं च। अथ पार्श्वद्वयान्तेऽपि चतुर्भागसम्मितं सूत्रं तिर्यग्विधाय तन्मध्याद् द्व्यंशमितसूत्रेण पूष्ठगतमुभयपार्श्वान्तस्पृगर्धवृत्तमालिखेत्। तद्वृत्तं षडंशपरिमितं सम्पद्यते, हस्तिपृष्ठमित्यस्य नामधेयम्।। 67।।

For a temple of Gajapṛṣṭha shape (Combination of square and semi circle) literally the back of the elephant the circumference of the desired temple may be divided by sixty four of which one portion may be dropped. What is left may be divided by eighteen of which four parts each for the two sides and front portion is to be divided by making a circular motion of two parts a semi circle is to be designed. Six and one quarter part is to form the back portion. (67)

भागद्वये द्विरदपृष्ठसमुक्तनीत्या वृत्तीकृते तदुभयान्तरभागदैर्घ्यम्।
स्वेध्मांशतो विरहितेन गुणांशकेन वृत्तायते वितनुयात् सुरवर्यधिष्ण्ये।। 68।।

विमर्शिनी

वृतायतप्रासादक्लृप्तिमाह–भागद्वय इति। वृत्तायते सुरवर्यधिष्ण्ये प्रासादे। भागद्वये द्विरदपृष्ठसमुक्तनीत्या हस्तिपृष्ठोक्तप्रकारेण वृत्तीकृते। तदुभयान्तरभागदैर्घ्यं वृत्तद्वयस्य मध्यगतं दैर्घ्यम्। स्वेध्मांशतो विरहितेन स्वस्य नाहस्यैकविंशत्यंशतो रहितेन। गुणांशकेन त्रिभागेन वितनुयात्।। 68।।

विवरणम्

दीर्घवृत्तस्याह–भागद्वय इति। पूर्वं त्रिभिरंशैः स्वकीयैकविंशतिभागवर्जितैः पृथगुभे पार्श्वे कुर्यात्। अथ प्राग्वद् द्व्यंशसम्मितसूत्रेण मुखे पृष्ठे चार्धवृत्ते द्विपार्श्वान्तस्पृशी विरचयेदित्यर्थः। कुक्कुटाण्डमित्येतदुच्यते।। 68।।

In an elongated circle type of shrine, as mentioned in connection with the Gajapṛṣṭha variety, where a two fold division is mentioned (with the divisions out of eighteen) the length of the sides have to be designed. Here

---

1. 'त' घ. ङ. पाठः

the length of a side multiplied by three has to be divided by twenty one from which one part may be dropped for fixing the size of the sides. (This Dīrgha- Vṛttaprāsāda is also called in architectural pattern as Kukkuṭāṇḍa resembling the egg of a cock.) (68)

षोढा विभज्य निजवाञ्छितमानराशि-
मंशायतानि परिकल्प्य षडश्रकाणि।
कुर्याद् गृहं रसपुटं द्विगुणांशमानो
व्यासोंऽशितेऽत्र तिथिभिर्नयनांशहीनः।।69।।

विमर्शिनी

षट्कोणप्रासादमाह-**षोढा** विभज्येति। निजवाञ्छितमानराशिं निजेष्टप्रासादपरिणाहं षोढा विभज्य। अंशायतानि एकैकांशदीर्घाणि। षडश्राणि परिकल्प्य रसपुटं षट्पुटात्मकं गृहं कुर्यात्। अत्र षट्कोणप्रासादे। तिथिभिः पञ्चदशभिः। अंशिते नाहे नयनांशहीनो द्व्यंशहीनः। द्विगुणांशमानो व्यासः दण्ड इत्यर्थः।।69।।

विवरणम्

अथ षट्कोटिप्रासादस्य लक्षणं दर्शयति-षोढेति। षष्ठमंशं द्विगुणयित्वा स्वकीयपञ्चमांशं स्वस्माज्जह्यात्। स तदीयो विस्तारो भवति। विस्तारकथनमुन्मानस्तम्भादिजननार्थम्।।69।।

After dividing the circumferences of the shrine which is fixed upon by one's desire, into six angles each of them may be elongated to form a hexagonal temple. By taking two parts out of the six and multiplying it by fifteen two may be dropped to arrive at the circumference of such a strine called hexagonal. (69)

स्वाभीष्टनाहे दशधा विभक्ते व्यासस्त्रिभागैर्द्विषडंशितेऽस्मिन्।
व्यासे शरांशैर्विहितायतांस्तदश्रीश्च कुर्याद् वसुकोणधाम्नः।।70।।

विमर्शिनी

अष्ट्यश्रप्रासादक्लृप्तिमाह-स्वाभीष्टेति। वसुकोणधाम्नः अष्ट्यश्रप्रासादस्य। स्वाभीष्टनाहे स्वस्य परिधौ। दशधा विभक्ते त्रिभागैर्व्यासो दण्डः। अस्मिन् व्यासे। द्विषडंशिते द्वादशधा कृते। शरांशेः पञ्चांशैः। विहितायतान् कृतदीर्घास्तदश्रीश्च कुर्यात्।।70।।

विवरणम्

अष्ट्यश्रलक्षणमाह-**स्वाभीष्टनाह** इति। परिधिमानं दशधां भङ्क्त्वा त्रिभिर्भागैर्विस्तारं कल्पयेत्। अथ विस्तारं षडंशं कृत्वा पञ्चांशसम्मितानेकैकानश्रीन् विदध्यादित्यर्थः।।70।।

For the construction of an Octagonal temple the desired circumference may be divided by ten, of which three is to form the width. This width is to be divided into twelve of which five parts shall be taken as length and corner. Thus the resultant structure will be octagonal. (70)

मूलाद्याशिखरं युगाश्ररचितं गेहं स्मृतं नागरं
ग्रीवाद्याशिखरक्रियं षडुरगाश्रोद्भेदितं द्राविडम्।
मूलाद्वा गलतोऽथवा परिलसद्वृत्ताल्पकं वेसरं
तेष्वेकं पृथगात्तलक्ष्मसु विदध्यादात्मनः सम्मतम्।। 71।।

विमर्शिनी

चतुरश्रादिप्रासादानां नामानि कथयति–मूलादीति। मूलाद्याशिखरम् अधिष्ठानादि शिखरावसानम्। युगाश्ररचितं चतुरश्ररूपेण कृतं गेहं नागरं स्मृतम्। ग्रीवाद्याशिखरक्रियं ग्रीवादिशिखरपर्यन्तम्। षडुरगाश्रोद्भेदितं षडश्रभेदितमष्टाश्रभेदितं च द्राविडं स्मृतम्। अथ मूलाद्वा गलतो वा परिलसद्वृत्तात्मकं वेसरं स्मृतम्। तेषु पृथगात्तलक्ष्मसु पृथक् पृथगुक्तलक्षणेषु मध्ये। आत्मनः स्वस्य सम्मतं विदध्यात्।। 71।।

विवरणम्

इदानीं वृत्तादिषु उपरितलसंस्थानं दर्शयति – मूलादीति। देशगुणकामादीक्षयेति। हिमवद्विन्ध्यान्तराले नागरं विन्ध्यागस्त्यान्तराले वेसरः। तत आ कुमारीभ्यो द्राविडमिति देशतो विशेषः।। 71।।

The Prāsāda with a square shape from the base to the top is called Nāgara. From basement upto the Gala with square shape and from that portion upto the top with hexagonal or octagonal shape is called Drāviḍa. From basement upto the Gala is circular in shape is called Vesara. One may construct these according to one's liking. (71)

नेत्रेषुसप्तदशभानुभिरादिधाम्न-
स्तारं विभज्य विधुलोकयुगाङ्गभूतैः।
विस्तारमत्र रचयेन्मुखमण्डपस्य
पादोनमर्धमथवा सममस्य दैर्घ्यम्।। 72।।

विमर्शिनी

मुखमण्डपलक्षणमाह–नेत्रेति। आदिधाम्नो मूलप्रासादस्य तारं विस्तारं नेत्रेषुसप्तदशभानुभिः द्विधा पञ्चधा सप्तधा दशधा द्वादशधा वा विभज्य। अत्र क्रमेण विधुलोकयुगाङ्गभूतैः एकत्रिचतुःषट्पञ्चांशैः। मुखमण्डपस्य विस्तारं रचयेत्। अस्य मुखमण्डपस्य विस्तारस्य। तत्पादोनं तदर्धं तत्समं वा दैर्घ्यं च रचयेत्।। 72।।

विवरणम्

यदा प्रासादावकाशो न पर्याप्तः तदा मुखमण्डपं कार्यम्। अतस्तत्प्रमाणमाह नेत्रेति। पादोनमिति। स्वविस्तारादिति द्रष्टव्यम्।। 72।।

The width of the Mukhamaṇḍapa (Pavilion in front of the sanctum) can be fixed by dividing the circumference of central shrine by one among two, five, seven, ten or twelve. Thus half, three, four, six, five parts may form its width. The length of the pavilion can be decided by one quarter, half or equal of the width as the case may be. (72)

दण्डेऽर्धेऽन्तर्गतं मण्डलमवनिमितेऽर्धान्विते वान्तहारा
दोःसङ्ख्ये मध्यहारा जलधिपरिमिते बाह्यहाराद्रिसङ्ख्ये।
मर्यादा मूलधाम्नः प्रथमचरमवर्जं मुखायामयुक्ताः
प्राकाराः पञ्च कार्याः स्युरिह चरमसीमैकविंशेऽपि वा स्यात्।। 73।।

विमर्शिनी

पञ्चप्राकाराणां विभागमाह–दण्डेऽर्ध इति। मूलधाम्नो मूलप्रासादाद् अर्धे दण्डे गते सति। अन्तर्गतं मण्डलमष्टमूर्तीनां स्थानं स्यात्। अवनिमिते एकदण्डे। अर्धान्विते सार्धैकदण्डे वा अन्तहारा स्यात्। दोस्सङ्ख्ये द्विदण्डे मध्यहारा। जलधिपरिमिते चतुर्दण्डे बाह्यहारा। अद्रिसङ्ख्ये सप्तदण्डे मर्यादा च। इह चरमसीमा महामर्यादा। सापि एकविंशे दण्डे वा स्यात्। एते पञ्च प्राकाराः प्रथमचरमवर्जं प्रथममन्तर्गतमण्डलं चरमं महामर्यादां च वर्जयित्वा मुखायामयुक्ताः कार्याः स्युः। तथाच विष्णुसंहितायाम्–

अन्तर्मण्डलदण्डार्धे दण्डे स्यादन्तहारका।
मध्यहारा द्विदण्डा च चतुर्मर्यादभित्तिका।।
सप्तदण्डायता कार्या मर्यादा महती तथा।

इति। पाशुपते च–

सप्तसीमासमायुक्तं स्थानं सर्वदिवौकसाम्।
अन्तर्मण्डलमाद्यं स्याद् दण्डार्धे जगतीस्थलात्।।
तस्मादप्येकदण्डान्ते चान्तहारा गृहाद् बहिः।
मूलस्थानाद् द्विदण्डान्ते दीपशाला सुशोभना।।
नीचहारां ततः कुर्याद् दण्डार्धे भित्तिरुज्ज्वला।
मध्यहारा चतुर्दण्डे मर्यादा सप्तसम्मिते।।
एकविंशतिदण्डान्ते महन्मर्यादभित्तिका।

इति।। 73।।

विवरणम्

अन्तर्मण्डलं लोकपालस्थानम्। दण्डशब्दः सर्वत्र विशेष्यत्वेन अनुयाति। अन्तहारा। दोस्सङ्ख्ये द्विदण्डे मध्यहारा। बाह्यहारा। मूलधाम्न इति सर्वत्र दण्डारम्भावधिरुक्तः।। 73।।

There shall be Pañcaprākāra – five boundaries – around the shrine. These boundary walls are called (1) Antarmaṇḍala – the innermost boundary line, (2) Antahāra – the second boundary (3) Madhyahāra - the third boundary (4) Bāhyahāra – the fourth boundary and (5) Maryādā the fifth boundary which is the limit. The accepted measures are half, one and half, two, four and seven daṇḍa from the outerside of the prāsāda. Of these the first and fifth shall be square like the Prāsāda, but the other three have a mukhāyāma

or elongations towards the front side by about one eighth of the width. The last boundary could be of twenty one daṇḍas apart from the central shrine. (73)

प्रासादस्योत्तरसमवधेर्जागतान्तस्य वा स्याद्
व्यासौ दण्डस्त्रिविध उदितः पादुकान्तस्य वात्र।
नेयश्चापं निजनिजपदात् सैकदण्डः सपादः
सार्धः साङ्घ्रित्रय इति मुखायाममानं समुक्तम्।। 74।।

विमर्शिनी

दण्डलक्षणमाह–प्रासादस्येति। प्रासादस्योत्तरसमवधेः उत्तरावधेर्व्यासो दण्डः स्यात्। जागतान्तस्य वा जगतीपर्यन्तस्य व्यासो वा। पादुकान्तस्य पादुकपर्यन्तस्य व्यासो वा इति अत्र त्रिविधो दण्डः उदितः स्यात्। त्रिविधोऽप्ययं दण्डः निजनिजपदात् स्वस्वस्थानाद् नेयो गमयितव्यश्च। मुखायामनिममाह – सैकदण्ड इति। सैकदण्डः एकदण्डयुक्तः। सपादः पाददण्डयुक्तः। सार्धः अर्धदण्डयुक्तः। साङ्घ्रित्रयः त्रिपाददण्डयुक्त इति मुखायाममानं समुक्तम्। तथाहि विष्णुसंहितायां–

मुखायामस्त्रिपादेन पादेनार्धेन वा स्मृतः।

इति। पाशुपते च–

अर्धेन पादहीनेन समस्तेनोत्तरेण तु।

इति।। 74।।

विवरणम्

इदानीं दण्डप्रमाणं मुखायामप्रमाणं चाह – प्रासादस्येति। वास्तोर्विस्तारः। उत्तरसमवधेः प्रासादस्येति सामानाधिकरण्यमवगन्तव्यम्। नेयश्चायं निजनिजपदादिति। यदि तावदुत्तरजनितो दण्डः स मुखगतोत्तरसमानतलदेशादारब्धव्यः। एवमन्ययोरपि योज्यम्।। 74।।

The mukhāyāma the elongation mentioned are spoken of as three kinds beginning from Prāsādottara upto Jagati basement above Pāduka. Pādūkāvasāna lowest part of basement. The measures shall be one, one and one fourth one and a half and three fourth of a daṇḍa from the circumference of Uttara, the wall plate. (74)

भक्तायामग्रभूमाविषुभिरिह बहिर्द्व्यंशकं त्र्यंशमन्तः
कृत्वान्तर्मण्डले दिक्परिवृढबलिपीठेषु तद्दण्डसीमा।
प्राच्यावाच्याः स्वसूत्रेष्वितरदिगधिपाश्चालिताः किञ्चनातः
प्रादक्षिण्यान्मिथस्ते द्वितय इह महादिङ्मुखाः सम्मुखाश्च।। 75।।

विमर्शिनी

प्राकारान् प्रति दण्डविधिमाह–भक्तायामिति। अन्तर्मण्डले दिक्परिवृढबलिवीठेषु दिङ्नायक–

बलिपीठेषु। अग्रभूमौ अग्रस्थल्याम्। इषुभिः पञ्चभिर्भक्तायां बहिर्द्व्यंशकम् अन्तस्त्र्यंशकं कृत्वा तस्मिन् सूत्रे तद्दण्डसीमा तत्रस्थस्य दण्डस्यावसानं स्यात्। प्राच्यावाच्याः प्राग्भवा दक्षिणभवाश्च दिगधिपाः स्वसूत्रेषु। इतरदिगधिपाः पश्चिमभवाः उत्तरभवाश्च। अत[1]ः स्वसूत्रात् प्रादक्षिण्यात् किञ्चन चालिताः गमिताः स्युः। ते द्वितयेऽपि महादिङ्मुखाः, न कोणाभिमुखाः, सम्मुखाः अन्योन्याभिमुखाश्च। तथा विष्णुसंहितायां–

पूर्वास्त्वप्रतिचाल्याः स्युरितरास्त्वस्थिराः शुभाः।
अन्योन्यं दक्षिणाक्षिभ्यामीक्षणं शस्यते बुधैः।।

इति। तथा[2] मञ्जर्यां च–

अन्तर्मण्डलसीमान्ते लोकेशानां हि पीठिका।
विरिञ्चस्येशपूर्वेण नैर्ऋत्यां पश्चिमोत्तरे।।
अनन्तस्योत्तरे सोमात् कुबेरस्य

इत्यादि।। 75।।

विवरणम्

मुखायामश्चतुर्विध उक्तः। अथान्तर्मण्डलगतं कृत्यविशेषमाहभक्तायामिति। अन्तर्मण्डले तद्दण्डसीमा दिक्परिवृढबलिपीठेष्वित्यन्वयः। चतुरश्रं शिलापिण्डं पट्टपद्मरूपेण बलिशिलां विधाय तदुपरिप्रदेशं समं पञ्चधा विभजेत्। तत्र अर्वाचीनभागद्वन्द्वावसानमन्तर्मण्डलसीमायां कार्यमित्यर्थः। प्राच्यावाच्याः स्वसूत्रेष्विति। दिक्परिवृढा इत्याक्रष्टव्यम्। पूर्वे दक्षिणे च सम्भूय पञ्च लोकपालाः स्वसीमसूत्र एव तिष्ठेयुः। उत्तरदिक्पालाश्चत्वारस्तु तस्मिन् सूत्र एव किञ्चित् प्रादक्षिण्येन प्रतिमाङ्गुलादिमानेन गमयितव्याः। ते द्वितय इह मिथस्सम्मुखा महादिङ्मुखाश्चेत्यन्वयः। पूर्वे त्रयः पश्चिमास्त्रयश्च परस्परमभिमुखाः। अत एव महादिगभिमुखाश्च। महादिगभिमुखा इति वचनं अग्निवाय्वोरीशनिरृत्योश्च परस्परसम्मुखत्वमागृह्येतेत्येतदर्थम्। दक्षिणोत्तरौ परस्परसम्मुखौ स्यातामिति चार्थः।। 75।।

In the antarmaṇḍala – innermost boundary region where the altar stones in which offerings are to be made its limit is to be fixed properly. The top portions of the altar stone is to be divided by five of which two shall be the inner portions and three to project towards outside. Here the Dikpālas-lords of the quarters, are to be installed in such a way so as to face each of them – the one in the south shall be one in the north. The stones are to be fixed in a Pradakṣiṇa way moving towards the right way. (75)

अन्तर्मण्डलतो व्यतीत्य करमात्रं प्रार्चनामण्डपं
तुर्यश्रं समसूरकं निजमुखायामस्य वा मध्यतः।
वेदस्तम्भभृतैकभारमथवा कुर्याच्चतुर्द्वादश
स्तम्भद्व्युत्तरसंयुतं स्वमकुटाद्यालङ्क्रियालङ्कृतम्।। 76।।

---

1. 'तः सू' ख. पाठः,
2. 'था च म' ख. घ. पाठः

विमर्शिनी

पूजामण्डपं विधत्ते–अन्तर्मण्डलत इति। अन्तर्मण्डलतः करमात्रं व्यतीत्य वा निजमुखायामस्य निजमुखदैर्घ्यस्य मध्यतो वा प्रार्चनामण्डपं कुर्यात्। तुर्यश्रं चतुरश्रं च। समसूरकं साधिष्ठानं च। वेदस्तम्भभृतैकभारं चतुर्भिः स्तम्भैर्घृतैकोत्तरं च। अथवा चतुर्द्वादशस्तम्भद्व्यत्तरसंयुतम् अन्तश्चतुर्भिर्बहिर्द्वादशभिः स्तम्भैः तथा द्वयुत्तरेण च संयुतं च। तथाहुः–

सममं त्रिपादमर्धं वा प्रासादस्य तु मण्डपम्।
पुरस्तादुक्तमानानां तन्निद्वयेकतलं तु वा।।
प्रासादतुल्यालङ्कारं तत्समाङ्गं च मण्डयेत्।

इति।। 76।।

विवरणम्

नमस्कारमण्डपं लक्षयति–अन्तर्मण्डलत इति। अन्तर्मण्डलदण्डसीमाभिहिता।। 76।।

With a distance of one daṇḍa from the Antarmaṇḍala a pavilion or a square porch in front of the shrine porch in called Pūjāmaṇḍapa in front of the shrine shall be made with a square shape. It may have four pillars and one beam or sixteen pillars with two beams connecting them. It shall have decorations from the base upto the finial. (76)

दण्डं स्वं समतीत्य भित्तिरुदिता बाह्यान्तहाराश्रिता
दण्डान्तो द्विविधस्तदुत्तरविभिन्नोऽग्रे सभाभेदतः।
ज्वालासीमनि दीपधामनि तथान्तस्थोत्तरेऽन्तर्गते
प्राकारेऽथ बहिष्ठितोत्तरबहिः साले महीयस्यपि।। 77।।

विमर्शिनी

अन्तहारादिषु दण्डावसानस्य नियममाह–दण्डं स्वमिति। अन्तहाराश्रिता बाह्या भित्तिः स्वं दण्डं समतीत्योदिता। अग्रे सभाभेदतः सभाया भेदेन हेतुना। तदुत्तरविभिन्नः सभाया उत्तरभेदवशात्। दण्डान्तो दण्डसीमा द्विविध उदितः। दीपधामनि दीपशालायाम्। ज्वालासीमनि दीपज्वालाग्रे दण्डान्तः। तथान्तर्गते प्राकारे अन्तस्थोत्तरे प्राकारस्यान्तस्थितोत्तरे दण्डान्तः। अथ महीयसि साले महामर्यादायाम्। बहिष्ठितोत्तरविधिः बहिष्ठितस्योत्तरस्य बहिर्भागे दण्डान्तः।। 77।।

विवरणम्

उत्तरेषां प्राकाराणां दण्डसीमा(मा)न(प्रा?प्र)कारविशेषान् दर्शयन्नाह–दण्डं स्वमिति। बाह्यान्तहाराश्रिता अन्तहारायां श्रिता भित्तिः तथा बाह्यहारायां श्रिता भित्तिश्च। अग्रे दण्डान्तः सभाभेदतो बहुधा विभिन्न इत्यन्वयः। तदुत्तरविभिन्न इति विभोः प्रदेश उक्तः। दीपधामनीति। मध्यमहारायामित्यर्थः। अन्तर्गते प्राकारे अन्तस्थोत्तरे महीयसि साले महामर्यादलक्षणे प्राकारे।। 77।।

The outer wall of Antahāra is outside of the measure rod fixed for the

same. In front of the sanctum the distance could be two fold (depending on the Ārūḍhottara beam of the raised up wall plate, as well as Vārottara the outer of the raised wall plate. This depends upon the type of structure. In the Dīpadhāma (the specially made wooden framed structure) beyond the wall of the Madhyahāra the limit of the measure is to be conceived at the end of the flames of fire). In the Antahāra the end of the measure is to be fixed within the wall plate the inner-wall in favour of Mahāmaryādā the outer most circle of the Temple campus the measure shall be fixed at the outside of the wall plate. (77)

पृष्ठे [1]सपार्श्वद्वितये स्वमूलयोन्यन्वितं मण्डपमाकलय्य।
तुर्यश्रमातत्य [2]ततोऽन्तराले तन्वीत संयोज्य मिथोऽन्तहाराम्।। 78।।

विमर्शिनी

अन्तहाराक्लृप्तिमाह–पृष्ठ इति। सपार्श्वद्वितये पृष्ठे स्वमूलयोन्यन्वितं स्वस्वदिग्भवयोन्युपक्लृप्तं तुर्यश्रं मण्डपमाकलय्य कल्पयित्वा। आतत्य दीर्घीकृत्य अन्तराले मिथोऽन्योन्यं संयोज्यान्तहारां तन्वीत।। 78।।

विवरणम्

तत्रान्तहारायां परिमण्डपं सूचितं लक्षयति–पृष्ठे चेति। स्वमूलयोन्यन्वितं स्वयोन्यन्वितं मूलयोन्यन्वितं वेत्यर्थः। स्वयोनिर्दिग्योनिः। तुर्यश्रं मण्डपमाकलय्य तदन्तराल आतत्य मिथस्संयोज्येत्यन्वयः। मण्डपत्रयमुभयतो वर्धयन् कोणत्रये परस्परमेलनं कुर्यात्। एवं दिक्त्रये मण्डपसिद्धिः।। 78।।

The Antahāra the second boundary of the temple from prāsāda shall have in it a square Maṇḍapa, which my be according to the yoni – point of origin. This Antahāra –Cuttampalam in the vernacular – may be planned by a covered corridor enclosing the shrine room located one daṇḍa away from the shrine room (This is also called Nālampalam in the vernacular, which forms the second prākāra in the pañcaprākāra module system of demarkating specific boundaries and the shrine room. (78)

कृत्वा वंशं मुखायत्युपचितनिजदण्डस्थितं पार्श्वहारा-
भारासक्ताग्रमूलं प्रथितगुणविभागादिक्लृप्त्या विभज्य।
कृत्वा तद्भागतस्तद्वितितिमुचितयोन्याढ्यमन्योत्तराणि
न्यस्यारूढोत्तरादीन्यपि रचयतु तद्युक्तितोऽग्रे सभायाम्।। 79।।

विमर्शिनी

सभालक्षणमाह–कृत्वा वंशमिति। अग्रे अग्रभागे सभायाम्। मुखायत्युपचितनिजदण्डस्थितं

---

1. 'च' इति.
2. 'तदन्ताराले' इति च विवरणरीत्या पाठः।

मुखायामयुक्ताया अन्तहारायाः कल्पिते दण्डे स्थितम्। पार्श्वहाराभारासक्ताग्रमूलं पार्श्वहाराया भारे उत्तरे आसक्तयोर्मूलाग्रभागयोर्युक्तम्। वंशं उत्तरं कृत्वा संस्थाप्य। उचितयोन्याढ्यं स्वदिग्भवयोनियुक्तं च कल्पयित्वा। प्रथितगुणविभागादिक्लृप्तया प्रसिद्धेन गुणविभागादिना विभज्य। तद्भागतस्तदंशेन। तद्विततिं तद्विस्तारं च कृत्वा। तथा तत्सादृश्यान्यन्योत्तराणि त्रीणि च न्यस्य पुनस्तद्युक्तितः आरूढोत्तरादीन्यपि रचयतु।। 79।।

विवरणम्

मुखदिशि तु सभालक्षणमेव मण्डपम्, तत्प्रकारमेवाह–कृत्वेति। सभा हि गोपुरविशेषः। तथाचानन्तप्राकारात्मकत्वाद् बहिः कुट्टिमेन भवितव्यम्। ततो मुखायामसमन्वितेऽन्तहारादण्डेऽग्रदेशे स्थितं सभाया अर्वाचीनमळिन्दोत्तरं यथा तदन्तस्सीमायां दण्डसीमा स्यात् तथा कल्पयेत्। अथ तस्योत्तरस्य दक्षिणोत्तरसीमानौ पार्श्वपरिमण्डपबाह्योत्तरसीम्नोः कल्पयेत्। अथ तमायामं गुणैः पञ्चभिर्वा विभज्य एकेन भागेन सभाया वितानं विदध्यात्। उचितयोन्याढ्यमिति क्रियाविशेषणम्। पश्चिमवंशसमान एव प्राग्वंशोऽपि भवति। तथाच यावत् परिधिमानमुपसम्पद्यते (तावद्) ध्वजवृषयोनिजनितपरिधिमानं समं सङ्कल्प्य शेषं विदध्यात्। प्रथितगुणविभागैरिति गुणकुट्टिमसभाया विभाग उक्तः। पादपङ्क्तिसभालक्षणमेतत्।।

[1]अथ पादसूत्रसभालक्षणं दर्शयति–तादृग्दण्ड इति। अनाधेगतालिन्दकमिति। पूर्ववदलिन्दोत्तरमिदानीं न ग्राह्यं, किन्तु प्रमाणे परिनिष्ठिते पश्चादेवोपजनयितव्यम्। आरूढोत्तरमेवाधुनाभिप्रेयत इत्यर्थः। गर्भसूत्रं कृत्वेति। मध्ये प्रसारितमृजु कृत्स्नावगाहि गर्भसूत्रम् तत्र च दण्डसीमावसीयते। [2]मूलाग्र

In the construction of Sabhā (the rectangular hall with hipped roof) called Vātilmāṭam in the vernacular) upto the end of the mukhāyati – the front elongation the beams of the two halls shall be lengthened according to the need of the point of origin. The measure should be divided according to the circumference of the wall plate and suitable Ārūḍhottara – additional horizontal support between wall plate and ridge. (79)

स्वाभीष्टे सममर्धिते गृहपरीणाहे स्ववंशप्रथा-
द्वन्द्वोने चतुरादियुग्मपरिसङ्ख्याभिर्विभक्ते समम्।
एकांशेन ततिं तनोतु परिशिष्टैराततिं चांशकै-
रूनांशं परितः प्रपूरयतु चैवं पादसूत्रे[3] क्रमः।। 80।।

विमर्शिनी

पादसूत्राख्यायाः सभाया विशेषमाह–स्वाभीष्टमाह इति। स्वाभीष्टे गृहपरीणाहे स्वयोनियुक्तस्य गृहस्य परिधौ। समं यथा तथा अर्धिते सति तत्र स्ववंशप्रथाद्वन्द्वोने स्वोत्तरविस्ताराद्द्विगुणं विहाय। चतुरादियुग्मपरिसङ्ख्याभिः समं विभक्ते तदेकांशेन ततिं तनोतु। परिशिष्टैरंशैराततिं च तनोतु। ऊनाशं प्राक् त्यक्तमुत्तर[4]विस्तारद्वयं च परितः प्रपूरयतु। एवं पादसूत्रे पादसूत्राख्यसभाविशेषे क्रमः स्यात्।। 80।।

1. अस्या व्याख्याया आधारभूतं पद्यं न दृश्यते।
2. इत उत्तरं विवरणव्याख्याने पटलपरिसमाप्तिपर्यन्तो भागो मातृकासु न दृश्यते।
3. 'त्र' मूलपाठः, 4. 'रद्व' क. पाठः,

The sequence of the Pādasūtra – horizontal grid lines is to be properly arranged, For this the desired circumference should be divided into two and measure of the beam to be placed there should be divided into two. This is to be divided by even numbers like four, six, eight etc, to fix the breadth and length of the front hall (Sabhā). The length of the beams shall be increased suit on all the four sides. (80)

प्रासादमध्याद् बहिरग्रतो गते
तदुत्तरोत्थे सदलद्विसङ्ख्के।
दण्डे त्रिसार्धत्रिशराङ्गसप्तके
स्वधाम्नि कुर्याद् बलिपीठिकां तथा।। 81।।

विमर्शिनी

बलिपीठक्लृप्तिमाह–प्रासादमध्यादिति। प्रासादमध्यदेशादारभ्याग्रतो गते बहिर्भागे सदलद्विसंख्यके अर्धसहितद्विदण्डे वा त्रिसार्धत्रिशराङ्गधासप्तके त्रिदण्डे वा अर्धसहितत्रिदण्डे वा पञ्चदण्डे वा षड्दण्डे वा सप्तदण्डे वा तदुत्तरोत्थे प्रासादोत्तरकल्पिते दण्डे बलिपीठिकां स्वधाम्नि स्वोचितक्लृप्त्या कल्पिते गृहे कुर्यात्। तथा पाशुपते–

"पञ्चषट्सप्तदण्डाग्रे कल्पयेद् बलिपीठिकाम्"

इति। मञ्जर्यां च–"पीठं प्रासादमध्यादथ बलिविधये पञ्चषट्सप्तदण्डं मुक्[1]त्वा" इति।। 81।।

Balipīṭha, the altar stone (on which the offerings are made) in front of the shrine; the location for the same is two and a half ,three, three, three and a half, five , six and seven parts lesser than the length of the beam (uttara) of the shrine. After measuring thus the location is to be fixed in front. (81)

पूजापीठसमं षडंशरहितं गर्भप्रतिप्रोन्मितं
प्रासादप्रतिसम्मितं च बलिपीठेऽब्जान्तिमाभ्युच्छ्रयम्।
उत्सेधे दशधांशिते सति निजेष्टे पीठिकाविस्तृतिं
सप्तांशैर्विदधीत मूलनिलयौचित्यात् तदङ्गक्रियाम्।। 82।।

विमर्शिनी

बलिपीठलक्षणमाह–पूजापीठेति। बलिपीठे अब्जान्तिमाभ्युच्छ्रयं पद्मपर्यन्तमुच्चं पूजापीठसमं देवस्य पीठपर्यन्तं वा तस्मात् षडंशरहितं[2] वा गर्भप्रतिप्रोन्मितं गर्भगृहस्य प्रतिपर्यन्तं वा प्रासादप्रतिसम्मितं वा विदधीत। चकारो विकल्पार्थः। निजेष्टे उत्सेधे दशधांशिते सति सप्तांशैः पीठिकाविस्तृतिं पीठिकाया उत्तरगतविस्तृतिं, मूलनिलयौचित्यात् तदङ्गक्रियां तदवयवविभागं च विदधीत। तथाहि विष्णुसंहितायां–

1. 'क्त्वा',
2. 'तं ग' क. पाठः

बलिपीठसमुत्सेधो गर्भागारप्रतेः समः।
पूजापीठसमो वापि षडूनो वा प्रकीर्तितः।।
उत्सेधं दशधा कृत्वा सप्तांशस्तस्य विस्तरः।

इति।। 82।।

The height of the altar could be equal to that of the seat of the idol or with a height reduced by one sixth of the same or equal to the floor of the sanctum. This height is upto the lotus shaped top of the altar. By dividing this height by ten and taking seven parts the width could be fixed .There could be segments as its parts in tune with those of the shrine. (82)

पुथ्व्या पादुकमंशतो जगतिकां वेदैर्गुणैः कैरवं
तत्पट्टीगलकम्बुनिद्रवमपि क्ष्मापङ्क्तिभूमीन्दुभिः।
कुर्वीत ज्वलनैः कपोतमिलयाग्रे पट्टिकां पङ्कजं
नेत्राभ्यामपि सप्तविंशतिविभक्ते पीठिकाभ्युच्छ्रये।। 83।।

विमर्शिनी

तद्विभागक्लृप्तिमाह—पूथ्व्येति। पीठिकाभ्युच्छ्रये सप्तविंशतिविभक्ते सति पृथ्व्या अंशतः एकांशेन पादुकं, वेदैश्चतुर्भिरंशतो जगतिकां, गुणैस्त्रिभिः कैरवं कुमुदं, तत्पट्टीगलकम्बुनिद्रवमपि तत्पट्टीं कुमुदपट्टिकां गलं कण्ठं कम्बुनिद्रवं च इति स्थानचतुष्कं क्रमेण क्ष्मापङ्क्तिभूमीन्दुभिः एकेन दशभिरेकैकेन चांशतः, ज्वलनैः त्रिभिः कपोतम्, इलया एकेन अग्रे पट्टिका[1]म् अग्रपट्टिकां नेत्राभ्यां द्वयंशतः पङ्कजं च कुर्वीत। तथा च विष्णुसंहितायां—

सप्तविंशतिधा कृत्वा सममेव तदुच्छ्रयम्।
एकांशं[2] पादुकं कुर्याच्चतुर्भिर्जगतीं पुनः।।
त्रिभागं कुमुदं चैव तथैकांशेन पट्टिकाम्।
दशांशं कण्ठमित्याहुरंशाभ्यां कम्बुनिद्रवौ।।
त्रिभिः कपोतमित्याहुरेकांशेनाग्रपट्टिकाम्।
द्वयंशकं पद्ममग्रे स्यादेतत् पीठस्य लक्षणम्।। 83।।

The altar stone if conceived as having twenty seven segments the measurements could be as follows. Pāduka is to be made by one part. Jagatikā with four parts, Kumuda with three parts, Kumudapaṭi with one part, Gala with ten parts, strong beam with one part, over which Kapota with three parts, Kapotapaṭi with one part and with the last two parts Padma – the lotus shape may be constructed. (83)

---

1. 'को ने' क. पाठः,
2. 'शे'

पीठोच्चे रदभेदिते सदलभूसार्धेषुबाणेन्दुभू-
दस्राः पादुकजागते कुमुदतत्पट्ट्यन्तरीषु प्रतौ।
अंशा वेदयुगानि वेदिगलयोः सार्धौ वलभ्युत्तरे
दस्रो चेति कपोतके शशिकराः स्युः पट्टिकापद्मयोः।। 84।।

विमर्शिनी

पक्षान्तरेण बलिपीठलक्षणमाह–**पीठोच्च** इति। पीठोच्चे रदभेदिते द्वात्रिंशद्धा कृते सति सदलभूसार्धेषुबाणेन्दुभूदस्राः सदलभूरर्धसहितमेकं सार्धेषुरर्धसहितं पञ्चकं बाणाः पञ्च इन्दुरेकः भूरेका दस्रौ द्वौ, एतत्क्रमेण पादुकजागते पादुके जगत्यां च कुमुदतत्पट्ट्यन्तरीषु कुमुदे कुमुदपट्ट्यामन्तर्या च प्रतौ च एतत्स्थानषट्के उक्ता अंशाः स्युः। वेदिगलयोः वेद्यां गले च वेदयुगानि चत्वारश्चत्वारोंऽशाः वलभ्युत्तरे वलभिसहितोत्तरे सार्धौ दस्त्रै अर्धसहितद्वयंशौ। कपोतके च इति अर्धसहितद्वव्यंशौ। पट्टिकापद्मयोः पट्टिकायां पद्मे च क्रमात् शशिकराः एकांशो द्वयंशकौ च स्युः। पञ्च[1]प्राकाराणामुक्तत्वात् केचन तद्विशेषाः संवादग्रन्थैरुदाह्रियन्ते–

प्रासादभवनादीनां रक्षालङ्कारसिद्धये।
वप्राणि क्रमशः कुर्यात् पञ्चत्रिद्वयेकसंख्यया।।

अत्र मय आह–

क्षुद्राणामल्पहर्म्याणां स्वव्यासार्धप्रमाणतः।
अन्तर्मण्डलकं कुर्यात् सत्रिहस्तं तु तत्समम्।।
द्वितीयं[2] च तृतीयं च तस्मात् पञ्चकराधिकम्।
तस्मात् स सप्तहस्तं तु तत्समं स्याच्चतुर्थकम्।।
नवहस्तसमायुक्तं तत्समं पञ्चमं भवेत्।
मध्यमा[3]नां तु मूलार्धमन्तर्मण्डलकं भवेत्।
ततः शरर्षिजगतीरुद्रहस्तं यथाक्रमम्।।
वप्रान्तरालविस्तारः प्रोक्तः प्राकारपञ्चके।
अथोत्तमानां मूलार्धं प्रथमं त्वथ च[4]र्षिभिः।।
नन्दरुद्रातिजगतीहस्तैर्हारा भवन्ति हि।
अन्तर्मण्डलभित्तेः स्याद् विष्कम्भः सार्धहस्तवान्।।
तस्मात् त्रित्यङ्गुलाधिक्यात् क्रमात् साला भवन्ति हि।
तत्तद्विष्कम्भमानात् तु त्रिगुणं वा चतुर्गुणम्।।
प्राकारतुङ्गता ज्ञेया स्वोच्चाष्टांशं शिरोघनम्।

1. 'प्र' घ. पाठः,
2. 'यस्य तृ',
3. 'नं',
4. 'पङ्क्तिभिः' घ. पाठः

उत्तरान्तोच्छ्रिता वा स्यात् कुम्भमण्ड्यन्तकोऽपि वा।।
मसूरकादिवर्गाढ्या खण्डहर्म्यादिमण्डिता।
बुद्बुदार्धेन्दुशीर्षा वा ऋजुर्वा भित्तिरिष्यते।।

इति। तथा च–

क्षुद्राल्पभित्तिविस्तारो हस्तादारभ्य पूर्ववत्।
क्रमात् त्रिर्त्र्यङ्गुलाधिक्याद् वर्धयेत् सार्धहस्ततः।।
सोत्तरा वाजनच्छत्रशीर्षवत्यश्च भित्तयः।

इत्यादि।

गोपुराणामथो लक्ष्म यथावदपि कल्प्यते।
प्रतिवप्रं तु कर्तव्यं द्वारे द्वारे तु गोपुरम्।।

अत्र मयश्च–

क्षुद्राल्पमध्यमुख्यानां वप्राणां स्वप्रमाणतः।
मूलप्रासादविस्तारे सप्ताष्टनवभागिके[1]।।
दशैकादशभागे च तत्तदेकांशहानितः।।
द्वारशोभादिविस्तारं गोपुरान्तं भवेत् क्रमात्।
क्षुद्राल्पकानां धाम्नां स्यान्मानमेवं यथोदितम्।।
मध्यानां मूलधाम्नस्तु व्यासे वेदेषुभागिके।
षट्सप्ताष्टांशके[2] वा स्याद् भागोनं गोपुरं पृथक्।।
त्रिभागैकांशमर्धं च द्विभागं स्यात् त्रिभागिके।
चतुर्भागे त्रिभागं च पञ्चांशे चतुरंशकम्।।
द्वारशोभादिविस्तारं श्रेष्ठानां गोपुरं मतम्।
तुङ्गं तु गोपुराणां स्यात् सप्तांशे रुद्रभागिकम्।।
चतुरंशे षडंशोच्चं पञ्चांशे सत्तभागिकम्।
सप्तांशं तु चतुर्भागे नवभागे तु पञ्चके।।
द्विगुणं वा यथासंख्यं द्वारायतनतुङ्गता।

इत्यादि।। 84।।

If the altar stone is conceived as having thirty two segments the arrangements of measures shall be as follows. With parts like one and a half, five, again five, one and one may be adopted for the segments called Pāduka, Jagati, Kumuda, Kumudapaṭi, Gala, and Galapaṭi, Four parts each may be taken for the construction of Vedikā and Gala one and a half portions

---

1. 'ते' क. पाठः,
2. 'ते' ख पाठः

each may be taken for Valabhi (frieze) and Uttara (beams or wall plate. With another two parts Kapota may be designed and Kapotapaṭṭa with one part and the final last two parts may be used to give shape to Padma the lotus shaped top of the altar. (84)

द्वारोत्सेधसमं तदङ्घ्रिरहितं[1] द्वारेऽखिले चोनिते
नन्दांशेन गजांशकेन च समं भक्ते त्रिधा द्व्यंशकैः।
क्लृप्तानीत्युदितानि पञ्च मनुबिम्बान्यत्र गर्भालये
शक्ते लोकशरेक्षणैर्द्विगुणभूम्यंशग्रहात् त्रीणि च।। 85।।

विमर्शिनी

एवं प्रासादमण्डपप्राकारादीनां लक्षणमभिधाय प्रतिमापीठादीनां लक्षणं वदन् प्रथमं मन्त्रबिम्बस्य दैर्घ्यक्लृप्तिमाह - द्वारोत्सेधसममिति। द्वारस्योस्सेधेन समं तदङ्घ्रिरहितं द्वारोत्सेधाच्चतुर्थांशहीनमिति द्वे बिम्बे। अखिले द्वारे द्वारोत्सेधे नन्दांशेन नवांशेनोनिते द्वारे च गजांशकेन अष्टांशेनोनिते द्वारे च तेषु त्रिष्वपि त्रिधा समं भक्ते द्व्यंशकैः द्विद्विभगैरिति त्रीणि क्लृप्तानि इति अत्र द्वारवशात् पञ्च मनुबिम्बान्युदितानि। पुनर्गर्भालये गर्भगृहे लोकशरेक्षणैः त्रिभिः पञ्चभिर्द्वाभ्यां च भक्ते क्रमाद् द्विगुणभूम्यंशग्रहाद् द्वित्र्येकांशपरिग्रहात् त्रीणि चोदितानि स्युः। तथाहि विष्णुसंहितायां-

द्वारेच्चेऽष्टांशहीने स्यात् त्रिभक्तेऽर्च[2] द्विभागिका।
नवांशोन समस्ते वा पादोना वापि तत्समा।।

इति। ब्रह्मरात्रे च-

अत्र तु प्रतिमायामः पञ्चधा परिकीर्तितः।
प्रासादगर्भागार्धमायाममधमं भवेत्।।
पञ्चभागीकृते त्वत्र त्रिभागैर्मध्यमं भवेत्।
त्रिभागीकृतगर्भे तु द्विभागं चोत्तमं भवेत्।।
पादायामश्च कर्तव्यो द्वारायामस्तथैव च।

इति।। 85।।

The height of the idol could be fixed in five ways as (1) equal to the height of the door of the sanctum sanctorum (2) three fourth of the height of the same (door), (3) the height of the door divided by nine or eight from which one part is reduced (4) the remaining part divided by three and accepting two parts each of nine and (5) of the eight divisions (all of which make five types to fix the height of the idol). There could be three other measures by dividing the circumference of the door into eight of which (1) two parts, (2) taking three out of five parts (3) or half the circumference to fix the height of the idol. (85)

---

1. 'त' मूलपाठः
2. 'च' ख. पाठः

स्वाभीष्टं दशधोत्तमे विभजतां मानं समं मध्यमे
कर्तव्ये नवधाष्टधा च चरमे बिम्बे तदेकांशकम्।
तालं तन्मिहिरांशमङ्गुलमदोद्वन्द्वं कलां गोलकं
चाहुर्मध्यममन्त्रबिम्बरचनात्रोदीर्यते सङ्ग्रहात्।। 86।।

विमर्शिनी

कल्पितदैर्घ्यस्य मन्त्रबिम्बस्य प्रस्तारे विभागक्लृप्तिमाह–स्वाभीष्टमिति। उत्तमे बिम्बे कर्तव्ये स्वाभीष्टं मानं समं दशधा विभजताम् अंशीकुर्यात्, मध्यमे कर्तव्ये नवधा च, चरमे अधमे अष्टधा च। तदेकांशकं दशांशिते नवांशिते अष्टांशिते च तेष्वेकमंशं तालमाहुः। आचार्या इति शेषः। तन्मिहिरांशं तस्य तालस्य द्वादशांशमङ्गुलमाहुः। अदोद्वन्द्वम् अङ्गुलद्वयं कलां गोलकं चाहुः। तत्राङ्गुलस्याष्टांशं यवं [1]चेति सिद्धं भवति। अत्र एषु त्रिष्वपि मध्ये मध्यम(मन्त्र)बिम्बरचना नवतालबिम्बरचनाप्रकारः संग्रहात् संक्षेपेणोदीर्यते। तथा च–

उत्तमा दशतालार्चा नवताला तु मध्यमा।
अष्टतालाधमा ज्ञेया देव्यः स्युश्चाष्टतालिकाः।।
उत्तमं पार्थिवे मानं दारवे मध्यमं भवेत्।
मणिजे चाधमं ज्ञेयमिच्छयान्यत्र कल्पयेत्।।
दशधा नवधा चेष्टं मानं कृत्वैकमंशकम्।
भङ्क्त्वा द्वादशधा ज्ञेयं स्वाङ्गुलं येन मीयते।।

तथा च सात्वते–

अष्टोत्तरशतांशो यः स्वोन्नतेरङ्गुलं तु तत्।
तद्द्वेऽङ्गुले कला नेत्रं गोलकं भाग एव च।।
अङ्गुलाष्टमभागो यः स यवः परिकीर्तितः।

इति।। 86।।

The idol made according to one's desire as the best shall be divided by ten in its length and that is called a 'tāla'. If one desires for an idol of the middle type it could be divided into nine to form a 'tāla' similarly the idol of the lowest type shall have eight divisions (thus the first type will be designated as Daśtāla, middle type of Navatāla and lowest type as Aṣṭatāla). Of these tāla measurement the divisions arrived by dividing into twelve parts each being called an "angula" (or 'pratimāngula') two parts form a "Kalā" or "Golaka". Here the middle variety of the idol referred to as "mantrabimba" is being discussed briefly. (86)

---

1. 'च यतिसि' क. पाठः

प्रायः स्ववाञ्छितमितिद्विगुणायतेष्ट-
पादोनविस्तृततदर्धघनां शिलां ताम्।
तुर्याश्रतां समतले निपुणं निधाय
प्रस्तारमत्र तनुयादथ मन्त्रमूर्तेः।। 87।।

विमर्शिनी

बिम्बप्रस्तारे इतिकर्तव्यतां दर्शयति-**प्राय** इति। प्रायः स्ववाञ्छितमितिद्विगुणायतेष्ट-पादोनविस्तृततदर्धघनां प्रायेण स्ववाञ्छिताया मितेः द्विगुणप्रमाणेनायतेन युक्ताम्, इष्टस्य स्वाभीष्टदैर्घ्यस्य पादोनेन प्रमाणेन विस्तृतां तदर्धेन विस्तारार्धेन घनेन तीव्रेण च युक्तां तां प्रस्तुतां शिलां तुर्याश्रतां चतुरश्रीकृतां कृत्वा समतले प्रदेशे निपुणमच[1]ञ्चलं निधाय अथात्र मन्त्रमूर्तेः प्रस्तारं तनुयात्। तथाच निबन्धने-

चतुरश्रायतां कृत्वा शिलां पूर्वप्रमाणिताम्।

इति। सात्वते च-

भूभागे तु समे श्लक्ष्णे मानमुत्कीर्य तेन वै।
निरूप्यावयवानां च लक्ष्म विस्तृतिपूर्वकम्।।

इति।। 87।।

One should select a stone having double the length of the idol which he has conceived with a width of three fourth of the same and a thickness of half of it. Having made a square stone, it shall be firmly put on a flat surface and then the measurements of the desired idol shall be marked. (87)

शीर्षाग्राद्यलिकान्तिमं त्रिभिरतो मास्वन्मितैरङ्गुलै-
रुन्मेयं चिबुकान्तिमं गुणमितैः कण्ठो हृदन्तं ततः।
नाभ्यन्तं च शिवान्तिमं व दिनकृत्सङ्ख्यैस्त्रिभिर्जानुनी
गुल्फाद्यङ्घ्रियुगं च सङ्कृतिमितैर्जङ्घाद्वयोरुद्वये।। 88।।

विमर्शिनी

नवतालकल्पनीयस्याष्टोत्तरशताङ्गुलस्य बिन्बस्य विभागक्लृप्तिमाह-**शीर्षाग्रदीति**। शीर्षागाद्यलिकान्तिमं मूर्धादिललाटपर्यन्तं त्रिभिरङ्गुलैः उन्मेयं स्यात्। अतो ललायत् चिबुकान्तिमं भास्वन्मितैर्द्वादशभिरङ्गुलैरुन्मेयम्। गुणमितैस्त्रिभिः कण्ठ उन्मेयः। ततः कण्ठात् हृदन्ते ततो नाभ्यन्तं ततः शिवान्तिमं लिङ्गान्तं च, एतानि त्रीणि स्थानानि दिनकृत्संख्यैर्द्वादशभिर्द्वादशभिः। त्रिभिर्जानुनी जानुद्वयम्। गुल्फाद्यङ्घ्रियुगं गुल्फाद्यधोगतपादद्वयं च त्रिभिः। जङ्घाद्वयोरुद्वये जङ्घाद्वयमूरुद्वयं च संकृतिमितैश्चतुर्विंशत्यङ्गुलैः। तथा विष्णुसंहितायां-

1. 'चलं' ख. पाठः

ग्रीवाहृन्नाभिमेढ्रान्तं मुखमानेन कल्पयेत्।
तद्भङ्क्त्वा मूर्धकण्ठाङ्घ्रिजानुदेशे समं न्यसेत्।।
जङ्घोरू द्विगुणौ ज्ञेयौ बाहू चाजानुलम्बिनौ।
किरीटमधिकं कुर्यात् पद्मनालं च मानतः।।

इति।। 88।।

Measurements shall be marked as follows: from the top of the head to forehead three angulas, then upto the tip of the chin with twelve angulas and then upto the end of the neck with three angulas and then upto the heart and navel with twelve angulas. Thereafter upto the knees, ankles and feet with three angulas each and pairs of thighs and shanks with twenty four angulaks each shall be measured (to form a Navatāla– idol.) (88)

सीमास्वासु सपद्मनालमुकुटान्तासूरुजङ्घाद्वयी
मध्याढ्यासु करोतु षोडश तिरश्चीनानि सूत्राण्यथ।
मध्ये कर्णकरास्त्रसीमसु तथा सप्तोर्ध्वगान्यप्यथो
वक्त्रं द्वादशवर्गकोष्ठसुविचित्रं कल्पयेत् सूत्रकैः।। 89।।

विमर्शिनी

एवं विभक्तासु सन्धिषु सूत्राण्यास्फालयेदित्याह–सीमास्विति। सपद्मनालमुकुयन्तासु पद्मनालस्य मुकुटस्य चावसानयुक्तासु ऊरुजङ्घाद्वयीमध्याढ्यासु ऊरुद्वयस्य जङ्घाद्वयस्य च मध्यभागयुक्तास्वासु सीमासु सम्भूय षोडश तिरश्चीनानि सूत्राणि करोतु, अथ तथा मध्ये कर्णकरास्त्रसीमसु कर्णसीम्नोः करसीम्नोरायुधसीम्नोश्च सप्तोर्ध्वगान्यपि सूत्राणि च। अथो वक्त्रं वक्त्रप्रदेशं द्वादश(वर्ग)कोष्ठसुविचित्रम् आयामतो विस्तारतश्च द्वादशपदयुक्तं सूत्रकैरास्फाल्य कल्पयेत्। तथाच वैष्णवे–

"तिर्यक् षोडश सूत्राणि सप्तोर्ध्वानि च कल्पयेत्।"

सनन्दप्रश्ने च–

पादे सूत्रद्वयं तिर्यग्जङ्घामध्ये तृतीयकम्।
पादेन जानु विज्ञेयमूरुमध्ये तथापरम्।।
मेढ्रान्ते सप्तमं ज्ञेयं नाभ्यां च हृदये द्वयम्।
कण्ठे द्वयं ललाटेऽन्यत् सूत्रमेकं शिरस्यथ।।
मकुटान्ते च विज्ञेयं सूत्राण्येवं चतुर्दश।
पद्मान्ते चैकमेकं च नालान्ते चेति षोड्श।।
सुषुम्नाकर्णयुग्बाह्वायुधे सप्तोर्ध्वगानि च।

पुनर्वैष्णवे–

"तिर्यगूर्ध्वगतैः सूत्रैर्मुखे द्वादशधा कृते।"

इति।। 89।।

Thereafter lines of measurements may be drawn with threads (anointed with powder or colour) both lengthwise and breadthwise with specified measures, to mark the borders. The lines shall begin from the tip of the Padmapīṭha, the lotus shaped base upto the end of the Nāla (stalk of the lotus) reaching upto the tip of the crown and centres of thighs and shanks forming a total of sixteen lines horizontally. Thereafter seven lines be drawn perpendicularly through the centre touching the borders of ears, joints of shoulders and the ends of the weapon held by both the hands. The portion of the face shall be divided lengthwise and breadthwise into twelve square shaped cavities (making a total of 144 squares). (89)

अष्टाङ्गुलाय[1]तमतोऽर्धततं ललाट-
मर्धेन्दुसुन्दरम[2]थोऽब्धिपदायता स्यात्।
नासा पदद्वयतताङ्गुल[3]निम्नमूला
व्यासोच्छ्रिताग्ररुचिरा तिलपुष्पकल्पा।। 90।।

विमर्शिनी

मुखविभागमाह–अष्टाङ्गुलेति। अष्याङ्गुलायतम् अष्यांङ्गुलदैर्घ्ययुक्तम्, अतो दैर्घ्याद्, अर्धततं चतुरङ्गुलविस्तृतम्, अर्धेन्दुसुन्दरम् अर्धेन्दुवत् सुन्दरं, ललाटं स्यात्। अस्याधोगता, अब्धिपदायता पदानामङ्गुलप्रमाणत्वाच्चतुरङ्गुलदीर्घा, पदद्वयतता अङ्गुलद्वयविस्तृता, अङ्गुलनिम्नमूला एकाङ्गुलनिम्नेन मूलेन युक्ता, व्यासोच्छ्रिताग्ररुचिरा अङ्गुलद्वयोच्छ्रितेनाग्रभागेन सुन्दरा, तिलपुष्पकल्पा तिलपुष्पसदृशी च नासा स्यात्। तथा निबन्धने–

"चतुष्केण चतुष्केण ललाटं नासिका मुखम्।"

सात्वते च–

आस्यनासाललाटार्थं वदनांशं भजेत् त्रिधा।
तत्राग्रतः कलामानं घ्राणं स्यात् तिलपुष्पवत्।।

वैष्णवे च–

ललाटकण्ठविस्तारो नासिकाद्विगुणो मतः।
नेत्रवन्नासिकाग्रोच्चं निम्नमूलं तदर्धतः।।

इति।। 90।।

The forehead shall have a length of eight angulas with a width of half that measure (meaning four angulas the shape shall be as beautiful as the crescent of the moon. The nose shall have a length of four angulas and a

---

1. 'त',
2. 'तो',
3. 'लि' मूलपाठः

breadth of two angulas with a similar height with one angula shorter than the tip with a shape of the charming flower of the sesamum. (90)

तन्मूलपार्श्वयुजि पञ्चमसूत्रसंस्थे
कोष्ठद्वयाततिमती पदविस्तृते च।
मध्यत्रिभागकृततारकतत्रिभाग-
क्लृप्तार्चिषी विरचयेन्नयनाम्बुजे द्वे।। 91 ।।

विमर्शिनी

नेत्रलक्षणमाह–तन्मूलेति। तन्मूलपार्श्वयुजि नासाया मूलस्य पार्श्वद्वये, पञ्चमसूत्र संस्थे वदनोर्ध्वगतसूत्रादारभ्य गणनात् पञ्चमसूत्रस्थिते, कोष्ठद्वयाततिमती अङ्गुलद्वयदीर्घयुक्ते, पदविस्तृते एकाङ्गुलविस्तारयुक्ते च, मध्यत्रिभागकृततारकतत्रिभागक्लृप्तार्चिषी नेत्रस्य मध्ये नेत्रत्रिभावोन कृताभ्यां द्वाभ्यां तारकाभ्यां तत्रिभागेन कृताभ्यामर्चिर्भ्यां च युक्ते, द्वे नयनाम्बुजे अम्बुजान्तर्दलसमाने नयने विरचयेत्। तथा सनन्दप्रश्ने–

तन्मध्ये नासिका कार्या तस्य मध्यगतस्य तु।
उभयोः पार्श्वयोः सूत्रे तत्र सूत्रान्तरस्थिते।।
ऊर्ध्वाङ्गुलादधस्तात्तु अङ्गुले पञ्चमे स्थिते।
अधोऽङ्गुलै[1]रूर्ध्वतस्तु अङ्गुले चाष्टमे स्थिते।।
तयोस्तु सूत्रयोर्मध्ये कुर्याज्ज्योतिर्द्वयं समम्।

इति। सात्वते च–

आद्यस्य नासिकांशस्य मध्यभागसमाश्रिते।
कुर्यान्नेत्रश्रुतिच्छिद्रे तत्र नेत्रे कलान्तरे।।

इति। विष्णुसंहितायां च–

तारके तत्रि[2]भागस्थे ज्योतिषी तत्रि[3]भागतः।

इति।। 91 ।।

The pair of lotus eyes shall be shaped at the tip of the nose on both the sides with five squares downwards and two sidewise and pair of round shaped gleaming eye balls with one third circumference at the centre. (91)

फालेक्षणान्तरग[4]ते द्विकलायते च
चिल्ल्यौ कलाव्यवहिते द्वियवप्रताने।
नेत्रैकवीथिविसरत्तुटुकान्तरन्ध्रौ
कर्णौ करार्णवपद[5]प्रतताततौ च।। 92 ।।

1. 'ले' ख. पाठः,
2–3. 'त्र भा क.' पाठः,
4. 'कृ',
5. 'दं' मूलकोशपाठः,

विमर्शिनी

चि[1]ल्लीलक्षणमाह–फालेति। फालेक्षणान्तरगते ललाटनेत्रयोर्मध्यगते, द्विकलायते चतुरङ्गुलदीर्घे, द्वियवप्रताने द्वियवविस्तारे कलाव्यवहिते मध्ये द्वयङ्गुलविच्छिन्ने च, चिल्ल्यौ चिल्लीद्वयं, विरचयेत्। कर्णलक्षणमाह – नेत्रेति। नेत्रैकवीथिविसरत्तुटुकान्तरन्ध्रौ नेत्रैकवीथ्यां प्रसरतः कर्णशङ्कुनाम्नस्तुट्टुकस्यान्ते रन्ध्रेण युक्तौ, करार्णवपदप्रतताततौ द्वयङ्गुलविस्तारौ चतुरङ्गुलदीर्घौ च, कर्णौ विरचयेत्। तथा सात्वते–

भ्रूलते द्विकले स्मृते।
मध्यतो द्वियवे बालचन्द्रतुल्ये क्रमक्षते।।

इति।। तथाच विष्णुसंहितायां–

भ्रूमध्यं नेत्रमध्यवत्।
कर्णायामस्तु नासावद् विस्तारं च तदग्रवंत्।।
तुटुकौ नेत्रसूत्रस्थौ तद्विस्तारेण सम्मितौ।

इति।। 92।।

In between the forehead and eyes eyelashes should be made with a length of two angulas each and with a width of two yavas (barley). There should be a space of two angulas in between the eyelashes. The ears shall be shaped from the centre, thread of the eyes with a hollow at the carlobe with a width of two angulas and length of four angulas (92)

द्वयेकाङ्गुलायततदर्धतताधरोत्त-
रोष्ठान्ततोऽङ्गुलविनिस्सृतसृक्कयुग्मम्।
कम्बीरकादिरुचिरं प्रकरोतु गोजिं
घोणाग्रसामिपिहिताष्टयवावती[2]र्णाम्।। 93।।

विमर्शिनी

ओष्ठादीनां लक्षणमाह–द्वयेकाङ्गुलेति। द्वयेकाङ्गुलायततदर्धतताधरोत्तराष्ठान्ततः क्रमेण द्वाभ्यामङ्गुलाभ्यां एकेनाङ्गुलेनायतं तदर्धेन ततं विस्तृतम् अधरोष्ठमुत्तरोष्ठं च तयोरन्ततोऽवसाने, अङ्गुलविनिःसृतसृक्कयुग्मम् एकाङ्गुलेन विनिस्सृतं व्यवहितं सृक्कयुग्मं च, कम्बीरकादिरुचिरं कम्बीरकादिना रुचिरं सुन्दरं च, प्रकरोतु। कम्बीरो हनुः। घोणाग्रसामिपिहिताष्टयवावतीर्णां घोणाग्रेण नासाग्रेण सामि अर्धं पिहितां छन्नाम् एकाङ्गुलाधोगतां गोजिं[3] नासाया अधोगतकुल्य[4]ां च प्रकरोतु। तथा विष्णुसंहितायां–

पुटौ निष्पावबीजाभौ भ्रूमध्यं नेत्रमध्यवत्।
अधरस्तत्समोऽन्योष्ठौ गोजिकामानमर्धतः।।

1. 'व' ख. पाठः
2. 'की' मूलकोशपाठः,
3. 'चि' क. पाठः,
4. 'ड्यां' ख. पाठः,

सात्वते च–

अर्धाङ्गुलं चोत्तरोष्ठमधरोष्ठं तु चाङ्गुलम्।
गोल[1]कं चिबुकं विद्धि सृक्किण्योश्चतुरङ्गुलम्।।
नासाग्रग्राहनिर्मुक्तगोजीमानं चतुर्यवम्।
तच्चतुर्यवमानेन घ्राणाग्रेणान्तरीकृतम्।।

इति।। 93।।

Thereafter the lower lip may be designed having a length of two angulas and a width of half an angula. For the upper lip the measures are angula in length and half an angula in width. At the end of both the lips there shall be two corners of the mouth as an embellishment to the cheeks. Further there shall be a channel shaped part having the length of eight yavas which may be half concealed by the lower tip of the nose. (93)

शब्दग्रहादिचिबुकावधि मानमिष्ट-
मष्टाङ्गुलै[2]श्चिबुकमानमथाङ्गुलाभ्याम्।
ग्रीवा गजाङ्गुलततार्ककलोपपन्नं
कक्षान्तरं स्तनयुगान्तरमेकतालम्।। 94।।

विमर्शिनी

कण्ठचिबुकादीनामान्तरालिकं मानमाह–शब्दग्रहेति। शब्दग्रहादिचिबुकावधि कर्णादिचिबुकपर्यन्तं, मानमष्ट्यङ्गुलैरिष्टम्। अथाङ्गुलाभ्यां द्वाभ्यां चिबुकमानम्। गजाङ्गुलतता अष्ट्यङ्गुलविस्तृता ग्रीवा स्यात्। अर्ककलोपपन्नं चतुर्विंशत्यङ्गुलमितं कक्षान्तरं कक्षयोर्मध्यविस्तारं च, एकतालं द्वादशाङ्गुलं स्तनयुगान्तं स्तनयोर्मध्यविस्तारं च। तथाहि विष्णुसंहितायां–

चिबुकाकर्णयोर्मध्यकण्ठांसा नेत्रसम्मिताः।
ललाटकण्ठविस्तारो नासिकाद्विगुणो मतः।।
स्तनान्तरं मुखं विद्याद् द्विगुणं चैव कक्षयोः।

इति।। 94।।

From the ear upto the chin a length of eight angulas may be marked. The chin shall be shaped with two angulas. The portion of the neck shall consist of eight angula and the chest located in between the two armpits shall have a space of twenty four angulas. The space between the two breasts shall be twelve angulas. (94)

---

1. 'लं' क. पाठः
2. 'लं चिबु' मूलकोशपाठः

नाभिस्थली प्रवितता नृपतिप्रमाणैः
स्यादङ्गुलैः कटितटी धृतिसम्मितैश्च।
कक्षस्तनान्तरमृतुप्रमिताङ्गुलाढ्यं
कक्षांसमध्यमपि मांसलमंसयुग्मम्।। 95।।

विमर्शिनी

नृपतिप्रमाणैः षोडशसंङ्ख्यैरङ्गुलैः प्रवितता विस्तीर्णा नाभिस्थली स्यात्। धृतिसम्मितैरष्यदशाङ्गुलैः कटितटी च। ऋतुप्रमिताङ्गुलाढ्यं षडङ्गुलयुक्तं कक्षस्तनान्तरं कक्षस्तनयोरन्तरालम्। कक्षांसमध्यमपि कक्षांसयोर्मध्यमपि तथा षडङ्गुलयुक्तम्। मांसलं घनं वांसयुग्मं स्यात्। तथाच विष्णुसंहितायां–

कण्ठद्विगुण एवेष्टो नाभिदेशे तु विस्तरः।
कटौ नेत्राधिकस्त्र्यंशं स्तनकक्षान्तरं विदुः।।
तावत्कक्षांसमध्यं च कारयेत् स्कन्धमुन्नतम्।

इति।। 95।।

The navel shall have a length of sixteen angulas and eighteen angulas apart shall be the hip. The portion between the armpit and breast shall have a distance of six angulas. The two arms should be plump in appearance at the top. (95)

कक्षादिसन्ध्यवधिकायतिरङ्कसङ्ख्यैः
स्याद् गोलकैः शिवमितैर्मणिबन्धनिष्ठा।
दिक्संख्यकैरुपभुजेऽथ तति[1]श्चतुर्भि–
र्मूले प्रकोर्परयुगे भुजयोस्त्रिभिश्च।। 96।।

विमर्शिनी

अङ्कसङ्ख्यैर्नवभिर्गोलकैरष्यदशाङ्गुलैः कक्षादिसन्ध्यवधिकायतिः कक्षादिकोर्परान्तदैर्घ्यं स्यात्। शिवमितैरेकादशसङ्ख्यैर्गोलकैर्द्वाविंशत्यङ्गुलैः सन्ध्यादिमणिबन्धनिष्ठा आयतिः स्यात्। उपभुजे ऊर्ध्वभुजे सति तत्र दिक्संख्यकैर्गोलकैर्विंशत्यङ्गुलैः सन्ध्यादिमणिबन्धनिष्ठायतिः स्यात्। अथ भुजमूले चतुर्भिर्गोलकैरष्यङ्गुलैः ततिः विस्तारः स्यात्। प्रकोर्परयुगे त्रिभिर्गोलकैः षडङ्गुलैस्ततिश्च। तथा च संहितायां–

"कटिवत् सन्धिकक्षान्तं प्रकोष्ठं नासिकाधिकम्।"

मुरारौ च–

उपबाह्वोस्तु विज्ञेया शलाका दशगोलका।
मणिबन्धस्तु नासावत्[2] ततोऽङ्गुष्ठान्तरं तथा।।
द्विगुणो बाहुविस्तारो नेत्रोनश्चैव कोर्परे।

1. 'त',
2. 'र्ततो' मूलकोशपाठः,

इति ।। 96 ।।

From the armpit upto the elbow shall have a length of eighteen angulas and from elbow to wrist the length shall be twenty two angulas while the extra arms (of the idol over and above the usual (pair) shall have an upward length of twenty angulas. The base of the arms shall have a space of eight angulas while the two elbows shall have a width of six angulas. (96)

अष्टाङ्गुलैः करतलाततिरश्विहीनै-
स्तद्विस्तृतिर्भवति मध्यमिकायतिश्च ।
मध्या[1]द् दशांशरहिते निजपार्श्वजे तत्-
पङ्क्त्यंशमात्ररहिते प्रथमान्त्यशाखे ।। 97 ।।

विमर्शिनी

करतलाततिः करतलगतदैर्घ्यम्, अष्ट्यङ्गुलैर्भवति । तद्विस्तृतिः करतलविस्तारः अश्वि[2]हीनैरष्ट्यङ्गुलैः षडङ्गुलैर्भवतीत्यर्थः। मध्यमिकायतिश्च मध्यमाया दैर्घ्यं च तथा षडङ्गुलैः। मध्यान्मध्यमादैर्घ्याद् दशांशरहिते दशांशहीने निज पार्श्वजे[3] मध्यपार्श्वजे तर्जन्यनामिके । तत्पङ्क्त्यंशमात्ररहिते तर्जन्यनामिकाभ्यां दशांशमात्ररहिते प्रथमान्त्यशाखे अङ्गुष्ठ(तर्जन्यौ ? कनिष्ठिके) भवतः। तथाच संहितायां-

तत्र मध्यमयोर्मानं नासिकाधरयोगतः ।
तले नेत्राधिकायामे मध्यमायामविस्तरे ।।
कल्पयेदर्धपर्वोने तथा तर्जन्यनामिके ।
तयोरप्यर्धपर्वोने तथाङ्गुष्ठकनिष्ठिके ।।

इति ।। 97 ।।

The length of the palm may be eight angulas whereas its width shall be of six angulas which measure applies to the middle finger also. The length of middle finger and ring finger shall be less by one tenth of that of the index finger. The length of the little finger and thumb shall be less by an eleventh portion. (97)

अङ्गुष्ठके विततिरर्कयवैः परासु
त्र्यंशोनितैः प्रतिपरुं लधिमा यवेन ।
मध्योद्भवाप्रथमपर्वयुगं समानं-
दैर्घ्यं तदर्धपरिमाणमथग्रयपर्व[4] ।। 98 ।।

---

1. 'ध्या द' मूलकोशपाठः
2. 'क्षि',
3. 'जे त' ख. पाठः,
4. 'र्वम्'।।

विमर्शिनी

अङ्गुष्ठके अर्कयवैर्द्वादशयवैर्विस्तृतिः। परास्वङ्गुलिषु त्र्यंशोनितैरष्टयवैर्विततिः। प्रतिपरुं प्रतिपर्व लघिमा लघुत्वं यवेन एकयवेन। मध्योद्भवाप्रथमपर्वयुगं मध्यमायाः अधोगतपर्वद्वयं समानदैर्घ्यम्। अथाग्रयपर्व मध्यमाया अन्त्यपर्व तदर्धपरिमाणं तदर्धदैर्ध्ययुक्तम्। तथा काश्यपः-

अङ्गुष्ठमूलविस्तारं स[1]पादांशमुदाहृतम्

इति। सात्वते च-

द्विपर्वातु स्मृतोऽङ्गुष्ठः सर्वाश्चाङ्गुलविस्तृताः।
सर्वासां मूलमध्यान्ताद् ग्रासयेच्च यवं यवम्।।
मध्यमापर्वणी पूर्वे समे शेषं तदर्धकम्।

इति।। 98।।

For the thumbs the width could be twelve yavas and for the other fingers eight yavas each could be the width. For the sections of the fingers one yava each could be fixed as width. For the middle finger the first two sections could be of the same width and length. The last section should be half the width of the middle portion. (98)

देशिन्युपावरजयोरमुतो द्विपांश-
हीनानि पादरहितानि कनिष्ठिकायाः।
पर्वाणि पर्वयुगलं क्रमशोऽथ तर्जा-
मध्याद्यपर्वसुसमं प्रथमोद्भवायाः।। 99।।

विमर्शिनी

देशित्युपावरजयोः तर्जन्यनामिकयोः अमुतो मध्यमाया द्विपांशहीनानि अष्ट्यंशहीनानि पर्वाणि। कनिष्ठिकाया अमुतः पादरहितानि पर्वाणि। अथ प्रथमोद्भवाया अङ्गुष्ठस्य पर्वयुगलं क्रमशस्तर्जामध्याद्यपर्वसुसमं तर्जनीमध्यमयोराद्यपर्वभ्यां सुसमं भवति। तथाहुः-

अष्टांशोनानि पर्वाणि ततो देशिन्यनामयोः।
पादोनानि कनीयस्या योक्तव्यान्यनुरूपतः।।
तर्जनीमध्यमापर्वसमे चाङ्गुष्ठपर्वणी।

इति।। 99।।

The section of the index finger and ring finger shall be one eighth less than that of the middle finger whereas the width of the ring finger and little finger shall be one fourth lesser. The first two sections of the thumb shall be equal to that of the index finger and middle finger in the case of the first two sections. (99)

1. 'सं' ख. पाठः

स्वस्वाग्रपर्वदलतो रचिता नखाः स्यु-
नाहोऽङ्गुलैः श्रुतिमितैः प्रथमप्रसूतेः।
मध्याद्विपार्श्वजनितावरजास्वतोऽतो
नाहोऽष्टमांशरहितो विहितः क्रमेण।। 100।।

विमर्शिनी

स्वस्वाग्रपर्वदलतः स्वस्वाग्रपर्वार्धेन रचिता नखाः स्युः। प्रथमप्रसूतः अङ्गुष्ठस्य नाहः श्रुतिमितैः चतुर्भिरङ्गुलैः स्यात्। मध्याद्विपार्श्वजनितावरजासु मध्यमायां तर्जन्यनामिकयोः कनिष्ठिकायां च क्रमेण अतोऽतः अस्मादस्माद् अष्टमांशरहितो नाहो विहितः। तथाच संहितायां-

सर्वाङ्गुलीषु कार्याः स्युरग्रपर्वार्धतो नखाः।
नाहोऽङ्गुष्ठस्य नासावदष्टांशोनं ततोऽन्ययोः।।
ततश्चैवं कनिष्ठाया वृत्ते भुजसमे स्फिजौ।

इति।। 100।।

Nails may be shaped with the half size of the top sections of the respective fingers. Thus the tip of the thumb shall have a nail of four angulas in size. Thereafter one eighth measure of the tip shall be taken to shape the nails of the middle and index finger. For the little finger one eighth of the previous measure should be less. (100)

अङ्गुष्ठतर्जनिकयोर्नयनाङ्गुलाढ्य-
मभ्यन्तरं प्रथमजामणिबन्धमध्यम्।
अब्ध्यङ्गुलैः परिमितं मणिबन्धकेऽपि
तैर्विस्तृतिः करभदैर्घ्यमथार्धतालम्।। 101।।

विमर्शिनी

अङ्गुष्ठतर्जनिकयोः अ(भ्य)न्तरं मध्यं नयनाङ्गुलाढ्यं द्व्यङ्गुलयुक्तम्। प्रथमजामणिबन्धमध्यम् अङ्गुष्ठमणिबन्धयोरन्तरम् अब्ध्यङ्गुलैश्चतुरङ्गुलैः परिमितम्। मणिबन्धकेऽपि तैश्चतुरङ्गुलैः विस्तृतिः स्यात्। ( ) करभदैर्घ्यं करभस्य दैर्घ्यम् अर्धतालं षडङ्गुलं स्यात्। ( ) तथाहुः-

तत्राङ्गुष्ठप्रदेशिन्योर्नेत्रसम्मितमन्तरम् ।
मणिबन्धस्तु नासावत् ततोऽङ्गुष्ठान्तरं तथा।।
अन्तरं मध्यमातुल्यं कनिष्ठामणिबन्धयोः।

इति।। 101।।

The middle distance between the thumb and the index finger shall be two angulas. Similarly the distance between the thumb and the wrist shall be four angulas. The length of the space between the thumb and the root of the little finger shall be four angulas. (101)

लिङ्गं युगाङ्गुलमितं वृषणद्वयं स्याद्
द्विद्व्यङ्गुलं द्विरदकुम्भनिभे स्फिजौ द्वे।
वृत्ते षडङ्गुलतते द्वयमध्यसंस्था
कौपीनराज्यपि कलावितता कृशाग्रा।। 102।।

विमर्शिनी

लिङ्गं युगाङ्गुलमिततं मेढ्रं चतुरङ्गुलदीर्घम्। वृषणद्वयं द्विद्व्यङ्गुलम्। स्फिजौ षडङ्गुलतते षडङ्गुलविस्तृते वृत्ते वृत्ताकारे च द्विरदकुम्भनिभे द्विपकुम्भप्रख्ये च। द्वयमध्यसंस्था कौपीनराजी कौपीनवीथी कलावितता द्व्यङ्गुलविस्तारा कृशाग्रा च क्रमेण कार्श्यर्ययुक्ताग्रभागापि स्यात्। तथा सात्वते–

द्व्यङ्गुलौ वृषणौ दैर्घ्यान्मूलान्तसमविस्तृतौ।

इति। मुरारौ च–

द्व्यङ्गुलौ वृषणौ मेढ्रं चतुरङ्गुलमायतम्।

इति। निबन्धने च – "स्फिजौ षडङ्गुले वृत्ते" इति। सात्वते–

"तथा कौपीनराजी च द्व्यङ्गुला मूलतः स्मृता।"

इति।। 102।।

The penis (of the idol) shall have a length of four angulas while the testicles shall be of two angulas in length and width. The two buttocks having the shape of the projection in the forehead of an elephant shall have a width of six angulas and circumference. The space for loincloth in between the two angulas in legth and with a slender tapering shape. (102)

मूलान्तराग्रविततिः क्रमशोऽङ्गुलैः स्या-
दूरुद्वये सुषिरभानुशरप्रमाणैः।
जङ्घाद्वयेऽङ्गगिरिसत्रियवत्रिसङ्ख्यैः
कुर्यात् ककुप्परिमितैरपि जानुयुग्मे।। 103।।

विमर्शिनी

ऊरुद्वये मूलान्तराग्रविततिः मूलमध्यान्तेषु विस्तृतिः सुषिरभानुशरप्रमाणैः क्रमशो नवद्वादशपञ्चसङ्ख्यैरङ्गुलैः स्यात्। जङ्घाद्वये मूलान्तराग्रविततिः अङ्गगिरिसत्रियवत्रिसङ्ख्यैः क्रमेण षड्भिः सप्तभिः त्रियवयुक्तैस्त्रिभिरङ्गुलैश्च स्यात्। जानुयुग्मके ककुप्परिमितैः दशाङ्गुलैर्विततिरपि स्यात्। तथा विष्णुसंहितायाम्–

ऊरू मुखवदक्ष्यूनं जानु जङ्घा मुखार्धतः।

इति।। 103।।

The shape of the two thighs shall have a circumference of nine angulas at the top, twelve angulas in the middle portion and five angulas at the

point of the knee. The two shanks shall have similarly six angulas at the base seven at the middle and three angulas and three yavas at the end. The two knees shall have a width of ten angulas each. (103)

मूलादिवेदशरसाङ्घ्रिरसाङ्गसङ्ख्यै-
व्यासोऽङ्गुलैः पदतलेऽर्कमितैश्च दैर्घ्यम्।
अङ्गुष्ठसीम्नि कलयोन्नतिरर्धतोऽन्य-
पार्श्वेऽङ्गुलैः प्रपददैर्घ्यमृतुप्रमाणैः ।। 104 ।।

विमर्शिनी

पदतले मूलादिप्रदेशेषु वेदशरसाङ्घ्रिरसाङ्गसङ्ख्यैः चतुर्भिः पञ्चभिः सपादैः षड्भिः षड्भिश्चाङ्गुलैः क्रमशो व्यासः स्यात्। अर्कमितैर्द्वादशाङ्गुलैर्दैर्घ्यं च। अङ्गुष्ठसीम्नि अङ्गुष्ठवति पार्श्वे कलया द्व्यङ्गुलेनोन्नतिश्च। अन्यपार्श्वे कनिष्ठावति पार्श्वे अर्धतः एकाङ्गुलेनोन्नतिः। प्रपददैर्घ्यम् ऋतुप्रमाणैः षडङ्गुलैश्च। तथा सात्त्वते-

"पार्ष्णा द्विगोलकतते तन्मध्ये साङ्गुले कले"

इति। तथाच संहितायां-

मुखायततलौ पादौ पुरस्ताज्जङ्घया समौ।
कूर्मोन्नतौ क्रमोनोच्चौ तत्राङ्गुष्ठौ तदर्धकौ।।

इति।। 104 ।।

The circumferences for the bases (of the feet) shall be four angulas for the heel, five angulas for hind portion of the heel, six and a quarter of angulas for the base of the fingers. The total length shall be twelve angulas. At the thumb there shall be two angulas thickness at the little finger the thickness shall be one angula and a length of six angulas for the fore part of the foot. (104)

अङ्गुष्ठतत्सहभुवोर्जगदङ्गुलाढ्यं
दैर्घ्यं नखान्नखमितिह[1]सितास्ततोऽन्याः।
पर्वत्रयाहितरुचोऽङ्गुलयो द्विपर्वा-
ङ्गुष्ठोऽर्धपर्वशशिखण्डनिभा नखाः स्युः ।। 105 ।।

विमर्शिनी

अङ्गुष्ठतत्सहभुवोः पादाङ्गुष्ठतर्जन्योः। जगदङ्गुलाढ्यं त्र्यङ्गुलविशिष्टं दैर्घ्यम्। ततोऽन्याः तिस्रोऽङ्गुलयः। नखान्नखमितिह्रसिताः क्रमान्नखान्नखमानेन ह्रस्वाः। पर्वत्रयाहितरुचः पर्वत्रयेण शोभावत्यश्च। अङ्गुष्ठो द्विपर्वा च। तासां नखाः अर्धपर्वशशिखण्डनिभाः अर्धार्धपर्वणा शशिखण्डसदृशाश्च स्युः। तथा वैष्णवे-

1. 'प्र'

तत्राङ्गुष्ठौ तदर्धकौ।
प्रदेशिन्यौ च तत्तुल्ये हीनाः शेषा नखान्नखम्।।
अनङ्गुष्ठास्त्रिपर्वाणो नखा रक्तार्धचन्द्रवत्।

इति।। 105।।

The length of the thumb and forefinger of the foot shall be three angulas each and as for the other fingers the length shall be lesser by the length of the nails of the forefinger. Form of the finger shall have three sections each with suitable shape. (105)

अङ्गुष्ठके रसमितैः परिधिः परस्यां
स्यादङ्गुलैस्त्रिभिरतो[1]ऽष्टमभागहीनैः ।
कार्यः क्रमात् तदितरास्वखिलेषु तत्त-
द्व्यासेन लोकगु[2]णितेन करोतु नाहम्।। 106।।

विमर्शिनी

अङ्गुष्ठके रसमितैः षडङ्गुलैः परिधिर्नाहः। परस्यां तर्जन्यां त्रिभिरङ्गुलैश्च। तदितरासु तिसृषु अतोऽष्टमभागहीनैः परिधिः कार्यः। अथाखिलेष्ववयवेषु लोकगुणितेन तत्तद्व्यासेन नाहं करोतु। तथाच संहितायां–

नाहोऽङ्गुष्ठस्य मध्यावत् तर्जन्यङ्गुष्ठदैर्घ्यवत्।
अष्टांशोनाः क्रमादन्याः कारयेदनुरूपतः।।

इति।। 106।।

The circumference of the thumb (of the feet shall be six angulas and three angulas for the forefinger. For the other three it shall be one eighth lesser than the other. As for the other limbs where no specifications are made thrice the circumference may be accepted. (106)

तालैस्त्रिभिः शिरसि साष्टियवेषुसङ्ख्यैः
कक्षान्तरे रहितविश्वयवैश्चतुर्भिः।
कुक्षौ त्रिभिर्भवति नाभितलेऽर्धयुक्तैः-
नार्हंस्तथा[3] कटितटे ऽर्धयुताब्धिसङ्ख्यैः।। 107।।

विमर्शिनी

त्रिभिस्तालैः शिरसि नाहः स्यात्। कक्षान्तरे कक्षप्रदेशे साष्टियवेषु संख्यैः द्व्यङ्गुलसहितपञ्चतालैः कुक्षौ रहितविश्वयवैः त्रयोदशयवरहितैश्चतुस्तालैः नाभितले अर्धयुक्तैरर्धतालयुक्तैत्रिभिस्तालैः, तथा कटितटे अर्धयुताब्धिसंख्यैः अर्धतालयुक्तचतुस्तालैर्नाहो भवति। तथा सात्त्वते–

1. 'ता'
2. 'गं मूलपाठः
3 'ता' मूलपाठः

शिरसः परिणाहं तु विद्धि षड्त्रिंशदङ्गुलम्।
कक्षान्तर्वेष्टनं विद्धि पञ्चतालं सलोचनम्।।
विनाङ्गुलद्वयेनैव द्वे ताले द्विगुणीकृते।
यवत्रयसमायुक्तं विद्धि तत्कुक्षिवेष्टनम्।।
परिधिर्नाभिमध्ये तु त्रिता(लः?लं) सत्रिलोचनम्।
स षड्गोलकतन्मानं परिध्यर्थं कटेः स्मृतम्।।

इति।। 107।।

The head portion (of the idol) shall consist of the circumference of three tālas (proportionate system of measurement – palm of the hand as a module). The two spaces in between the arm-pit shall be five tālas and two angulas. The belly shall have a measure of four tāla minus thirteen yavas. The navel shall have the measure of three and a half tālas. The hip shall have four and a half tālas as circumference. (107)

जङ्घोरुबाहुयुगमध्यकराङ्गुलीषु
कार्या करीन्द्रकरवत् परिवृत्ततात्र।
कूर्माभता प्रपदयोर्जलजाभता च
कण्ठे कपोलतलयोर्मुकुराभता च।। 108।।

विमर्शिनी

जङ्घोरुबाहुयुगमध्यकराङ्गुलीषु जङ्घयोरूर्वोः बाहुद्वये मध्यप्रदेशे कराङ्गुलीषु च करीन्द्रकरवद् गजनासावत् परिवृत्तता वृत्ताकारता कार्या। प्रपदयोः कृर्माभता कूर्मसदृशता, कण्ठे जलजाभता शङ्खाकारता, कपोलयोर्मुकुराभता च कार्या।। 108।।

The limbs such as shanks, thighs, hands, middle portion (of the chest) and fingers may be shaped as circular emulating the trunk of an elephant. The upper part of the foot, the neck shall have the shape of a conch while the two cheeks shall resemble a mirror in shape. (108)

अत्रैकाङ्गुलसम्मितेन परिवेष्ट्योष्णीषपट्टेन के
कोटीरं मुकुटोज्ज्वलं विरचयेदष्टाङ्गुलैः सर्वतः।
द्वयष्टाभिर्धृतिसम्मितैर्दिनकरद्वन्द्वप्रमैर्वाङ्गुलै-
रुष्णीषोपरिभासमानमुकुटोपेतं किरीटं हरौ।। 109।।

विमर्शिनी

मुकुटलक्षणमाह–अत्रेति। अत्र के मूर्धनि एकाङ्गुलसम्मितेन उष्णीषपट्टेन परिवेष्ट्य सर्वतः सर्वदेवेषु अष्यङ्गुलैः सम्मितं मुकुटेज्ज्वलं मुकुटेनोज्ज्वलं कोटीरं जटबन्धं विरचयेत्। हरौ तु द्वयष्यभिः षोडशभिर्वा धृतिसम्मितैः अष्यदशभिर्वा दिनकरद्वन्द्वप्रमैः चतुर्विंशत्यङ्गुलैर्वा उष्णीषोपरिभासमानमुकुटोपेतम्

उष्णीषपट्टस्योपरिभागे शोभमानेन मुकुटेनोपेतं किरीटं विरचयेत्। तथा ब्रह्मरात्रे– "उष्णीषमङ्गुलं प्रोक्तम्" इति। नि[1]बन्धने–

"जटाबन्धोऽधिकः कार्यः सोऽप्यष्टाङ्गुलसम्मितः।"

इति। पद्धतौ–

"षोडशाङ्गुलमायामं सौवर्णमणिदीपितम्।"

मुरारौ–

मुखद्विगुणमध्यर्धं किरीटं कैश्चिदिष्यते।
षोडशाङ्गुलमित्याहुस्तस्मादधममेव तत्।।

इति।। 109।।

For all the deities there shall be a diadem on the head having a height of eight angulas and it shall be well decorated. For Viṣṇu it, could be sixteen, eighteen or even twenty four angulas in height shining with a crown. (109)

कुर्यात् किरीटं शिखरैः समेतं
त्रिपञ्चसप्तप्रमितैर्यथार्हम्।
अण्डोपमं वा कमलोपमं वा
छत्रोपमं वा कमठोपमं वा।। 110।।

विमर्शिनी

किरीटं तु त्रिपञ्चसप्तप्रमितैः त्रिभिः पञ्चभिः सप्तभिर्वा शिखरैः समेतं कुर्यात्। तद् अण्डोपमं वृत्ताकारं वा कमलोपमं वा छत्रोपमं वा कमठोपमं वा य[2]थार्हं यथायोग्यं कुर्यात्। तथा सात्त्वते–

त्रिपञ्चसप्तशिखरो मौलिरष्टकलोन्नतः।
निर्जटानां ललाटोर्ध्वं मकुटं वा सुशोभनम्।।

ब्रह्मरात्रे च–

चतुर्विधं किरीटान्तमस्मिंस्तन्त्रे मया श्रुतम्।
छत्राण्डपद्मकूर्माणां कुर्यादाकारमन्ततः।।

इति।। 110।।

The diadem shall have three, five or seven crown and resemble an egg, a lotus, an umbrella or a tortoise in shape. (110)

ग्रीवाद्यङ्घ्र्यवसानसूत्रितदशस्थानानि संवर्धिता
न्येकैकाङ्गुलतो यवैरथ वसूर्म्याम्नायसङ्ख्यैः क्रमात्।

---

1. 'किरीटस्तु ज 'क. पाठः
2. 'थायो' ख. पाठः

उष्णीषाद्यलकाक्षिनोग्रचरमं तद्द्वन्द्वहीना हनु-
दुर्गायामिति पङ्क्तितालपरिभिन्नायां समुक्तोन्मितिः।। 111।।

विमर्शिनी

अथ दुर्गामुद्दिश्य दशतालविधानाय नवतालबिम्बाद् विशेषकल्पनास्थितिमाह– **ग्रीवाद्यङ्घ्र्यवसानेति।** ग्रीवाद्यङ्घ्र्यवसानसूत्रितदशस्थानानि ग्रीवामारभ्य पादपर्यन्तं नवतालबिम्बोक्तक्रमेण सूत्रैः कल्पितानि दशस्थानानि। तत्र ग्रीवा प्रथमं स्थानं, ततो हृदन्तं द्वितीयं, ततो नाभ्यन्तं तृतीयं, ततो लिङ्गान्तं चतुर्थं, तत ऊरुमध्यसूत्रान्तं पञ्चमं, तत ऊर्वोरधस्सूत्रपर्यन्तं षष्ठं, ततो जान्वधस्सूत्रान्तं सप्तमं, ततो जङ्घामध्यसूत्रान्तमष्टमं, ततो जङ्घाया अधोगतसूत्रान्तं नवमं, ततः पादाग्रपर्यन्तं दशममित्युक्तानि दश स्थानानि एकैकाङ्गुलतः संवर्धितानि पूर्वकल्पितादेकैकाङ्गुलाधिकानि स्युरिति दशमस्य तालस्य दशसङ्ख्या अङ्गुलयो योजिताः। पुनर्द्वे एव शिष्टे। अथ वसूर्म्याम्नायसङ्ख्यैः अष्टाभिः षड्भिश्चतुर्भिश्च यवैः क्रमेण उष्णीषाद्यलकाक्षिनोग्रचरमम् उष्णीषाद्यलकान्तं, तदादिनेत्रान्तं, तदादिनासाग्रान्तं, त्रीणि स्थानानि योजनीयानि स्युरित्यष्टदशयवयोगाद् द्वयङ्गुलतो द्वियवाधिक्ये प्राप्ते तद्द्वन्द्वहीना द्वियवरहिता हनुः कपोलस्थली स्यादिति पङ्क्तितालपरिभिन्नायां दशतालविभक्तायां दुर्गायामुन्मितिः समुक्ता। तथाहुः–

मध्येन दशतालेन गौरीलक्ष्मीगिरां मतम्।
दुर्गायाश्चापि मातृणां मध्येनैव प्रकल्पयेत्।।
मध्येन दशतालेन स्त्रीमानं कथ्यतेऽधुना।
भागः कचान्त उष्णी(षस्त ?षात् त) स्मात् भागः
सषड्यवः।।
नेत्रान्तः स्यात् ततो नासापुटान्तः सचतुर्यवः।
भागः स्यादथ हन्वन्तो रामांशैस्तु सषड्यवैः।।
हनोर्भागस्तु कर्णान्तस्ततो हृन्नाभियोनयः।
पृथक् त्रयोदशांशैः स्युरूरू षड्विंशदङ्गुलैः।।
भागेन जानुस्तस्माच्च जङ्घे षड्विंशदङ्गुलैः।
भागेन पादौ च तलौ भागायामौ प्रकल्पयेत्।।

इति। तथा च काश्यपः–

सविंशच्छतभागेन स्त्रीमाने तु विभाजिते।
एकांशमङ्गुलं ख्यातं तदष्टांशं यवं भवेत्।।
उष्णीपोदयमेकांशं केशान्तं तु गुणाङ्गुलम्।
केशान्तादक्षिसूत्रान्तं सत्रिभागं गुणांशकम्।।
अक्षिसूत्रात् पुटान्तं तु सार्धवेदांशमिष्यते।
नासापुटात्तु हन्वन्तं सत्रिपादगुणांशकम्।।

तस्याधः कण्ठमानं तु चतुर्भागमुदाहृतम्।
(हिकादाहृतदा?एतस्माद्धृद)यान्तं च
हृदयान्नाभिसीमकम्।।
नाभ्या आयोनिपर्यन्तं समं त्रयोदशाङ्गुलम्।
ऊरुदीर्घं तु षड्विंशदङ्गुलं जानु युगांशकम्।।
ऊरुदीर्घसमं जङ्घादीर्घं पादतलं युगम्।।

इति।। 111।।

For an idol of the measure of ten tālas from the top portion of the neck upto the foot there shall be ten divisions (neck chest, navel, penis, the two halves of thighs, the two knee joints and tip of the feet) with increase of one angulas each. The length may be decided by increasing an angula each from that of an idol of nine measurements called Navatāla. Thereafter the measures shall be increased gradually from diadem to the tip of the cheek like eight, six four and two yavas. Thus the space between the tip of the locks upto the eyes and then upto the tip of the nose shall be calculated. A decrease of two yavas for the cheek shall be allowed. This measurement of ten tālas is applicable to an idol of Durgā of the same height. (111)

विस्तारः शिवशैलकैर्मुखगलेऽत्यष्ट्या द्विकक्षान्तरे
वक्षोजे नवभिः पृथक् च तदधो विश्वैः शिवैर्मध्यतः।
कृत्या श्रोणितले कटौ रवियुगेनोर्वोः सजानुद्वये
जङ्घायुङ्नलकेऽर्कशैलरसवेदैश्चाङ्गुलैः सम्मितैः।। 112।।

विमर्शिनी

दशतालबिम्बस्य विस्तारमाह–विस्तार इति। मुखगले मुखे गले च क्रमात् शिवशैलकैः एकादशभिः सप्तभिश्चाङ्गुलैः विस्तारः स्यात्। द्विकक्षान्तरे कक्षयोर्मध्यप्रदेशे अत्यष्ट्या सप्तदशाङ्गुलैर्विस्तारः। वक्षोजे स्तने नवभिरङ्गुलैः, तदधः वक्षोजाधोभागे विश्वैः त्रयोदशाङ्गुलैः, मध्यतो मध्यप्रदेशे शिवैरेकादशाङ्गुलैः, श्रोणितले जघनप्रदेशे कृत्या विंशत्यङ्गुलैः कटौ रवियुगेन चतुर्विंशत्यङ्गुलैः, ऊर्वोः सजानुद्वये जङ्घायुङ्नलके ऊर्वादिचतु[1]र्षु स्थानेषु क्रमाद् अर्कशैलरसवेदैः द्वादशभिः सप्तभिः षड्भिश्चतुर्भिरङ्गुलैर्विस्तारः। तथा च काश्यपः–

ग्रीवा सप्ताङ्गुलव्यासा रुद्रांशैर्मुखविस्तृतिः।
कक्षयोरन्तरव्यासौ भवेत् सप्तदशाङ्गुलैः।।
तदधोऽतिजगत्यंशैर्नन्दांशैः स्यात् प्रतिस्तनम्।
षड्यवव्यासनिम्ना स्यान्नाभिर्मध्यं ततस्तनु।।
रुद्रमात्रैस्तु विस्तारं रोमराज्या च शोभितम्।

1. 'तुः स्था' ख. पाठः

कटिर्द्वितालविस्तारा श्रोणी कृत्यङ्गुलैस्ततः।।
जानुव्यासः सप्तमात्रैरूर्वोर्व्यासस्तु तालतः।
नलकाततिर्वेदांशा जङ्घामध्यं रसाङ्गुलम्।।

इति।। 112।।

For face and neck portions a length of eleven or seven angulas may be prescribed. In between the two armpits there shall be seventeen angulas for the breast portions, nine angulas and below that thirteen angulas. The middle portion (of the body) eleven angulas, twenty for the hip and twenty four at the buttocks. The thighs the knees,, the shanks and the wrists shall have the measures of length respectively as twelve, seven, six and four angulas each. (112)

उत्कृत्याधिभुजं प्रकोर्परमनु द्वाभ्यां प्रकोष्ठे तले
धृत्या सप्तभिराततिर्युगशराङ्गेष्वर्णवैरङ्गुलैः।
अङ्गुष्ठादिषु तत्ततिर्नवनगाह्यद्यङ्गसङ्ख्यैर्यवै-
स्त्रीष्वश्वैर्मणिबन्धकोर्परभुजामूलेऽङ्गुलैर्विस्तृतिः।। 113।।

विमर्शिनी

उत्कृत्या षड्विंशत्यङ्गुलैः अधिभुजं भुजयोः आततिः दैर्घ्यं स्यात्। प्रकोर्परमनु प्रकोर्परयोः द्वाभ्यां द्व्यङ्गुलाभ्यां, प्रकोष्ठे धृत्या अष्यदशाङ्गुलैः तले पाणितलयोः सप्तभिरङ्गुलैराततिः स्यात्। अङ्गुष्ठादिष्वङ्गुलीषु क्रमाद् युगशराङ्गोष्वर्णवैः चतुर्भिः पञ्चभिः षड्भिः पञ्चभिः चतुर्भिश्चाङ्गुलैराततिः स्यात्। तत्ततिः तासामङ्गुलीनां ततिः नवनगाह्यद्यङ्गसंख्यैः क्रमेण नवभिः सप्तभिरष्टभिः सप्तभिः षड्भिश्च यवैः स्यात्। मणिबन्धकोर्परभुजामूले क्रमात् त्रीष्वश्वैः त्रिभिः पञ्चभिः सप्तभिश्चाङ्गुलैर्विस्तृतिः स्यात्। तथाचाहुः-

उत्कृत्यंशैर्भुजायामः कोर्परः स्यात् कलासमः।
धृत्यंशैस्तु प्रकोष्ठः स्यात् तलं सप्ताङ्गुलायतम्।।
वेदेष्वृतुशराम्नायैरायताङ्गुलयः क्रमात्।
नवर्षिवस्वृषिरसयवैरङ्गुलयस्तताः ।।
रामेषुषट्सप्तमात्रैर्मणिबन्धश्च कोर्परः।
बाहुमध्यं च मूलं च विस्तीर्णं स्यात् क्रमेण तु।।

इति।। 113।।

From the point of the arm upto the elbow there shall be a length of twenty six angulas and from the elbow upto the wrist the length shall be eighteen angulas. The palm should have a breadth of seven angulas and from the thumb upto the four fingers the measure shall be respectively four, five, six, five and four angulas. The breadth for the fingers from thumb

to the others shall be respectively nine, seven, eight, seven and six yavas. Similarly the breadth of wrist upto the arm pit including elbow the breadth shall be three, five and seven angulas (113)

तर्जन्यग्रिमयोर्युगैर्युगयवन्यूनैः पराङ्घ्र्यङ्गुलि-
ष्वायामोऽङ्गुलकैर्नृपाष्टसदलाद्ग्रद्ग्रङ्गसंख्यैर्यवैः ।
व्यासः सार्धयुगाङ्गुलैः स्तनसमुत्सेधस्त्रिभिश्चूचुके
व्यासोऽक्षे श्रुतिभिर्यवैर्ऋतुमितैर्नाभौ दृशाक्षोन्नतिः ।। 114 ।।

विमर्शिनी

तर्जन्यग्रिमयोः पादतर्जन्यङ्गुष्ठयोः युगैः चतुर्भिरङ्गुलकैरायामः स्यात्। पराङ्घ्र्यङ्गुलि[1]षु पादस्य परासु मध्यमानामिकाकनिष्ठासु क्रमाद् युगयवन्यूनैः चतुश्चतुर्यवहीनैः चतुरङ्गुलादर्धार्धाङ्गुलहीनैरायामः स्यात्। ज्येष्ठादीनां क्रमाद् नृपाष्टसदलाद्ग्रद्ग्रङ्गसंख्यैः षोडशभिरष्टभिरर्धान्वितसप्तभिः सप्तभिः षड्भिश्च यवैर्व्यासः स्यात्। सार्धयुगाङ्गुलैः अर्धाङ्गुलसहितचतुरङ्गुलैः स्तनसमुत्सेधः स्तनयोरुन्नतिः स्यात्। चूचुके त्रिभिरङ्गुलैर्व्यासः। अक्षे स्तनाग्रभागे श्रुतिभिः चतुर्भिर्यवैर्व्यासः। नाभौ ऋतुमितैः षड्यवैर्व्यासः। दृशा द्वाभ्यां यवाभ्यामक्षोन्नतिः स्यात्। तथाचाहुः-

तर्जन्यग्रिमयोर्दीर्घं चतुर्भागमुदाहृतम्।
सार्धत्रिभागं मध्या स्यात् त्रिभागं तदनामिका।।
सार्धद्विभागमानं तु कनिष्ठाङ्गुलदीर्घकम्।
द्विरष्टाष्टसार्धसप्तपातालैर्ऋतुभिर्यवैः ।।
अङ्गुष्ठादिकनिष्ठान्तं चरणाङ्गुलविस्तृतम्।
रामांशैश्चूचुकव्यासः सार्धभागोन्नतौ स्तनौ।।
स्तना(क्षमात्रं? क्षं) श्रुतिमानं स्याद् द्वियवः स्यात् तदुन्नतिः।।

इति ।। 114 ।।

The length of the thumb and forefinger of the feet could be four angulas each while for the rest of the three fingers could be half an angula less respectively (meaning three and a half, three and two and half angulas) The height of the breast could be four and a half angula, with a circumference of three angulas for the dark part in the centre called nipple of the breast the tip of which may be with four yavas in diameter. The navel shall be with six yavas in breadth. The height of the middle of the nipple of the should be two yavas. (114)

विघ्नेशं शरतालकैर्विरचयेत् त्र्यक्षं महेभाननं
गूढाभुग्रगलं स्थितं समुपविष्टं वातिपीनाङ्गकम्।

1. 'ली' ख. पाठः

उष्णीषान्मुखमेककेन सदलाभ्यां तालकाभ्यां ततः
कट्यन्तं चरणौ कराश्च करणीयाः सार्धतस्तालतः।। 115।।

विमर्शिनी

अथ गणपतिमुद्दिश्य पञ्चतालस्थितिमाह–विघ्नेशमिति। विघ्नेशं शरतालकैः पञ्चतालैः विरचयेत्। कीदृशं, त्र्यक्षम् अक्ष्णां त्रयेण युक्तं महेभाननं मत्तवारणेन्द्रसमानमुखं, गूढाभुग्नगलं गूढेन तिरोहितेन आभुग्नेन ईषद्वक्रितेन गलेन युक्तम्, अतिपीनाङ्गकम् अतिस्थूलकायं, स्थितं तिष्ठन्तं, वा समुपविष्टं सम्यगासीनं वा। उष्णीषाद् उष्णीषपट्टादारभ्य मुखं मुखमानम् एककेन तालेन, तत आरभ्य कट्यन्तमानं सदलाभ्यां तालाभ्याम् अर्धसहितेन तालद्वयेन चरणौ कराश्च सार्धतस्तालतः सार्धैकतालेन करणीयाः स्युः। तथाचाहुः–

विघ्नेशः पञ्चतालः स्यात् स्वासीनो वा स्थितो भवेत्।
उष्णीषाधोमुखं तालं सार्धतालायताः कराः।।
सार्धद्वितालं कण्ठाधोमानमाकटिसूत्रकम्।।
सार्धतालायतौ पादौ पीवरः सर्वतो भवेत्।।

इति।। 115।।

Vighneśa, the elephant faced god with three eyes and with slightly bent neck and huge body may be shaped either as sitting or standing form (In a five tāla measurement) one tāla is for shaping the face from the diadem and the next two and a half tāla is to be spent to shape the limbs from the face upto the middle portion ending with hip. The final one and a half tāla shall form hips legs and hands. (115).

श्रीमद्रत्नकिरीटकुण्डलयुगग्रैवेयहाराङ्गद–
श्रेणीकङ्कणसोपवीतरशनावासोङ्घ्रिभूषादिकम् ।
तत्तन्मूर्त्यनुरूपतोऽत्र रचयेत् स्वस्वायुधाद्युज्ज्वलं
श्लक्ष्णं दृष्टिमनोहरं विरचनादाक्ष्याद् यथालक्षणम्।। 116।।

विमर्शिनी

तन्मूर्तीनामालङ्कारं विशेषेण रचनीयमित्याह–श्रीमदिति।। श्रीमद्रत्नकिरीटकुण्डलयुगग्रैवेयहा–राङ्गदश्रेणीकङ्कणसोपवीतरशनावासोङ्घ्रिभूषदिकं श्रीमन्ति रत्नमयं किरीटं शिरोभूषणं तथा कुण्डलयुगं कर्णालङ्कारद्वयं तथा ग्रैवेयं ग्रीवाभूषणं तथा हारादिकमुरःस्थलभूषणं तथा अङ्गदश्रेणी भुजाभूषणावलिः कङ्कणं प्रकोष्ठभूषणं सोपवीतं ग्रीवागतोपवीतादिकं तथा रशनावस्त्रादिकं कटिभूषणं तथा मञ्जीराद्यङ्घ्रिभूषादिकं च तत्तन्मूर्त्यनुरूपतः स्वस्वायुधाद्युज्ज्वलं स्वस्वायुधैरप्यतिशयेनोज्ज्वलं श्लक्ष्णम् अपरुषं दृष्टिमनोहरं नेत्रमनसोः प्रसादकरं यथालक्षणं लक्षणादनपवृत्तं च विरचनादाक्ष्याद् निर्माणकौशलेन विरचयेत्।। 116।।

Diadem studded with lustrous jewels the two ear pendants, necklaces,

pearl strings, bracelets for the upper arms, bracelets for the wrists, secred thread, waist band, loin cloths, anklets and other movements shall be conceived according to the needs of the particular images (of deities). Suitable weapons are also to be made in a smooth and charming idol representing the beauty of execution (on the part of the architects.) (116)

पद्मं तालसमुच्छ्रयं द्विगुणविस्तारं च षोढा कृते
मूले पट्टमिलांशतो द्वितयतोऽस्याधस्तनाष्टच्छदम्।
अङ्घ्र्यूनप्रथमब्जमध्यमुपरिष्टादष्टपत्रं त्रिभि-
र्भागैः पट्टयुतं करोतु कमलेनामात्र पीतोच्छ्रयः।। 117।।

विमर्शिनी

पदाधस्तनपद्मलक्षणमाह–पद्ममिति। पद्मं तालसमुच्छ्रयं द्वादशाङ्गुलोच्चं द्विगुणविस्तारं च करोतु। षोढा कृते उत्सेधे षोढा विभक्ते सति मूले अधोभागे इलांशतः एकांशेन पट्टं वलयं करोतु। द्वितयो द्वयंशे अस्य पद्मस्याधस्तनाष्टच्छदम् अधोगताष्टपत्रम्, अब्जमध्यं पद्मस्य मध्यप्रदेशम् अङ्घ्र्यूनप्रथं स्वविस्तारात् पादोनविस्तारयुक्तम्, उपरिष्यत् त्रिभिर्भागैः पट्टयुतमष्टपत्रं करोतु। अत्र पीठोच्छ्रयः कमलेनामा उक्तपद्मेन सहैव। पद्मोत्सेधपीठोत्सेधे योजनीय इत्यर्थः। तथा च भास्करः–

अथ पद्मस्य तूत्सेधं मुखमानसमुच्छ्रयम्।
यावत्पद्मस्य तूत्सेधं षड्भागं च विधाय च।।
त्रिभागमूर्ध्वपद्मं स्यादधःपद्[1]म द्वियंशकम्।
शेषांशं पंद्मपट्टं स्यात् पीठमानसमाश्रितम्।।
पद्मस्य विस्तरो ज्ञेयो द्वितालस्त्रितालो वा (?)
पद्मविस्तारमेवं स्यात् त्रिभागो मध्यविस्तरः।।
अष्टपत्रैस्तु संयुक्तं वृत्तमेव विधीयते।

इति।। 117।।

Padmam (the lotus shaped seat) shall have a height of one tāla and height of two tālas. Dividing the height by six the first section is to be used for the first slab, two sections for shaping a lotus with eight leaves (or petals). In the center of the lotus shaped seat with three-fourth of a tāla two layers of petals may be shaped and three talas are to be used to form an eight petal led lotus above that. The height of the seat shall include those of the petals on the base portion. (117)

विंशत्या प्रतिमाङ्गुलैः प्रविततं वृन्ते तया सैकया
नालं सद्विक[2]यापिवाथ विततेरष्टाचलाङ्गांशकैः।

1. 'द्यस्यांश' ख पाठः,
2. 'त' मूलपाठः

अन्ते हीनवितानमारचयतु ब्रह्मोपलान्तायतं
तुर्याश्रं सकलेषु वैधसमिदं वृत्तं क्वचिच्चैश्वरम्।। 118।।

विमर्शिनी

नाललक्षणमाह–विंशत्येति। वृन्ते पद्ममूले विंशत्या वा सैकया विंशत्या वा सद्विकया विंशत्या वा प्रतिमाङ्गुलैः प्रतिमायास्तालवशात् कल्पितैरङ्गुलैः प्रविततं विस्तृतं नालमारचयतु। अथान्ते नालाग्रे वितते: मूलविस्तृतः अष्ट्यचलाङ्गांशकैः अष्टांशेन वा सप्तांशेन वा षडंशेन वा हीनवितानं रहितविस्तारं ब्रह्मोपलान्तायतं नपुंसकशिलापर्यन्तदैर्घ्ययुक्तं रचयतु। इदं नालं सकलेषु देवेषु वैधसं ब्रह्मदेवत्यं तुर्याश्रं, तथाच क्यचिद् वृत्तं चैश्वरं रुद्रदेवत्यं च। तथाच भास्करः–

पद्मनालस्य विस्तारं प्रतिमाङ्गुलेन चोच्यते।
द्वाविंशतिश्च अङ्गुल्य एकविंशाङ्गुलं भवेत्।
विंशाङ्गुलं तथैव स्यात् त्रिविधं नालविस्तरम्।।
नालमूलस्य तारेण[1] अग्रविस्ताररहीनता।
अष्टभागैकहीनं स्यात् सप्तभागैकहीनकम्।।
षड्भागस्यैकहीनं स्यात् त्रिविधं त्वग्रहीनकम्।

इति। तथाच मुरारिः–

तस्य नालं तु वृत्तं स्याच्चतुरश्रं तु वा भवेत्।
वृत्तं शिवात्मकं ब्राह्मं तथा स्याच्चतुरश्रकम्।।
रत्नन्यासस्पृगेव स्यान्नान्यथा नालमिष्यते।

इति।। 118।।

At the base of the lotus shaped seat there shall be a Nāla-a tubular shaped stem with a square shaped top portion with a measure of twenty, twenty-one or twenty two angulas in breadth and with a reduced top of one eighth, one seventh or one-sixth width. It should be long enough to hold the idol. This Nāla is presided over by Brahmā in respect of all deities. If it is round shaped then Śiva will be the presiding deity. (118)

लिङ्गानि सायककरादिपदोनिताश्वि–
हस्तान्तिमानि चरणांशविमु[2]क्तिक्लृप्त्या।
स्युर्वर्णिनां मुखभुजोरुपदोद्भवानां
पञ्चाग्निपावकजगत्परिसङ्ख्यकानि ।। 119।।

विमर्शिनी

बिम्बलक्षणमुक्त्वा लिङ्गलक्षणमाह–लिङ्गानीति। मुखभुजोरुपदोद्भवानां ब्रह्मणे मुखादिभ्यः

1. 'त्राग्र' क. पाठः,
2. 'युक्तक्लृ' मूलपाठः,

सम्भूतानां ब्राह्मणक्षत्रियवैश्यशूद्राणां वर्णि[1]नां क्रमेण चरणांशविमुक्तिक्लृप्त्या पादापादांशहीनक्रमेण सायककरादिपदोनिताश्विहस्तान्तिमानि पञ्चकरादिपादोनद्विहस्तावसानानि पञ्चाग्निपावकजवात्परिसङ्ख्यकानि पञ्चत्रित्रित्रिसङ्ख्यकानि लिङ्गानि स्यु। तत्र पञ्चकरपादोनपञ्चकरसार्धचतुष्करसपादचतुष्करचतुष्करमितानि पञ्च लिङ्गानि ब्राह्मणानां, पादोनचतुष्करसार्धत्रिकरसपादत्रिकरमितानि त्रीणि क्षत्रियाणां, त्रिकरपादोनत्रिकरसार्धद्विकरमितानि त्रीणि वैश्यानां, सपादद्विकरद्विकरपादोनद्विकरमितानि त्रीणि लिङ्गानि शूद्राणामिति विभागः। तथाच पाशुपते–

पञ्चहस्तादि विप्राणां ह्रासादेकैकपादतः।
लिङ्गं पञ्चविधं तद्वदन्येषां च त्रयं त्रयम्।।

इति।। 119।।

Lingas (idol of Siva with the shape of a Phallus) for worship of the four communities such as Brāhmins, Kṣatriyas, Vaiśyas and Śūdras, are presented as of five, three, three and three (fourteen altogether) and their measurements with a reduction of length of a quarter of one hasta. (The Brahmin will have 5, 4¾, 4 ½, 4¼ and 4 hastas. The Kṣatriyas will have 3¾, 3½ and 3¼. The Vaiśyas will have 3, 2¾ and 2½ hastas. The Śūdras are entitled to have idols of 2¼, and 2 and 1¾ hastas). (119)

अङ्घ्र्यंशकक्रमकृतह्रसनेन भूयो
द्वे चैकमप्यनुविलोमकुलोत्थयोः स्युः।
तान्युत्तरोत्तरकुलप्रभवेषु चानु-
लोम्यात् प्रकल्पयतु वैककरादिकानि।। 120।।

विमर्शिनी

भूयः पाशेनद्विकरादारभ्य अङ्घ्र्यंशकक्रमकृतह्रसनेन पादांशहीनक्लृप्त्या अनुविलोमकुलोत्थयोः अनुलोमजातस्य प्रतिलोमजातस्य च क्रमेण द्वे चैकमपि लिङ्गानि स्युः। तत्र सार्धैककरसपादैककरमिते द्वे लिङ्गे अनुलोमजातानाम्, एककरमेकमेव लिङ्गं प्रतिलोमजातानाम्। तान्येककरादिकानि लिङ्गानि उत्तरोत्तरकुलप्रभवेष्वानुलोम्याद् अनुलोमक्रमेण प्रकल्पयतु वा। तत्र ब्राह्मणानां सर्वाणि लिङ्गानि ग्राह्याणि। क्षत्रियाणां स्वानि, वैश्यानां विहितानि चेत्यादिं च कल्पयतु। तथा निबन्धने–

द्विकरान्तं च पञ्चादि विप्रादीनां क्रमात् स्मृतम्।
एकहस्तं तु यल्लिङ्गं प्रतिलोम(च?ज) मुच्यते।।

इति।। 120।।

Further for higher and lower caste an additional prescription for idols is given as of further two types with a reduction of the measures of a quarter of hastas. While Brāhmins are entitled to all types, other communities have to stick-on to the prescription. (120)

1. 'र्णा' क. पाठः

गर्भव्यासे विभक्ते स्मरशरनवनेत्रैस्त्रिपञ्चैकभागै-

र्लिङ्गानि त्रीणि तेषु त्रिषु गुणदलितेष्वेकभागैर्द्विभागैः।

द्वे द्वे तानि स्युरेवं नव चरणयुतं तत्समं पादहीनं

द्वाराद् द्वयेकांशकाभ्यामपि गुणदलिते तत्र पञ्चेतराणि।। 121।।

विमर्शिनी

गर्भगृहप्रमाणेनापि लिङ्गान्याह–**गर्भव्यास** इति। स्मरशरनवनेत्रैः पञ्चभिर्नवभिर्द्वाभ्यां च गर्भव्यासे गर्भगृहव्यासे विभक्ते सति क्रमात् त्रिपञ्चैकभागैश्च त्रीणि लिङ्गानि। तेषु त्रिषु लिङ्गेषु गुणदलितेषु त्रित्रि[1]भक्तेषु एकभागैर्द्विभागैश्च इति तत्र तत्र द्वे द्वे। एवं तानि लिङ्गानि नव स्युः। पुनर्द्वारवशादपि लिङ्गान्याह चरणयुतमित्यादिश्लोकशेषेण। तत्समं द्वारसमं चरणयुतं द्वारात् पादांशाधिकं पादहीनं द्वारात् पादांशहीनं, गुणदलिते त्रिभक्ते तत्र द्वारे द्वयेकांशकाभ्यामपि द्वयंशेनैकांशेन च इतीतराण्यपि पञ्च लिङ्गानि स्युः। तथा[2]च पाशुपते–

भूतरन्ध्राष्टभेदेन गर्भगेहे विभाजिते।
वह्निभूतचतुर्भिस्तु कल्पितं त्रिविधं विदुः।

क्रियासारे च–

त्रितयं विभजेत् त्रिधा।
एकस्य द्वितयं चैकमेकस्यैवं नवोदितम्।।

पुनरपि पाशुपते–

पादाधिकं समस्तं च पादोनं गुणभाजिते।
द्वाभ्यामेकेन निर्दिष्टं द्वारमानेन पञ्चधा।।

इति।। 121।।

To fix the height of the idol the circumference of the Sanctum is to be divided by five, nine or two, the resultant measure may be fixed as the height of the idol. Each of these three measures may be divided by three and then one or two of the figure may also be fixed on the length of the idol. Thus based on the circumference there could be idols of nine types in length.

Similarly the length of the idol can be decided based on the breadth of the door of the sanctum. By adding one fourth of the breadth, by accepting an equal size, by reducing one fourth of the breadth and by taking two third of the breadth one could finalize the idol in five different sizes. (121)

लिङ्गं सर्वसमं समोन्मितिविभक्तांशत्रयं तत् पुनः

स्वायत्या समनाहकं यदि समांशं चाथ वृद्ध्युत्तरम्।

---

1. 'त्रिर्भक्ते'
2. 'था पा' क. पाठः

भक्ते भानुयुजोच्छ्रयेऽद्रिवसुनन्दांशै(स्तु) मूलादिषू-
पेतं दिग्दलिते त्रिलोकयुगसङ्ख्याभिस्तथेशाधिकम्।। 122।।

विमर्शिनी

इति लिङ्गायाममुक्त्वा तेषां विभागक्लृप्तिमाह–लिङ्गमिति। समोन्मितिविभक्तांशत्रयं समेनोन्मानेन दैर्घ्येण विभक्तमंशत्रयं चतुरश्राष्ट्यश्रवृत्तस्वरूपं यद्यल्लिङ्गं तत् सर्वसममिति प्रसिद्धम्। तल्लिङ्गं पुनः स्वायत्या स्वस्वभावादैर्घ्येण समनाहकं यदि भवति, तर्हि तत् समांशमिति प्रसिद्धम्। अथ भानुयुजा चतुर्विंशतिधा उच्छ्रये भक्ते सति मूलादिषु चतुरश्रादिषु अद्रिवसुनन्दांशैरुपेतं लिङ्गं वृद्ध्युत्तरम्। तथा दिग्दलिते दशधा विभक्ते मूलादिषु त्रिलोकयुगसंख्याभिः त्रित्रिचतुर्भागैरुपेतमीशाधिकमिति प्रसिद्धम्। तथा निबन्धने–

अग्रे मूले च मध्ये च प्रमाणं सर्वतः समम्।
तद्धि सर्वसमं नाम बहुधान्यधनावहम्।।
लिङ्गं त्रिधा विभक्तं स्यात् परिणाहसमायतम्।
समांशमिति विज्ञेयं नैतत् सूक्ष्मतरं भवेत्।।
उत्सेधमाने लिङ्गस्य चतुर्विंशतिभाजिते।
सप्ताष्टनवभागैस्तु क्रमेणोर्ध्[1]वविवर्धितम्।।
वर्धमानमिति ज्ञेयं सर्वसम्पत्समृद्धिदम्।
उत्सेधं दशधा भङ्क्त्वा मूलमध्यं त्रिभिस्त्रिभिः।।
चतुर्भागयुतं चोर्ध्वं कुर्यादेवं शिवाधिकम्।।

इति।। 122।।

The total length of the idol could be equally divided to for, caturasram square, Astasram-with eight corners or vrtta-circular in shape. Such an idol is designated as 'Sarvasama'. If that idol of Sarvasama variety is made with an equal circumference or breadth it is then called Samāmśa. If the height of the idol is divided by twentyfour and Caturasra, Aṣṭāsra and Vṛtta are further divided by seven, eight or nine, one could make the type called Vrddhyuttara. Another type called Īśādhika could be formed by dividing the height of the idol by this and three types are formed by taking three, three and four parts and (again into Caturasra, Aṣṭāsra and Vṛtta) from the base onwards it is called "Īśādhika" (122)

आयामे दलिते दिवाकरयुजाभीष्टे ऽष्टभिर्विस्तृतिः
कार्यांशैरथ पञ्चपञ्चयवयुक्तैः सप्तभिः पञ्चभिः।
स्वायामार्कयुगांशत[2] द्द्विरसनांशः स्याद् यवः केवलैः
पञ्चांशैरपि गर्भगेहनवमांशेनापि सा[3] स्मर्यते।। 123।।

1. 'ध्र्व' क. पाठः,
2. 'कीद',
3. 'स स्मार्य' मूलपाठः,

विमर्शिनी

आयामस्य क्लृप्तिमुक्त्वा विस्तारक्लृप्तिमाह–**आयाम** इति। अभीष्टे आयामे दिवाकरयुजा चतुर्विंशतिधा दलिते विभक्ते अष्टभिः विस्मृतिः कार्या। अथात्रैव पञ्चपञ्चयवयुक्तैः इति। पञ्चयवयुक्तैः सप्तभिश्च पञ्चयवयुक्तैः पञ्चभिश्चांशैरिति द्विधा च विस्तृतिः कार्या। तन्मध्ये तत्रत्यं यवलक्षणमप्याह स्वायामार्कयुगांशतद्द्विरसनांशः स्याद् यव इति। स्वायामस्य स्वदैर्घ्यस्यार्कयुगांशः चतुर्विंशत्यंशो यस्तस्य द्विरसनांशोऽष्टांशश्च यः स यवः स्यात्। पुनः पूर्वोक्तशेषत्वेन विस्तारान्तरमाह–केवलैरित्यादिना। आयामे चतुर्विंशतिधा कृते केवलैः पञ्चांशैरपि विस्तृतिः कार्या। अपिशब्देन ब्राह्मणादिवर्णिनामेव ते चत्वारो विस्तारा इति सूचितम्। गर्भगेह[1]नवमांशेनापि सा विस्तृतिः स्मर्यते क्रियत इत्यर्थः। तथाचाहुः–

चतुर्विंशतिभक्तस्य विस्तारोऽष्टभिरंशकैः।
यवपञ्चकसंयुक्तैः सप्तभिः पञ्चभिस्तथा।।
केवलैः पञ्चभिश्चैवं विस्तारो ब्राह्मणादिषु।
चतुर्विंशतिभागं तु पुनर्भङ्त्वाष्टधांशकैः।।
यवस्थाने च संयुक्तैः कल्पयेद् द्विकरादिकम्।

इति।

"गर्भत्रिभागं पीठं स्याल्लिङ्गं पीठत्रिभागकम्।"

इति च।। 123।।

To fix the width of the idol the height already fixed may be divided by twentyfour and eight of the resultant measures may be accepted. It is also possible to fix the width by taking seven parts and adding five or seven yavas. In this connection Yava is taken as one eight of a measure arrived by dividing the idol into twenty-four. It is also possible to fix the width of the idol by taking five measures out of twenty four sections or by fixing one-ninth of the width of the door of the sanctum sanctorum. (123)

यथोचितातानवितानयुक्तां शिलां त्रिधोक्तक्रमतो विभज्य।
मूलं युगाश्रं विदधीत मध्यमष्टाश्रकं वृत्तमयं परं च।। 124।।

विमर्शिनी

एवं कल्पितायाः शिलायाश्चतुरश्रादिरूपेण त्रैविध्यकल्पनमाह–**यथोचितातानेति**। यथोचितातानवितानयुक्तां यथोचिताभ्यामातानविताना्भ्यां युक्तां शिलामुक्तक्रमतस्त्रिधा विभज्य मूलं युगा[2]श्रं चतुरश्रं मध्यम् अष्टाश्रकं परं वृत्तमयं च विदधीत। तथा निबन्धने–

आयामं तु द्विधा कृत्वा मूलमध्याग्रतः क्रमात्।
तुर्याश्राष्टाश्रवृत्तानि भूपीठव्योमगानि तु।।

1. 'हे' क. पाठः
2. 'श्रयुक्तं च' ख. पाठः

इति।। 124।।

By dividing the stone selected for idol making into three the base portion maybe shaped as Caturasra (square.) middle to form the lower part of the seat, middle portion as Aṣṭāsra with eight corners and the top portion shaped into circular form. (124)

तुर्याश्रे सुसमे प्रसार्य भुजसूत्रं कर्णसूत्राध्वना
तस्यान्ताहितलक्ष्मसु प्रतिदिशं द्वे द्वे भुजासूत्रके।
कृत्वा तद्द्वयमध्यसंस्थितचतुष्कोणानि संशोध्य सा-
ध्वष्टाश्रं विदधीत वृत्तमपि तद्द्व्यष्टाश्रकादिक्रमात्।। 125।।

विमर्शिनी

तत्करणविधानमाह–**तुर्याश्र** इति। सुसमे तुर्याश्रे दीर्घचतुरश्रीकृते तत्र शिलाप्रकाण्डे भुजसूत्रं दिक्सूत्रं कर्णसूत्राध्वना कोणसूत्रमार्गेण प्रसार्य तस्य सूत्रस्य अन्ताहितलक्ष्मसु अवसाने सम्पादितलाञ्छनेषु प्रतिदिशं चतसृष्वपि दिक्षु द्वे द्वे भुजासूत्रे दृक्सूत्रे कृत्वा तद्द्वयमध्यसंस्थितचतुष्कोणानि तस्य भुजासूत्रद्वयस्य मध्यस्थितानि चत्वारि कोणानि संशोध्य त्यक्त्वा साधु यथावदष्ट्यश्रं विदधीत। तद्द्व्यष्ट्यश्रकादिक्रमात्। तत्पुनरष्ट्यश्रं तथैव प्रोक्तक्रमेण षोडशाश्रं तद्द्वात्रिंशदश्रमित्यादिक्रमेण वृत्तमपि विदधीत। तथाच मञ्जर्यां–

निक्षिप्य कर्णेषु च बाहुसूत्रं तस्यावसाने विनिधाय सूत्रम्।
कोणेषु सर्वत्र च निम्नमेतदष्टाश्रकं वृत्तमथैवमेवम्।।

इति।। 125।।

By selecting a flat oblong square slab of stone marks may be made upto the size of the idol to be shaped and a diagonal line may be drawn through south-west and north-west corner as also side line in a particular measure on all the four sides of the slab these twin lines are to be marked, by joining these lines one could make Catuasra, Aṣṭāsra and Vṛtta. (by this process Ṣoḍaśāsra can also be formed by joining together the two Aṣṭāsras.(one could mark 16 asra, 32 asra are also 64 asra as the need arises in addition to the basic Aṣṭāsras. (125)

विस्तारं शिवलिङ्गमूर्ध्नि वसुनन्दादित्यरुद्रांशकं
कृत्वात्र क्रमशो[1] विशोध्य परितो द्व्येकद्विलोकांशकान्।
कृत्वात्यष्टितिथिप्रकृत्यतिधृतिख्यातांशयुक्तं क्रमात्
पूजाभागमिहोक्तभागमुपरिष्टाच्छोधयेत् वर्णिषु।। 126।।

विमर्शिनी

शिरोवर्तनविधिमाह–**विस्तारमिति**। अत्र शिवलिङ्गमूर्ध्नि वसुनन्दादित्यरुद्रांशकम् अष्टनव-

1. 'तो' मूलपाठः,

द्वादशैकादशभागं कृत्वा क्रमशो द्वयोकद्विलोकांशकान् द्व्येकद्वित्रिभागान् परितो विशोध्य पुनः पूजाभागं वृत्तभागमपि तथात्यष्टितिथिप्रकृत्यतिधृतिख्यातांशयुक्तं सप्तदश-पञ्चदशैकविंशत्येकोनविंशत्यंशयुक्तं। कृत्वा क्रमादिहापि उक्तभागं द्वयेकद्वित्रिभागमुपरिष्यद् वर्णिषु ब्राह्मणादिषु शोधयेत्। तथाच पाशुपते-

वसुरन्ध्रऋतुद्वन्द्वरुद्रभेदे तु विस्तृते।
द्व्येकद्वित्रितयांशैस्तु वर्तयेल्लिङ्गमस्तकम्।।
सप्तपञ्चमहारुद्रनवयुक्तैर्दशांशकैः ।
पूजाभागगते दैर्घ्ये[1] विभक्ते कल्पयेत् क्रमात्।।
अंशैः पूर्वोदितैरेव त्रपुषीफलमस्तकम्।
छत्राभं बालचन्द्राभं कुक्कुटाण्डनिभं क्रमात्।।

इति।। 126।।

The width at the top of the Sivalinga may be divided by eight, nine, twelve or eleven as may be desired and omitting the portions of two, one,two and three. The portions accepted for ritualisatic worship shall be further divided by seventeen,. fifteen, twentyone or nineteen the idol may be finalized getting reduced according to the prescription for the four castes like Brahmins etc. (This shortening is to effect a round shape). (126)

तन्मस्तके नवविभागतया विभक्ते
भागं विशोध्य परितः शिवभागदैर्ध्यम्।
द्वात्रिंशदंशकतया परिकल्प्य भागा-
नेकैकशो द्विजमुखेषु विशोधयेद्वा।। 127।।

विमर्शिनी

पक्षान्तरमाश्रित्य शिरोवर्तनमाह-तन्मस्तक इति। तन्मस्तके तस्योर्ध्वभागविस्तारे नवविभागतया विभक्ते सति परितो भागमेकांशं विशोध्य शिवभागदैर्घ्यं पूजाभागायामं द्वात्रिंशदशतया परिकल्प्य द्विजमुखेषु ब्राह्मणादिषु भागानेकैकशः एकैकाधिक्येन शोधयेद्वा। तथाच क्रियासारे-

विस्तारं नवधा भङ्क्त्वा बाह्यभागं विशोधयेत्।
आयामं शिवभागस्य समं भङ्क्त्वाष्टधान्तिमम्।।
वेदैर्विभज्य वर्णानामेकैकं तु विशोधयेत्।

इति।। 127।।

By dividing the breadth at the top of the Śivalinga into nine a portion may be reduced by cutting away. The part of the idol used for worship which is long and round shaped may be divided by thirtyfour from which respective portion may be reduced for the use of the Brāhmins and other communities. (127)

1. 'र्घ्य' ख. पाठः

कुर्वीत त्रपुषीफलाग्रसदृशं छत्रोपमं मस्तकं
बालेन्द्वाकृति कुक्कुटाण्डसदृशं विप्रादिवर्णक्रमात्।
भेदाः सर्वसमांशकप्रभृतयो नाहप्रभेदान्विता-
स्तेऽप्येतत्क्रमतः स्युरेतदनुलोमाङ्गीकृतिश्चेष्यते।। 128।।

विमर्शिनी

तत्र वर्णवशाद् भेदमाह—कुर्वीतेति। विप्रादिवर्णक्रमात् त्रपुषीफलाग्रसदृशं, त्रपुषीफलं तस्याग्राभं छत्रोपमं छत्राकारं बालेन्द्वाकृति बालेन्दुसदृशं कुक्कुटाण्डसदृशं च मस्तकं कुर्वीत। नाहप्रभेदान्विता नाहप्रभेदेन युक्ताः सर्वसमांशकप्रभृतयो भेदाश्च एतत्क्र(मात्?मतः) विप्रादिक्रमात् स्युः। एतदनुलोमाङ्गीकृतिश्च विप्रादीनामनुलोमाङ्गीकारश्चेष्यते। तथाच मञ्जर्या—

लिङ्गस्य त्रपूषीफलाग्रसदृशं विप्रस्य कुर्याच्छिर-
श्छत्राभं धरणीपतेः शशिकलाकारं विशः कल्पयेत्।
शूद्राणामपि कुक्कुटाण्डसदृशं सर्वं समस्तस्य वा
वर्णस्य प्रविधेयमेषु बहुधा भेदाः पृथक् संस्थिताः।।

इत्यादि।। 128।।

Idol of Śiva shall have its top for the respective four castes from Brāhmin onwards differently as that of the fruit of Trapuṣi (a type of pumpkin) as an umbrella, as a crescent and that of an egg of fowl. There may be difference in size or circumference, again according to the heirarchy of the caste. (128)

भङ्क्त्वा त्रेधा शिवांशायतिमुपरितनं भागमुत्क्षिप्य शिष्टं
कृत्वाष्टांशं समास्फाल्य च विषुवसिरासूत्रमत्राष्टमांशे।
लिङ्गाभं लक्ष्म साधारणमथ यवरूपं महेभेक्षणाभं
व्रीह्याकारं च बद्धाञ्जलिनिभमपि विप्रादिक्लृप्त्या लिखेद्वा।। 129।।

विमर्शिनी

लक्ष(णाः णो)द्धारमाह—भङ्क्त्वेति। शिवांशायतिं पूजाभागदैर्घ्यं त्रेधा भङ्क्त्वा उपरितनम् ऊर्ध्वगतं भागमुत्क्षिप्य ऊर्ध्वं त्यक्त्वा शिष्टमष्यंशं कृत्वा विषुवसिरासूत्रं मध्यनाडीसूत्रं चास्फाल्य अत्राष्यमांशे लिङ्गाभं शिवलिङ्गाभं लक्ष्म वर्णिनां साधारणं लिखेत्। अथ विप्रादिक्लृप्त्या यवरूपं, यवाकारं महेभेक्षणाभं गजनयननिभं व्रीह्याकारं बद्धाञ्जलिंनिभमपि लिखेद्वा। तथाचाहुः—

पूजाभागं त्रिधा भङ्क्त्वा मुक्त्वा भागमथान्तिमम्।
कण्ठादिमौलिपर्यन्तं मुखं तस्मिन् व्यवस्थितम्।।
शेषाभ्यां लक्षणोद्धारं लिङ्गाकारं समं भवेत्।
तद्ब्रह्मसूत्रमुल्लिख्य विप्राणां तु यवाकृति।।
नृपतेरिभनेत्राभं व्रीह्याकारं स्मृतं विशः।
शूद्रस्याञ्जलिमुद्राभं सर्वेषां सर्वमेव वा।।

इति ।। 129 ।।

By dividing the portion used for worship which is long and round shaped into three leaving away the uppear part of the rest of the portions may be divided by eight. A central line may be drawn at that portion covering the whole of the idol. Thereafter from bottom to the top of the idol specific marks may be made for the respective caste for identification. These marks may be like that of a yava, eye of an elephant rice or folded hands. (129)

रेखां लक्षणमूलतो मणिमयीं मूलांशयुग्मान्तिमं
रेखे लक्षणपार्श्वजे च परिलिख्येष्वंशमध्यावधि।
ऊर्ध्वाग्रैर्ऋतुसूत्रकैस्त्रिदशकोष्ठानि प्रकल्प्याथ ते
तत्कर्णक्रमतः परागवनिपङ्क्त्यन्ते मिथो योजयेत् ।। 130 ।।

विमर्शिनी

मणिरेखापार्श्वरेखयोर्लक्ष[1]णमाह–रेखामिति। लक्षणमूलतः लक्षणोद्धारादधोभागे मणिमयीं मणिसंज्ञां मध्यस्थां रेखां मूलांशयुग्मान्तिमं मूलांशयुग्मपर्यन्तं परिलिख्य लक्षणपार्श्वजे लक्षणस्य पार्श्वगते च रेखे इष्वंशमध्यावधि पञ्चमांशमध्यपर्यन्तं परिलिख्य ऊर्ध्वाग्रैर्ऋतुसूत्रकैः षट्सूत्रैः त्रिदशकोष्ठानि त्रिंशत्पदानि प्रकल्प्याथ (ते) तत्कर्णक्रमतः तत्कोणक्रमेण पराक् पृष्ठभागे अवनिपङ्क्त्यन्ते एए(व?क)पङ्क्त्यवसाने मिथोऽन्योन्यं योजयेत्। तथाच मञ्जर्याम्–

भङ्क्त्वा तं च तथाष्टधा सममधस्त्यक्त्वा च भागद्वयं
रेखां तां मणिसंज्ञिकीं परिलिखेत् पार्श्वद्वये भ्रामयेत्।
रेखे पञ्चमभागमध्यनिहिते पृष्ठे तथा संगति-
श्चान्त्यांशोपरि मध्यमाश्च ललिता रेखा न निम्नोन्नताः।।

इति ।। 130 ।।

From the above mentioned distinguishing mark a line called Maṇirekhā may be drawn from bottom to the top of the second section. On the right side another such line may be drawn upto the middle of the fifth section. These two lines may be drawn downwards. Upward lines may be drawn upto the fifth portion which shall be divided by six to form thirty squares. These are to be joined behind the idol at the first line again according to the respective four castes. (130)

विस्तारोऽधमलक्षणे द्वियवतस्तत्पादवृद्ध्योर्ध्वतो
रेखा ताद्दलतो मिता मणिमयी तत्सामिक्लृप्से परे।
रेखा दक्षिणवाममध्यरचिता ब्रह्माजितानङ्गजि-
द्देवत्याश्चतुरश्रकादिशिवलिङ्गांशाश्च तद्देवताः ।। 131 ।।

---

1. 'क्ष्माह' ख. पाठः

विमर्शिनी

तत्र अधमलक्षणे अधमलिङ्गस्य लक्षणे द्वियवतो विस्तारः स्यात्। ऊर्ध्वतो मध्यमोत्तमयोस्तत्पादवृद्ध्या विस्तारः। मणिमयी रेखा तद्दलतः तदर्धेन मिता। परे अन्ये पार्श्वरेखे तत्सामिक्लृप्ते तदर्धमिते च स्याताम्। दक्षिणवाममध्यरचिता रेखाः क्रमाद् ब्रह्माजितानङ्गजिद्देवत्याः ब्रह्मविष्णुरुद्रदेवताः। चतुरश्रादिशिवलिङ्गांशाश्च चतुरश्राष्टश्रवृत्तांशाश्च तद्देवताः स्यु। तथाहुः–

यवद्वयमथारभ्य वर्धयेल्लिङ्गमानतः।
लक्षणस्य तु विस्तारं पादेन द्विगुणान्ततः।।
विस्तारं मणिरेखायाः खातं चापि यवादितः।
ब्रह्मसूत्रस्य यत् खातं तदर्धं पक्षसूत्रयोः।।

इति। तथाच–

दक्षिणायां चतुर्मुखः।
वामाख्यायां महाविष्णुर्मध्यगा[1]यां महेश्वरः।।

इति। मञ्जर्यां च–

"विष्णुस्थाणुपितामहाश्च विहिता भागत्रये देवताः"

इति।। 131।।

For the Adhama, lowest type of idol, the breadth shall be two yavas. For the higher one Madhyama a quarter is increased and the measurement shall be five and a quarter while for the ultimate the highest idol it should be two and a half yavas. The line called Maṇirekhā shall be half of the breadth already mentioned while the width of the side line it shall be half of the Maṇirekhā. The deities for the right left and middle lines shall be Brahmā, Viṣṇu and Maheśwara. For the other types of idols like Caturasra and Vrtta these are the respective deities. (131)

बिम्बे बिम्बोच्छ्रयसमसमायामविस्तारयुक्तं
स्वव्यासार्धोच्छ्रयपरिगतं च प्रकुर्वीत पीठम्।
लिङ्गव्यासत्रिगुणितवितत्यातातिभ्यां समेतं
लिङ्गे स्वाष्टाश्रकसमसमुच्छ्रायि तुर्यश्ररूपम्।। 132।।

विमर्शिनी

एवं बिम्बस्य लिङ्गस्य च लक्षणमुक्त्वा तयोः पीठलक्षणमाह–बिम्ब इति। बि (म्ब?म्बे) स्थाप्ये बिम्बोच्छ्रयसमसमायामविस्तारयुक्तं बिम्बोच्छ्रयसमेनायामेन विस्तारेण च युक्तं, स्वव्यासार्धोच्छ्रयपरिगतं स्वस्य व्यासस्यार्धमात्रेणोच्छ्रयेण युक्तं पीठं प्रकुर्वीत। लिङ्गे स्थाप्ये लिङ्गव्यासत्रिगुणितवितत्यातातिभ्यां

---
1. 'मा' ख. पाठः

लिङ्गविस्तारत्रिगुणिताभ्यां विस्तारदीर्घाभ्यां समेतं, स्वाष्यश्रकसमसमुच्छ्रायि लिङ्गस्याष्यश्रेण समानोच्छ्रयं तुर्यश्ररूपं चतुरश्राकारं पीठं प्रकुर्वीत। तथाच संहितायां–

बिम्बोच्चार्धं तु पीठोच्चमायामो बिम्बमानतः।।

इति। "लोहजस्यैकयोनिजम्। शैलमन्यत्र विज्ञेयम्" इति च। तथाच पाशुपते–

लिङ्गत्रिगुणविस्तीर्णां विष्णुभागसमोच्छ्रयाम्।
लिङ्गायामप्रविस्तीर्णां कल्पयेद् वाथ पीठिकाम्।।

इति।। 132।।

For the idol there shall be an altar of an equal length and breadth. The height shall be half the measure of the circumference The seat shall have the same length and breadth as that of the idol and height shall be half the same measurement for the idol the seat shall be three times of the circumference and it shall be square in shape. (132)

द्व्यष्टांशे शिवपीठके क्षितिशराब्धीन्द्वंशकैः पादुकं
प्रादध्याज्जगतीं तथा कुमुदकं तत्पट्टिकां च क्रमात्।
अंशाभ्यां गलमंशकेन गलपट्टिं जागतेब्ध्यंशिनि
ग्रीवान्तेऽर्धयुतद्वयेन वलभिं शिष्टेन पट्टिं सदा।। 133।।

विमर्शिनी

तत्र शिवलिङ्गपीठस्य क्लृप्तिमाह–द्व्यष्टांश इति। शिवपीठके द्व्यष्टांशे षोडशांशीकृते सति क्षितिशराब्धीन्द्वंशकैः एकपञ्चचतुरेकांशकै[1]: क्रमात् पादुकं जगतीं तथा कुमुदकं तत्पट्टिकां च प्रादध्यात्। अंशाभ्यामंशद्वयेन गलं च एकेनांशेन गलपट्टिं च। जागते अब्ध्यंशिनि चतुर्भिरंशैरेव जगतीमादध्या(द्यभि?त्)। ग्रीवान्ते अर्धयुतद्वयेन वलभिं सदापि पक्षद्वयेऽपि शिष्टेन पट्टिं च। तथाचाहुः–

उत्सेधं विभजेत् तस्याः समं षोडशधा क्रमात्।
एकेन पादुकं कुर्यात् पञ्चभिर्जगतीमपि।।
कुमुदं कुमुदपट्टिं च वैदेरेकांशकेन तु।
द्वाभ्यामेकेन कर्तव्यं गलं च गलपट्टिकाम्।।
अंशद्वयेन सुदृढं कल्पयेन्मुखपट्टिकाःम्।

तथाच मञ्जर्याम्–

उत्सेधं वसुयुग्मकेन विभजेत् पीठस्य चैकांशतः
कुर्यात् पादुकमंशकैश्च जगतीं वेदैश्चतुर्भिः क्रमात्।
एकांशेन विलोचनेन कुमुदं चालिङ्गपट्टिं गलं
सार्धांशद्वितयेन रम्यवलभिं शिष्टेन पट्टिं खनेत्।।

1. 'येनापि' ख. पाठः

इति।। 133।।

The height of the altar of Śivaliṅga may be divided by sixteen and there shall be Pāduka, Jagati, Kumuda and Kumudapaṭi using one, five, four and one parts respectively. Two portions may be used for Gala, one for Galapaṭi and the balance of four portions for Paṭi. Under the Gala a Valabha (rafter) shall be made using two parts. The balance is to be used for simple Paṭi which shall have one and a half portion. (133)

पीठे मुक्त्वा प्रतिष्ठावटमुदधिविभागं विधायावशिष्टं
द्वाभ्यामाधाय पाथोवलयमुदकधात्रीं विधायांशकेन।
शिष्टेनाधाय तद्वेष्टनमथ तदुदक् त्र्यंशविस्तारदैर्घ्ये
कुर्यादष्टाश्रमांशांश ककृतजलकुल्यं कृशाग्रं प्रनालम्।। 134।।

विमर्शिनी

पीठस्योपरिगतविभागमाह–पीठ इति। पीठे प्रतिष्ठावटं मुक्त्वा अवशिष्टमुदधि–विभागं चतुर्धा च विधाय द्वाभ्यामन्तर्गताभ्यामंशाभ्यां पाथोवलयं जलमार्गाकारं वलयमाधाय एकेनांशेनोदकधात्रीं शिष्टेन तद्वेष्टनं चाधायाथ तदुदग्भागे त्र्यंशविस्तारदैर्घ्ये पीठस्य त्रिभागेन विस्तारदैर्घ्ययुक्तमाशांशकृतजलकुल्यं दशांशेन कृतजलकुल्यमष्टाश्रं क्रमात् कृशाग्रं प्रनालं कुर्यात्। तथाचाहुः–

लिङ्गावटं त्रियंशेन शिष्टं कृत्वाष्टधा क्रमात्।
वलयं वारिमार्गस्य वेदैः खातं तदर्थतः।।
खातस्य पार्श्वयोः कुर्याद् द्वाभ्यां द्वाभ्यां तु मेखलाम्।
प्रनालमुत्तरे कुर्याद् विस्तारायामत[1]ः समम्।।
त्रिभागेन तु पीठस्य कृत्वाष्टाश्रं समन्ततः।
तद्दशांशेन खातं स्यात् किञ्चिदग्रे तनूकृतम्।।
तरङ्गमूलपार्श्वे तु जगत्यां चो[2]र्ध्वतोऽर्पयेत्।
षोडशांशेन गमनं पीठमध्यादथैशगम्।।

इति।। 134।।

Leaving the part in which idol is to be installed in the centre of the altar rest of the width shall be divided into two which are to be used as a drain for water. A part may be used to form border around and a small drain to ooze water on the northern side of the altar. One-tenth of the breadth is to form the channel and an octagonal drain is to be made with a tapering end. (134)

---

1. 'तत्सम ',
2. 'वर्धतो' क. पाठः

बिम्बे नपुंसकशिलां निजनालमूल-
विस्तारतोऽधिचरणांशदलांशतानाम्।
द्विघ्नप्रथां च विदधीत निजप्रथार्ध-
पादोनतत्समसमुच्छ्रयसम्प्रपन्नाम् ॥ 135 ॥

विमर्शिनी

बिम्बविषये नपुंसकशिलालक्षणमाह–बिम्ब इति। बिम्बे बिम्बविषये निजनालमूलविस्तारतः निजबिम्बनालस्य मूलभागविस्ताराद् अधिचरणांशदलांशतानां पादाधिक्येन वार्धाधिक्येन वा विस्तारेण युक्तां, द्विघ्नप्रथां नालमूलविस्ताराद् द्विगुणितविस्तारयुक्तां वा, तथा निजप्रथार्थपादोनतत्समसमुच्छ्रयसंप्रपन्नां निजविस्तारार्धेन वा पादोनेन वा तत्समेन वा समुच्छ्रयेण युक्तां नपुंसकशिलां विदधीत। तथाचाहुः–

पादशैलप्रमाणतः।
पादाथिकमथाध्यर्धं द्विगुणं वा सविस्तरम्॥
विस्तारार्धोच्छ्रयं कुर्यात् पादोनं वा विधीयते।
विस्तारतः समं वापि त्रिविधं च तदुच्छ्रयम्॥

इति॥ 135॥

While shaping the idol a pit is to be made in the altar which shall be double or one and a half size of the stem. A Napumsakaśilā the stone of the neutral variety is to be made into which the stem is to be inserted and which shall have half the breadth or one third of it with the same height. (135)

भङ्क्त्वा त्रिधाङ्घ्रिदृषदुच्छ्रयमेकमंशं
पीठे द्विभागमुपवेशयतूर्वरायाम्।
द्व्येकार्धिताङ्गुलिमितं खनतूत्तमादि
बह्माश्ममूर्ध्न्युचितनालनिवेशनाय॥ 136 ॥

विमर्शिनी

पुनः अङ्घ्रिदृषदुच्छ्रयं नपुंसकशिलोत्सेधं त्रिधा भङ्क्त्वा एकमंशं पीठे द्विभागमुर्वरायां भूमौ च उपवेशयतु। ब्रह्माश्ममूर्ध्नि नपुंसकशिलोपरिभागे उत्तमादिक्रमेण द्व्येकार्धिताङ्गुलिमितं द्वाभ्यामेकेन अर्धाङ्गुलेन वा मितम् उचितनालनिवेशनाय तत्र योग्यस्य नालस्य निवेशनाय खनतु च॥ 136॥

Dividing the height of the Napumsakaśilā, a portion be put in the altar and two portion in the earth so as to enable one to stand on the altar. A pit to enable the idol to be fixed may be made either two angles, one angle or half an angle as the case may be. (136)

लिङ्गायामसमो नपुंसकशिलाव्यासो वरिष्ठोऽवरः
पूजांशद्विगुणस्तदन्तरमितावष्टांशितायां क्रमात्।
अंशद्व्यधमध्यमादिकविधिर्व्यासार्धतोऽङ्घ्र्यन्तिम-
श्चोत्सेधश्च तथात्र लिङ्गविनिवेशार्हश्च कार्योऽवटः॥ 137 ॥

विमर्शिनी

अथ लिङ्गविषये नपुंसकशिलालक्षणमाह–लिङ्गायामेति। लिङ्गायामसमः लिङ्गस्य दैर्घ्येण समो नपुंसकशिलाव्यासः नपुंसकशिलाया विस्तारो वरिष्ठ उत्तमः, पूजांशद्विगुणः अवरः अधमः, तदन्तरमितौ तथोरन्तरगतायां मितौ अष्टांशितायां क्रमादंशद्व्या अंशांशवर्धनेन अधममध्यमादिकविधिः अधमाधमाद्युत्तमोत्तमपर्यन्तस्य विधिः। तथाच (स?स्व) व्यासार्धतो व्यासार्धमारभ्य अङ्घ्र्यन्तिमः पादांशपर्यन्त उत्सेधश्च। तस्मिन्नपि तथाष्टांशिते तथा उत्तमोत्तमावधमाधमपर्यन्तविधिश्च। तथात्र लिङ्गविनिवेशार्हः लिङ्गविनिवेशनायां योग्योऽवटश्च कार्यः। तथाच गुरुदेवः–

लिङ्गायामसमव्यासा श्रेष्ठा ब्रह्मशिला स्मृता।
पूजांशद्विगुणा नीचा तयोर्मध्येऽष्टभागिके।।
प्राग्वन्नव प्रकाराः स्युः शुभा ब्रह्मशिलाः स्मृताः।
स्वव्यासार्धेन ता मुख्या नीचा पादांशतो घना।।
तयोर्मध्येऽष्टधां भक्ते घनाद् ब्रह्मशिला नव।।

इति।। 137।।

It is better to fix the breadth of the Napumsakaśilā equal to the height of the Śivalinga. The stone which is double the breadth of the Śivalinga is improper. It is better to select a Madhyama measure in between the Uttama and Adhama. A suitable pit to hold the idol on the altar is to be made by proper calculation. (137)

सकले सति मूलबिम्बके निगमांशोन्मिति कर्मबिम्बकम्।
सकलाकृति निष्कलेऽपि वा स्थितमासीनमुत प्रकल्पयेत्।। 138।।

विमर्शिनी

विम्बविषये कौतुकलक्षणमाह–सकल इति। मूलबिम्बे सकले सावयवे सति निगमांशोन्मिति चतुर्थांशेनोन्मि[1]तं मानं यथा भवति तथा कर्मणि बिम्बकौतुकं कल्पयेत्। निष्कले निरवयवे सकलाकृति सावयवत्वेनैव स्थितं स्थिते मूलबि(म्ब?म्बे)स्थितम् आसीनमुत आसीनं वा प्रकल्पयेत्। आसीने चोभयथा प्रकल्पयेत्। निगमांशोन्मितीत्येतदुपलक्षणम्। अन्यथा च ग्रन्थान्तरे विधानात्, तथा दर्शनाच्च। तथाहि–

महति प्रतिमायामे तिथिभक्ते मधुद्विषः।
अग्न्याद्यद्य्रन्तिमैरंशैर्बलिबिम्बं प्रकल्पयेत्।।
स्वायामपञ्चषड्भागैः कर्मार्चाष्टांशितेऽथवा।
अब्ध्याशुगरसाद्य्रंशैरल्पे महति वा भवेत्।।

इति। तथाच–

---

1. 'न्मानं' ख. पाठः

बिम्बदीर्घनृपभाजितेंऽशकैर्वेदभूतरसपर्वतैस्तथा ।
अङ्गुलैश्च भवति स्वयोनिजैः कर्मबिम्बमितिरच्युतार्ययोः ।।

इति। रत्नावल्याम् – "अथ कर्मार्चाप्रमाणम्। यथा मूलार्चा, कर्मार्चापि तथैव कार्या। स्थाने स्थितमासीनं वा कारयेत्। अन्यकर्मार्चाः स्थिता एव कुर्यात्। महाबेरत्रिभागैकभागमुत्तमम्। कर्मार्चाप्रतिमोच्छ्रयं नवभागं कृत्वैकभागमपोह्य शेषं त्रिभागं कृत्वा एकभागं मध्यममि" त्यादि।। 138 ।।

If the main idol has got details such as limbs another smaller idol without details is to be made. The main idol (called Mūlabimba) could have details; it could be made in sitting or standing position. This is applicable to the plain idol also. (138)

आयामेन शिवांशकस्य रचयेन्नाहेन वा सम्मितं
व्यासेनापि च मन्त्रलिङ्गविषये तत् कर्मबिम्बं शिवे।
भङ्क्त्वा षोदशधा षुनस्त्रयमिदं रुद्राङ्कशैलाशुगा-
ग्न्यंशैर्वाधिकमूनितं च कुहचित् कुर्यात् तदौचित्यतः।। 139 ।।

विमर्शिनी

लिङ्गविषये कर्मबिम्बमानमाह–आयामेनेति। मन्त्रलिङ्गविषये शिवांशकस्य वृत्तांशकस्यायामेन वा तस्य नाहेन वा तस्य व्यासेन वापि सम्मितं कर्मविम्बं रचयेत्। कुहचित् पुनरिदं त्रयं षोडशधा भङ्क्त्वा रुद्राङ्कशैलाशुगाग्न्यंशैः एकादशनवसप्तपञ्चत्र्यंशैरधिकं कुहचिदूनितं वा तदौचित्यतः कुर्यात्।। 139 ।।

The Arcanābimba (the idol used for practical purposes like taking out and offering worship) should be moulded in proportion to the Mantraliṅga (the idol consecrated and fixed firmly to altar with rites of installation) The length of the Mantrabimba, its circumference or breadth may be taken into consideration for the portable Arcanābimba. The proportion may be eleven, nine, seven, five or three in relation to the main idol. Here the proportion may be increased or decreased as applicable to the region or direction. (139)

शिखिविशिखसुषिरभक्ते मूलगृहे मूललिङ्गे च।
नेत्राग्निभूतभागैर्बालग्रहं बाललिङ्गं च।। 140 ।।

विमर्शिनी

निष्क्रमणार्थमल्पगेहाल्पबिम्बयोः प्रमाणमाह–शिखीति। मूलप्रासादे मूललिङ्गे च त्रिभिः पञ्चभिर्नवभिर्वा भक्ते क्रमेण द्वाभ्यां त्रिभिः पञ्चभिर्वा बालालयमल्पबिम्बं च कुर्यात्।। 140 ।।

The main shrine and the main idol may be taken into account when a temporary shrine or temporary idol is made. The proportion may be two, three or five. (140)

इति तन्त्रसमुच्चये द्वितीयः पटलो दर्शितदेवधिष्ण्यलक्ष्मा।
परिमण्डपबिम्बलिङ्गपीठादिकक्लृप्त्युक्तिसमन्वितः समाप्तः।। 141।।

विमर्शिनी

पटलमुपसंहरति–इति द्वितीयः पटलः समाप्तः। दर्शितदेवधिष्ण्यलक्ष्मा प्रतिपादितप्रासादलक्षणेन युक्तः। परिमण्डपबिम्बलिङ्गपीठादिकक्लृप्त्युक्तिसमन्वितः अन्तहारादिबिम्बलिङ्गादिक्लृप्तिवचनेन युक्तश्च।। 141।।

Thus the second Paṭala of Tantrasamuccaya dealing with sanctum sanctorum, pavilion, idols, altar stones and specifications has come to an end. (141)

इति तन्त्रसमुच्चयविमर्शिन्यां द्वितीयः पटलः।।



अथ तृतीयः पटलः



कुर्यात् प्रागधिवासकर्मदिवसान्मित्राङ्कसङ्ख्ये दिने
शैलेषुप्रमितेऽथ[1]वाधिगतयामायां शुभायां निशि।
प्रत्यग्द्वारि सुरालयोदगुपक्लृप्ते संवृते मण्डपे
मन्त्री तन्तुकुशस्त्रगादिकृतसंस्कारेऽङ्कुरारोपणम्।। 1।।

विमर्शिनी

अतीतपटलेन प्रासादप्रतिमादिसम्पादनमभिधाय सम्प्रति प्रतिष्ठाकर्मणः प्राक्कर्त्तव्यबीजावापादिकं ब्रूते–कुर्यादिति। अधिवासकर्मदिवसात् प्राक्। यद्यपि प्रतिष्ठाकर्मणः प्रागिति वक्तव्यम्

"अष्टमेऽह्नि प्रतिष्ठायाः प्राक् कुर्यादङ्कुरार्पणम्"

इत्याद्यागमेषूक्तत्वात्। तथापि बीजाङ्कुराणामधिवासकर्मण्येव विनियोग इत्यभिप्रेत्य तथोक्तम्। अधिवासकर्मदिवसः प्रतिष्ठाया दिवसात् पूर्वेद्युरेव। तस्मात् प्राक्। मित्राङ्कसङ्ख्ये मित्रा द्वादश अङ्का नव तत्सङ्ख्ये वा। शैलेषुप्रमिते शैलाः सप्त इषवः पञ्च तत्सङ्ख्ये वा दिने अधिगतयामायां प्राप्तैकयामायां शुभायां निर्दोषायां निशि सुरालयोदगुपक्लृप्ते देवालयस्योदग्भागकल्पिते प्रत्यग्द्वारि पश्चिमभागग[2]तद्वारे संवृते सम्यगाच्छादिते तन्तुकुशस्त्रगादिकृतसंस्कारे तन्तुकुशस्त्रगादिभिः कृतसंस्कारे। आदिशब्देन मुष्ट्या[3]दिभिः स्थलशुद्धिर्विवक्षिता। मण्डपे अङ्कुरारोपणं कुर्यात्। मन्त्रीति, स्थलशुद्ध्यादौ मन्त्रं कर्म च जानन्त्यिर्थः।। 1।।

विवरणम्

अथाधिवासदिनपूर्वदिनेषु कर्तव्यं सर्वं वदन् प्रथममधिवासशेषतया मङ्गलाङ्कुरारोपणमाह–कुर्यात् प्रागिति। अधिवासकर्मदिवसान् प्राङ्मित्राङ्कसङ्ख्ये दिने निशि सुरालयोदगुपक्लृप्ते मण्डपेऽङ्कुरारोपणं कुर्यादित्यन्वयः। उत्तममध्यमाद्यभिप्रायेण मित्राङ्कादिदिवससङ्ख्याविकल्पः। कर्तुरनुरूपपरिग्रहाद्यर्थो वा। [4]अधिगतयामायां निशीति। तद्रात्रावपि प्रथमयामेऽतीते इत्यर्थः। शुभायामिति विष्ट्यादिराहित्यमुक्तम्। प्रत्यग्द्वारीत्यनेनैव देवालयोदग्भागेऽपि प्राग्भाग एवेति लभ्यते। तदुक्तम् 'मध्यसूत्रात् पुरो भवेदि'ति, 'ईशानसोमयोर्मध्य' इति च। संवृत इति। समन्तादाच्छादिते। मन्त्रीति स्नानतन्मन्त्रसकलीकरणादिकमुक्तम्।

---

1. 'पि'
2. 'कृ' ख. पाठः,
3. 'ख्या' क. पाठः,
4. 'अथवातिगतयामायाम्' इति विवरणरीत्या पाठः

तन्तुकुशस्रगादिकृतसंस्कार इति। परिमण्डप एव संवृते स्थले सति मुष्ट्यादिभिः स्थलशुद्धिमात्रं स्यात्। पृथङ्मण्डपे तु यथोक्तरूपे सति भाविमण्डपसंस्काररीत्या त्रिगुणितसूत्रदर्भमालापरिकलनं द्वारदेश एवैकतोरणध्वजस्थापनं मुष्ट्यादिभिः स्थलशोधनं च कार्यम्।।1।।

Twelve or nine days before the fixed day of installation or seven or five days before, in an auspicious night after the passage of seven and a half Nāḍikas (=a nāḍika means 24 minutes) a pavilion may be erected towards the northen side of the intended sanctum facing towards the west. It should be properly fortified by covering with clothes and threads including garlands. After clearing the area with fist and fingers the preceptor shall sow the seeds (in an action called Aṅkurāropaṇam (moistening the paddy etc. to germinate). (1)

क्षेत्रे वारिधिवर्गकोष्ठसुविचित्रे शालिदर्भाग्रकैः
पीठानि प्रविधाय तेषु विनिदध्यात् पालिकाः षोडश।
अस्त्राप्क्षालितवर्मसूत्रक[1]लिता दूर्वादिदीप्ता लस-
त्कूर्चा मृत्सिकताकरीषरजसा पूर्णा हुताशादितः।।2।।

विमर्शिनी

तद्विधानमाह–क्षेत्र इत्यादिभिः। वारिधिवर्गकोष्ठसुविविते वारिधयश्चत्वारः तेषां वर्गाः षोडश तत्सङ्ख्यैः पदैर्विचित्रिते क्षेत्रे शालिदर्भाग्रकैः शालिभिः दर्भाग्रैश्च पीठानि प्रविधाय तेषु पीठेषु अस्त्राप्क्षालितवर्मसूत्रकलिता अस्त्रमन्त्रेण अप्भिः क्षालिताः कवचमन्त्रेण त्रिगुणसूत्रेण बद्धाः दूर्वादिदीप्ताः दूर्वादर्भपल्लवैः शोभिताः मृत्सिकताकरीषरजसा मृद्भिर्वालुकाभिः करीषरजोभिश्चोत्तरोत्तरं पूर्णाः लसत्कूर्चाः शोभनकूर्चैश्च युक्ताः षोडश पालिकाः हुताशादितः अग्निकोणमारभ्य निदध्यात्। अयं भावःदक्षिणपङ्क्तौ पूर्वादिपश्चिमान्तं तदुत्तरपङ्क्तौ पश्चिमादिपूर्वान्तं तस्या अप्युत्तरपङ्क्तौ पूर्वादिपश्चिमान्तं सर्वोत्तरङ्क्तौ पश्चिमादिपूर्वान्तमिति।।2।।

विवरणम्

क्षेत्रे वारिधिवर्गकोष्ठसुविचित्र इति। वर्गो नाम समद्विधातः वारिधीनां चतुर्णां वर्ग एकचतुरश्रतया षोडशकोष्ठानि यत्र तद्वारिधिवर्गकोष्ठं क्षेत्रं यद्वा वारिधिभिर्वर्गा यत्र कोष्ठेष्विति समासः। प्रागग्रैरुदगग्रैश्च षट्षट्सूत्रैः पञ्चवर्गात्मकं क्षेत्रं विधाय तत्र मध्यमपुटेन प्रागग्रामुदगग्रां च वीथीं विमृज्यादिति भावः। प्रतिकोष्ठं शुक्लरक्तरजोविकिरणेन स्वस्तिकादिकं वा सुविचित्रं भवति। पीठानीति प्रतिकोष्ठं पीठविरचनमुक्तम्। हुताशादितो विनिदध्यादिति सम्बन्धः। सर्वदक्षिणपङ्क्तौ प्रागादिपश्चिमान्तं तदनन्तरपङ्क्तौ पश्चिमादिप्रागन्तम्, एवमुत्तरपङ्क्त्योरपीति भावः। वीथीपक्षे प्रतिखण्डं वाग्न्यादीशान्तत्वं स्यात्। दूर्वादिदीप्ता इति शिरीषाङ्कुराश्वत्थस्तबकादिग्रहणम्। तैरलङ्करणमेतदुक्तम्। प्रणव एवेह कूर्चन्यासे मृदादिपूरणे निधाने च मन्त्रः मन्त्र्यङ्कुरारोपणं कुर्यादित्येवैतदर्थमपि भवति। लसत्कूर्चा इति प्रत्येकं तद्वदनेषु ह्रस्वोत्कूर्चन्यास उक्तः। पूर्णा इति क्रमेणोत्तरोत्तरं पूरिता इति भावः। पालिकानां

1. 'रचिता' क. पाठः

दर्भाद्यलङ्करणानन्तरं गन्धालेपनं सन्धूपनमपि प्रणवेन कार्यम्। यद्यप्येतत् सर्वं पीठपूजानन्तरमुचितं किंतु सौकर्यार्थमिदानीं क्रियते। यद्वा परिकर्मिणो व्यापारोऽयमभिप्रेतः। पीठपूजानन्तरं तु तथाकल्पनया भाव्यम्। यतो वक्ष्यति–

"पीठं प्रपूज्य परिकल्पितसांस्क्रियासु"

इति।। 2।।

In a diagram with the shape of Swastika provided with sixteen columns, paddy may be spread over which kuśa grass are to be strewn. In such altar shaped columns sixteen Pālikas (pots) filled with mud, soil, manure, charcoal etc, and decorated with fresh threads of cloth, blades of grass and twigs of mango and fig trees, should be placed in a particular order. These should be sprinkled with water purified with the chanting of Astramantra. (2)

अस्त्रस्वमन्त्रजलदुग्धसमाप्लुतानि
बीजानि तत्र पुरतो विनिधाय मन्त्री।
इष्टाम्बिकेयकृतनान्द्यभिधानकर्मा
पुण्याहमाचरतु मूर्तिधरैरुपेतः।। 3।।

विमर्शिनी

एवं पालिकासादनमुक्त्वा बीजसादनादिकमाह–अस्त्रेति। मन्त्री मन्त्रविशेषज्ञो गुरुः अस्त्रस्वमन्त्रजलदुग्धसमाप्लुतानि अस्त्रेण स्वमन्त्रेण च क्रमात् जलेन दुग्धेन च क्षालितानि बीजानि तत्र पुरतो विनिधाय इष्टाम्बिकेयकृतनान्द्यभिधानकर्मा भूत्वा इष्ट आम्बिकेयो गणपतिर्येन कृतं नान्द्यभिधानं कर्म व येन सः, नान्द्यभिधानकं नान्दीमुखं, मूर्तिधरैरुपेतः मूर्तिपालैः सह मङ्गलाङ्कुरदेवताः प्रीयन्तां प्रीयन्तां मङ्गलाङ्कुरदेवताः इति विशेषयुक्तं पुण्याहमाचरतु। अत्र पुण्याहकाले बीजानां पालिकानां च प्रोक्षणमवगन्तव्यम्।। 3।।

विवरणम्

अस्त्रस्वमन्त्रजलदुग्धसमाप्लुतानीति। पूर्वं सुदर्शनादिस्वास्त्रेण ततः स्वमन्त्रेण 'मूलं प्रक्षालनेऽणुरखिलेष्वि' त्यादिवक्ष्यमाणेन (जलेन) दुग्धेन च समाप्लुतानि। इह जलेन क्षालनपूर्वकं आप्लावनं समाप्लावनं क्षीरेण त्वाशु गुणवदङ्कुरोत्पत्त्युचिततयाप्लावनं समाप्लावनम्। बीजानि तत्र पुरतो विनिधायेति। स्वपुरतः स्थण्डिले दर्भान् विकीर्य नानापात्रेष्वेकपात्रे वा यथायोगं निधानमुक्तम्। मन्त्रीति। नान्दीमुखपुण्याहयोर्मन्त्रविशेषविदित्यर्थः। इष्टाम्बिकेयः कृतनान्द्यभिधानकर्मा चेति समासः। गणपतिमिष्ट्वा नान्दीमुखं च कृत्वेत्यर्थः। प्रायश्चित्तपूर्वकं नान्दीमुखमिष्यते। मन्त्रस्तु तत्र प्रसिद्ध एव। ओं बीजाङ्कुरदेवताः प्रीयन्तामित्येवं पुण्याहे मन्त्रः ब्रह्माद्याश्च वक्ष्यमाणास्ता देवताः।। 3।।

After drawing Swastika with powders and chanting the Astramantra prescribed for the particular deity the seeds washed in milk and kept in a jar may be put into the various sanctified pots. For this the preceptor should purify himself by bath and chant "puṇyāha" mantra to the accompaniment

of gift to the people around. The chanting should mean that "may the deities presiding over the seeds be pleased." (3)

पीठं प्रपूज्य परिकल्पितसंस्क्रियासु
विष्णुं स्वनाममनुनार्हतु पालिकासु।
बीजेषु तत्तदधिपांश्च पृथक्स्थितेषु
सम्मिश्रितेषु यजतामथवौषधीशम्।। 4।।

विमर्शिनी

पीठं प्रपूज्य परिकल्पितसंस्क्रियासु कृतशोषणादिक्रियासु पालिकासु विष्णुं स्वनाममनुना 'ओं विष्णवे नम' इति मन्त्रेण अर्हतु अर्चयतु। पृथक्स्थितेषु बीजेषु तत्तदधिपांश्चार्हतु। अथवा सम्मिश्रितेषु युक्तेषु बीजेषु ओषधीशं सोमं 'सों सोमाय नम' इति मन्त्रेण यजताम्।। 4।।

विवरणम्

परिकल्पितसंस्क्रियास्विति शोषणादि सर्वमुक्तम्। पालिकासु विष्णुं स्वनाममनुनार्हत्विति। मन्त्रीत्येतदिहापि योजनीयम्। स्वनाममनुर्वैष्णवः षडक्षरो निजनाममन्त्र एव वा। पालिकासु पृथग्वा समुदायतो वा पूजनम्। पृथक्स्थितेषु बीजेषु तत्तदधिपांश्चेति। तत्तदधिदेवताः स्वनाममन्त्रैरर्चयेदित्यर्थः। शोषणादि तु बीजेष्वपि समानम्। सम्मिश्रितेष्विति। यद्येकपात्र एव सम्मिश्रितानि स्युस्तदा तस्मिन् बीजौघे सोमं स्वनाममनुना पूजयेदित्यर्थः। यद्वा पूर्वं पृथग् ब्रह्मादीन् पूजयित्वा पुनर्मिश्रयित्वा सोमपूजाप्यनेनोक्ता। यदुक्तम्–'द्रव्याण्येतानि पात्रेषु कृत्वे'त्यादि, 'एकस्मिन्नेव पात्रेऽथ सर्वाण्येतानि निक्षिपेदि'त्यादि चेति।। 4।।

Worship is to be accorded to the pots as well as to the seeds sown and Viṣṇu may be invoked with the mantra containing his name (Viṣṇave namaḥ) After the proper propitiation of the respective deities consecrated in the seeds, the moon who is the deity of medicine may be worshipped (for which his name is to be mentioned in the mantra invoked) (4)

ब्रह्मार्च्योऽधियवं मुरारिरधिमुद्गं सर्षपेष्वीश्वरो
निष्पावेषु मरुत् प्रियङ्गुषु गुहो माषेष्वमर्त्याधिपः।
खल्वेष्वग्निरिनोऽधिशाल्यधितिलं प्रेताधिभू राजमा-
षाख्येष्वप्पतिराढकीषु च रमा श्यामेषु सोमः क्रमात्।। 5।।

विमर्शिनी

पृथक्स्थितेषु बीजेष्वर्चनार्थं तद्देवतामाह–ब्रह्मार्च्य इति। अधियवं यवेषु ब्रह्मार्च्यः, अधिमुद्गे मुद्गेषु मुरारि विष्णुः, सर्षपेष्वीश्वरो रुद्रः, निष्पावेषु मरुद् वायुः, प्रियङ्गुषु गुहः स्कन्दः, माषेषु अमर्त्याधिपः इन्द्रः, खल्वेष्वग्निः, अधिशालि शालिषु इनः सूर्यः, अधितिलं तिलेषु प्रेताधिभूः यमः, राजमाषेष्वप्पतिर्वरुणः, आढकीषु रमा श्रीः, श्यामेषु सोमश्च। तेषां क्रमाच्चतुर्थीनमोन्तानि स्वस्वनामान्येव मन्त्राः। बीजानां पृथगर्चनेऽपि सम्मिश्रितेषु बीजेषु सोमार्चनं कर्तव्यम्।। 5।।

विवरणम्

बीजानां पृथगधिदेवतास्तदा च तेषां क्रममपि दर्शयति–ब्रह्मार्च्योऽधियवमिति। सप्तम्यर्थेऽव्ययीभाव इति बोद्धव्यम्। मुरारिर्विष्णुः। ईश्वरो रुद्रः। मरुद्वायुः। अमर्त्याधिप इन्द्रः। इनस्सूर्यः। प्रेताधिभूर्यमः। अप्पतिर्वरुणः। रमा श्रीः। क्रमादिति। मूलतन्त्रेषु नानाक्रमदर्शनादयं क्रम इहाश्रित इति ज्ञेयम्।। 5।।

The respective deities related to the various seeds are to be involved as follows. On yava, Brahman, on mudga (kidney bean) Murāri, on sarṣapa (mustard) Siva, on Niṣpāva (Cajanus indicus)the god of winds, on Priyaṅgu (long pepper or panicum Italicum) the god Subrahmaṇya; on Masa (Phaseolous radiatus) god Indra, on Khalva (horse gram) the deity Agni, on sali (paddy) Aditya; on Tila (Sesamum) Yama; on Rājamāṣa (green gram) lord Varuṇa, on Āḍhaki (a variety of gram) goddess Śree and on Śyāmā (Panicum miliaceum) the deity of Soma-moon(is to be worshipped. (5)

एतानि बीजानि समाहितात्मा क्रमेण पात्रेषु पवित्रपाणिः।
नदत्सु वाद्येषु वपेत् तदुक्तमन्त्रेण वह्न्यादिशिवावसानम्।। 6।।

विमर्शिनी

अर्चितानां बीजानां वापमाह–एतानीति। गुरुः पवित्रपाणिः समाहितात्मा च भूत्वा वाद्येषु नदन्त्सु सत्सु एतानि बीजानि पात्रेषु स्थापितासु पालिकासु तदुक्तमन्त्रेण[1] तत्र वापस्योक्तमन्त्रेण वह्न्यादिशिवावसानं पूर्वप्रोक्तेन क्रमेण वपेत्।। 6।।

विवरणम्

एतानि बीजानीति। पृथक्स्थितानि वा सम्मिश्रितानि वेति भावः। समाहितात्मेति। ... ... क्रमेण पात्रेषु वपेदित्यन्वयः। पृथक्स्थितपक्षे तेषामेकैकपालिकास्वपि वह्न्यादिशिवान्ततयावस्थानं यथा स्यात् तथा वपनं कार्यमिति ज्ञेयम्। यथा यवांस्तावत् तत्तत्पालिकास्वग्न्युद्देशे वपन्नग्न्यादिशिवान्तं क्रमेण पालिकासूप्त्वा ततो मुद्गांस्तत्तत्पालिकासूप्तयवानन्तरपश्चिमोद्देशे वपन्नग्न्यादिशिवान्तं पालिकासु वपेदित्यादि। सम्मिश्रितपक्षे तु बीजौघस्यैवाग्न्यादीशान्तं पालिकासु वाप इति। पवित्रपाणिरिति। प्रादेशमात्रदर्भयुगलरूपमेतत् पवित्रम्। कराञ्जलिना च वपनं कार्यम्।। 6।।

These seeds are to be sown by presenting with concentration and purified hand. There should be the accompaniment of musical instruments while the priest shall chant mantras related to Agni ending with that of Īśa (6)

तानि प्रोक्षतु तत्तदागमसमुक्तेनाणुना सादरं
पाथोभिः कुशकूर्चचर्चितकरो गन्धक्षपामेदुरैः।
देवं तत्र ततोऽभिवाह्य सकलीकृत्योपहारान् क्रमाद्
दत्त्वा स्नानविधौ समुक्षतु तथापोह्यादितन्मन्त्रतः।। 7।।

1. 'ण वा' क. पाठः

विमर्शिनी

वापानन्तरं प्रोक्षणादिकमाह–तानीति। कुशकुर्चचर्चितकरः दर्भमयेन कूर्चेनालङ्कृतकरो गुरुः तानि बीजानि गन्धाक्षपामेदुरैः अष्टागन्धरजनीचूर्णमिलितैः पाथोभिः जलैः तत्तदागमसमुक्तेन तेषु तेष्वागमेषु प्रोक्षणार्थमुक्तेन (अणुना) मन्त्रेण सादरं प्रोक्षतु। ततस्तत्र देवमभिवाह्य सकलीकृत्योपहारान् क्रमाद् दत्त्वा स्नानविधौ स्नानकाले आपोह्यादितन्मन्त्रतः आपोहिष्ठादिप्रोक्षणमन्त्रैः तथा पूर्वोक्तप्रकारेण प्रोक्षतु च।।7।।

विवरणम्

तत्तदागमसमुक्तेनेति। शिवे गायत्र्या मूलेन वेत्यादि सूचितम्। सादरमित्युप्तबीजानामक्षोभः प्ररोहानुगुणतेत्यादि यथा स्यात् तथा प्रोक्षणार्थमुक्तम्। कुशकूर्चचर्चितकरो दर्भकूर्चान्वितकरः। गन्धक्षपामेदुरैः पाथोभिरिति। चन्दनरजनीरजोयोगतः सिद्धैर्जलैः। पात्रान्तरे जलमेवं कृत्वास्त्र-प्रोक्षणशोषणादि कृत्वा प्रणवेन सम्पूज्य प्रोक्षणं कार्यम्। वपनं प्रोक्षणं च सकृत् त्रिर्वा स्यात्। सादरमित्यनेन प्रोक्षणे प्रतिपत्तिर्वा सूचिता। यदुक्तं –'राजताद्रिशिखराभमखण्डं शीतभासमुपरि प्रविचिन्त्ये' त्यादि। स्नानविधौ समुक्षत्विति। शक्यत्वादेतद्विधानम्।। 7।।

Holding kuśa and short bundle of grass, the preceptor shall sprinkle the seeds pronouncing the respective mantra with sanctified water in which incenses (like Aṣṭagandha) and powdered turmeric are mixed. The holy act of sprinkling is to be done by holding the water in cupped palms and letting the water ooze in between the fingers. Thereafter the deity shall be invoked with Mūlamantras- his specific hymn and pouring water as if to bathe him pronouncing the specific Vedic hymns (the three hymns beginning with "Āpohiṣṭhā" etc.). (7)

दत्त्वा वस्त्रादिभूषावधि तदनु यजेत् तं च पञ्चोपहारै-
नैंवेद्यान्ते प्रसा[1]द्यामलवसनवृतान्यस्त्रतस्तानि रक्षेत्।
प्रागाद्यासूपलिप्तास्तृतकुशरुचिरास्वष्टदिक्ष्वर्चयित्वा
दद्यात् त[2]द्रात्रिपेभ्यो बलिमपि परिषत्संहितेभ्यो ग्रहेभ्यः।। 8।।

विमर्शिनी

तदनु वस्त्रादिभूषावधि वस्त्रादिभूषणान्तमुपहरणं दत्त्वा तदनु तं देवं पञ्चोपहारैर्यजेच्च। नैवेद्यान्ते प्रसाद्य प्रसन्नपूजां कृत्वा अमलवसनवृतानि नवनिवस्त्राच्छादितानि (तानि) बीजान्यस्त्रतो रक्षेत्। उपलिप्तास्तृतकुशरुचिरासु उपलिप्तासु क्षिप्तदर्भासु च प्रागाद्यासु अष्टदिक्षु तद्रात्रिपमन्त्रेणार्चयित्वा तद्रात्रिपेभ्यः परिषत्संयुतेभ्यो ग्रहेभ्यः 'ओं ब्रह्मग्रहेभ्यो नमः' 'तत्पारिषदेभ्यो नमः' इत्यादिमन्त्राभ्यां बलिमपि दद्यात्।। 8।।

---

1. 'सत्रर्चनमुदितमभिध्याय रक्षां च कुर्यात्।',
2. 'स्वद्रव्ययुक्तं। बलिमपि परितो रात्रिपेभ्यो प्र' क. पाठः

विवरणम्

कवचेनास्त्रेण मूलेनैव वा नवीनवस्त्रेण वाच्छादनं स्यात्। तान्यस्त्रती रक्षेदिति तालत्रयादिकमुक्तम्। यद्वास्त्रेण नीराजनमप्युक्तम् इति। प्रागाद्यास्त्वष्टदिक्ष्विति। प्रत्यग्द्वारेऽपि मण्डपे तद्बहिः पूर्वाद्यष्टदिक्षु। परिमण्डपादिमात्रे तु पालिकानामेव प्रागाद्यष्टदिक्ष्विति बोद्धव्यम्। उपलिप्तास्तृतकुशरुचिरास्विति गोमयोदकेनोपलेपनं तत्र दर्भास्तरणं चोक्तम्। परिषत्संयुतेभ्यो ग्रहेभ्य इति। एतदुक्तं भवति–पूर्वं ब्रह्मग्रहेभ्यो नम इति सम्पूज्य बलिं दत्त्वा तदनु तत्पारिषदेभ्यो नम इति सम्पूज्य बलिं दद्यात्। एवं भूतेन्द्रादीनामपीति। बलिप्रक्रिया तूत्सवपटले भविष्यति। एवं तावत् प्रथमे दिने निशि कर्तव्यमुक्तम्।। ८।।

Thereafter presenting the deity the items like cloth and ornaments he may be worshipped with five offerings (which are jala, gandha, puṣpa, dhūpa and dīpa) the main offering may given to please him. Then the pots may be covered with fresh clean clothes. On the eight regions around the place where the seeds are shown the land may be cleansed with items (including cowdung)and Akṣata (unhusked and powdered rice washed with water) the guardian angels of the particular region may be given offerings which are suitable to them). (8)

उक्षेदूर्ध्वदिनेषु पीतयजनान्ते पात्रबीजाधिदै-
वेज्याकृत् सवनेषु देवमभिवाह्योक्तक्रमात् पूजयेत्।
रात्रौ तत्र बलिं हरेदि[1]ह बलिः शुद्धेन भूतान्धसा
तत्तद्द्रव्यसमन्वितेन चरुणा वान्ते स्वयं स्नातु च।। ९।।

विमर्शिनी

एवं तद्रात्रिकर्मोक्त्वा शेषदिनेषु कर्तव्यं कर्माह–उक्षेदिति। ऊर्ध्वदिनेधु त्रिषु सवनेषु पीठपूजान्ते पात्रबीजाधिदैवेज्याकृत् पात्रबीजयोरधिदैवतं विष्णुः सोमश्च तयोः पूजाकृन्मन्त्री तत्तन्मन्त्रेणोक्षेत्। ततः उक्तक्रमाद् देवमभिवाह्य पूजयेत्। तत्र तेषु दिनेषु रात्रौ तृतीयसवनपूजानन्तरं बलिं हरेच्च। इह अत्रत्यो बलिः शुद्धेन चरुणा वा भूतान्धसा भूतकूरहविषा वा तत्तद्द्रव्यसमन्वितेन तत्तद्देवतानां विहितेन द्रव्यसमन्वितेन चरुणा वा स्यात्। अन्ते बलिदानानन्तरं स्वयं गुरुः स्नातु च, बलिदानानन्तरं स्नानस्य विहितत्वात्।। ९।।

विवरणम्

उक्षेदूर्ध्वदिनेष्विति। द्वितीयादिदिनेषु। सवनेष्विति। प्रातर्मध्याह्ने सायं चेत्यर्थः। पीठयजनान्त उक्षेदित्यन्वयः। पीठं सम्पूज्य यथोक्तं सवनं कृत्वा पात्रबीजदेवतेज्या स्यात्। पीठयजनान्ते पात्रबीजाधिदैवेज्याकृदुक्षेदिति वा योजना। पृथग्वापे तत्तदधिदेवताः पूज्याः। सम्मिश्रितवापे सोमः समुच्चये तूभयपूजा स्यादिति। इह बलिः शुद्धेनेति। केवलेन हविषा वेत्यर्थः। दौग्धेनेति वा पाठः। भूतान्धसेति। वक्ष्यमाणेन भूतकूरहविषा वेत्यर्थः। अन्ते स्वयं स्नातु चेति। मण्डपबहिर्बलि-दानोपपत्तावेतदित्यवबोद्धव्यम्। पुनः स्नात्वैव भोजनं देवपूजादि वा कार्यमित्यभिप्राय इति।। ९।।

---

1. 'तसपरिषद्भ्यस्तद्ग्रहेभ्यस्ततः स्नायादप्यधिवासकर्मदिवसे प्रातर्बलिं चाचरेत्।। शा' ख. पाठः,

From the second day onwards rituals like worship may be made (thrice a day at morning, noon and evening,) Gods Viṣṇu and Soma are to be invoked in the respective pots making usual offerings like water etc.).

Aṣṭagandha (a mixture of eight items including sandal etc.) and with mixed turmeric may be held in the hands of the priest (while invoking the presence of deities before the pots are watered). During night offerings are to be made for the guardian forces that protect the pots with suitable rice preparation at the end of which the priest shall partake his part. (9)

शालीमाषयवप्रियङ्गुतिलमृत्साखल्वमुद्गासु[1]री
शिम्बश्यामकराजमाषकमयः शार्ङ्गीशदुर्गाजिते।
बीजौघः शिवविघ्नयोरपयवान्त्योऽन्त[2]द्विहीनो गुहे
निर्मुद्गादिरथार्यके ससुमनो वेणूत्थनीवारवान्॥ 10॥

विमर्शिनी

बीजवापकर्माभिधाय बीजादीनाह–शालीति। शार्ङ्गीशदुर्गाजिते शङ्करनारायणदुर्गाविष्णुषु शालीमाषयवप्रियङ्गुतिलमृत्साखल्वमुद्गासुरीशिम्बश्यामकराजमाषकमयः शाल्यादिराजमाषान्तस्वरूपो बीजौघः बीजानां समूहः स्यात्। ( ) शिवविघ्नयोरपयवान्त्यः अपगतो यवोऽन्त्यो राजमाषश्च यस्मिन् बीजौघे। गुहे अन्तद्विहीनः अन्ते प्राप्ताभ्यां श्याम(क)राजमाषाभ्यां हीनः। अथार्यके निर्मुद्गादिः निर्गतो हीनो मुदगादिः यथा स तथा ससुमनः सुमनेन सहितः। इह सुमनशब्दोऽकारान्त एव, "गोधूमः सुमनः समौ" इत्युक्तत्वात्। वेणूत्थनीवारवांश्च वैणवेन नीवारेण च सहितः। ( )॥

विवरणम्

शालीमाषेति। बीजौघो वपनीयबीजनिचयः। शिवविघ्नयोरपयवान्त्यः यवेनान्त्येन राजमाषेण च विरहितः। दशेवैवमनयोर्बीजानीत्यर्थः। अथार्यके निर्मुद्गादिरित्यन्वयः। मुद्गादिपञ्चरहितो गोधूमादियुतश्च बीजौघः। एवमपि दशबीजानीति भावः॥ 10॥

In respect of the deities of Śaṅkaranārāyana, Durgā and Viṣṇu the seeds to be sown are : Śāli, Māṣa, Yava, Priyaṅgu, Tila, Mṛtsā, Khalva, Mudga, Āsuri, Śimba, Śyāmā, and Rājamāṣa. For Śiva and Vighneśa the items of Yava and Rājamāṣa from the above group are to be omitted. In the case of Guha, the last mentioned two items namely Śyāmā and Rājamāṣa are to be avoided. For Āryaka (Śāstā) the items are prescribed as the first five in the above list to which wheat, Veṇūttha (produced by bamboo meaning bamboo seed)and Nīvāra (wild rice). (This means that Śaṅkaranārāyaṇa and Durgā get twelve seeds each while the other deities ten each in connection with the ritual of sowing the seeds). (10)

1. 'डकीराजिश्या' ख. पाठः,
2. 'न्त्य' मूलकोशपाठः

बीजानि वह्निभुवि वा शिववत् स्वमूलं
प्रक्षालनेऽणुरखिलेषु हराविनार्णम्।
तत्रेश्वरे भवति तत्पुरुषः प्रवापे
स्यात् त्र्यम्बकाणुरधिशूलि परेषु मूलम्।। 11।।

विमर्शिनी

वह्निभुवि स्कन्दे शिववद्वा बीजानि। अखिलेषु देवेषु बीजस्य प्रक्षालने स्वमूलं स्वस्वमूलमेव अणुर्मन्त्रः। हरौ इनार्णं द्वादशाक्षरमन्त्रः। ईश्वरे तत्र प्रक्षालने तत्पुरुषोऽणुः। अधिशूलि शिवे प्रवापे त्र्यम्बकाणुः त्रम्बकायेत्यादिमन्त्रः। परेषु प्रवापे मूलमन्त्रः।। 11।।

विवरणम्

बीजानि वह्निभुवि वा शिववदिति। वह्निभूः स्कन्दः। हराविनार्णमिति। द्वादशाक्षरं प्रक्षालने मन्त्रः। तत्रेति। प्रक्षालने। परेषु मूलमिति। प्रवाप इत्यनुषङ्गः।। 11।।

In the matter of the seeds for sowing they could be the same as in the case of Subrahmaṇya and Śiva. For washing the objects with milk the Mūlamantras of the respective deites are to be chanted as for instance for Viṣṇu the twelve- syllablled mantra is needed. For Śiva the mantra with ' Tatpuruṣa" is required. For sowing ritual in the case of Śiva Tryambakāya' etc, is in order. For all other deites respective Mūlamantra are to be chanted in sowing the seeds. (11)

त्रि[1]यम्बकाय शर्वाय शङ्कराय शिवाय च।
सर्वलोकप्रधानाय शाश्वताय नमो नमः।। 12।।

इति।।

विमर्शिनी

त्र्यम्बकाणुं पठति–त्रियम्बकायेति।। 12।।

The hymn for sowing the seeds for Śiva is given as :- I bow to Tyambaka, Śarva, and Śaṅkara who is in the chief among all in addition to being the eternal one. (12)

गायत्र्या निजयात्र सेचनविधिर्विघ्नार्यषाण्मातुरे
शार्ङ्गीशाजितयोस्त्रितारकनमोमूर्ध्ना जितन्ताणुना।
कार्यः षण्मुखविद्ययेषुभुवि वा शक्त्या ध्रुवाद्यन्तया
दुर्गायां मनुना मनोभवरिपौ वापोदितेन स्वयम्।। 13।।

विमर्शिनी

विघ्नार्यषाण्मातुरे गणपतिशास्तृस्कन्देषु अत्र निजया स्वस्वगायत्र्या सेचनविधिः कार्यः।

1. 'त्र्यम्ब' क. पाठः

शार्ङ्गीशाजितयोः त्रितारकनमोमूर्ध्ना प्रणवत्रयं नमश्शब्दश्चोर्ध्वस्थितेन जितन्ताणुना 'जितन्त' इत्यादिमन्त्रेण, इषुभुवि स्कन्दे षण्मुखविद्यया 'ओं नमः षण्मुखाये'ति मन्त्रेण वा, दुर्गायां घ्रुवाद्यन्तया प्रणवपुटितया शक्त्या भुवनेश्वर्या, मनोभवरिपौ शिवे वापोदितेन स्वयं 'त्रियम्बकाये' त्यनेनैव।। 13।।

विवरणम्

त्रितारकनमोमूर्ध्नेति सर्वेष्वपि सेचनमन्त्रेषूचितमेतत्। षण्मुखविद्या तदुपचारमन्त्रः। मनुनेति सर्वत्र योज्यम्। वापोदितेन स्वयमिति। तेनैवेत्यर्थः।। 13।।

Watering or sprinkling the pots containing the seeds in respect of Vighneśa, Śāstā and Subrahmaṇya, should be accompanied by the chanting of the Gāyatrī of the respective deities. For Śaṅkaranārāyaṇa and Viṣṇu three times of gāyatrī chants ending with "namaḥ" is prescribed in this connection. For Subrahmaṇia a personal reference may also be accepted while in the case of Durgā the mantra should be prefixed by Praṇava and ending with a salutation to Tryambaka (the enemy of Kāmadeva). (13)

बलेर्ब्रह्मभूतेन्द्रगन्धर्वयक्षाः
सरक्षः पिशाचाः स्मृता विष्णुविघ्नाः।
ततः स्कन्दरुद्राः शिवाः शर्वविघ्ने
द्वि[1]षड् देवता रात्रिक्लृप्त्यात्र योज्याः।। 14।।

विमर्शिनी

बलिदेवता आह–बलेरिति। शर्वविघ्ने शिवगणेशयोः बलेः बलिविधेः ब्रह्मभूतेन्द्रगन्धर्वयक्षाः इति पञ्च, सरक्षः पिशाचाः राक्षसपिशाचयुक्ता इति द्वे, विष्णुविघ्ना इति च द्वे, ततः स्कन्दरुद्रा इति च द्वे, शिवाश्च इत्येका। अत्र सर्वबहुवचनं मन्त्रे च बहुववनप्रयोगार्थम्। इति द्विषड् द्वादश देवताः स्मृताः। अत्रासु देवतासु मध्ये रात्रीणां क्लृप्त्या योज्याः। अयं भावः–पञ्चरात्रिक्लृप्तयैव बीजावापः क्रियते चेत् पञ्चसु रात्रिष्वादौ भवाः पञ्चैव देवताः स्युः, सप्तरात्रिक्लृप्त्या चेत् सप्तैव, नवरात्रिक्लृप्त्या चेन्नव, द्वादशरात्रिक्लृप्त्या चेदखिला योज्या इति।। 14।।

विवरणम्

रात्रिक्लृप्त्यात्र योज्या इति। दिवसविकल्पास्तावदुक्ता 'मित्राङ्कसङ्ख्ये दिन' इत्यादि। तत्र द्वादशरात्रमुत्तमं, तद्विषये चैता द्वादशदेवता गणिताः। तत्र पञ्चरात्रिसम्भवे ब्रह्मभूतेन्द्रगन्धर्वयक्षा इतीयत्यो देवता योज्या इत्यादि बोद्धव्यम्।। 14।।

For offering oblation of Śiva and Vighneśa there are twelve mantras one each pertaining to deities and spirits like (1) Brahmagraha (2) Bhūtagraha (3) Indragraha (4) Gandharvagraha (5) Yakṣagraha (6) Rakṣagraha (7) Piśācagraha (8) Viṣṇugraha (9) Vighnagraha (10) Skandagraha (11) Rudragraha and (12) Śivagraha ending with salution

1. गुहे देवताश्चेन्द्रभूतक्रमात् ते।। भू ख. पाठः,

'namaḥ. These are to be used for twelve days or according to the number of nights during which the seeds sown are worshipped. (14)

भूतपितृयक्षनागब्रह्मशिवा बलिभुजः स्मृता विष्णवन्ताः।
हरिहरदुर्गाहरिषु स्कन्द इमे शिवसमुक्तबीजोप्ति[1]विधौ।। 15।।

विमर्शिनी

हरिहरदुर्गाहरिषु भूतपितृयक्षनागब्रह्मशिवाः इति षट्, विष्णवन्ताः अन्ते विष्णुयुक्ताः इत्येकः, एवं सप्त बलिभुजः स्मृताः। स्कन्दे शिवसमुक्तबीजोप्तिविधौ शिवसमुक्तानि बीजान्युप्यन्ते चंद् इमे बलिभोक्तारः।। 15।।

विवरणम्

शिवसमुक्तबीजोप्तिविधाविति। उप्तिर्वापः। वह्निभुवि वा शिववदित्यत्रेत्यर्थत्।। 15।।

For offering libations to deities and spririts like Śaṅkaranārāyaṇa, Durgā, and Viṣṇu there are mantras like (1) Bhūtagrahebhyo Namaḥ (2) Pitṛgrahebhyo Namaḥ (3) Yakshagrahebhyo namaḥ (4) Nāgagrahebhyo Namaḥ (5) Brahmagrahebhyo Namaḥ (6) Śivagrahebhyo Namaḥ (7) Viṣṇugrahebhyo Namaḥ. If the seeds for Śiva is used also for Skanda these mantras are to be used. (15)

भूतेशे बलिभाजो भूतपिशाचाश्च यक्षनागाश्च।
ब्रह्मशिवविष्णुपितरः ससर्वदेवा ग्रहा नव प्रोक्ताः।। 16।।

विमर्शिनी

भूतेशे शास्तरि भूतपिशाचाः इति द्वौ, यक्षनागाश्च इति च द्वौ, ब्रह्मशिवविष्णुपितरः इति चत्वारः, ससर्वदेवाः सर्वदेवसहिता इत्येकः, एवं नव बलिभाजो ग्रहाः प्रोक्ताः।। 16।।

In respect to Bhuteśa (Śāsta) there are seven deities to receive oblations and the following Nine mantras are to be used. (1 l)Bhūtagrahebhyo Namaḥ (2) Piśācagrahebhyo Namaḥ (3) Yakṣagrahebhyo Namaḥ (4) Nāgagrahebhyo Namaḥ (5) Brahmagrahebhyo Namaḥ (6) Śivagrahebhyo Namaḥ (7) Viṣṇugahebḥyo Namaḥ (8) Pitṛgrahebhyao Namaḥ (9) Sarvadevagrahebhyo Namaḥ. (16)

इतीरितानां बलिदेवतानां सङ्ख्यातिरिक्तेषु बलिं दिनेषु।
तदन्त्यया देवतयैव दद्याद् वक्ष्ये बलिद्रव्यगणं क्रमेण।। 17।।

विमर्शिनी

इतीरितानां बलिदेवतानां सङ्ख्यातिरिक्तेषु देवताभ्योऽहस्सङ्ख्याधिक्ये तद्दिनेषु तदन्त्यया देवतयैव बलिं दद्यात्। बलिद्रव्यगणं क्रमेण वक्ष्ये।। 17।।

---

1. 'क्ति' क. पाठः

विवरणम्

सङ्ख्यातिरिक्तेष्विति। सप्तदेवताविषये मित्राङ्कसङ्ख्ये दिन इति रात्रिसङ्ख्यातिरेकः देवतावशाद् द्वि[1]त्ररात्रिसङ्ख्यातिरेकः सर्वत्रापि सम्भवति। पञ्चरात्रिसम्भवे रात्रिक्लृप्त्यात्र योज्या इति हरिहरादिष्वपि तुल्यमिति।। 17।।

If there are more days fixed for the rituals the mantra mentioned for the last day on be utilized for excess days. Hereafter the various articles for obliations are narrated. (17)

ब्राह्मं पुष्पकुशाक्षताम्बुचरुणान्यं भूतकूरान्धसा
सर्पिः सक्तुपयोदधीन्द्रलतिका[2]गौलान्धसैन्द्रं हरेत्।
तुर्यं वैणवपायसेन जलपुष्पाज्यान्धसा पञ्चमं
दोषाकम्बुतुषैः सरक्तकुसुमान्धोगन्धकै राक्षसम्।। 18।।
माषान्नन्वितमत्स्यमांसकृसरक्षौद्रैः सतैलक्षपा-
लाजैः सप्तममष्ट[3]मं गुलभुवा वैघ्नं त्रिमध्वोदनैः।
दध्याज्यान्वितकेरदुग्धचरुणा स्कान्दं शि[4]विऽन्यन्निशा
दध्युद्यत्कृसरेण स[5]द्विपमुखेऽन्त्यं साज्यदुग्धान्धसा[6]।। 19।।
(युग्मकं)

विमर्शिनी

सद्विपमुखे सगणपतौ शिवे पुष्पकुशाक्षताम्बुचरुणा पुष्पकुशाक्षतजलयुक्तेन हविषा ब्राह्मं ब्रह्मदेवत्यं बलिं हरेत्। अन्यं भौतिकं भूतकूरान्धसा भूतकूरयुक्तेन हविषा। भूतकू (रो?रं) वक्ष्यति। ऐन्द्रं सर्पिः सक्तुपयोदधीन्द्रलतिकागौलान्धसा। ( ) गौलान्धो गुलेन सह पक्वं हविः। तुर्यं गान्धर्वं वैणवपायसेन। पञ्चमं याक्षं जलपुष्पाज्यान्धसा जलपुष्पाज्यसहितेन हविषा। राक्षसं दोषाकम्बुतुषैः। ( ) सरक्तकुसुमान्धोगन्धकैः। रक्तकुसुमं ( ) सप्तमं पैशाचं सतैलक्षपालाजैः माषान्नन्वितमत्स्यमांसकृसरक्षौद्रैः। माषान्नं माषेण सह पक्वमन्नं, मत्स्यमांसं मोदकादिप्रतिनिधिना कल्पितं, कृसरं तिलेन सह पक्वमन्नं, क्षौद्रं मधु। अष्टमं वैष्णवं गुलभुवा गुलान्नेन। वैघ्नं त्रिमध्वोदनैः त्रिमधुरहविर्भिः। स्कान्दं दध्याज्यान्वित-केरदुग्धचरुणा। केरदुग्धं नालिकेरक्षीरम्। अन्यद् रौद्रं निशादध्युद्यत्कृसरेण निशादधिभ्यां सहितेन कृसरेण ( ) कृसरमुक्तम्। अन्त्यं शैवं साज्यदुग्धान्धसा आज्यक्षीरसहितहविषा।। 18-19।।

---

1. 'द्वित्रादिस' ख पाठः,
2. 'सिद्धान्ध' ख. पाठः,
3. 'न्धसा गु' ख. पाठः,
4. 'बलिं यामिनीद',
5. 'शैवमथ चान्त्यं',
6. 'सा।। इति द्वादश ब्रह्मपूर्वग्रहणां बलिद्रव्यकाणि क्रमेणोदितानि। द्वितीयं तृतीयं च तद्देवतावद् विपर्यस्य कार्यं गुहे द्रव्यकं च।। हा' ख पाठः।

विवरणम्

अन्यं भूतकूरान्धसेचि। भूतबलिमित्यर्थः। भूतकूरौदनं वक्ष्यति–'हारिद्रं दधिलाज–सक्तुपललाढ्यमि'ति। दोषा हरिद्रा।। 18।।

अष्टमं गुलभुवेति। गौलान्धसा। त्रिमध्वोदनैरिति। त्रिमधुरान्धसा। शिवे सद्विपमुख इति। शर्वविघ्न इत्येतदनुवादः। अन्यत्रिशादधयुद्यत्कृसरेणेति रुद्रबलिः। कृसरस्तिलौदनम्। अन्त्यं साज्यदुग्धान्धसेति शिवबलिः।। 19।।

Oblations to be offered to deities in connection with Śiva and Vighneśa are as follows:

(1) For Brahmagraha, Tulasī flower, Kuśa and unhusked rice mixed together. (2) For Bhūtagraha the oblation called Bhūtakūra (consisting of parched rice, sesamum, turmeric and curd.) (3) For Indragraha, ghee, Saktu (the flour of rice first fried and then ground), milk, curd and Indralatikā juice (= Cissus padata) usually for Soma sacrifice) and molasses mixed together (4) for Gandharvagraha the Pāyasa (Pudding) prepared with bamboo seed and milk (this one is for the 4th day (5) for Yakṣagraha on the 5th day the oblation shall consist of water , lotus flower and ghee mixed together (6) for Rakṣagraha on the 6th day the oblations shall be the mixture of turmeric, red millet, husk, red flower (shoeflower) and aṣṭagandha a mixture of 8 fragrant items) (7) for the 7th day Piśācagraha is to be offered the oblation of oil, turmeric,parched rice, black gram, peas, cake, fried sesamuam and honey mixed together, (8) for Viṣṇugraha on the 8th day food item prepared with molasses. (9) for Vighnagraha on the 9th day oblation having milk, ghee and honey. (10) For Skandagraha on the 10th day oblation of coconut milk (or juice) (11) for Rudragraha on the 11th day the mixture of turmeric, ghee fried sesamum (12) for the Śivagraha on the last. day the oblation of milk and ghee are required. (18-19)

गुहेऽत्र निःश्यामकराजमाषे बीजे विपर्यस्तमुपाद्ययुग्मम्।
स्कन्दग्रहेभ्यो बलिरष्टमेऽह्नि गौलेन दौग्धेन ततः परस्तात्।। 20।।

विमर्शिनी

गुहे अत्र बलिविधौ निःश्यामकराजमाषे श्याम[1]राजमाषाभ्यां रहिते, बीजे उपाद्ययुग्मं द्वितीयतृतीये देवते विपर्यस्तमिन्द्रभूतक्रमेण। तथा तद्बलिद्रव्ययुग्ममपीत्यर्थः। तत्राष्टमेऽह्नि स्कन्दग्रहेभ्यो गौलेन बलिर्भवति। ततः परस्तात् स्कन्दग्रहेभ्य एव दौग्धेन च।। 120।।

विवरणम्

विपर्यस्तमुपाद्ययुग्ममिति। ब्रह्मेन्द्रभूतेत्यमुना क्रमेणेत्यर्थः। दौग्धेन ततः परस्तादिति। यदुक्तम्–'अष्टमं नवमं तथा। गुलान्नं पायसं स्कान्दमि'ति।। 120।।

1. 'माकरा' ख. पाठः

In the case Guha where the items of Śyāmā (Panicum milaceum) and Rājamāṣa which were avoided in the above said mantra, second may be chanted as third and third as second (1) Brahamagrahebhyo Namaḥ, (2) Indragrahebhyo Namaḥ (3) Bhūtagrahebhyo Namah like this) The articles for oblation should also be changed accordingly. From 4th day onwards upto the seventh the grahas to be propitiated are Gandharva, Yakṣa, Rakṣa and Piśāca. On the 8th day oblation with molasses may be given with the mantra Skandagrahebhyo namaḥ. From the 9th day onwards till the last day pāyasams with milk is to be offered with the mantra related to Skanda mentioned above. (20)

हारिद्रं दधिसक्तुलाजपललाढ्यं भूतकूराह्वयं
प्राचीनं तिलतण्डुलं परमुडुम्बं लाजधानान्वितम्।
याक्षं नागमुशन्ति केररसशालीपिष्टसक्तूत्तरं
पाथोजाक्षतमन्नपूपमपरं गौलोदनं सप्तमम्।। 21।।
दिवसेऽष्टमे पयोन्नं कृसरं नवमे पयोन्नमत ऊर्ध्वम्।
द्रव्याणि विष्णुदुर्गाहरीशषाण्मातुरेष्वाहुः।। 22।।

विमर्शिनी

विष्णुदुर्गाहरीशषाण्मातुरेषु प्राचीनं प्राग्भवं दधिसक्तुलाजपललाढ्यम्। ( ) हारिद्रं निशाचूर्णेन सह पक्वमन्नं भूतकूरमिति सर्वत्र प्रसिद्धम्। उशन्ति इच्छन्ति। परं द्वितीयं तिलतण्डुलं तिलेन तण्डुलेन च सहितं हविरित्यर्थः। अत्र सर्वत्र तत्तदुक्तद्रव्येण सह हविर्योज्यम्। याक्षं तृतीयं लाजधानान्वितम् उडुम्बम्। ( ) नागं चतुर्थं केररसशालीपिष्टसक्तु नालिकेरक्षीरं शालीपिष्टं सक्तु च। उत्तरं पञ्चमं पाथोजाक्षतम्। पाथोजं पद्मम्। अपरं षष्ठम् अन्नपूपम् अन्नमपूपं च। सप्तमं तौलौदनम् अष्टमे दिवसे पयोन्नम्। नवमे कृसरम्। अत ऊर्ध्वं सर्वेष्वहस्सु पयोन्नमेवेति द्रव्याण्याहुः। बुधा इति शेषः।। 21–22।।

विवरणम्

हारिद्रमिति। विष्णुदुर्गाहरीशषाण्मातुरेष्वाहुरित्युपर्यन्वयः। प्राचीनमिति भूतबलिम्। परमिति पितृबलिम्। उत्तरं पाथोजाक्षतमित्यन्वयः। पाथोजं पद्मम्। अन्नपूपमपरमिति। पूपोऽप्यपूप एव।। 21–22।।

For Viṣṇu, Durgā, Śaṅkaranārāyaṇa and Subrahmaṇya, the oblation to be offered in this connection for the various days are as follows. On the first day – a mixture of turmeric, curd, rice powder, fried rice and fried sesamum – this preparation is called Bhūtakūra. The mantra to be chanted is Bhutagrahebhyo Namaḥ. For the second day sesamum and rice preparation with the accompaniment of the mantra Pitrgrahebhyo namah. For the third day parched rice, fried rice powder and half parched rice with the mantra, Yakṣagrahebhyo namaḥ. For the fifth day lotus flower and akṣata unbroken paddy with the mantra Brahmagrahebhyo Namaḥ. For the sixth day sweet

rice cake with the mantra Śivagrahebhyo namaḥ. For the 7th day the oblation prepared with molasses with the mantra Viṣṇugrahebhyo namaḥ. For the 8th day milk with rice made as pāyasa, mantra being Viṣṇugrahebhyo namaḥ. For the 9th day fried sesamum with rice preparation using the mantra Viṣṇugrahebhyo Namaḥ. Hereafter for 10th, 11th and 12th days the same milk pudding with the same mantra Viṣṇugrahebhyo namaḥ. (21-22)

भूतान्नैस्तैलमांसौदनरजनिरजः सक्तुभिर्लाजधाना-
दध्यौडुम्बैस्तथा तण्डुलविमलरजः सक्तुकेरीपयोन्नैः।
स्यात् पद्मव्रीहिदूर्वाक्षतयवतिलसिद्धार्थगन्धैर्गुलान्नै-
र्दौग्धान्नैर्दाधिकान्नैर्बलिरिह कुसुमान्नैः क्रमाद् भूतनाथे।। 23।।

विमर्शिनी

भूतनाथे क्रमात् पूर्वं भूतान्नैः भूतकूरैः। पुनः तैलमांसौदनरजनिरजःसक्तुभिः। तैलमभ्यङ्गम्। मांसं मोदकेन कल्पितम्। अन्यानि स्पष्टानि। पुनः लाजधानादध्यौडुम्बैः। एतान्युक्तानि। तथा पुनः तण्डुलविमलरजः सक्तुकेरीपयोन्नैः तण्डुलचूर्णं सक्तु नालिकेरक्षीरमन्नं च, एतैः। पुनः पद्मव्रीहिदूर्वाक्षतयवतिलसिद्धार्थगन्धैः, एते प्रसिद्धाः। पुनः गुलान्नैः पुनः दौग्धान्नैः। पुनर्दाधिकान्नैः दध्ना सह पक्वहविर्भिः कुसुमान्नैः। इह बलिविधौ एतैर्बलिः स्यात्।। 23।।

विवरणम्

भूतान्नैरिति भूतकुराभिप्रायम्। यत्रौदनो नोक्तो यथा तिलतण्डुलं परं लाजधानादध्यौडुम्बैरिति, तत्राप्योदनयोग इष्यते। मांस[1]स्थाने मोदको भवति।। 23।।

23. In the case of Śāsta the oblation to be offered for the first day shall be with Bhūtakūra items (mantra being Bhūtagrahebhyo namaḥ). On second day the oblation shall be the rice cake (instead of flesh) sesamum is fried and powdered paddy fried and pounded rice with the mantra (Piśācagrahebhyo namah), On the third day the oblation shall be parched rice, powdered fried rice, curd and half fried paddy with the mantra Yakṣagrahebhyo namaḥ. On the fourth day the oblation shall consist of white rice powder, fried rice, powder and coconut milk with the mantra Nāgagrahebhyo Namaḥ. On the fifth day oblations shall be lotus flower, paddy, Dūrvā (a grass used for funeral ceremonies – Ageostis linearis) Akṣata (unbroken paddy or rice), sesamum mustard and Aṣṭagandha (eight types of incenses provided together with the mantra Brahmagrahebhyo namaḥ. On the sixth day oblation prepared with molasses is to be offered with the mantra Śivagrahebhyo namaḥ. On the sixth day milky food with the mantra Viṣṇugrahebhyo Namaḥ may be offered. On the eighth day rice preparations with curd may be offered with the mantra Pitṛgrahebhyo

---

1. 'ससमाने नेः' ख. त. पाठः,

namaḥ. On the ninth day also the same mantra is to be offered with oblation of lotus and rice. (23)

पौर्वाह्णिके प्रत्तबलीन् सुरूपान्[1]
स्वारूढपीठादिचितीनथैतान् ।
बीजाङ्कुरान् मन्त्रिवरोऽधिवास-
कर्मण्यमुष्मिन् विनियोजयेच्च ।। 24 ।।

विमर्शिनी

अथाधिवासकर्मणि तद्विनियोगविधानमाह–पौर्वाह्णिक इति। अथ मन्त्रिवरः मन्त्रदेवतयोरैक्यं विद्वान्। अधिवासकर्मदिने पौर्वाह्णिके प्रातःकालपूजानन्तरं प्रत्तबलीन् प्रकर्षेण दत्तबलीन्। सुरूपान् शोभनवर्णान्। स्वरूढपीठादिचितीन् स्वस्मिन् योजितपीठादिगतचैतन्ययुक्तान् बीजाङ्कुरान्। अमुष्मिन्नधिवासकर्मणि विनियोजयेच्च। प्रतिमायाः परितः संस्थाप्य तद्विभूतित्वेन कल्पयेदित्यर्थः।। 24 ।।

विवरणम्

अधिवासदिने विशेषं वदन् विनियोगमप्याह–पौर्वाह्णिक इति। प्रातस्तवन एव[2] प्रत्तबलीन् दत्तबलीन्। सुरूपानिति। यदुक्तम्– 'शुभं पीतेषु शुक्लेषु समेषूर्ध्वेष्वृजुष्वपी'ति। स्वारूढपीठादिचितीनिति पीठोद्वासनं, तोरणध्वजादिसम्भवे तदुद्वासनमप्युक्तम्। अमुष्मिन्निति। भाविनि अधिवासकर्मणि मन्त्रिवरो विनियोजयेदिति ।। 24 ।।

The preceptor shall on, the specific day perform, ritualistic worship quite early in the morning and offer the oblation for the day. Then invoking the power of altar and that of the seeds shall take up the pots in which they are kept. In front of a lamp lit for the purpose these pots may be placed as if in a bed. Then to the accompaniment of the drumming he shall engage his assistants to take up the pots of seed. (24)

संस्थाप्य केतुं बलिपीठबाह्ये
घण्टापताकानिजवाहनाढ्यम् ।
त्रिसन्ध्यमभ्यर्च्य किरेद् बलिं च
तत्प्रक्रियां वच्मि महोत्सवोक्तौ ।। 25 ।।

विमर्शिनी

ध्वजस्थापनस्यापि कर्तव्यतामाह–संस्थाप्येति। (बलिपीठबाह्ये) बलिपीठस्थानस्य बाह्ये घण्टापताकानिजवाहनाढ्यम् घण्टया पताकया निजनिजवाहनेन च युक्तं केतुं संस्थाप्य। त्रिसन्ध्यं सन्ध्यात्रयेऽप्यभ्यर्च्य बलिं किरेच्च। महोत्सवोक्तौ महानुत्सवो महोत्सवस्तदभिधाने। (तत्प्रक्रियां) तत्प्रकारं वच्मि वक्ष्यामीत्यर्थः।। 25 ।।

---

1. 'नारू' क. पाठः
2. 'वं' ख. पाठः,

विवरणम्

तत्प्रक्रियां वच्मीति वदन् प्रतिष्ठायामनियतोऽयं ध्वज इत्यपि सूचितवानिति।।25।।

On the night in which the seeds are sown, a flagstaff atop which the insignia of the god is made, may be fixed along with bell in the ground a little away from the Balipīṭha (the major altar stone on which offerings are made). It should be ritualistically worshipped on all the three junctures of the day and oblations are to be poured. Thereafter the oblations are to be offered everyday at the base of the flagstaff the procedures of which will be explained in connection with the description of the festival. (25)

अधिवासविधानवासरात् प्रा-
गथ तुर्येऽहनि साधकः सुक्लृप्ताम्।
प्रतिमां परिगृह्य कारुवर्या-
दपराह्लेऽप्स्व[1]धिवासये शैली[2]म्।।26।।

विमर्शिनी

अथ प्रतिमापरिग्रहादिकं विधत्ते–अधिवासेति। अथ साधकः अधिवासविधानवासरात्। प्रतिष्ठाकर्मणः पूर्वदिवसोऽधिवासकर्मवासर इति पूर्वमेवोक्तम्। तस्मात् प्राक् तुर्ये चतुर्थेऽहनि। अपराह्ले मध्यकालातीते। शैलीं शिलासम्बन्धिनीम्। सुक्लृप्तां लक्षणकौशलेन च शुभावयवसंस्थानकल्पितां प्रतिमाम्। कारुवर्यात् शिल्पिप्रवरात् परिगृह्य अप्सु अधिवासयेत।।26।।

विवरणम्

अथ प्रतिमापरिग्रहं प्रस्तौति–अधिवासविधानवासरादिति। शैलीं शिलामयीं प्रतिमाम्।।26।।

The preceptor shall receive the idol from the sculptor four days before the day fixed for ceremonial installation. The idol should have all the auspicious signs. On the afternoon of the day well before evening the preceptor shall plunge the idol in a trough filled with water. (26)

स्नात्वा समाचम्य समञ्चितात्मा
मन्त्री समभ्यर्च्य गणाधिनाथम्।
सन्तर्प्य विप्राञ्छिवदिक्प्रक्लृप्ते
तन्मण्डपे नेत्रविधिं विदध्यात्।।27।।

विमर्शिनी

तत्क्रियाक्रममाह–स्नात्वेत्यादिभिः। मन्त्री स्नात्वा तदर्थं मन्त्रस्नानं कृत्वा। समाचम्य तथा मन्त्राचमनमपि विधाय। समञ्चितात्मा क्वचिच्छुद्धे प्रदेशे उपविश्य सकलीकरणशङ्खपूरणात्माराधनकृद्

1. 'स्व' क. पाठः,
2. 'लीम्।। स्विष्टात्माज्यमधू' ख. पाठः

भूत्वा गणाधिनाथं समभ्यर्च्य अग्रतः स्वस्तिके[1] शालिदर्भादिभिः क्लृप्ते पीठे यथाविधि शोधितं सुवर्णमयं चषकं संस्थाप्य कूर्चविन्यासानन्तरं घृतं मधु च सममासिच्य मूलेनार्चयित्वा विप्रान् दानैः सन्तर्प्य शिवदिक्प्रक्लृप्ते तन्मण्डपे गत्वा नेत्रविधिं नेत्रोल्लेखनविधिं विदध्यात्।। 27।।

विवरणम्

समञ्चितात्मेति देहशुद्ध्यादि सर्वमुक्तम्। मन्त्रीति। तत्प्रतिमोचितमन्त्राभिज्ञः। शिवदिक्प्रक्लृप्ते तन्मण्डप इति। प्रासादस्यैशभागे प्रागुदीरितशिल्पिनिलयाग्रदेशे रचिते बिम्बपरिग्रहमण्डपे इत्यर्थः। अत्र कार्याल्पत्वान्मार्जन[2]लेपनाभ्यामेव शुद्धिः स्यात्। वितानप्रदीपाद्युचितमेव।। 27।।

Having bathed and sipped the water ceremoniously the preceptor with a composed mental attitude shall worship Gaṇādhinātha, Vighneśwara and propitiate Brahmins with auspicious objects seating them at the northern side of the idol. Then he shall place the idol facing the sanctum in an altar specifically made and the act called Netronmīlana – the final rite of the opening of the eyes. (27)

संयोज्याज्यमधू सुवर्णचषके स[3]ञ्जप्य मध्वृक्त्रिकं
शु[4]द्धस्वालयसम्मुखीनशयनीयन्यस्तबिम्बाक्षिणी ।
सूच्यग्रेण विलिख्य साज्यमधुना त[5]क्ष्णा समुत्कीर्य ते
प्रोक्ष्यापूर्य तथैव साज्यमधुना शय्यादि तक्ष्णेऽर्पयेत्।। 28।।

विमर्शिनी

कथं तदित्यत्राह–संयोज्येति। सुवर्णचषके संयोजितं तदादाय मध्वृक्त्रिकं 'मधु वाता' इति तृचं सञ्जप्य शुद्धस्वालयसम्मुखीनशयनीयन्यस्तबिम्बाक्षिणी शुद्धे प्रासादाभिमुखशय्यायां शयनीये न्यस्तस्य बिम्बस्याक्षिणी नेत्रे। साज्यमधुना आज्यमधुयुक्तेन सूच्यग्रेण विलिख्य। तक्ष्णा ते अक्षिणी समुत्कीर्य स्पष्टीकरणं कारयित्वा। जलेन प्रोक्ष्य तथैव तेन साज्यमधुना आपूर्य पुनः शय्यादि सुवर्णचषकादिकं च तक्ष्णेऽर्पयेत् दापयेत्।। 28।।

विवरणम्

संयोज्याज्यमधू सुवर्ण (झ?च)षक इति। (झ?च)षकं वृत्तिकास्थण्डिले दर्भसं[6]स्तरे (झ?च)षकं न्यग्बिलं निधाय अस्त्रेण प्रोक्ष्य शोषणादि कृत्वोत्तानिते प्रणवेनाज्यमधुनी निषिच्य संयोज्य तस्यापि शोषणादि कृत्वा प्रणवेन पूजयेत्। सञ्जप्य मध्वृक्त्रिकमिति। 'मधु वाता' इत्यादि मन्त्रत्रयम्। शुद्धस्वालयेति। [7]शुद्धे स्वालयसम्मुखीने शयने संवेशिताया अर्चाया दृशौ। साज्यमधुना सूच्यग्रेण

1. 'ते' क. पाठः,
2. 'ना' ख पाठः,
3. संयोज्य म,
4. 'जप्त्वा स्वा'
5. 'सूच्या तया शिल्पिना तद्दृष्टी सुसमे विधाप्य शयनाद्यस्मै पुनर्दापयेत्।। शय्या',
6. 'संस्थ झ' क. पाठः 'त्त्वा व' ख. पाठः
7. 'शुद्धस्वालयसम्मुखीनशयने संवेशितार्चादृशौ' इति विवरणपाठः

विलिख्येति योजनीयम्। शयनं शय्या स्वस्तिकादौ व्रीहिवस्त्रादिकल्पिता। तस्याः पूर्वदिक्छिरस्कतया समास्तरणे स्वालयसम्मुखीनतत्वं स्यात्। शय्यायाः शुद्धिश्च नवाम्बरकृतत्वमस्त्रप्रोक्षणादि च। शयने संवेशनं शिल्पिप्रवरेणतदुचिततया शायनम्। हरिहरेऽक्षित्रयविलेखनं भवति। बिम्बमस्त्रेण प्रोक्ष्य तेन सूच्यग्रप्रदेशेन तदाज्यमधू समादाय तेन दक्षिणवामनेत्रयोः, त्र्यक्षसम्भवे पुनर्ललाटनेत्रे चोल्लेखनं कार्यम्। तक्ष्णा समुत्कीर्य ते इति। ततः शिल्प्याचार्येण ते नेत्रे समुत्कीर्णे स्वशस्त्रेण समुन्मेषिते कारयित्वेत्यर्थः प्रोक्ष्येति पुनर्नेत्रयोः प्रोक्षणमुक्तम्। साज्यमधुना तथैवापूर्येति सूच्यग्रपूर्वकमापूरणमुक्तम्। शय्यादि तक्ष्णेऽर्पयेदिति। शयन (झ?च)षकादि तदुपयुक्तं सर्वं यजमानेन तस्मै शिल्पिने प्रदापयेदित्यर्थः।। 28।।

Having mixed honey and ghee in a goden goblet and sanctified it with the chanting of a hymn beginning with "madhuvātāh" thrice the sculptor may be required to open the eyes of the idol placed in a bed, facing the sanctum. He shall rub the eyes with the tip of the golden needle having dipped it in the mixture of ghee and honey so as to form the eyeballs. Again the cavity of the eyes shall be filled up with the ghee and honey. After the ceremony the bed and the golden needle shall be presented to the sculptor. (28)

शय्यायां शयितस्य शर्वगुहयोर्बिम्बस्य दद्या[1]द् बलिं
राज्याज्योज्ज्वलपायसेन परितः प्राग् देवताभ्योणुना।
मूर्धन्यक्षतसर्षपाच्छकुसुमं न्यस्येत् त्रिनेत्रे ततः
सूत्रं चन्दनचर्चितं च मणिरेखायामनेन क्षिपेत्।। 29।।

विमर्शिनी

शिवस्कन्दयोर्विशेषमाह–**शय्यायामिति**। प्राक् नेत्रोल्लेखनात् प्राक्। शय्यायां शयितस्य शर्वगुहयोर्बिम्बस्य परितो राज्याज्योज्ज्वलपायसेन सर्षपाज्ययुक्तेन पायसेन। देवताभ्योणुना 'देवताभ्यः पितृभ्योऽथे'यादिमन्त्रेण बलिं दद्यात्। तत्र त्रिनेत्रे मूर्धनि शिरसि। अक्षतसर्षपाच्छकुसुमम् अक्षतसर्षपयुक्तं श्वेतपुष्पं न्यस्येत्। ततश्चन्दतचर्चितं चन्दनपङ्करूषितं (सूत्रम्) अनेन 'ओं नमो भगवत' इत्यादिमन्त्रेण मणिरेखायां क्षिपेत्।। 29।।

विवरणम्

शिवादौ विशेषमाह–**शय्यायामिति**। शयितस्य प्रागुक्तवत् संवेशितबिम्बस्य मूर्धनीति सम्बन्धः। प्राग् तद्बिम्बं परितः प्रागाद्यष्टदिक्षु राजिभिराज्येन च व्यामिश्रितेन पायसेन देवताभ्यः पितृभ्योऽथेति पुरोक्तमन्त्रेण बलिं दद्यात् वाद्यघोषणमिह सामान्यसिद्धम्। शिवे भेदमाह–त्रिनेत्रे तत इति। लक्षणं मणिरेखा पार्श्वरेखे चेत्येतत् सर्वं गतपटले लक्षितम्। क्षिपेदित्यास्फालनाभिप्रायम्। हस्तद्वयेनाङ्गुष्ठोपकनिष्ठिकाभ्यां गन्धाप्लुतं सूत्रमग्रयोर्गृहीत्वा मणिरेखास्थाने समास्फालनरूपेण विन्यसेदिति। अनेनेति वक्ष्यमाणमन्त्रग्रहणम्।। 29।।

1. 'त्वा व' ख. पाठ

The idols of Śiva and Subrahmaṇya reposing in the couch shall be propitiated with offerings consisting of pāyasa prepared with mustard and ghee with the chanting of the mantras–" devatābhya pitṛbhyaḥ etc. Deities surrounding them shall be adored from east onwards in all the eight regions. On the head of the idol of Śiva, Akṣata, mustard and white flowers shall be scattered. Thereafter threads dipped in Sandal paste shall be placed over it to the accompaniment of the following mantras "Oh God Rudra, having golden semen, the great one, the auspicious god of the nature of and the beloved of Umā, salutations to you. (29)

"ओं नमो भगवते रुद्राय हिरण्यरेतसे महात्मने शिवाय शिवरूपाय उमाप्रियाय नमो नमः" इति।

विमर्शिनी

ततस्तन्मत्रे लिखति –'ओं नम' इत्यादि।

सम्प्रोक्तक्रमतो विलोचनविधिं कुर्याद् गुहेऽथेश्वरे-
ऽघोरेणाज्यमधू सुयोज्य मधुमन्मन्त्रं प्रजप्यामुना।
सूच्यग्रेण विलिख्य लक्ष्म मणिरेखापार्श्वरेखान्वितं
त[1]क्ष्णा तद् विरचय्य सर्वमथ मध्वाज्येन सम्पूरयेत्।। 30।।

विमर्शिनी

अथ गुहे सम्प्रोक्तक्रमतो विलोचनविधिं नेत्रोल्लेखनं कुर्यात्। ईश्वरे अघोरेणाज्यमधू सुयोज्य। मधुमन्मन्त्रं 'मधु वाते'ति तृचं प्रजप्य। 'अमुना (मधुवाते'ति तृचेन) साज्यमधुना सूच्यग्रेण मणिरेखापाश्वरेखान्वितं लक्ष्मविलिख्य। तक्ष्णा तत् लक्षणादिकं विरचय्य। अथ सर्वं लक्ष्यादिकं रेखासमूहं मध्वाज्येन सम्पूरयेत्।। 30।।

विवरणम्

स्कन्देऽपि भेदमाह–सम्प्रोक्तक्रमतो विलोचनविधिं कुर्याद् गुह इति। संवेशिताचार्दृशौ सूच्यग्रेणेति नेत्रविलेखनं तत्समुत्किरणं पुनस्तत्पुरणं चोक्तम्। शिवे पुनर्भेदमाह–अथेश्वर इति। सुयोज्येति। प्राग्वदस्त्रप्रोक्षणादिपूर्वकं सुवर्ण(झ?च)षक इति प्रकरणादवसेयम्। लक्ष्मेति लिङ्गगतं लक्षणम्। मणिरेखया पाश्वरेखाभ्यां चान्वितमिति समासः। तत्सर्वमिति। लक्षणादित्रयम्। सम्पूरयेदिति। तत्सर्वमित्यनुषङ्गः। शय्यादि तक्ष्णेऽर्पयेदिति सर्वत्र समानम्।। 30।।

Thereafter the act of opening the eyes of the idol of Guha may be performed as already described. Ghee and honey mixed together shall be applied to the eyes and scratched with a goden needle to shape the eye-balls. In the case of Śiva the Aghora mantra is to be chanted in addition to the mantra of Madhuvātā' etc, thrice. The sculptor shall be engaged in the act

1. 'मन्त्री तत्परिपूर्य तेन रचयेत् तक्ष्णा यथालक्षणम्।। सन्तु' ख. पाठः

of drawing lines with the golden needle as required for the perfection. Then these lines of identification may be filled with the mixture of the ghee and honey after washing the eyelids with water. (30)

सन्तुष्टेन ततो निजायतनवद् भद्रासने स्थापितं
तक्ष्णा तत्करतः प्रगृह्य यजमानेनाथ तत् प्रार्पितम्।
तारेण प्रविलोक्य तच्चरणयोस्तारं प्लुतं प्रोच्चरन्
गृह्णीयान्मनुबिम्बमुद्गतकुशाग्राभ्यां कराभ्यां गु[1]रुः।। 31।।

विमर्शिनी

तत्परिग्रहप्रकारमाह–सन्तुष्टेनेति। अथ गुरुः सन्तुष्टेन हिरण्यवस्त्रादिदानतस्तृप्तेन तक्ष्णा। तत उद्धृत्य निजायतनवद् निजप्रासादो यद्दिङ्मुखस्तद्दिङ्मुखं भद्रासने स्थापितम्। यजमानेन तत्करतः कारुकरतः प्रगृह्य प्रार्पितम्। तद् मनुबिम्बं तारेण प्रविलोक्य तारं प्लुतं प्रोच्चरन्। उद्गतकुशाग्राभ्याम् ऊर्द्ध्वगतदर्भाग्राभ्यां कराभ्याम्। तच्चरणयोरभिवाद्यरूपेण गृह्णीयात्।। 31।।

विवरणम्

सन्तुष्टेन तक्ष्णेति। दक्षिणादिभिरिति शेषः। यदा बिम्बं क्रीतं स्यात् सदाप्येतत् सर्वकार्यम्। निजायतनवदिति। प्राग्द्वारे प्रासादे प्राङ्मुखं, प्रत्यग्द्वारे प्रत्यङ्मुखमिति भावः। ततो भद्रासन इति। ततः शय्या[2]तलादुद्धृत्य भद्रासने तेनैव तक्ष्णा स्थापितम्। अथ तत्करतः प्रगृह्य यजमानेन प्रार्पितं तदिति। यथोक्तं स्थपतिरग्रतस्तिष्ठन् पृष्ठतः स्थितस्य कर्तुर्हस्ते दद्यात्। कर्ता प्रतिमां स्पृशन् तिष्ठेत्। अथ आचार्यस्तत्समीपमागत्याचम्य सकलीकृतात्मेत्यादि। तारेण प्रविलोक्येति। पुरतस्तिष्ठन्निति भावः। मनुबिम्बं तच्चरणयोः कराभ्यां गृह्णीयादित्यन्वयः। तारेण प्र[3]विलोक्यैतदुचितम्। शिवेऽप्येतत् सर्वमनुसरणीयम्। [4]बुध इति। दक्षिणपादे दक्षिणकरेण सव्यपादे सव्यकरेण च दीर्घदर्भाग्रेण युगपत् सङ्ग्रहणमुक्तम्। यद्वा पीठब्रह्मशिलाकर्मबिम्बानां बलिपीठवाहनादीनां च सहाधिवासोपपत्तौ तेषामपि बिम्बोपयुक्तशेषेण यथास्वं नेत्रोल्लेखनादि पुनश्शोधनादि च सर्वमुक्तम्। वक्ष्यति च–'पीठं ब्रह्मशिलायुतं कृतजलावासान्तमुक्तक्रमाद्' इति। तथा–"कुर्यात् तुर्यदिनात्यये यदि महापीठप्रतिष्ठापनम्" इत्यादि।। 31।।

Now the preceptor shall engage the sculptor who is prescnted with appropriate gifts and as such pleased, to place the idol on a wooden stool in such a manner as to how the idol is to be consecrated with in the sanctum. Thereafter the preceptor shall receive the idol from the hand of the sculptor, While handing over the idol it shall be closely examined from head to foot chanting Praṇava in the highest pitch and holding darbhā grass in both the hands. While touching the foot of the idol it shall be in the form of ceremonial salutation as is usually done. (31)

1. 'बुधः।।' क.
2. 'सनादु 'क. पाठः,
3. प्रोक्ष्यैतदुचितम्।'ख. पाठः,
4. 'गुरुः' इत्यस्य स्थाने 'बुध 'इति विवरणरीत्या पाठः

पाथोदर्भकधेनुबालघृतमासूराम्बुभिः श्रीपतौ
साज्यक्षौद्रकवल्कमृद्भसितचूर्णैर्गन्धतोयैः शिवे।
अप्क्षौद्राज्यकदर्भवल्कसुमृदद्भिश्चाजितेशे मधू-
र्ध्वस्थाज्येन हरीरितेन महिषारावम्बुदर्भादिना।। 32।।

दर्भाद्यप्पशुलूमगोधृतमसूराब्गोमयाद्भिर्गुहे
पाथोमृन्निजकल्कदर्भजलमध्वाज्यैः समासूरकैः।
विघ्ने शास्तरि साम्बुदर्भकुशमृत्त्वगगव्यकैः शालिपि-
ष्टाद्भिश्च क्रमतः स्वमूलमनुना स्वास्त्रेण वा शोधयेत्।। 33।।

विमर्शिनी

गृहीतस्य बिम्बस्य शोधनमाह–पाथ इति। श्रीपतौ पाथोदर्भकधेनुबालघृतमासूराम्बुभिः क्रमतः स्वमूलमनुना स्वास्त्रेण वा शोधयेत्। अयमत्र शोधनप्रकारः – उक्तमन्त्रेण पूर्वं (पाथो?) जले[1]नाभिषिच्य दर्भकैः संघृष्य धेनुबालेन च संघृष्य घृतेनाभिषिच्य ( ) तेनोद्वर्त्याम्बुभिः क्षालयेदिति। एवं सर्वत्रानुरूपेण शोधनं कार्यम्। स्वमूलमनुना स्वास्त्रेण वेति प्रत्येकं सम्बध्यते। शिवे साज्यक्षौद्रकवल्कमृद्भसितचूर्णैः आज्यसहितेन क्षौद्रेण। क्षौद्रं मधु, वल्कास्त्वचः, मृन्मत्तिका, भसितं भस्म चूर्णं च। एतैर्गन्धतोयैश्च। अजितेशे अप्क्षौद्राज्यकदर्भवल्कसुमृदद्भिश्च। महिषारौ हरीरितेन हरावुक्तेन अम्बुदर्भादिना। मधूर्ध्वस्थाज्येन आज्यात् पूर्वं मधुना च। गुहे दर्भाद्यप्पशुलूमगोघृतमसूराब्गोमयाद्भिः। दर्भादिः दर्भा मृदस्त्वचश्च, अपः जलं, पशुलूम पशुवालं, गोघृतमाज्यमेव, मसूर उक्तः, अप् गोमयम् अम्बु च, एतैः। विघ्ने पाथोमृन्निजकल्कदर्भजलमध्वाज्यैः समासूरकैः। निजकल्काः निजास्त्वचः। शास्तरि साम्बुदर्भकुशमृत्त्वगगव्यकैः शालिपिष्टाद्भिश्च।। 32–33।।

विवरणम्

स्थूलां बिम्बशुद्धिमाह–पाथोदर्भकेति। शोधयेदित्युपरि सम्बन्धः। इह पूर्वमस्त्र-प्रोक्षणतालत्रयाद्यौचित्यसिद्धम्। जलदर्भादि सर्वं दर्भसंस्तरे संसाद्य अस्त्रप्रोक्षणशोषणादि कृत्वा प्रणवेन पूजयेत्। गोबालेऽप्यस्त्रप्रोक्षणं स्यात्। मासूरं मसूरपिष्टमुद्वर्तनीयम्। साज्येति मध्वाज्ययोगविकल्पोऽपि सूचितः। वल्ककल्कशब्दौ त्वग्वचनौ। हरीरितेन मधूर्ध्वस्थाज्येन अम्बुदर्भादिनेति। जलदर्भगोवा-लमध्वाज्यमासूरपिष्टजलैरित्यर्थः। दर्भादिपदेन दर्भमृत्त्वग्ग्रहणम्। लूमशब्दो वालपर्यायः। विघ्न इत्यधः सम्बन्धनीयम्।। 32–33।।

The idol of Viṣṇu cleaned with the materials like water, handful of Kusa grass, bits of the tail of cow, ghee, and powdered Māsura – the Bengal gram with splashes of water.For cleaning the idol of Śiva a host of cleaning materials like ghee, honey, barks of trees (specified as eight) sands from hill, ant hill, dusts made from elephant tusk (ivory) horns of ox, altar where Agnihotra was performed, river, holy ghats, junction of roads, ashes

1. 'ले तेना' म. पाठः

prepared from seven barks and cowdung, green gram, turmeric, yava, wheat and gold and water mixed with and Aṣṭangandha fragrances are to be used. In the case of the idol of a Śaṅkaranārāyaṇa the materials for cleaning the idol are water, honey, ghee, the barks of four milky trees as well as those of Palāśa (Butea frondosa) and bamboo, ant hill, fertile land, horn of an ox, sands from both the banks of a river and again plenty of water are needed. In the case of Durgā the materials for cleaning are water, darbhā grass, tail of cow, ghee, honey, powder of Bengal gram along with plenty of water is prescribed. (32)

In respect of (the idol of) Guha the materials for the cleaning are: Sand from the sacred pit prepared for the Agnihotra, fertile land, powdered ivory and horn of an ox, hill, ant-hill, sea shore, barks of four types of fig trees as also those of mango tree, Butea frondosa, mimosa sirisha and Bassia latifolia, plenty of water trail of cow, powder of Bengal gram, and water mixed with cowdung.

In the case of Vighneśa the cleaning materials for the idol are water, sand from fertile land and that thrown up by rats in digging the earth, horn of an ox, holyghat sand collected from it ivory hill, sacrificial pit where Agnihotra was performed, barks of four trees in addition to those of jack tree, mimosa sirisa, Bilva), handful of Kuśa grass, more water, honey, ghee and powdered Bengal gram. As regards the idol of Śāstā, the materials are water, darbha grass, Kuśa grass, sands from the pit made by a pig, ivory, horn of ox, ant hill barks of four types fig trees, Pañcagavya, powdered paddy and again plenty of water.

In cleaning the idol the respective Mūlamantras or Astra mantra shall be chanted. (33)

मुद्गनिशायवशालीगोधूमसुवर्णजानि चूर्णानि।
स्थाणौ स्वबिम्बकलशाद्यवगन्तव्यं मृदादि सर्वेषु।। 34।।

विमर्शिनी

चूर्णान्याह–मुद्गेति। स्थाणौ मुद्गनिशायवशालीगोधूमसुवर्णजानि चूर्णानि। (   ) सर्वेषु मृदादि मृत्त्वगादि स्वबिम्बकलशाद्यवगन्तव्यं स्वबिम्बशुद्धिकलशादितो ज्ञातव्यम्।। 34।।

विवरणम्

स्वबिम्बकलशाद्यवगन्तव्यमिति। आदिशब्देनाभिषेकग्रहणम्। शिवेऽभिषेके माधूक ब्रह्मशैरीष- कपनसरसालाः, अजितगिरिशयोः प्लक्षहीनाः क्षीर्याख्या इति त्वचः। बिम्बकलशे स्थाणौ नाकूक्षतीर्थद्विपशिखरिनदीवेदिकाचत्वरोत्था इति मृदः। क्वथितकथितवृक्षत्वक्करीषं सुदग्धं भसितमिति सामान्यसिद्धं भस्मेति हरिहरे। क्षीरिद्रुमाद्रिजशमीखदिरं कुमार्यां, हरीशे खदिरोनितं तदिति त्वचः। सरिदुभयतटक्षेत्रनाकूक्षजाता मृत्सनाः शार्ङ्गीश इति मृदः। स्कन्दे वेदीक्षत्रगजोक्षशृङ्गगिरिवल्मीकोद्भवाः

सरिदब्धिजे शरभव इति मृदः। न्यग्रोधद्रुरुदुम्बरश्चलदलप्लक्षौ रसालद्विजौ शैरीषस्समधूकदारुरपि सेनान्यामिति त्वचः। गणपतौ शैवोक्ता एव मृदः। किंतु क्षेत्राखुजा[1]श्च्युतचरमसरिज्जा इति विशेषः। विघ्ने पयोद्रुमकपित्थमधूकबिल्वमिति त्वचः। शास्तरि करिकिरिवृषवल्मीकनद्युद्भवाश्चेति मृदः। प्रभेशे क्षीर्याख्या इति त्वचः। इति।। 34।।

For Sthāṇu (Śiva) the materials so cleanse the idol are prescribed as powders of green gram, turmeric, yava, wheat and gold. In the case of all deities the group of materials are almost the same for Bimba and Kalaśa (filling the pot). (34)

अ[2]थालङ्कृत्य गन्धाद्यैः कुर्यान्नीराजनं शिवे।
विष्ण्वादौ निजहोमान्ते विघ्नादौ कौतुकान्ततः।। 35।।

विमर्शिनी

अत शिवे गन्धाद्यैरलङ्कृत्य नीराजनं कुर्यात्। विष्ण्वादौ विष्णुदुर्गास्कन्देषु। निजहोमान्ते निजाक्षतहोमावसाने। विघ्नादौ विघ्नशर्वरीशयोः। कौतुकान्ततः कौतुकबन्धनानन्तरम्। अत्र शिवशब्दः शास्तुरप्युपलक्षणार्थः।। 35।।

विवरणम्

अथालङ्कृत्य गन्धाद्यैरिति। निजनिजोक्तशोधनानन्तरमित्यर्थः। गन्धाद्यैरिति गन्धपुष्पाक्षतस्र-गादिग्रहणम्। विष्ण्वादाविति दुर्गास्कन्दग्रहणम्। विघ्नादाविति हरिहरशास्तृग्रहणम्।। 35।।

In the case of Śiva after cleaning the idol) decorations(with flower, incenses etc.) be made before Nīrājana, the waving of lights, as an act of adoration) with regard to Viṣṇu, Durgā and Subrahmanya the waving of lights should be after Akṣatahoma whereas in the case of Gaṇeśa, Śaṅkaranārāyṇa and Śāstā, if shall be after the Kautuka tying of the auspicious thread. (35)

अग्रेऽग्निं विनिधाय तत्र विधिवत् विष्णौ सदुर्गागुहे
प्रत्येकं शतशः शमीदलमिलद्भिः साज्यकैरक्षतैः।
सप्तव्याहृतिभिर्जुहोतु जिनवर्णेनात्र पूर्णा हरौ
स[3]म्पातं प्रतिमाङ्गपूर्तिविधये पादादिषु प्रार्पयेत्।। 36।।

विमर्शिनी

अक्षतहोममाह–अग्र इति। सदुर्गागुहे विष्णौ अग्रे प्रतिमाया अग्रभागे। विधिवद् उल्लेखनादिपूर्वकम् अग्निं विनिधाय। तत्राग्नौ। शमीदलमिलद्भिः शमीपत्रमिश्रैः। साज्यकैरक्षतैः सप्तव्याहृतिभिः 'ओं भूः स्वाहा' इत्यादिभिः 'ओं सत्यं स्वाहा' इत्यन्तैर्मन्त्रैः प्रत्येकं शतं जुहोतु। हरौ अत्र अक्षतहोमे। जिनवर्णेन

---

1. 'जाडयश्च्यु' क. पाठः,
2. 'एवं विशोधितं बिम्बं गन्धपुष्पाद्यालङ्कृतम्। ..... निधाय तत्र दर्भादि त्यक्त्वा भूमिं विशोधयेत्।। ख. पाठः,
3. 'होमान्ते प्रतिमात्मनि प्रतनुयात् सम्पातपातादिकम्।। इ', ख पाठः

गायत्र्या। पूर्णा पूर्णाहुतिः स्यात्। तेषु देवेषु संपातं प्रतिमाङ्गपूर्तिविधये प्रतिमाया अङ्गपरिपूरणार्थम्। पादादिषु मूर्धान्तेषु अर्पयेत्।। 36।।

विवरणम्

तत्राग्रेऽग्निमित्यन्वयः। विधिवदित्युल्लेखनादिकमग्नौ पूजादिकं प्रणवव्याहृतिपीठ-मन्त्राज्यहोमादिकं चोक्तम्। सप्तव्याहृतिभिः प्रत्येकं शतश इत्यन्वयः। शतं सर्वत्राष्टोत्तरं प्रथितम्। शमीदलमिलद्भिरिति। शमीपत्रमिश्रितैः। आज्यसंस्कृतावक्षतानामपि पर्यग्निकरणं भवति। अत्र हरौ जिनवर्णेन पूर्णेति। विष्णौ स्वगायत्र्या पूजा मन्त्रान्ते शतशतान्ते च पूर्णाहुतिः। दुर्गायां गुहे च निजमूलेनान्यदेवेष्वपीति भाविरीत्या तत्तन्मूलेनैवेत्यर्थः। प्रतिमाङ्गपूर्तिविधय इति। सुपूर्णलक्षणमपि बिम्बं परमसूक्ष्मोनातिरेकसम्भवादपूर्णमिव स्यात्। तदीयादृष्टक्षपणेन पूर्णतासम्पादनार्थमेतदिति भावः। शैवादिषु त्वेतदधिवासे कार्यम्। यद् वक्ष्यति हि–'प्रागष्टोर्ध्वसहस्रम्' इत्यादि। पादादिष्विति। पादजानुगुह्यनाभिहृन्मुखन्मूर्धस्विति। प्रार्पयेदिति। पुष्पाञ्जलिः सामान्यतो लभ्यते।। 36।।

In front of the idol of Viṣṇu, Durgā and Guha a sacrificial altar may be properly prepared and kindled with usual items like ghee and bits of tinder. Then Akṣata be prepared mixed with the leaves of Śamī and ghee after which offerings be made into the fire with the prescribed seven mantras (which are traditionally handed down). After the offers of a 108 times of the seven mantras, Viṣṇu may propitiated with the Gāyatrī mantra. The spirit of the fire may be invoked to the vessel in which sacrificial items are collected with placing them in the various parts of the idol like foot (knee, thigh, navel, head and crown etc.) (36)

इष्ट्वा गन्धादिभिः कौतुकमथ[1] कलयेन्मूलतो विघ्नशर्व[2] –
श्रीशे ता[3]राभिरुद्धोपचरणमनुनोक्ताहुतेः प्राक् कुमारे।
चण्ड्यां चक्रेण वोर्ध्वं मुरजि[4]ति जलवासोद्धृतौ सोपचारे –
णाष्टार्णेनार्यके प्राङ् निजकलशविधेर्बीजमन्त्रेण मन्त्री।। 37।।

विमर्शिनी

कौतुकबन्धनमाह–इष्ट्वेति। मन्त्री मन्त्रविशेषज्ञो गुरुः। विघ्नशर्वश्रीशे च अथ शोधनानन्तरं गन्धादिभिरिष्ट्वा मूलतः कौतुकं कलयेत्। कुमारे उक्ताहुतेः अक्षतहोमात् प्राक्। ताराभिरुद्धोपचरणमनुना प्रणवपुटितोपचारमन्त्रेण। चण्ड्यां दुर्गायाम्। उक्ताहुतेरूर्ध्वं वा पूर्वं वा चक्रेण सुदर्शनमन्त्रेण। मुरजिति जलवासोद्धृतौ जलाधिवासादुद्धृते सति। सोपचारेणाष्टार्णेन। आर्यके निजकलशविधेः बिम्वशुद्धि-कलशाभिषेकात् प्राग् द्वादशपटले वक्ष्यमाणेन बीजमन्त्रेण च।। 37।।

---

1. 'पि' ख. पाठः,
2. 'र्वे' क. पाठः,
3. 'बीजाणुनार्ये ध्रुवपरिपुटितेनोपचाराणुनाथ। स्कन्दे प्रोक्ताहुतेः प्राङ् महिषजिति परं वा रथाङ्गेन तोयावासोद्धारे जितन्तोपरिकृतनिजमूलेन शाङ्गार्युधे च।। स्थि ख. पाठः,
4. 'भिदि ज' मूलकोशपाठः

विवरणम्

मूलतो विघ्नशर्वश्रीश इति। कौतुकमिदानीमेव बध्नीयात्। वोर्ध्वमिति। उक्ताहुतेरूर्ध्वं वा प्रागेव वेत्यर्थः। मुरभिदि जलवासोद्धृताविति। वक्ष्यति च–'प्रतिसरं तत् साम्प्रतिक्य' इति। सोपशरेणेति। जितन्तान्वितेन। मन्त्रीति कौतुकोक्तमन्त्रस्य प्रणवरुद्धत्वं नमोन्तत्वं चोक्तम्। अयमिह क्रमः सम्पद्यते। शिवे शोधितेऽलङ्करणं नीराजनं च, कौतुकं नास्ति। विष्णौ अलङ्करणाक्षतहोमौ नीराजनं च। हरिहरे गणपतौ चालङ्करणम्। गन्धादिभिरिष्ट्वा कौतुकं नीराजनं च। स्कन्दे तु तथा कौतुकानन्तरमक्षतहोमो नीराजनं च। दुर्गायां स्कन्दवत्। अथवालङ्करणाक्षतहोमौ गन्धादिभिरिष्ट्वा कौतुकं नीराजनं च। शास्तरि शिववदिति।। 37।।

For tying the Kautuka – the auspicious thread, the rites are as follows For Vighneśa, and Śaṅkaranārāyṇa after the cleaning of the idols they should be decorated with flowers and the thread should be tied with the chant of the Mūlamantra. In the case of Kumāra (Subrahmaṇya) the decoration of the idol shall be before the Akṣata homa and along with the chant of Praṇava. For Durgā it could be later than the homa mentioned with the chanting Sudarśanamantra. For Viṣṇu, the mantra is the eight syllabled one and the tying of the thread shall be first after taking the idol from jalādhivāsa, plunging in the water. In the case of Śāstā before the purification the thread could be tied with the chant of Bījamantra. (37)

स्थित्वा प्रार्थ्य नमस्त इत्यणुयुजा दर्भाग्रगर्भाञ्जलिः
क्षौमक्षिप्तसमुक्तसर्षपसुवर्णोर्जस्वलं कौतुकम्।
ऊर्णासूत्रसितं सुवर्त्य परिजप्य स्वाणुना सप्तधा
सा[1]ङ्गुष्ठोपकनिष्ठिकाङ्गुलियुजा बध्नातु बाहूत्तमे।। 38।।

विमर्शिनी

कौतुकबन्धनस्येतिकर्तव्यतां दर्शयति–स्थित्वेति। दर्भाग्रगर्भाञ्जलिः दर्भाग्रद्वयेनान्तर्गतमञ्जलिं बद्ध्वा। अग्रतः स्थित्वा नमस्त इत्यणुयुजा 'नमस्तेऽर्चे! सुरेशानी'त्यादिमन्त्रद्वयेन प्रार्थ्य। क्षौमक्षिप्तसमुक्तसर्षपसुवर्णोर्जस्वलं क्षौमखण्डे क्षिप्तेन मुक्तासर्षपसहितेन सुवर्णेन तेजोवत्। ऊर्णासूत्रसितम्। तेन बद्धं कौतुकम्। साङ्गुष्ठोपकनिष्ठिकाङ्गुलियुजा अङ्गुष्ठसहिताभ्यामनामिकाभ्यां सप्तधा सुवर्त्य। स्वाणुना परिजप्य बाहूत्तमे दक्षिणकरे बध्नातु।। 38।।

विवरणम्

स्थित्वेति। तिष्ठन् भूत्वेत्यर्थः। दर्भाग्रगर्भाञ्जलिर्नमस्त इत्यणुयुजा प्रार्थ्येत्यन्वयः। क्षौमक्षिप्तसमुक्त-सर्षपसुवर्णोर्जस्वलमूर्णासूत्रसितमिति। एवं कौतुकविरचनक्रमः उक्तः। क्षौमपट्टे मुक्तासर्षपसुवर्णं निक्षिप्तमूर्णासूत्रेण बद्धं कौतुकमित्यर्थः। ऊर्जस्वलपदेनास्य महावीर्यत्वं मङ्गल्यत्वं सर्वरक्षाकरत्वं चोक्तम्। कौतुकस्यास्त्रप्रोक्षणं शोषणादिकं तदुक्तमन्त्रेण पूजनमभिमन्त्रणं चार्थसिद्धम्। स्वाणुना परिजप्य बाहूत्तमे

---

1. 'स्वा' क. पाठः

बध्नात्विति बन्धनप्रकार उक्तः। सप्तधा सुवर्त्त्येति जपसमये व्यापारः। अर्थाच्च मन्त्रस्य सप्तवारमावृत्तिरपि लभ्यते। बाहूत्तम इति। दक्षिणबाहौ। तदापि बहुबाहुसम्भवे प्रधानबाहौ नोपबाहौ। मन्त्रान्ते च बन्धनं भवति।। 38।।

Having stood up with hands holding the darbhā grass and pronouncing the mantra "Namaste Sureśāni' with folded hands take hold of the Kautuka consisting of the thread of blank bed sheet placed round an wooden rafter and one should tie it around the right arm of the idol as a bracelet. The woollen bracelet is to be placed on the rafter along with gold mustard and pearl while tying it around the hand of the idol one should chant the mantra related to the particular diety several times. The thread is to be held by the ring finger and the little finger called Kaniṣṭhikā (38)

नमस्तेऽर्चे! सुरेशानि! प्रतीके! विश्वकर्मणः।
प्रभाविताशेषजगद्धात्रि! तुभ्यं नमो नम!।। 39।।
त्वयि सम्पूजयामीशं नारायणमनामयम्।
रहिता योनिदोषैस्त्वमृद्धियुक्ता सदा भव।। 40।।

विमर्शिनी

विष्णुप्रार्थनामन्त्रद्वयं पठति – नमस्त इति।। 39-40।।

For Viṣṇu the mantra is in the forms of O Sureśāni. I bow to you, you are the representative of Viśvakarman – the master builder, I shall worship the auspicious deity in your own form which is without a blemish and you be a cause of prosperity. The entire prowess of the universe is represented in your firm. (39-40)

त्वयि सम्पूजयामीशौ शम्भुनारायणौ सदा।
इत्यादितत्तत्कल्पोक्तभिदयात्र मनुं पठेत्।। 41।।

विमर्शिनी

शिवनारायणादौ विशेषमाह–त्वयिति। अत्र कौतुकबन्धने। तत्तत्कल्योक्तभिदया तत्तदागमोक्तभेदेन सह मनुं पठेद् उच्चरेत्।। 41।।

विवरणम्

तत्तत्कल्पोक्तेति। यथा कार्त्तिकेयमनामयमित्यादि।। 41।।

The mantra for Śaṅkaranārāyaṇa is in the form of O divinity in you we invoke the presence of Śambhu and Nārāyaṇa. Here again the respective mantra is to charied with suitable modifications. (41)

नमस्तेऽर्चां! सुरेशानि! विश्वावासे! सुरारिणि!
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः।। 42।।

त्वयि सम्पूजयामीशे! देवीं नारायणीं सदा।
रहितेत्यादिरूपोऽत्र दुर्गोपस्थानमन्त्रक[1]:।। 43।।

विमर्शिनी

दुर्गाप्रार्थनमन्त्रे विशेषमाह पुनः—नमस्त इति। इत्यादिरूप इत्यादिस्वरूपः। दुर्गोपस्थानमन्त्रकः दुर्गाया उपस्थानमन्त्रः।। 42-43।।

विवरणम्

रहितेत्यादिरूप इति। 'रहिता योनिदोषैस्त्वमि'त्यादि। शेष उक्तः।। 43।।

For Durgā the mantra is O Sureśāni, I worship you, in whom the universe dwell, you destroy the enemiy of Gods, you manifest all the powers of the mother of the world. (42)

O Goddess in you I worship Nārāyaṇi. Here one may add the mantra used for Durgopasthāna beginning with "rahitā yoni doṣaiḥ" meaning devoid of the blemishes of origin. (43)

अर्चामथावेष्ट्य सदर्भवस्त्रैरारोप्य, मन्त्री निपुणं रथादौ।
छत्रध्वजाद्यैर्बहुवाद्यहृद्यं जलाधिवासाय नयेच्च तीर्थम्।। 44।।

विमर्शिनी

अथार्चां सदर्भवस्त्रैरावेष्ट्य रथादौ याने। निपुणम् अप्रमादयुक्तमारोप्य। छत्रध्वजाद्यैः सह बहुवाद्यहृद्यं बहुभिर्वाद्यवादनेन हृद्यं मनोहरं यथा भवति तथा मन्त्री कनिक्रदादिमन्त्रं जपन् जलाधिवासाय तीर्थं नयेच्च।। 44।।

विवरणम्

सदर्भवस्त्रैरावेष्ट्येति। वस्त्रेण बिम्बं सर्वतः समाच्छाद्य तद्बहिर्दर्भैराच्छाद्य बन्धनं कार्यम् मन्त्रीति कवचेनाच्छादनमुक्तम्। यद्वा स्वास्त्रेण तालत्रयादिकमुक्तम्। तथा शाकुनस्वस्तिसूक्तादिजपश्च। रथादाविति तदुचितयानाद्यभिप्रायम्। तीर्थमिति नदीतटाकादिविकल्पोपलक्षणम्।। 44।।

The priest shall then cover the idol, with fresh clothes and darbhā grass. He shall bind the idol with a rope prepared by joining the darbhā grass and carry it in a chariot in a procession with the accompaniments of parasol, flag and festoons, lamps, musical instruments, chantings of auspicious hymns etc., shall be there in the procession taking the idol to the specified place for immersion in holy water. (44)

---

1. 'कः।। नेत्रं तत्र तदीयनेत्रमनुमूलोङ्कारकैर्गोळ्तारार्चिष्कल्पनयोक्तकौतुकविधेः प्रागार्यके प्रोल्लिखेत्। ज्योतिलिंङ्गमिदं यदीह परिभूषामात्रमाकल्पयेज्जायासत्यकबिम्बके यदि तथा सर्वं तयोश्चाचरेत्।। अथांशुकाद्यैः परिभूष्य बिम्बं नीराज्य कृत्वा वि' ख. पाठः

तीरेऽवता[1]र्य सलिलं सकलीकृतात्मा
संशोध्य तत्र वरुणं परिपूज्य देवम्।
तन्मन्त्रतश्च परिजप्य च वारुणाद्यं
कृत्वात्र बोधिफलकं प्रयजेत पीठम्।। 45।।

विमर्शिनी

तीरे बिम्बमवतार्य सकलीकृतात्मा स्वस्य सकलीकरणादि कृत्वा। सलिलं शोषणादिभिः संशोध्य। तत्र वरुणं तन्मन्त्रतः स्वमूलतो देवं च परिपूज्य। वारुणाद्यं पञ्चवारुणात्मकं परिजप्य। अत्र बोधिफलकं कृत्वा अश्वत्थनिर्मितां सकूर्चां फलकां विन्यस्य तत्र पीठं प्रयजेत।। 45।।

विवरणम्

तीरेऽवतार्येति। जलतीरे मार्जनादिशोधिते तामर्चां भद्रासने जलाभिमुखतया निधायेत्यर्थः। सलिलं संशोध्येति। जलेऽस्त्रप्रोक्षणं तालत्रयादिकरणं शोषणादिकं चोक्तम्। नाभिदघ्ने जले चतुष्पदीं प्रपां विधाप्य तत्रैतत्सर्वं कार्यम्। तत्र वरुणं परिपूज्येति। तन्मन्त्रत इति सम्बन्धनीयम्।

सुधा कुमुदिनी पूर्णा वारुणी विश्वतोमुखी।
तरङ्गिणी च सुरसा सुशीलाप्यायिनी क्रमात्।

इति नव शक्तयः। सर्वशक्तिकमलासनाय नम इति समष्टिमन्त्रः। ओं वं वरुणाय नम इति मूलम्। वां वीमित्यादिभिरङ्गानि। अङ्गाष्टनागेन्द्रादिवज्रादिभिरावरणपूजा। 'ध्रुवासु त्वास्वि'ति वा मन्त्रः। 'अष्टभिः सप्तभिः षड्भिः पुनस्तावद्भिरक्षरैः' इत्यङ्गानि। स्वच्छांशुकाभरणपाशाङ्कुशाभयवरकरस्वच्छपद्मस्थितो ध्येय इति। देवमिति। तन्मन्त्रतः परिपूज्येति समानम्। परिजप्य च वारुणाद्यमिति। 'तत्त्वेमम्मेऽवतेहेलस्त्वन्नो अग्न उदुत्तममि'ति पञ्च वारुणानि। गङ्गे च यमुने चैवेत्यादि।

इमा आपश्शिवास्सन्तु शुभाः शुद्धाश्च निर्मलाः।
पावनाः शीतलास्सन्तु पूतास्सूर्यस्य रश्मिभिः।।

इति। त्रिपञ्चसप्तवारं पूनर्मूलं चासकृज्जपेदित्यर्थः। कृत्वात्र बोधिफलकमिति। अत्र जलेऽश्वत्थकृतं फलकं निधायेत्यर्थः। तस्मिन्नस्त्रप्रोक्षिते कूर्चं न्यस्य तत्तत्पीठं पूजयेत्।। 45।।

Placing the idol on the ground (carrying it down from the chariot) the preceptor shall purify himself in the prescribed manner and propitiate God Vāmana with appropriate hymns invoking his presence in holy water. The idol may be placed on a plank made of the fig tree before performing worship. (45)

---

1. 'र्य परिशेध्य च धारणाभिस्तीर्थाम्बुपीठमभिपूज्य जलाधिनाथम्। मन्त्री स्वमन्त्रकृतसन्निधिमर्चयित्वा तत्र स्वमूलमनुना प्रयजेच्च देवम्।। पञ्चवारुणजपा (दि) भाविते वारिणीह फलकं सकूर्चकम्। न्यस्य विम्बविनिवेशनाय तत्रार्चयेच्च निजयोगविष्टरम्।। ह। ख. पाठः

ह्लामादिस्वस्वबीजोर्ध्वगतनतिपरायाक्षरोद्यत्पृथिव्या-
द्याख्योद्भिन्नात्मने हूंफडिति मनुमुदीर्यासुमुद्धातवृत्त्या।
आयम्यानेन हुंफट्पदकृतनमसोद्व्याप्य हृत्वा धराद्यं
ज्योतीरूपां ध्रुवेण प्रतिकृतिमुदके वासयेत् प्राक्शिरस्काम्।। 46।।

विमर्शिनी

अत्र पूर्ववेष्टितानि वस्त्रादीन्यपास्याभिषिच्यलङ्कृत्य ह्लामादिस्वस्वबीजोर्ध्वगत-नतिपरायाक्षरोद्यत्पृथिव्याद्याख्योद्भिन्नात्मने हुंफडिति ह्लामित्यादिस्तस्वबीजानाम् ऊर्ध्वगतैर्नतिर्नम इति परायेत्यक्षरैश्चोद्गच्छद्भिः पृथिव्याद्याख्यामुक्तैश्च आत्मने हुं फडित्यक्षरैर्मनुमुदीर्य। 'ह्लां नमः पराय पृथिव्यात्मने हुं फट्', 'ह्लीं नमः पराय अबात्मने हुं फट्', 'ह्लूं नमः पराय तेजआत्मने हुं फट्', ह्लैं नमः पराय वाय्वात्मने हुं फट्', ह्लौं नमः परायाकाशात्मने हुं फड्' इति मन्त्रानुदीर्येत्यर्थः। उद्धातवृत्त्या भूतानां स्वस्वगुणानुरूपिणी सङ्ख्योद्धाता वृत्तिः, तयासुं प्राणमायम्य हुंफट्पदकृतनमसा हुं फडिति पदे स्थापितेन नमः वदेत। 'ह्लां नमः पराय पृथिव्यात्मने नमः' इत्यादिनानेन उद्व्याप्य पादाग्रादिनाभ्यन्तं तदादिहृदयान्तं तदादिकण्ठान्तं तदादिताल्वन्तं तदादिमूधर्वान्तं चोर्ध्वमूर्ध्वं तदा तदा व्याप्य धराद्यं पूथिव्याद्यं च हृत्वा संहृत्य शोषणदाहने च स्वस्वबीजाभ्यां कृत्वा ज्योतीरूपामग्निमयीं[1] प्रतिकृतिं प्रतिमां वस्त्रादिभिराच्छाद्य ध्रुवेण प्राक्छिरस्कामुदके वासयेत्।। 46।।

विवरणम्

ह्लामित्यादि पृथिव्यादीनां स्वस्वबीजानि ह्लां ह्लीं ह्लूं ह्लैं ह्लौं इत्येतानि तदूर्ध्वगतानि नतियुक्तानि परायेत्यक्षराणि तत उद्यन्त्यः पृथिव्याद्याख्याः पृथिव्यप्तेजोवाय्वाकाशपदानि ताभिरुद्भिन्नमात्मने हुंफटितीदृशम्। मनुमुदीर्येति। यथा–ओं ह्लां नमः पराय पृथिव्यात्मने हुं फडित्यादि। शिवे, ह्लां नमशिवायेत्यादि पठनीयम्। वक्ष्यति च–"योज्यं चैतेषां परांशे शिवार्णमि"ति। उद्धातवृत्त्या असुमायम्येति मन्त्रोक्तिसमये व्यापारोऽयमुक्तः। असुः प्राणः। उद्घातवृत्त्या तत्तद्गुणसङ्ख्ययेत्यर्थः। यद्वक्ष्यति – "तत्त्वावृत्तिप्रजप्तस्वमनुः" इत्यादि। तत्सर्वमिहापि समानम्। हुंफट्पदकृतनमसा अनेनोद्वाप्येति। ह्लां नमः पराय पृथिव्यात्मने नमः इत्यादि उद्व्यापनं संहारव्यापकम्। धराद्यं हृत्वेति। धरा पृथिवी तदादीनि भूतानि संहृत्येत्यर्थः। ज्योतीरूपां प्रतिकृतिमिति। तेजोरूपतां नीतां तां प्रतिमाम्। त्रिधा चैतत् सम्भवति। अप्सु संहारे कृते तेजोभावनया, शोषणे कृते दाहने, वायुसर्गानन्तरं तेजोभावनयेति। तेषामिह विकल्पः। प्राक् पूजितफलके शाययित्वा नाभिदघ्ने तस्मिञ्जले प्रणवेनाधिवासयेत्। प्राक्शिरस्कामिति। नान्योऽत्र नियम इति भावः। यथोक्तम्–

"वेष्टितं वसनैर्दर्भैः प्राक्शीर्षं चोर्ध्वसूत्रकम्" इति। फलकोपर्यधोमुखं सर्वत्र शाययेदुत्तानं वेति।। 46।।

The idol is to be dipped or plunged in the water placing its heard towards east and lying on its bank on a plank made of the fig tree imagining it to be a shining divinity. Before doing it the five elements of, earth, water, fire air and space are to be invoked several times with their specific mantras beginning with "hlām" etc, ending with "hum phaṭ" (46)

---

1. 'वीं प्रतिमां' ख. पाठः

र[1]क्षां कृत्वा पञ्चमन्त्रैः समन्तात्
सा[2]स्त्रैर्दिक्पांस्तद्बहिः संविभाव्य।
दीपानग्निं[3] जागरूकांश्च पुंस-
स्तत्रारक्षेत् स्थापयित्वा त्रिरात्रम्।। 47।।

विमर्शिनी

पुनः स्वस्व[4]पदे[5] पञ्चमन्त्रैः समन्ताद् दिक्षूर्ध्वान्तं सास्त्रैरस्त्रेण च रक्षां कृत्वा तद्बहिर्दिक्पान् संविभाव्य कल्पयित्वा दीपानाग्निं जागरूकान् उन्निद्रान् पुंसः पुरुषांश्च तत्र स्थापयित्वा त्रिरात्रमारक्षेत्।। 47।।

विवरणम्

रक्षां कृत्वा पञ्चमन्त्रैः समन्तादिति निजनिजपञ्चतत्त्वग्रहणम्। मध्ये परमेष्ठितत्त्वम्। प्रागादिषु पुरुषादितत्त्वानि। यद्वा, बिम्बस्य समन्ततः सर्वतत्त्वम्। तद्बहिस्समन्ततो निवृत्तितत्त्वमित्यादि। शिवे पञ्च ब्रह्माणि ग्राह्याणि, न्यासपूजार्घ्यदानान्येषां कार्याणि। सास्त्रैरिति। तद्बहिस्समन्तादस्त्रं पञ्जराकारेण विभावनीयम्। न्यासपूजार्घ्यदान[6]-जपा इहापि तुल्या एव। दिक्पास्तद्बहिस्संविभाव्येति दशसु दिक्षु तेषां सन्निधापनपूजार्घ्यदानात्युक्तानि। तत्र स्थापयित्वा आरक्षेदित्यन्वय इति।। 47।।

Affording protection with the five mantras all around ritualistic worship is to be performed. Then the lords of the eight quarters are to be invoked and propitiated with their respective mantras to ensure further protection. Several people may be arranged to guard it with burning lamp and fire. For three nights they should keep awake to afford full protection. (47)

प्रासादं परिगृह्य कारुकरतः कर्त्रा गुरुः प्रार्पितं
पर्येत्य प्रयतोऽथ रात्रिसमये सङ्गृह्य संशोध्य च।
एतद्दक्षिणतो निषद्य सकलीकृत्यार्चितात्माग्रतो
विघ्नेशं प्रसमर्च्य बीजमनुना निर्विघ्नतां प्रार्थयेत्।। 48।।

विमर्शिनी

एवं बिम्बं परिगृह्य जलाधिवासं कृत्वा ततः प्रासादमपि परिगृह्य शोधयेदित्याह प्रासादमिति। अथ जलाधिवासानन्तरं गुरुः प्रयतः शुद्धो भूत्वा कर्त्रा यजमानेन कारुकरतः परिगृह्य प्रापितं दत्तं प्रासादं रात्रिसमये पर्येत्य परितः स्वयं गत्वा ऊनातिरेकं निरीक्ष्य संगृह्य संशोध्य तदन्तर्बहिश्च मार्जनालेपनाभ्यां

---

1. 'दिक्षूर्ध्वान्तं पञ्च मन्त्रान् यथार्हं दिक्पानस्त्रार्चिश्च विष्वग् वि' ख. पाठः,
2. 'स्वा',
3. 'ग्नीन् जा' क. पाठः,
4. 'स्वपञ्च' ख. पाठः,
5. 'दे. म' क. पाठः,
6. 'नभवा इ' ख. पाठः

शोधयित्वा एतद्दक्षिणतः प्रासादस्य दक्षिणभागे निषद्योपविश्य सकलीकृत्य शङ्खपूरणपूर्वमर्चितात्मा कृतात्माराधनो भूत्वाग्रतो बीजमनुना गणपतिबीजेन विघ्नेशं प्रसमर्च्य तं प्रति निर्विघ्नतां प्रार्थयेत्।। 48।।

विवरणम्

इदानीं प्रासादशुद्धिं प्रस्तौति–**प्रासादं परिगृह्येति**। कतमदिन एतत् कर्तव्यमिति। बिम्बाधिवासतः पूर्वदिने। वक्ष्यति च–'तत्स्नपनतः पूर्वेऽह्नी'ति। किं च बिम्बाधिवासदिने प्रासादस्याप्यधिवासं वक्ष्यति 'पीठाधिवाससमये विहिताधिवासमि'ति। अतस्ततोऽपि प्रागेव तच्छोधनोपपत्तिः। अथ प्रासादं कारुकरतः परिगृह्य कर्त्रा प्रापितं गुरुः पर्येत्य सङ्गृह्येति योजना। कारुस्तक्षा। बिम्बपरिग्रह[1]वत् प्रासादपरिग्रहप्रकारः। प्रयतः शुद्धः। स्नानादिकृदिति यावत्। गुरुस्तद्दिनेऽपराह्णे स्नानादि कृत्वा सभायामन्यत्र वा उपविश्य सकलीकरणमात्रं विधाय गणपतिं सम्पूज्य कर्त्रा परिगृहीते प्रासादे तन्मुखदिगादितदन्तं प्रदक्षिणं परीत्य तदग्रतस्तिष्ठन् तं प्रासादं कर्तृसकाशात् प्रणवेन आलोक्य दर्भेण स्पृश[2]न् प्लुतप्रणवेन परिगृह्णीयादिति। कारुकरत इति तेन सन्ताड्य मुक्तमात्रे कर्त्रा परिग्रह उक्तः। संशोध्य चेति। यद्यपि साधु मार्जनादिपरिशोधितस्यैवायं परिग्रहः, किन्तु परिगृहीतस्य पुनस्तलक्षालनादि सर्वमस्त्रेण कार्यमिति भावः। एतद्दक्षिणतो निषद्येति। प्राग्द्वारे प्रासादेऽन्तर्मण्डलान्तरे वा याम्यबलिपीठपुरतः प्रत्यग्द्वारे तत्पश्चिमत इति ज्ञेयम्। मण्डप एव वा। यथोक्तं गुरुराचम्य मण्डप उपविश्येत्यादि। निषदनमुपवेशनम्। सकलीकृत्येति। आत्मानमिति शेषः। अग्रतो बीजमनुना विघ्नेशं प्रसमर्च्येति। स्वस्तिकेऽष्टदलपद्मे वा विधिवद् गणपतेः स्वबीजमन्त्रेण पूजोक्ता। निर्विघ्नतां प्रार्थयेदिति। प्रतिष्ठापनपर्यन्तमियं निर्विघ्नताभिप्रेयते।। 48।।

The preceptor after having purified himself with bath and other purificatory acts receive the temple ceremonially from the hands of the carpenter in the evening who shaped it. Holding darbhā in his hand he should spinkle water over the structure going around it from left to right. He should again purify himself sitting on the four sides of the shrine respectively. If the temple is to face towards the east, the preceptor shall sit towards the east of Yama and if towards the west, he should also sit in that region for cleaning his body. He is to worship Vighneśa with the Mūlamantra to ward off all obstacles. The mantra is "Nirvighnamastu". (48)

ततः समास्तीर्णकुशेषु सादितं
त्रिसूत्रकाद्यक्षतसूनपश्चिमम् ।
विशोधितं धारणया ध्रुवार्चितं
परामृशेत् स्वैर्मनुभिर्यथाक्रमम्।। 49।।

विमर्शिनी

ततः समास्तीर्णकुशेषु सादितं त्रिसूत्रकाद्यक्षतसूनपश्चिमं त्रितन्त्याद्यक्षतपुष्पान्तिमं द्रव्यजातं धारणया शोषणादिभिर्विशोधितं ध्रुवार्चित तत् स्वैर्वक्ष्यमाणैर्मनुभिर्यथाक्रमं परामृशेत् संस्पृश्य जपेत्।। 49।।

1. 'हतत्प्रासा',
2. 'शेत् प्लु' क. पाठः

विवरणम्

ततः समास्तीर्णकुशेषु सादितमिति। स्वाग्रत उदग्भागे दक्षिणभागे वा दर्भसंस्तरे सादितं प्रणवेन क्रमतः सादनमिष्यते। त्रिसूत्रकं त्रिगुणितसूत्रकम्। धारणया विशोधितमिति शोषणादिकमुक्तम्। अस्त्रप्रोक्षणपूर्वकमेतत् कर्तव्यम्। ध्रुवार्चितम्। पुनः प्रणवेन पूजितम्। स्वैर्मनुभिरिति। व्यस्ताव्यस्तप्रणवादिभिः।। 49।।

Thereafter on the northern side material for worship may be collected and spread over the Darbhā grass arranged on a mat. The items are thread, garlands, flowers and Akṣata, sprinkling them with holy water and performing acts of purificatory worship may be made sounding the bell along with the chant of Praṇava, respective mantras may be used in purifying the substances spread over the darbhā grass. (49)

सूत्रं प्राक् त्रिवृतं कुशस्त्रजमथो मुष्ट्या शकृद्वारि वा
पश्चात् सर्षपमुष्टिगोमयजलं गव्यं क्रमात् तत्परम्।
कुर्याद्वा विकिरं समुष्टिकमथो गन्धाम्बु पुष्पाक्षतं
दर्भाग्रान्वितमन्ततो विकिरवापेऽन्ते तु तत्सादनम्।। 50।।

विमर्शिनी

द्रव्याण्याह–**सूत्रमिति**। प्राक् पूर्वं त्रिवृतं त्रिगुणितं सूत्रं कुशस्त्रजं चाथो मुष्ट्या सह शकृद्वारि गोमयजलं वा विकल्पेन, पश्चात् सर्षपमुष्टिगोमयजलं सर्षपं मुष्टिं गोमयजलं पञ्चगव्यं च क्रमात्, तत्परं विकिरं समुष्टिकं वा विकिरमुष्टिं च विकल्पेन कुर्यात्। अथ गन्धाम्बु दर्भाग्रान्वितं पुष्पाक्षतं च कुर्यात् संपात[1]येत्। अन्ततः अवसाने विकिरवापे पक्षे तु तत्सादनं चान्ते कुर्यात्।। 50।।

विवरणम्

प्राक् त्रिवृतं सूत्रमित्यन्वयः। कुर्यादिति च सम्बध्यते। त्रिवृतं त्रिगुणितम्। कुशस्त्रजमिति। दर्भमालाम्। मुष्ट्या शकृद्वारि वेति। सहार्थे तृतीया। मुष्टिगोमयजले कुर्याद्वा नवेत्यर्थः। तत्परं कुर्याद्वा विकिरं समुष्टिकमिति। विकिरमुष्ट्योस्सहविकल्पः। पुष्पाक्षतं दर्भाग्रान्वितमित्येकं सन्धानमुक्तम्। अन्ततो विकिरवाप इति। यदा गव्यानन्तरं विकिरमुष्टी न स्तस्तदा धूपदीपकमपि प्रकल्प्य परित इत्येतदन्त एव विकिरकर्म कार्यम्। तदा चाक्षतान्ते विकिरसादनमपि कार्यम्। नत्विह मुष्टिरपीत्यभिप्रायः।। 50।।

The idol should be provided with several items. First thread with three strings, a garland made of darbhā grass and a handful of water mixed with cowdung shall be applied. These articles like white mustard and water mixed with cow dung, Thereafter Pañcagavya (the five) items related to a cow) followed by the showering of grass. Then again water with Aṣṭagandha (the fragrants) flowers and Akṣata are to be provided in an act of cleansing. (50)

---

1. 'द' क. पाठः

व्यस्ताव्यस्तनिरञ्जनं त्रिगुणदाम्नोर्यं त्रिमुष्ट्यां शकृ-
त्तोयं वं सितसर्षपे रमथवा सैंहं हरौ मन्त्रवित्।
गव्ये पञ्च जपेन्मनून् विकिरकाद्येषु स्वमूलं हरा-
वर्कार्णं विकिरे त्रितन्तुषु तनुत्रं[1] गव्यमन्वस्त्रकम्।। 51।।

विमर्शिनी

तन्मन्त्रानाह–व्यस्ताव्यस्तेति। मन्त्रविद् मन्त्रविशेषज्ञो गुरुः त्रिगुणदाम्नोः त्रिसूत्रदर्भस्त्रजोः व्यस्ताव्यस्तनिरञ्जनं पृथग्भूतमपृथग्भूतं प्रणवं जपेत्। त्रिमुष्ट्यां मुष्टित्रये यमिति बीजं, शकृत्तोये वं बीजं, सितसर्षपे सिताः सर्षपा मुख्या इति सितसर्षप इत्युक्तं, तत्र रं बीजं, हरौ अथवा सैंहं क्ष्रौं[2]मिति नरसिंहबीजं, गव्ये निजान् पञ्च मन्त्रान्, विकिरकाद्येषु स्वस्वमूलं, हरौ विकिरेऽर्कार्णं द्वादशाक्षरं, त्रितन्तुषु तनुत्रं कवचं वा, गव्यमनु गव्येऽस्त्रकं च जपेत्।। 51।।

विवरणम्

व्यस्ताव्यंस्तनिरञ्जनं त्रिगुणदाम्नोरिति। निरञ्जनं प्रणवः, त्रिगुणं त्रिगुणितसूत्रं, तस्मिन् व्यस्तप्रणवं जपेत्। दाम दर्भमाला, तत्र समस्तप्रणवं जपेत्। यं त्रिमुष्ट्यामिति। मुष्टित्रये वायुबीजम्। शकृत्तोये वमिति। गोमयजलद्वयेऽपि वरुणबीजम्। सितसर्षपे रमिति। सितास्सर्षपा मुख्याः। सर्षपे चाग्निबीजमित्यर्थः। अथवा सैंहं हराविति। सर्षपे नरसिंहबीजं वेत्यर्थः। मन्त्रविदिति विकिरणे फडन्तत्वमुक्तम्। यद्वा, सर्वेष्वप्यस्त्रविकल्प उक्तः। यदुक्तं–हरौ "सर्षपानस्त्रमन्त्रितानि"ति, शिवादिष्वपि "सर्षपानस्त्रमन्त्रतः", सर्षपानस्त्रसञ्जप्तानि"त्यादि। गव्ये पञ्च जपेन्मनूनिति। विष्णौ वासुदेवादिनारायणान्तं मनवः ते च कर्मशेषपटलभाविनः। शिवे तु ईशानादि पञ्च ब्रह्माणि। हरिहरे द्वयान्यपि। पञ्चतत्त्वानि इतरेषु स्युः। पञ्चगव्यानां योजनक्लृप्तिस्तु निष्कृतिपटले वक्ष्यते–'गोमूत्रं निजवाञ्छया परिमितमि'त्यादि। विकिरकाद्येषु स्वमूलमिति। विकिगन्धोदकाक्षतेषु धूपदीपयोरपि सादने तयोरपि मूलम्। मुष्टौ तु वायुबीजं, यं त्रिमुष्ट्यामिति ह्युक्तम्। हरावर्कार्णं विकिर इति। द्वादशाक्षरं मङ्गलाङ्कुरोक्तबीजैस्सतर्वेषु विकिरसादनम्। स्कन्दे तु "विकिरमिह व्रीहियव"मित्यादि निष्कृतिवक्ष्यमाणं ग्राह्यम्। [3]त्रितन्तुषु तनुत्रं वेति। शिवादौ त्रिगुणितसूत्रे कवचं वेत्यर्थः। गव्येऽस्त्रकमिति। वेत्यनुषङ्गः। शिवादिष्वेव पञ्चगव्येऽस्त्रं वा जपेदित्यर्थः। अधि गव्य इति। दुर्गास्कन्दयोर्दर्भमालादि, सर्वेष्वप्यस्त्रविकल्पोऽपि सूचितः। विकिरे तु मूलमेवेष्यते। यदुक्तम्–'विकिरान् जपेदष्टोत्तरं शतं मूलमन्त्रमि'ति।। 51।।

There are mantras to be chanted along with the presentation of items. For the three threads and garland of darbhā their Mūlamantra with Praṇava is to be chanted. For white mustard the Mūlamantra of Narasimha in the case of the idol of and for Pañcagavya their basic mantras are required to be chanted. For using the twelve lettered mantra is prescribed and Kavaca-mantra for the three threads to be concluded with Astra for Pañcagavya. (51)

1. 'त्रं वापि गव्येऽस्त्र' म. पाठः',
2. 'क्ष्रौं' क. पाठः।
3. 'त्रितन्तुषु तनुत्रं वापि गव्येऽस्त्रकम्' इति विवरणपाठः

दत्त्वा धेनूर्द्विजेभ्यो द्विरदवदनमुद्वास्य तद्देवतात्मा
स्थित्वा द्वारोपकण्डे विभुसदनमदः प्रेक्ष्य दृष्ट्यास्त्रमय्या।
फट्कारान्तेन तारेण च चुलुकभृतैरष्टतारामिजप्तैः
पाथोभिः प्रोक्ष्य रक्षःप्रकरमिह कृतावासमुत्सारयेच्च।। 52।।

विमर्शिनी

पुनर्द्विजेभ्यो धेनूर्दत्त्वा द्विरदवदनं गणपतिमुद्वास्य तद्देवतात्मा गुरुः स्वयं देवो भूत्वा द्वारोपकण्ठे प्रासादद्वारसमीपे स्थित्वा अदः एतद् विभुसदनं देवालयम् अस्त्रमय्या अस्त्रतेजः प्रसारिण्या दृष्ट्या प्रेक्ष्य चुलुकभृतैर्निजदक्षिणकरचुलुकगृहीतैः अष्टताराभिजप्तैः पाथोभिर्जलैः फट्कारान्तेन तारेण प्रोक्ष्य इह कृतावासं कृतस्थानीयकं रक्षःप्रकरं राक्षससमूहं उत्सारयेद् अपसारयेच्च।। 52।।

विवरणम्

दत्त्वा धेनूर्द्विजेभ्य इति। चतुरवरं पशुदानमुक्तम्। द्विरदवदनमुद्वास्येति। अवसानीयार्घ्यदानादिपूर्वकं गणपतिरुद्वासनीयः। तद्देवतात्मेति। मूलमन्त्रप्राणायामाङ्गादिन्यासमानसपूजाजपैरिति शेषः। स्थित्वा द्वारोपकण्ठ इति। प्रासादद्वारसन्निधौ बहिरेव तदभिमुखं स्थित्वेत्यर्थत्। अदो विभुसदनमस्त्रमय्या दृष्ट्या प्रेक्ष्येत्यन्वयः। दृष्ट्योरस्त्रभावनास्त्रोच्चारणमपि कार्यम्। प्रासादशरीरे तदन्तर्गर्भगृहे चैतदीक्षणं भवति। चुलुकभृतैरष्टताराभिजप्तैः पाथोभिः फट्कारान्तेन तारेण च प्रोक्ष्येत्यन्वयः। दक्षिणकरपुटे शङ्खाज्जलं सम्पाद्य वामहस्तेन स्पृशन् प्रणवेनष्टवारमभिमन्त्र्य तेन फडन्तप्रणवेन प्रासादशरीरं प्रोक्ष्येत्यर्थः। रक्षःप्रकरं रक्षसां समूहम्। उत्सारणमपनयनम्। भावनैवेयं भवति।। 52।।

Thereafter presenting cows to the Brāhmins and ceremonially released the presence of Vighneśa and perfecting the act of cleaning on the parts of the deity the priest shall assume the role of the god and stand guard at the door of the sanctum. There chanting the Astramantra he shall sprinkle water purifying it with the chant of particular mantra[1]. The holy water should be held in the hollowed palm and the act of sprinkling is supposed to ward off the evils like forces like Bhūtas and Rākṣasas who may be occupying the sanctum. (52)

ईशादीशदिगन्तिमं गुणकुशस्त्रग्भ्यां कपोतोपरि
प्रासादं परिवेष्ट्य दिष्टमनुना मुष्ट्या[1]द्वयान्तर्बहिः।
सम्मृज्य प्रसमुक्ष्य गोमयजलेनोत्कीर्य सिद्धार्थकान्
मार्जन्या परिमृज्य सिञ्चतु शकृत्तोयेन गव्येन च।। 53।।

विमर्शिनी

तत[2]: प्रासादं कपोतोपरिभागे गुणकुशस्त्रग्भ्यामीशादीशदिगन्तिमं दिष्टमनुना निर्दिष्टमन्त्रेण परिवेष्ट्य

1. 'ष्ट्या तथान्त' इति मूलकोशपाठः
2. 'त्र प्रा' ख. पाठः',

परितो वेष्टयित्वा। दिष्टमनुनेति सर्वत्र योज्यम्। आद्यया मुष्ट्यान्तर्बहिश्च संमृज्य गोमयजलेन समुक्ष्य सिद्धार्थकानुत्कीर्य मार्जन्या मुष्ट्या परिमृज्य शकृत्तोयेन गव्येन च सिञ्चतु।। 53।।

विवरणम्

दिष्टमनुनेति सर्वक्रियाभिः सम्बध्यते। जपोपदिष्टेन मन्त्रेणेत्यर्थः। प्रासादस्य कपोतपङ्क्त्युपरिभागे त्रिगुणसूत्रदर्भमालाभ्यामीशदिगादितदवसानं व्यस्तसमस्तप्रणवजपेन परिवेष्टयेत्। मुष्ट्याद्ययांन्तर्बहिः समृज्येति। प्रथममुष्ट्या वायुबीजेन गर्भगृहेऽच्छादीशान्तं पुनर्नाडीगृहे बहिरधिष्ठानेऽपि द्वारादितदन्तं परिमृज्यम्। करक्षाळनमन्तरान्तरा कार्यमिति ज्ञेयम्। समुक्ष्य गोमयजलेनेति। क्यचिच्छुद्धजलमपीष्यते। यदुक्तम्–

"ततो गोमयवारिभ्यां गायत्र्या चोपलेपयेत्।"

इति। उत्कीर्य सिद्धार्थकानिति। विष्णौ फडन्तेन नरसिंहबीजेन। अन्येषु रं बीजेन स्वास्त्रेण वान्तर्बहिर्विकिरणं[1] कार्यम्। उत्कीर्येति वोपरि किरणमप्युक्तम्। तेन प्रागादिदशदिक्षु सर्वतस्सर्षपविकिरणमपि सूत्रितम्। यदुक्तम्–

"नृसिंहेन फडन्तेन विकिरेद्दशदिक्ष्वपि।"

इति। मार्जन्या परिमृज्येति द्वितीयमुष्ट्या। सिञ्चतु शकृत्तोयेन गव्येन चेति। पूर्वं गोमयजलेन पुनः पञ्चगव्येन च जपोक्तमनुजापी प्रोक्षेत्। प्राग्वत् क्वचिच्छुद्धजलयोगः।। 53।।

Putting the thread chanting mantras including the Praṇava he shall tie it around the Kapota—the projecting portion of the entablature with an "S" shape beginning from the north east direction and to each back the same location completing a circle. First he should touch the sanctum and brush the inner part and the passages between the walls, splashing water mixed with cowdung. For this act he shall take darbhā grass in his palms, to act as brush. He shall also sprinkle mustards in those areas and again brush the region with water mixed with cowdung and Pañcagavya in the aforesaid manner. (53)

त्रेधा च प्रविकीर्य तत्र विकिरान् संमृज्य वापोणुना
वोक्षेद् गन्धजलैः किरेत् पुनरिषेत्वेत्यादिना वाक्षतैः।
धू[2]पं दीपमपि प्रकल्प्य परितो मूलेन गर्भालये-
ऽथे[3]शेऽग्नावनिलेऽथवास्त्रमुदकुम्भेऽधोग्रकूर्चेऽर्चयेत्।। 54।।

विमर्शिनी

तत्र विकिरानञ्जलिना त्रिधा च विकीर्य पुनर्मुष्ट्या संमृज्य वा गन्धजलैरापोणुना 'आपः

1. 'णमुक्तम्। व' घ. पाठः।,
2. 'धूपाद्यं च समर्पयेद् विकिरकर्मान्ते तथा सादनेऽथैशे' ख. पाठः,
3. 'थे' क. ख. पाठः

पुनन्त्वि'त्यादिमन्त्रेण वा मूलेन वोक्षेत्। पुनः 'इषे त्वे'त्यादिना वा मूलेन वाक्षतैः किरेत्। परितो धूपं दीपमपि मूलेन प्रकल्प्याथ गर्भालये ईशे अग्नौ अथवानिले कोणे अधोग्र[1]कुर्चे उदकुम्भे उदकपूर्णे कुम्भे अस्त्रं स्वस्वास्त्रमावाह्यार्चयेत्।। 54।।

विवरणम्

त्रेधा च प्रविकीर्य तत्र विकिरानिति। प्रासादान्तस्त्रेधा पुनर्बहिश्च विकिरान् विकिरेदित्यर्थः। विकिरणक्लृप्तिस्तु मण्डपसंस्कारे द्रष्टव्यम्। 'प्रागास्योऽञ्जलिना त्रिधात्र विकिराञ्छक्त्यात्मनि प्रोत्किरेदि'ति। शिवे प्रासादेन इतरेषु मूलेन च प्रासादमूर्तिं विभाव्यैतत् कार्यम्। इह विकिरणक्लृप्त्यनभिधानादिह तदनियमोऽपि लभ्यते। संमृज्य चेति। तृतीयमुष्ट्येति भावः। आपोणुना वोक्षेत् गन्धजलैरिति। शिवशास्त्रादावयम् 'आपः पुनन्त्वि'ति मन्त्रविकल्पः। गन्धजलैर्वोक्षेच्चेति वा चशब्दो योज्यते। पूर्वं गन्धजलैरालेपनमनेन सूचितम्। तदुक्तं–'गन्धोदैर्लिप्त्वाथापः पुनन्त्विति भूयोऽपि ताभिः संप्रोक्ष्ये'ति। किरेत्। पुनरिषेत्वेत्यादिता वाक्षतैरिति शिवशास्त्रादावेवायं मन्त्रविकल्पः। दर्भाग्रपुष्पमिश्राणामेवाक्षतानामेतद् ग्रहणम्। धूपं दीपमपि प्रकल्प्य परितो मूलेनेति। यदुक्तं–'धूपदीपौ च विन्यस्येदि'ति।

सारागारविनिक्षिप्तगुल्गुल्वगरुवासितम् ।
धूपं दत्त्वाऽभितो दीपमपि प्रज्वाल्य विन्यसेत्।।

इति। अथ गर्भालये ईशेऽग्नावतिलेऽथवा अधोग्रकूर्च उदकुम्भेऽर्चयेदिति। क्षालितस्थले स्वस्तिकामालिख्य व्रीहिदर्भपीठे तत्तत्पीठपूजापूर्वकं संस्कृते कुम्भेऽधोग्रं कूर्चं निक्षिप्य शुद्धाम्बुपूर्णे स्वास्त्रमावाह्य विधिवत् पूजयेत्। प्रतिष्ठावसितावस्य देवस्य उद्वासनं भवतीति बोद्धव्यं रक्षार्थत्वादस्येति।। 54।।

There the priest should sprinkle the prescribed material thrice with his palms and chant of "Kṛṇusva" the purificatory mantra beginning with the words "Apaḥ punantu" (meaning let the water purify) water mixed with the Aṣṭagandha incenses may also be sprinkled with water and Akṣata. Again chanting Mūlamantra bring incences and torch may be waved in the worship on a potful of water sanctifying the same with the Astramantra of the respective deity. For this the north east or north west corner may be selected. (54)

ईशेशाजितविघ्नशास्तृषु सदर्भब्रह्मशाखाकृता
मुष्टिः सैव गुहे सपिप्पलशिखाशाखाशलाकाकृता।
दुर्गाशार्ङ्गभृतोः सहाश्रितशलाकादर्भसन्दर्भिता
शार्ङ्गीशे द्विजशाखया प्रकलिता विष्णूदिता वा भवेत्।। 55।।

विमर्शिनी

मुष्टिलक्षणमाह – ईशेशेति। ईशेशाजितविघ्नशास्तृषु सदर्भब्रह्मशाखाकृता दर्भैः सह पलाशशाखया

1. 'ग्रे' क. पाठः

कृता मुष्टिर्भवेत्। गुहे सपिप्पलशिखाशाखाशलाकाकृता अश्वत्थाग्रशाखाभिः शलाकाभिश्च सह कृता सैव शैवादिषूक्तैव। दुर्गाशाङ्गभृतोः सहाश्रित-शलाकादर्भसन्दर्भिता सहायुक्ताभिः शलाकाभिश्च सह कृता दर्भैश्च बद्धा। ( ) शार्ङ्गीशे द्विजशाखया पलाशशाखया सह प्रकलिता विष्णूदिता वा।। 55।।

विवरणम्

इदानीमुक्तशोधनसाधनेषु मुष्टिरलौकिकीति तल्लक्षणं कथयति-ईशेशाजितविघ्नशास्तृष्विति। सदर्भब्रह्मशाखाकृतेति। दर्भैः पलाशशाखया निबद्धा। सैव गुहे सपिप्पलशिखाशाखाशलाकाकृतेति। यदुक्तं-

पलाशाश्वत्थशाखाभिश्शलाकैर्दर्भमिश्रितैः।
मुष्टिं कृत्वा

इति। दुर्गाशार्ङ्गभृतोरिति। सहाशलाकादर्भैर्निबद्धा मुष्टिरित्यर्थः। शार्ङ्गीश इति। पलाशशाखान्विततया कृता। विष्णूक्तमुष्टिर्वा। पूर्वोक्तेव वा मुष्टिरित्यर्थः।। 55।।

In the case of Śiva, Śaṅkaranārāyaṇa, Vighneśa and Śāstā the items of materials should include darbhā grass and Samit, the twigs of Palāśa. For Subrahmaṇya, the Palāśa twig and stalk of the coconut leaf, samit and darbhā grass should form the fistful of materials. For Durgā and using the twigs of the particular grass called cacalia rotunda folio, stalk of the coconut leaf, samit and grass should be the fistful of materials. For Subrahmaṇya the same materials prescribed for Śāstā are applicable in additions to the twig of Palāśa. (55)

चक्रं चक्रिनिसुम्भजिद्धरिहरेऽघोरं गणेशेश्वरे
स्याद् वा पाशुपतं तदन्वितरथाङ्गं वास्त्रमीशाच्युते।
ज्वालामालिनिहुं ज्वलादिघृणिहुंफट् चेति सङ्कीर्तिते
अस्त्रे शक्तिधरार्ययोः स्वलिपिक्लृप्ताङ्गे तथाङ्गाक्षरे[1] ।। 56।।

विमर्शिनी

अन्त्रमाह-चक्रमिति। चक्रिनिसुम्भजिद्धरिहरे विष्णुदुर्गाशिवनारायणे चक्रं सुदर्शनमस्त्रं स्यात्। गणेशेश्वरे गणपतिशिवयोः अघोरं पाशुपतं वा। ईशाच्युते तदन्वितरथाङ्गं पाशुपतेन युक्तं सुदर्शनं वा। शक्तिधरार्ययोः क्रमेण ज्वालामालिनिहुं ज्वलादिघृणिहुंफट् ज्वलघृणिहुंफडिति च, स्वलिपिक्लृप्ताङ्गे स्वैः स्वैः षड्भिरक्षरैः कल्पिताङ्गयुक्ते, तथाङ्गाक्षरे षड्भिः षड्भिरक्षरेण च युक्ते अस्त्रे सङ्कीर्तिते।। 56।।

विवरणम्

चक्रमिति। अस्त्रं स्यादिति सर्वत्र सम्बध्यते। पाशुपतं वेति। गणेशेश्वर इत्यनुषङ्गः। तदन्वितरथाङ्गं वेति पाशुपतान्वितचक्रं वा प्रागुक्तकेवलचक्रं वेत्यर्थः। अस्त्रयोगे तदङ्गयोगोऽपि भवति। चक्रादीनां

---

1. 'रे।। कृणुष्वपाजः प्रमुखाणुजापं कृत्वा सकृत् साष्टशतं तथास्त्रम्। संजप्य संरक्ष्यं गृहं प्रकुर्यात् राक्षोघ्नहोमं बहिरग्निकोणे।। पक्वं' ख. पाठः

कर्मशेषपटल उद्धारः। शक्तिधरः स्कन्दः। स्वलिपिक्लृप्ताङ्गे इति। द्वयोरपि षड्भिस्स्वराक्षरैरङ्गानि। अङ्गाक्षरे इति। द्वे अपि षडक्षरे। अङ्गेन्द्रादिवज्रादिभिरस्त्राणाम् आवरणपूजा।। 56।।

The Astramantra for Viṣṇu, Durgā and Śaṅkaranārāyaṇa is called Sudarśana. For Ganeśa and Śiva it should be either Aghora or Pāśupata. For Śaṅkaranārāyaṇa it could very well be Pāśupata and Sudarśana together. For a six lettered mantra is prescribed as noted in the verse. (56)

गर्भालयेऽभ्यर्चितवि[1]ष्टरेऽत्र
प्रासादमन्त्रेण शिवे परेषु।
मूलेन देवं गृहमूर्तिरूपं
प्रकल्प्य साङ्गं प्रयजेद् दिगीशैः।। 57।।

विमर्शिनी

क्रियाशेषमाह-**गर्भालय** इति। गर्भालयेऽभ्यर्चितविष्टरे अत्र शिवे प्रासादमंन्त्रेण, परेषु मूलेन च गृहमूर्तिरूपं देवं प्रकल्प्यावाह्य साङ्गम् अङ्गैर्युक्तं दिगीशैः सह प्रयजेत्।। 57।।

विवरणम्

[2]अभ्यर्चितदर्भक इति। क्षालिततले ह्रस्वदर्भसंस्तरं कृत्वा तत्रेत्यर्थः। गृहमूर्तिरूपं देवं प्रकल्प्येति। स्वपीठपूजापूर्वकमुक्तमन्त्रेणावाह्य लिपिवत्त्वमन्त्राङ्गन्यासविधानमुक्तम्। साङ्गं प्रयजेद् दिगीशैरिति। मूलाङ्गैर्विग्रहपूजाङ्गेन्द्रादिवज्रादिभिरावरणपूजोक्ता। तिवेद्यसमयेऽर्घ्यं दत्वा प्रसन्नपूजामपि विदध्यात्।। 57।।

In front of the such sanctum worship may be made in front of the idol. In the case of Siva it is Prāsāda mantra, while for other deities Mūlamantra of each of them shall be used. The god consecrated as the deity of the particular shrine may be worshipped along with the eight lords of the quarters with flowers and Naivedyas,. (57)

जपेत् कृणुष्वाद्यसकृत् तथाष्ट-
शतं निजास्त्रं च विकीर्य राज्या।
गव्यैरुत प्रोक्ष्य गृहं प्ररक्षेत्
पुष्पास्त्रतालत्रयकल्पनाद्यैः ।। 58।।

विमर्शिनी

'कृणुष्वा'दिमन्त्रजातमसकृत् प्रजपेत्। निजास्त्रं चाष्टशतं जपेत्। राज्या सर्षपेण विकीर्यं गव्यैरुत प्रोक्ष्य वा पुष्पास्त्रतालत्रयकल्पनाद्यैः पुष्पा(स्त्रम?स्त्रैर) स्त्रंजप्तपुष्पैर्दिक्षु क्षेपणैः तालत्रयदिग्बन्धनाद्यैश्च गृहं प्ररक्षेत्।। 58।।

---

1. दर्भकेऽत्रे' क. पाठः
2. 'गर्भालयेऽभ्यर्चितदर्भकेऽत्र' इति विवरणपाठः

विवरणम्

जपेदिति। राक्षोघ्नास्त्रयोर्जपः। तदभिमन्त्रितसर्षपविकिरणं तन्मन्त्रैर्गव्यप्रोक्षणमिदमुभयं समुदितं वा कार्यमिति। विकिरान्तपक्षे तु अक्षतविकिरणानन्तरमेव प्रासादमूर्तिं दर्भसंस्तरे विभाव्य गन्धमुष्पाभ्यां धूपदीपाभ्यां च तदादिप्रासादान्तर्बहिः पूजां विधाय निवेद्यस्थाने यथोक्तविकिरणमपि का[1]र्यम्। पुनस्तं प्रासादमूर्तिं पूजयेत्। ततोऽस्त्रकलशपूजां राक्षोघ्नजपादिकं च कुर्यादिति। गृहं प्रक्षेदिति। तत्रैव स्थित्वा पुष्पास्त्रमोचनं कुर्यात्। बहिर्निष्क्रस्य द्वारसम्मुखस्तालत्रयदिग्बन्धनाग्निप्राकारान् अस्त्रेण विदध्यादिति। पुष्पास्त्रमोवनमुक्तम्–

अस्त्रमन्त्रेण पुष्पाणि दश दिक्षु प्रमोचयेत्।
नाराचमुद्रया तत्र शूलमुद्रां च दर्शयेत्।।

इति। शिवे शूलमुद्रा विष्ण्वादिषु चक्रादिमुद्रेति ज्ञेयम्। पुनः प्राचीनासन उपविश्य आत्मनो लयाङ्गादि सर्वमर्थसिद्धमिति।। 58।।

Chanting of the mantras mentioned here may be made a hundred and eight times. Mustard has to be thrown everywhere and Pañcagavya may be sprinkled over them. Hereafter flowers etc., may be used for worship along with Astra mantra on all directions. (58)

ततो बहिः स्थण्डिलमारचय्य हुताशकोणे विनिधाय वह्निम्।
आध्वर्यवार्हाग्निमुखादिक्लृप्त्या रा[2]क्षोघ्नहोमं विदधीत विद्वान्।। 59।।

विमर्शिनी

ततो बहिर्हुताशकोणे स्थण्डिलमारचय्य वह्निं वि[3]निधाय। आध्वर्यवार्हाग्निमुखादिक्लृप्त्या, आध्वर्यवा यजुर्वेदिनः, तेषां योग्ययाग्निमुखादिक्लृप्त्या राक्षोघ्नहोमं विदधीत। विद्वानिति राक्षोघ्नहोमेन दुष्टराक्षसादीनां निबर्हणं विद्वानित्यर्थः।। 59।।

विवरणम्

राक्षोघ्नहोममाह–ततो बहिरिति। आध्वर्यवार्हाग्निमुखादिक्लृप्त्येति। आध्वर्यवं याजुषं चरणं तदर्हमग्निमुखं पक्वहोमप्रधानस्य आध्वर्यवत्वात्। आदिशब्देनोपरिष्टात् तन्त्रग्रहणम्। विद्वानित्यस्त्रम-याग्निप्रतिपत्त्यर्थम्। तदुक्तं–"अग्निं निधाय घोराग्निं ध्यायन्नग्निमुखं चरेत्" इति।। 59।।

Thereafter the particular sacrifice called Rakṣoghna capable of warding off goblins and other evil spritis may be performed by the priest outside the shrine in a vacant spot on the south east corner. The priest should be proficient in such sacrificial matters, which are traditionally handed down. (59)

---

1. 'कुर्यात्।' घ. पाठः,
2. 'र' क. पाठः,
3. 'विधा' ख. पाठः

पक्वं रक्षोहणादिद्वयमयमनुनाज्यं कृणुष्वादिमन्त्रै-
येंदेवाद्यैश्च दुर्गामनुभिरपि सभूरादिभिश्शखाखिलेषु।
प्राग् भूरादेः स्वगुह्याणुभिरजितहरे मार्गजाज्यान्नसर्पी-
ष्यस्त्रेणाथाष्टयुक्तं शतमपि जुहुयात् सर्वतः सस्वपूर्णम्।। 60।।

विमर्शिनी

अखिलेषु रक्षोहणादिद्वयमयमनुना 'रक्षोहणं वाजिनं' 'विज्योतिषा बृहता' इति द्वयस्वरूपेण मन्त्रेण पक्वं जुहुयात्। कृणुष्वादिमन्त्रैरष्टादशभिर्येदेवाद्यैश्च पञ्चभिः दुर्गामनुभिः पञ्चभिर्दुर्गाभिश्च सभूरादि-भीर्व्याहृतिभिरपि च आज्यं जुहुयात्। अजितहरे भूरादेः व्याहृतिभ्यः प्राक् स्वगुह्याणुभिः स्वपञ्चतत्त्वैश्च। अथ सर्वतः सर्वदेवेषु मार्गजाज्यान्नसर्पिषि, मार्गजोऽपामार्गः, अस्त्रेण स्वस्वास्त्रमन्त्रेणाष्टयुक्तं शतमपि सस्वपूर्णं स्वस्वपूर्णाहुतिसहितं यथा तथा जुहुयात्।। 60।।

विवरणम्

पक्वं रक्षोहणादिद्वयमयमनुनेति। रक्षोहणं वाजिनमिति पुरोनुवाक्यामुक्तौ प्रणवेन सन्धाय विज्योतिषेत्यृचा पक्वं जुहुयादिति द्वयमयपदाभिप्रायः। कृणुष्वादिमन्त्रैरित्याध्वर्यवग्रहणा-द्यजुर्वेदाम्नातैरष्टादशभिरिति लभ्यते। येदेवाद्यैरिति। पञ्चभिः दुर्गामनुभिरिति। पञ्चदुर्गाभिः। प्राग् भूरादेरिति। पञ्चदुर्गानन्तरं स्वस्वपञ्चतत्त्वैरपीत्यर्थः। मार्गजेत्यपामार्गसमिधः। सर्वत इति। सर्वेषु। सस्वपूर्ण-मिति। व्याहृतिहोमान्ते समिदादिचतुर्णां प्रत्येकमन्ते च व्योमव्याप्यादिनिजमन्त्रेण पूर्णाहुतिरपि कार्येत्यर्थः।। 60।।

Using the two prescribed mantras like "Rakṣohaṇa" etc, along with the chant of Kṛṇuṣva the preceptor shall offer Pakva (fruit) in the sacrificial pit. There using other mantras ghee should be poured to all deities. 18 hymns for all, five for Durgā and another form for all deities with prescribed hymns. Before pouring ghee in respect of Śaṅkaranārāyaṇa the five principles related to him are to be chanted. Thereafter samit, ghee, offering and again ghee are to be poured into this sanctificial fire. (60)

होमान्ते खरमञ्जरीरसलसद् भस्मप्रणीताम्भसा
सम्पातेन शतास्त्रजापमहितेनोक्षेद् गृहं सर्वतः।
द[1]र्भब्रह्ममयूरपिप्पलशिखाभिर्होममन्त्रैरमुं
निक्षिप्यानलमेव वास्तुहवनं कुर्वीत शार्व्यां दिशि।। 61।।

विमर्शिनी

होमान्ते स्विष्टकृदादिहोमावसाने। खरमञ्जरीरसलसद्भस्मप्रणीताम्भसा, खरमञ्जरीरसोऽपामार्गरसः, तेन मिलितेन भस्मना प्रणीताम्भसा च युक्तेन शतास्त्रजापमहितेन शतावृत्त्यास्त्रजापात् सञ्जात-महितत्वेन सम्पातेन दर्भब्रह्ममयूरपिप्पलशिखाभिः दर्भपलाशापामार्गाश्वत्थशाखाभिः, होममन्त्रैः

---

1. 'मायूराग्रकुशादिभिः परिजपन् मन्त्रान् हुतोक्तानमुं', ख. पाठः

कृणुष्वाद्यैः गृहं सर्वतः सर्वप्रदेशेषूक्षेत्। अमुमेवानलं शार्व्यां दिशि निक्षिप्य वास्तुहवनं वास्तुहोमं कुर्वीत।। 61।।

विवरणम्

होमान्त इति। अग्निमुखादिक्लृप्त्येत्युक्तत्वात् स्विष्टकृदादिहोमशेषे कृत इति लभ्यते। खरमञ्जर्यपामार्गः, लसच्छब्देन व्यामिश्रितत्वमुक्तम्। खरमञ्जरीरसेन लसद्यत्र भस्मप्रणीताम्भश्चेति सम्पातविशेषणतया बहुव्रीहिः। पात्रसम्भृते सम्पातेऽपामार्गस्य रसं हुतभस्म प्रणीतजलं च संयोज्य अस्त्रेण अष्टोत्तरशतवारमभिमन्त्र्य तेन सम्पातेन प्रासादमन्तबहिश्च सर्वतः प्रोक्षेत्। दर्भब्रह्ममयूर-पिप्पलशिखाभिरिति। दर्भान् पलाशापामार्गाश्वत्थानां शिखाश्च संग्रथ्य तेन प्रोक्षेदिति। होममन्त्रैरिति। कृणुष्वाद्यस्त्रान्तैरुक्तैरित्यर्थः। वास्तुहोमं प्रस्तौति–अमुमिति। अमुमेवानलं शार्व्यां दिशि निक्षिप्य वास्तुहवनं कुर्वीतेत्यन्वयः।। 61।।

At the end of the sacrifice the mixture Kharamañjarīrasa (juice of the plant Ashyranthes aspera) the ashes from the sacrificial pit and water mixed together to form an offering may be sanctified with the chant of specific mantra. Darbhā, twigs of Kharamañjarī and that of fig tree may be bound together to form a brush with which the sanctified material may be sprinkled all around inside as well as outside the sanctum. Then on the north east corner the fire in which sacrifice was done materials may be collected in a vessel to perform Vāstuhāra (Sacrifice in connection with the ceremony of the laying of foundation) (61)

पूर्वेण तं हुतवहं विरचय्य पीठं
शालीनवीनवसनामलतण्डुलाद्यैः ।
दूर्वाशमीदलकुशोत्तरकूर्चचर्चि-
तेऽस्मिन् यजेत कलशौ परिधानतः प्राक्।। 62।।

विमर्शिनी

अत्र परिधानतः परिधिस्थापनात् प्राक् तं हुतवहं पूर्वेण तस्याग्नेः पूर्वभागे शालीनवीन-सनामलतण्डुलाद्यैः शालीभिर्नवेन वस्त्रेणामलैस्तण्डुलतिलसिद्धार्थैश्च पीठं विरचय्य दूर्वाशमीदल-कुशोत्तरकूर्चचर्चिते दूर्वाशमीदलकुशानामुपरि कुर्चेन चालङ्कृते अस्मिन् पीठे कलशौ गजेत।। 62।।

विवरणम्

पूर्वेण तं हुतवहमिति। तदुक्तम्–'स्थण्डिलस्य भृशस्थाने कल्पिते स्थण्डिलद्वये' इति। नवनिवसनं नूतनवस्त्रम्। तण्डुलाद्यैरिति। तिलसर्षपग्रहणम्। चर्चनमलङ्करणम्। कलशौ यजेतेति।। 62।।

To the eastern side of the Vāstuhoma pit and before fixing the borders two Svastikāpadma made of flour be drawn where rice, sesamum and mustard should be strewan and in a jar covered by cloth be prepared. This should be propitiated after placing materials like green grass, Darbhā etc.

Two pots placed on the altar shall be cleaned by mantras and worshipped. (62)

न्यक्कूर्चेऽभ्यर्चयतु निजया विद्ययावाह्य वि[1]द्वान्
प्रत्यक्संस्थे प्रकृतघटयोस्तण्डुलस्वर्णपूर्णे।
शन्नोदेव्या द्विरभिहितपादाङ्गयोर्वात्र शान्तिं
प्राचीने च प्रयजतु तथा स्वर्णरत्नोदपूर्णे।। 63।।

विमर्शिनी

विद्वान् मन्त्रविशेषज्ञः प्रकृतघटयोः प्रस्तुतयोर्वास्तुकलशयोः प्रत्यक्संस्थे पश्चिमगते न्यक्कूर्चे अधोग्रकूर्चे तण्डुलस्वर्णपूर्णे तण्डुलेन स्वर्णेन च पूर्णे कुम्भे निजया विद्यया स्वस्वमूलेनावाह्य, देवमभ्यर्चयतु। तथा च प्रकृतघटयोः प्राचीने स्वर्णरत्नोदपूर्णे सुवर्णेन रत्नोदकैश्च पूर्णे अत्र कुम्भे द्विरभिहितपादाङ्गया द्विष्कृत्वा उच्चारणादुद्भूतैः षड्भिः पादैरङ्गानि यस्याः तया शन्नोदेव्या ऋचा शान्तिमावाह्य प्रयजतु।। 63।।

विवरणम्

कथमित्याह–न्यक्कूर्च इति। प्रकृतयोः कलशौ यजेतेति प्रक्रान्तयोर्घटयोर्मध्ये प्रत्यक्स्थिते घटेऽधोग्रं कूर्चं निक्षिप्य तण्डुलैस्सम्पूर्य सुवर्णं निक्षिप्य स्वमूलेनावाह्य पूजयेत्। पुनः प्राचीनघटे तथा न्यक्कूर्चे सुवर्णरत्नं निक्षिप्य तोयेन सम्पूरिते शन्नोदेवीरित्यनयर्चा शान्तिमावाह्य पूजयेत्। द्विरभिहितपादाङ्गयेति। द्विरभिहितायास्तस्याः षट् पादाः सम्पद्यन्ते। तैष्षडङ्गविधिरिति भावः। शान्तेरङ्गेन्द्रवज्रादिभिरावरणपूजा। विद्वानिति पीठपूजादिकमुक्तम्। यद्वा, कलशद्वयेऽपि शान्तेरेव पूजेतयादिपक्षान्तरं पुनरुभयोः निवेद्यादि सर्वं विधाय स्वं स्वं मन्त्रभिजप्य वस्त्रेणाच्छाद्य तालत्रयादि कार्यमिति।। 63।।

In both the pots Kūrca – a handful of Kuśa with the tip knotted together be placed head down. In the pot placed at the western side gold pieces and rice may be put till it is full, Invoking the prescribed mantra worship may be performed. In the pot placed at the eastern side gold and jewels may be put before it is filled to the full with water. Twice the mantras mentioned may be chanted and the pots may be worshipped in the usual manner using the mūlamantra noted. (63)

पक्वं वास्तोष्पतेन्ते प्रतिमनुयुगलेनाथ सर्पिध्रुवास्थू-
णाद्यैर्जातादिभिः शान्त्यृगणुभिरपि भूरादिभिश्चाखिलेषु।
भर्गे दुर्गापदे पञ्चभिरिह जुहुयाद् ब्रह्मभिर्गुह्यमन्त्रैः
शार्ङ्गीशे तत्पुरस्तात् तदुपरि निजषण्मन्त्रकैः षण्मुखे च।। 64।।

विमर्शिनी

अथाखिलेषु परिधिस्थापनाद्याज्यभागहोमान्ते वास्तोष्पतेन्ते प्रतिमनुयुगलेन वास्तोष्पत इत्यन्ते

1. 'द्वेवं प्र' ख. पाठः

'प्रतिजानीहि'त्यादिना 'वास्तोष्पते संग्मया' इत्यादिना च मन्त्रद्वयेन पक्वं जुहुयात्। अथ वास्तोष्पतेन्ते ध्रुवास्थूणाद्यै षड्भिः, जातादिभिः 'जातवेदस' इत्यादिपञ्चभिर्दुर्गाभिः, शान्त्यृगणुभिः शान्तिदेवत्याभिः 'शन्न इन्द्राग्नी'त्यादिभिः पञ्चदशभिः ऋग्भिः, भूरादिभिर्व्याहृतिभिश्चापि सर्पिर्जुहुयात्। इह भर्गे शिवे दुर्गापदे पञ्चदुर्गास्थाने पञ्चभिर्ब्रह्माभिश्च, शार्ङ्गीशे तत्पुरस्तात् पञ्चदुर्गाभ्यः पुरस्ताद् गुह्यमन्त्रैः, षण्मुखे त(दुपरि) पञ्चदुर्गाणामुपरि निजषण्मन्त्रकैश्च जुहुयात्।। 64।।

विवरणम्

पक्वमिति। आध्वर्यवाहाग्निमुखादिक्लृप्त्येत्येतदिहापि समानम्। पुनः परिधिनिधानादि कृत्वा पक्वं जुहुयात्। वास्तोष्पतेन्ते प्रतिमनुयुगलेनेति। वास्तोष्पतेपदावसाने प्रतीत्यादिना मनुद्वयेन वास्तोष्पते प्रतिजानीहीति। द्वयमयमनुनेत्यर्थः। प्राग्वत् पूर्वां पुरोनुवाक्यामुक्त्वोत्तरया होमः। अथ सर्पिर्ध्रुवास्थूणाद्यैरिति। वास्तोष्पतेन्ते इत्यनुवर्तते। वास्तोष्पतेध्रुवास्थूणाद्यैः षड्भिः। यदुक्तं–

वास्तोष्पते ध्रुवास्थूणा ततो गृह्यंभयादिना।
अक्षिस्पन्देत्यादिना च दुःस्वप्नेत्यादिना ततः।।
वास्तोष्पते प्रतरणोऽमीवहेत्यादिना(पि) च।

इति। जातादिभिरिति। पञ्चदुर्गाभिः। शान्त्यृगणुभिरिति। शन्न इन्द्राग्नी इत्यादिपञ्चदशभिः। शन्नः पञ्चोना शान्तिरिति ह्युक्तम्। भर्ग इति। पञ्चदुर्गास्थाने पञ्चब्रह्मभिः। गुह्यमन्त्रैरिति। हरिहरे पञ्चदुर्गातः पूर्वं स्वैः पञ्चतत्त्वैः। तदुपरीति। स्कन्दे पञ्चदुर्गातः पश्चात् स्वैः षण्मन्त्रैः।। 64।।

Pakva homa putting fruits on the sanctificial pit shall be done with the two prescribed mantras beginning with "Vāstoṣpate"and ending with Svāhā. Thereafter the food items as clarified butter may be served to all the deities with specified mantras hinted herein. For Śiva the mantras are mentioned as "Pañca durgā, and and Pañcabrahma that Śaṅkaranārāyaṇa shall be worshipped with the same hymn. Thereafter oblations for Subrahmaṇya may be put in the sacrificial fire. (64)

शन्नेदेव्यणुना शमीधृतहविः सर्पींषि गव्याप्लुता
दूर्वाश्चाष्टशतं जुहोतु निखिले पूर्णाभिपूर्णं पृथक्।
दुर्गायां पुनराद्ययादिमचतुष्कं दानवारौ हुनेद्
दूर्वा मूल[1]त एव शास्तृगुहयोः सर्वं जिनार्णेन वा।। 65।।

विमर्शिनी

निखिले निखिलेषु देवेषु शमीधृतहविस्सर्पींषि गव्याप्लुताः दूर्वाश्चाष्टशतं शन्नेदेव्यणुना पूर्णाभिपूर्णं पूर्णाहुतिभिः पूर्णं यथा भवति तथा जुहोतु। दुर्गायां पुनराद्यया 'जातवेदस' इत्यृचा आदिमचतुष्कं समिदाज्यव(रुरा?र्वा) ज्यानि हुनेत्। दानवारौ विष्णौ दूर्वास्तु मूलत एव, शास्तृगुहयोः सर्वं द्रव्यपञ्चकं जिनार्णेन गायत्र्या वा हुनेत्।। 65।।

---

1. 'लमहाणुनायेगु' ख. पाठः

विवरणम्

शमीति शमीसमिधां ग्रहणम्। पूर्णाभिपूर्णं पूथगिति। एकैकवर्गान्ते पूर्णाहुतिरपि स्ववक्ष्यमाणेन कार्येत्यर्थः। दुर्गायामिति। आद्यया 'जातवेदसे सुनवाम सोममि'त्यनया शमीसमिधादिचतुष्कं जुहुयात्। दानवाराविति। विष्णौ मूलत एव दूर्वाहोमः शेषितमेव तु शन्नेदेव्यणुनेति भावः। शास्तुगुहयोरिति। सर्वं शमीसमिदादिचतुष्कं दूर्वाश्च।। 65।।

All the deities may be propitiated with the mantra "Śanno devī" etc., before articles are offered in the sacrificial fire. The items are a variety of samit, ghee, pañcagavya and green grass called dūrvā. 108 times the items may be supplied to the fire. For Durgā there is slight change in mantra, so also for Viṣṇu, Śāstā and Subrahmaṇya for whom sacrificial materials differ. (65)

प्राक् पावकं स्विष्टकृतोऽवशिष्टेनान्नेन तोयाज्यसमन्वितेन।
विकीर्य दर्भाग्रचयं नमोरुद्राद्येन मन्त्रेण बलिं विदध्यात्।। 66।।

विमर्शिनी

पावकं प्राग् अग्नेः प्राग्भागे दर्भाग्रचयं विकीर्य स्विष्टकृतोऽवशिष्टेन स्विष्टकृदवदानोच्छिष्टेन तोयाज्यसमन्वितेनान्नेन नमोरुद्राद्येन 'नमो रुद्राय वास्तोष्पतये 'इत्याद्येन मन्त्रेण बलिं विदध्यात्।। 66।।

विवरणम्

प्राक् पावकमिति। दर्भाग्रचयं विकीर्य बलिं विदध्यादित्यन्वयः। जलगन्धादिपूजा तु सामान्यसिद्धा।। 66।।

After completing the sactifice called "Sviṣṭakṛt" spread Kuśa on the eastern side of the altar where the remaining portion of the materials may be put along with water and ghee for offering Bali chanting mantras like " Rudram" (66)

एकाशीतिपदाल्पपद्मविहितं व[1]ह्नेरुदीच्यामुत
प्राच्यां वास्तुबलिं महेशदिशि वा कुर्यान्निजोक्तक्रमात्।
सम्पातेन स[2]भस्मशान्तिज[3]लगव्येनाथ शम्यादिकै-
रुक्षेच्छान्त्यभिमन्त्रितेन भवनं त्वंविप्रमन्त्रं जपन्।। 67।।

विमर्शिनी

वह्नेरुदीच्यामुत प्राच्यां वा महेशदिशि वा एकाशीतिपदात्मपद्मविहितम् एकाशीतिपदस्वरूपे पद्मे निविष्टं वास्तुबलिं निजोक्तक्रमाद् निजनिजोक्तरीत्या कुर्यात्। अथ वास्तुबलेरनन्तरं सभस्मशान्तिजलगव्येन

---

1. 'प्राग्वत् स्वयं साधकः कुर्याद् वास्तुबलिं तदापि शिखिनस्तस्येश्वराशामुखे।.. म्पा',
2. 'च',
3. 'सलिलोपेतेन शम्यत्रकैस्त्वं विप्रस्त्वमिति ब्रुवन् भगवतः प्रासादमभ्युक्षतु।। गर्भा' ख. पाठः

भस्मप्रणीतजलगव्यशेषैर्युक्तेन शान्त्यभिमन्त्रितेन 'शन्नो देवीरि'ति जप्तेन सम्पातेन शम्यादिकैः शमीपलाशाश्वत्थशाखादर्भैः 'त्वंविप्र'मन्त्रं जपन् भवनमुक्षेत्।। 67।।

विवरणम्

एकाशीतिपदात्मपद्मविहितं वास्तुबलिमिति। क्षेत्रे रन्ध्रपुट इत्यादिनैकाशीतिपदात्मके पद्मे विहितमित्यर्थः। तिजोक्तक्रमादिति। स्वस्वोक्तप्रकारेण। सभस्मशान्तिजलगव्येनेति। यदुक्तं–

शाखयोदुम्बरस्य वा।
पलाशशाखया वाथ दर्भमुष्ट्याथवा पुनः।।

इति। कुशाग्रैः प्रोक्षेदिति चाप्युक्तम्। शान्त्यभिमन्त्रितेनेति। 'शन्नो देवीरि'ति साष्टशतमभिमन्त्र्य तेन प्रोक्षणमुक्तम्। भवनमिति। प्रासादान्तर्बहिरपीति भावः।। 67।।

Towards the north east or north eastern corner of the Vāstuhoma maṇḍala Vāstubali shall be offered in a Padma design having 81 columns.Prescribed materials for the deities shall also be offered in it with specified mantras, which may be chanted at specified times. One such mantra is called "Tvam vipra" (mantra specified here.) The items put together consisting of ghee and pañcagavya may be mixed with water to be splashed both inside and outside with a brush prepared by the twigs of darbhā, samit and tinder of fig. (67)

[1]गर्भागारे कलशसुभृतांस्तण्डुलान् गेहमूर्त्तौ
प्रोत्कीर्यैतत्कलशसलिलैश्चापि सिक्त्वा तयर्चा।
कृत्वा पुण्याहमपि सशिवं वास्तुवादादि विप्रैः
कृत्वा नीराजनमपि निजास्त्रेण रक्षां च कुर्यात्।। 68।।

विमर्शिनी

गर्भागारे गर्भगृहे गेहमूर्त्तौ प्रासादरूपमूर्त्तौ कलशसुभृतान् वास्तुकलशस्थान् तण्डुलान् मूलेन प्रोत्कीर्य एतत्कलशसलिलैः वास्तुकलशजलैश्चापि तथा 'शन्नो देवीरि'ति ऋचा सिक्त्वा विप्रैः सह 'ओं वास्तुदेवताः प्रीयन्तामि'त्यादिविशेषसहितं पुण्याहं सशिवं वास्तुवादादि शिवं वास्त्वित्यादिमङ्गलयुक्तं कृत्वा नीराजनमपि कृत्वा निजनिजास्त्रेण रक्षां च कुर्यात्।। 68।।

---

1. 'लये निहितदर्भचये निजेन
प्रासादरूपमणुना पुरुषं प्रकल्प्य।
तस्मिन् समर्प्य घटपूरिततण्डुलानि
मूलेन शान्तिकलशेन तया च सिञ्चेत्।।
वास्तुपुण्याहमादाय मूर्तिं प्रासादरूपिणीम्।
तत्स्यास्त्रघटवीर्येण गुप्तां सम्भावयेत् सदा।। शुद्धो' ख. पाठः

विवरणम्

गर्भागार इति। प्राग्वत् क्षालिततले दर्भान् विकीर्य स्वं स्वं पीठमिष्ट्वा प्रासादमूर्त्तिमावाह्य सकलीकृत्य स्नानसमये नीराज्य पूर्वपूजितवास्तुकलशयोर्मध्ये तण्डुलकलशमानाय्य तत्तण्डुलैस्तस्मिन् प्रासादमूर्तौ मूलेन प्रोत्किरणं विधाय व्यापकादि कृत्वा नीराज्य शान्तिकलशमानाय्य तेन 'शन्नो देवीरि'ति तमभिषिच्य तया व्यापकादि कृत्वा अर्घ्यं दद्यात्। विप्रैः पुण्याहमपि कृत्वेति। चतुर्भिरष्टभिर्वा मूर्त्तिपैः सह वास्तुपुण्याहं कृत्वेत्यर्थः। वास्तुदेवताः प्रीयन्तामिति च देवतोद्देशः। सशिवं वास्तुवादादीति। कृत्वेत्यस्याः क्रियाया विशेषणम्। पुण्याहान्ते तैः शिवं वास्त्वित्यपि वाचयेत्। आदिशब्देन 'शान्तिरस्तु' 'पुष्टिरस्त्वि'त्याद्याशिषां ग्रहणम्। तासां पूर्वं वा वाचनम्। यदुक्तम्–

"आशिषो वाचयित्वाग्रे शिवं वास्त्विति वाचयेत्।"

इति। नीराजनमपीति। कृत्वेत्यनुषङ्गः। पुनः प्रासादमूर्त्तेः पूजाशेषं विधाय बहिर्निष्क्रम्य निजास्त्रेण तालत्रयादिना रक्षां च कुर्यादिति।। 68।।

After worshipping the deity inside the sanctum and showering the riceful of pot over it and pouring sanctied water from the second pot Vāstumantra begining with "Śivamastu etc., the priest along with his assistants shall chant Puṇyāhamantra. Thereafter lights may be waved cememonially before the deities presenting them with plateful of materials. The final act is to afford protection for all the ten region in the ceremonial way. (68)

[1]शूद्धोदग्भवने च[2] सप्तदशकद्रव्यक्रमात् क्षेत्रकं
कृत्वान्तर्नवकं प्रकल्प कलशानां बाह्यतो युक्तितः।
श्रीशेऽन्तर्नवकेऽङ्कुरादिनवकं गन्धोदकं दिग्विदिक्–
खण्डान्तःस्थघटेषु शुद्धसलिलं शेषेषु चापूरयेत्।। 69।।

विमर्शिनी

अथाधिवासदिवसात् पूर्वेद्युः कर्तव्यं बिम्बशुद्धिकलशपूजनमाह–**शुद्धोदग्भवन** इति। अथ शुद्धोदग्भवने प्रासादस्योदग्भागक्लृप्ते मार्जनादिस्थलशुद्धिभिः शुद्धे भवने सप्तदशकद्रव्यक्रमात् कलशपटले सप्तदशद्रव्ये वक्ष्यमाणक्रमात् क्षेत्रं कृत्वान्तः कलशानां नवकं बाह्येतो युक्तितश्च प्रकल्प्य श्रीशेऽन्तर्नवकेऽङ्कुरादिनवकमापूरयेत्। दिग्विदिक्खण्डान्तःस्थघटेषु दिग्विदिक्खण्डानामन्तः स्थितेषु घटेषु गन्धोदकं, शेषेषु घटेषु शुद्धसलिलं चापूरयेत्।। 69।।

विवरणम्

अथ तद्रात्रावेव बिम्बशुद्धिकलशपूजेति तां प्रस्तौति–**शुद्धोदग्भवनेऽथेति**। प्रासादस्यैश्यां दिशि स्तपनमण्डपः। तदुक्तम्–

---

1. 'शुद्धोदग्भवनेऽथ सप्त' इति विवरणपाठः
2. 'शिवादिकपुटक्षेत्रेऽङ्कवर्गादिकाः स्युः कुम्भा इह मध्यतो नवकमेतद् वा' ख. पाठः

"स्तानमण्डपमैशान्यां भूषयित्वा विशोधयेत्।"

इति। यद्वा अधिवासमण्डपापेक्षया ऐश्यां दिशि स्यात्। यच्चोक्तम्–

"प्रागुदीच्यां तु वोदीच्यामधिवासनमण्डपात्।"

इत्यादि। तदसम्भवे ततोऽपि पश्चादित्युदग्भवन इत्युक्तम्। यद्वा ओदग्भवन इति पदम् ईषदुदग्भवन इति। शुद्धपदेन तत्र मुष्ट्यादिस्थलशुद्धिरुक्ता। सप्तदशकद्रव्यक्रमादिति। क्रमशब्देन 'शरशैलनन्दवर्गा नवोत्तरशतद्विशते चे'त्यादि वक्ष्यमाणक्रमग्रहणम्। अन्तर्नवकमिति। वक्ष्यति च–

"मध्ये पङ्कजकर्णिकादलगताः कुम्भा नव स्युः सदा।"

इति। बाह्यतो युक्तित इति। सङ्ख्येति शेषः। युक्तिशब्देन तदीयपुटोपपत्तिरभिप्रेयते। यथा सप्तपुटे त्र्येकेति नवपुटेङ्गाब्धीत्यादि। इह विष्णौ हरिहरे च सप्तदशद्रव्यं शिवादिषु नवद्रव्यम्। सर्वेष्वप्येष एव क्षेत्रविरचनविधिरिति भावः। दिग्विवदिक्खण्डान्तः स्थघटेष्विति। दैविकावरणे दिक्कोणखण्डानां ब्रह्मकलशेषु। शेषेष्विति। तदीयपरिकलशेषु।। 69।।

On the previous day of dhyānādhivāsa to the north east corner of the specified plot columns made of flour may be drawn for placing seventeen items. In the centre nine pits to be formed. On the corners also similarly pots are to be placed as specified. The materials to be put in the pots are also specified in the particular order. (69)

[1]मध्यान्तर्नवखण्डकेषु शिवशास्त्रोर्दिग्विक्क्लृप्तितो
दुर्गेभाननयोः प्रदक्षिणतया द्रव्याणि विन्यस्यतु।
दिक्कोणक्रमतोऽन्तरादिः शरजोऽथेशाच्युते मध्यतो
मध्याशाविदिशाक्रमान्नव बहिः खण्डेषु हेमाम्बु च।। 70।।

विमर्शिनी

शिवशास्त्रोर्नवखण्डकेषु दिग्विदिक्क्लृप्तितो मध्यान्तर्द्रव्याणि विन्यस्यतु। दुर्गेभाननयोः प्रदक्षिणतया मध्यान्तश्च। शरजेऽन्तरादि दिक्कोणक्रमतश्च अथेशाच्युते मध्यतो मध्यखण्डे मध्याशाविदिशाक्रमाद् मध्ये दिग्विदिक्क्रमाच्च नव द्रव्याणि बहिः खण्डेषु बहिः खण्डानामन्तः स्थघटेषु हेमाम्बु च विन्यस्यतु।।

विवरणम्

मध्यान्तमिति। द्रव्याणि विन्यस्यत्विति सर्वत्र सम्बध्यते। प्रदक्षिणतयेति। प्रागादिखण्डेषु प्रादक्षिण्येन मध्यान्तमित्यर्थः। अन्तरादि दिक्कोणक्रमत इति दैविके दिकविदिक्खण्डे क्रम उक्तः। मध्यतो मध्याशाविदिशाक्रमान्नवेति। द्रव्याणि विन्यस्यतु। ब्रह्मकलशे तदीयेषु दिग्विदिग्गतपरिकलशेषु चेत्यर्थः। बहिःखण्डेषु हेमाम्बु चेति। दिग्विदिक्क्रमादिति भावः।। 70।।

For Śiva and Śāstā pots are to be located inside the central place. For Durgā and Gaṇeśa they are to put from eastern side onwards. For

---

1. 'मध्यान्तम्' इति विवरणपाठः

Subrahmaṇya the place is the centre while Śaṅkaranārāyaṇa deserves pots placed from the central spot. Gold pieces may be put inside the pot before filling it with water. The total substances to be placed inside these pots come to seventeen. (70)

क्षीरिश्रीबकुळाम्रचम्पकपलाशाशोकनीपार्जुन-
प्रोत्थान्यत्र तु पल्लवानि कलशे कार्शानवाशादले।
रक्षोदिक्स्थदले सपद्मकपटीरद्वन्द्वजात्यार्तवं
दर्भस्तम्बसकुन्दनन्द्यभिधदूर्वारोचनासर्षपम् ॥ 71 ॥

यवव्रीहिस्वर्णं रजततिलकूलद्वितयमृ-
च्छकृद्युक्तं न्यस्येत् सततगतिदिक्पत्रकलशे।
सहाविष्णुक्रान्तीमधुकरगुळूच्यार्द्रकशमी;
शतावर्या श्यामाकमपि शिवदिक्पत्रकलशे ॥ 72 ॥
प्रत्यक् फलं न्यसतु गव्यमवाक् कषायं
प्रागुत्तरे च शतमूल्यमृताकुमारीः।
व्याघ्रीं वचां बहुसुतां च सहां व सिंहीं
वल्मीकसप्तकमृदः कलशेऽथ मध्ये ॥ 73 ॥
ओं सोमाय वनस्पत्यन्तर्गतये नमो मृदन्तमनुः।
गन्धोदेऽष्टार्णं स्याच्छुद्धोदे द्वादशाक्षरं च हरौ ॥ 74 ॥

विमर्शिनी

हरावित्यूर्ध्वतो ग्राह्यम्। अत्र हरौ तु कार्शानवाशादले मध्यस्थपद्मस्याग्नेयकोणदलस्थे कलशे क्षीरिश्रीबकुलाम्रचम्पकपलाशाशोकनीपार्जुनप्रोत्थानि क्षीरिवृक्षाद्यर्जुनवृक्षान्तेभ्यो गृहीतानि पल्लवानि न्यसेत्। क्षीरिणः क्षीरवृक्षास्तोरणे वक्ष्यमाणाः। ( ) चम्पकः स्वयमेव। ( ) अशोकः स्वयमेव। ( ) रक्षोदिक्स्थदले निरृतिकोणस्थदलकलशे सपद्मकपटीरद्वन्द्वजात्यार्तवम्। सपद्मकं पद्मकसहितम्। ( ) पटीरद्वन्द्वं चन्दनं रक्तचन्दनं च। ( ) दर्भस्तम्बसकुन्दनद्यभिधदूर्वारोचनासर्षपम्। ( ) सततगतिदिक्पत्रकलशे वायव्यकोणगतकलशे यवव्रीहिस्वार्णं यवाः व्रीहयः स्वर्णं च रजततिलकूलद्वितयमृच्छकृद्युक्तं, कूलद्वयमृद् नदीतीरद्वयस्था मृत्, शकृद् गोमयं, तैर्युक्तं न्यस्येत्। शिवदिक्पत्रकलशे ईशानकोणदलकलशे सहाविष्णुक्रान्तीमधुकरगुलूच्यार्द्रकशमीः ( ) शतावर्या सह। ( ) प्रत्यक् पश्चिमे फलं फलोदकं न्यसतु। अवाक् दक्षिणे गव्यं, प्राक् प्राग्भागे कषायम्। उत्तरे शतमूल्यमृताकुमारीः। ( ) अमृता स्वयम् ( ) बहुसुता शतावरी। सहा उक्ता ( ) एताः न्यसतु। अथ मध्ये मध्यस्थे कलशे वल्मीकसप्तकमृदः वल्मीकानां सप्तकादाहृता मृदाः। 'ओं सोमाय वनस्पत्यन्तर्गतये नमः' इति मृदन्तमनुः पल्लवादिमृदन्तेषु पूरणे मन्त्रः स्यात्। गन्धोदे गन्धोदकेषु अष्टार्णं, शुद्धोदे द्वादशाक्षरं च ॥ 71-74 ॥

विवरणम्

विष्णावङ्कुरादिनवकं तावदाचष्टे–क्षीरिश्रीति। श्रीवृक्षो बिल्वः। पल्लवमङ्कुर एव। कार्शानवाशदलैः। कृशानुरग्निः। तदीयं कार्शानवम्। आ[1]शादले दिग्दल इति यावत्। पटीरद्वयं चन्दनद्वयम्।। 71।।

कुलद्वितयेति नदीतटद्वयग्रहणम्। सततगतिर्वायुः।। 72।।

गव्यमवातिति। दक्षिणतः पञ्चगव्यम्। कषायं प्रागिति पृथग्वाक्यम्। वल्मीकसप्तकमृदः कलशेऽथ मध्ये इति। ब्रह्मकलशे सप्तभ्यो वल्मीकेभ्य आहृता मृद इत्यर्थः। द्रव्यन्यासोऽयमग्न्यादिकोणेषूक्तः प्रदक्षिणः ततोऽप्रदक्षिणः पश्चिमादिदिक्ष्वन्तरन्तत इति।। 73।।

मृदन्तमनुरिति। पल्लवादिमृदन्तद्रव्याणां न्यासे मन्त्रः।। 74।।

In the case of Visnu in the nine columns starting from north east the following twelve twigs or substances may be placed. The twigs of four milky trees Bilva, Bakula, Āmṛa, Campaka, Palāśa, Arka, Nīpa and Arjuna. On the Nirti corner the ten substances to be placed are Padmaka, two varieties of Sandal, jāti, darbhā, Kunda, Nandyabhidhā, Dūrvā, Rocanā and Sarṣapa. (71)

On the south side there are pots in which the following eight items are to be put They are yava Vrihi, Svarna, Rajata, Tila, Sand from the two banks of river and cow-dung. 1n the northern direction the eight items to be placed are Sahā, Viṣṇukrānti, Madhukara, Gulūci, Ārdraka, Śami, Śatāvari and Śyāmāka. (72)

On the western side the fruits are to be placed while on the south side Pañcagavya is needed in the east while the decoction made of certain items are also needed. On the north the eight items required are Śatamūli, Amṛtā, Kumārī, Vyāghrī, Vacā, Bahusutā, Sahā and Simhī. In the central pot sands collected from seven ant hills may be put. (73)

The mantras (for Viṣṇu) required are "Somāya" etc. Then water with fragrance and the eight lettered mantra and pure water are required. (74)

क्वाथोदगव्यभसितानि शिवे मृदम्भो–
गोमूत्रदुग्धदधिकं कुशगन्धवारि।
मृत्साजलं क्वथितवार्यथ पञ्चगव्यं
व्यस्तं समस्तमपि गन्धजलं प्रभेशे।। 75।।

विमर्शिनी

शिवे क्वाथोदगव्यभसितानि कषायं पञ्चगव्यं भस्मोदकं च, मृदम्भोगोमूत्रदुग्धदधिकं गोमूत्रं क्षीरं दधि च, कुशगन्धवारि कुशोदकं गन्धोदकं च। क्रमः प्रागुक्तः न्यसत्विति पूर्वस्मादायाति। प्रभेशे

1. 'आग्नेयदि' क. पाठः

मृत्साजलं क्वथितवारि, अथ व्यस्तं पृथक्स्थितं पञ्चगव्यं पञ्चसु घटेषु, पुनः समस्तं पञ्चगव्यमप्येकस्मिन् घटे, गन्धजलं च।। 75।।

For Śiva (in nine pots in quarter, corner and centre) decoctions, Pañcagavya and Bhasma, murkey water, urine of cow, milk and curd, water dipped with darbhā and Aṣṭagandha water (These are the nine objects)

For Śāsta, murkey water, decoctions and Pañcagavya, urine of cow, water mixed with cow dung, milk, curd, ghee and water mixed with Aṣṭagandha (again nine items). (75)

व्यस्तं क्रमेण महिषद्विषि पञ्चगव्यं
मृत्क्वाथरत्नसलिलान्यपि गन्धतोयम्।
पाद्यार्घ्यगव्यकपयांसि दधि द्विपास्ये
क्वाथाम्बुमृत्कुशजलान्यपि गन्धवारि।। 76।।

विमर्शिनी

महिषद्विषि व्यस्तं पञ्चगव्यं क्रमेण गोमूत्रगोक्षीरदध्याज्यक्रमेण, मृत्क्वाथरत्नसलिलानि मृज्जलं कषायं रत्नजलं च, गन्धतोयमपि। द्विपास्ये पाद्यार्घ्यगव्यकपयांसि पाद्यमर्घ्यं गव्यं च क्षीरं च दधि, क्वाथाम्बुमृत्कुशजलानि कषायं मृज्जलं कुशजलं च, गन्धवार्यपि।। 76।।

For Durgā the items to be put in pots beginning with the eastern directions are Pañcagavya (the five items separately) milky water, decoction, water washed by jewels and Aṣṭagandha mixed water. Other items to be placed in the central pots are Pañcagavya, milk and to four decoctions, murkey water and water dipped with Kuśa grass in addition to plenty of water mixed the incenses. (76)

कौशोदगव्यककषायकदौर्व्यराजी-
मृद्रत्नशुद्धजलगन्धजलं कुमारे।
मृत्क्वाथकं हरिहरे पृथगास्थितानि
गव्यानि पञ्च फलवार्यखिलौषधं च।। 77।।

विमर्शिनी

कुमारे कौशोदगव्यककषायकदौर्व्यराजी[1] मृद्रत्नशुद्धजलगन्धजलं कौशोदं गव्यं कषायं दूर्वोदं सर्षपोदं मृज्जलं रत्नजलं शुद्धजलं गन्धजलं च। हरिहरे मृत्क्वथकं पृथगास्थितानि पञ्चगव्यानि फलवारि अखिलौषधं च न्यसतु।। 77।।

For Subrahmaṇya the nine items in order are water dipped with Kuśa, pañcagavya, decoctions, Darbā grass, mustard, pearls and water washed by jewels, pure water and Ashṭagandha mixed water. (These are the nine

1. 'त्रि' ख. पाठ

required) Beginning from east onwards the items to be put in pots are pearls, decoction, urine of cow, water mixed with cowdung, milk and ghee, fruits and medicinal water. Gold may be placed in the pots of the corners. (77)

स्वस्वदिक्संस्थितब्रह्मतदङ्गैरिह पूरयेत्।
मदनदुहि तद्द्रव्याण्यपरेषु स्वमूलतः।। 78।।

विमर्शिनी

मदनदुहि शिवे इह बिम्बशुद्धिकलशपूरणे स्वस्वदिक्संस्थितब्रह्मतदङ्गैः दिक्षु तत्पुरुषादिभिः अग्न्यादिकोणेषु हृदयशिखाकवचशिरोभिः पञ्चब्रह्माङ्गैर्मध्यकलश ईशानेन च (तद्)द्रव्याणि पूरयेद्, अपरेषु देवेषु स्वस्वमूलतश्च।। 78।।

विवरणम्

स्वस्वदिकसंस्थितेति।
पुङ्घोरसद्यवामाः स्युर्दिक्षु कोणेषु हृच्छिखे।
वर्मशीर्षे च मध्ये स्यादीशानः पूरणे मनुः।।

इति। शिवेऽपि सप्तदशद्रव्यं वा स्यात्। तथोक्तम्-

हेमरत्नाष्टगन्धाद्भिः पूरयेन्मध्यमं घटम्।
कषायं पञ्चगव्यं च भस्मोदं मार्त्तिकं जलम्।।
दिक्षु कोणेषु गोमूत्रं क्षीरं दधि कुशोदकम्।
अन्तः पद्मदलेष्वष्टौ जलधीन् पूरयेत् क्रमात्।।
व्यस्तैर्गन्धैश्च सम्पूज्य शुद्धोदैरपरान् घटान्।

इति। समुद्रजलानामष्टगन्धानां चायं विकल्प इति बोद्धव्यम्। वरुणश्च तेषां देवतेति पूरणमन्त्रोऽमि लभ्यत इति।। 78।।

For Siva the pots may be filled with the chant of mantras from east onwards. They are Tatpuruṣa, Aghora, Sadyojāta, Vāmadeva in quarters. In corners Hridaya, Śikhā, Kavaca and Śiras are to be prescribed as mantras. For other Gods their Mūlamantra is to be chanted in this connection. (78)

स्थाणौ नाकूक्षतीर्थद्विपशिखरिनदीवेदिकाचत्वरोत्था
विघ्ने क्षेत्रासुजाद्यश्च्युतचरमसरिज्जाश्च्युताद्यन्तिमाः स्युः।
सक्रोडोत्थाः कुमार्यां सरिदुभयतटक्षेत्रनाकूक्षजाता
मृत्साः शार्ङ्गीश आर्ये करिकिरिवृषवल्मीकनद्युद्भवाश्[1]च।। 79।।

विमर्शिनी

मृदादीनि कथयति-स्थाणाविति। स्थाणौ नाकूक्षतीर्थाद्विपशिखरिनदीवेदिकाचत्वरोत्थाः

1. 'वाः स्युः।।' ख. पाठः,

वल्मीकवृषशृङ्गस्थतीर्थस्थगजशृङ्गस्थपर्वतस्थनदीगतवेदिकास्थचत्वरस्था मृदः स्युः। विघ्ने क्षेत्राखुजाढ्याः क्षेत्रजाखुजाभ्यां युक्ताः च्युतचरमसरिज्जाः हीनचत्वरस्थनदीगताश्च। कुमार्यां च्युताद्यन्तिमाः रहितवल्मीकचत्वरस्थाः सक्रोडोत्थाः सूकरदारितमृत्सहिताश्च। शार्ङ्गीशे सरिदुभयतटक्षेत्रनाकूक्षजाताः नद्या उभयतटाद् क्षेत्राद् वल्मीकादुक्षशृङ्गाच्च जाता मृत्साः मृदः। आर्ये करिकिरिवृषवल्मीकनद्युद्भवाः गजवराहवृषदन्तेभ्यो वल्मीकनदीभ्यां चोद्भवाश्च।। 79।।

विवरणम्

नार्कुवल्मीकम्। द्विपादिपदैस्तच्छृङ्गग्रहणम्। विघ्ने क्षेत्राखुजाढ्याश्च्युतचरमसरिज्जा इति। शिवोक्ता एव गणपतौ मृदः। किन्तु क्षेत्रमूषिकमृदौ योज्ये, चरमा चत्वरजा नदीजा च हेये इत्यर्थः। च्युताद्यन्तिमाः स्युः सक्रोडोत्थाः कुमार्यामिति। वल्मीकचत्वास्मृदौ हेये। वराहमृद्योज्येत्यर्थः। करी गजः किरिर्वराहः।। 79।।

For Śiva the items required are ant-hill, sand from the horn of an ox, sand from holy ghat, mud from an elephant tusk, sand from ant hill around from river, sand from an altar for Agnihotra, sand from a road junction (these eight form the substances) For Vighneśa one may add mud from a fertile land and that dug up by rat. But in this case sand from road junction and river may be omitted (these eight are required). For Durgā seven items are required omitting ant-hill and sand from junction (prescribed for Śiva) but adding sand dug up by a pig (altogether seven items. For Śaṅkaranārāyaṇa the five materials are sand from both the banks of the river, sand from fertile land, ant-hill and mud collected from the horn of an ox (altogether five items). For Śāstā mud from an elephant's tusk, mud from the horn of an ox, ant hill and mud from a river (forming eight items). (79)

क्षीरि[1]द्विजद्रुमशमीखदिरं कुमार्यां
क्वाथाङ्गकं हरिहरे खदिरोनितं तत्।
विघ्ने पयोद्रुमकपित्थमधूकबिल्वं
शेष[2]प्रसिद्धि[3]रुपरि स्नपनाभिधाने।। 80।।

विमर्शिनी

कुमार्यां क्षीरिद्विजद्रुमशमीखदिरं क्वाथाङ्गकं कषायाङ्गम्। हरिहरे खदिरोनितं खदिररहितं तदेव। विघ्ने पयोद्रुमकपित्थमधूकबिल्वम्। ( ), शेषप्रसिद्धिः शेषद्रव्याणां प्रकर्षेण सिद्धिः प्राप्तिः उपरि स्नपनाभिधाने कलशपटले।। 80।।

विवरणम्

द्विजः पलाशः। शेषप्रसिद्धिरिति। विष्णौ फलकषायगन्धानां, शिवे कषायभस्मगन्धानां, शास्तरि

1. 'रं,
2. 'षे',
3. 'द्धमुप' क. पाठः

कषायगन्धयोर्दुर्गायां रत्नगन्धयोः, विघ्ने पाद्यार्घ्यगन्धानां, स्कन्दे कषायमृद्रत्नगन्धानां, हरिहरे फलस्य च प्रसिद्धिरित्यर्थः।। 80।।

For Durgā a decoction prepared from the four milky trees, samit and bark of Palāśa and khadira is required. For Sthāṇu may be decotion be prepared omitting Khadira from the above list. For a Vighneśa the decoction shall be made from the barks of the four milky trees Kapitha, Madhūka and Bilva trees. Other response merits will be those mentioned earlier in the work hill dealing with the items for filling up pots. (80)

सर्वौषधानि[1] तिलमाषयवप्रियङ्गु-
गोधूमशाल्यणुसमाह्वयकान्य[2]थ स्युः।
नीवारगार्मुकगवीथुकजर्तिलाख्य-
श्यामाकवेणुफलवास्तुकसंयुतानि ।।81।।

विमर्शिनी

अथ हरिहरे तिलमाषयवप्रियङ्गुगोधूमशाल्यणुसमाह्वयकानि ( ) इति ग्राम्याणि सप्त। नीवारगार्मुकगवीथुकजर्तिलाख्यश्यामाकवेणुफलवास्तुकसंयुतानि। ( ) इत्यारण्यकैः सप्तभिः सहितानि सर्वौषधानि स्युः। तथाचाहुः–

तिलमाषव्रीहियवाः प्रियङ्गवश्चाणवश्च गोधूमाः।
एता ग्रामौषध्यो नीवाराद्यास्तथैव चारण्याः।।
नीवारश्यामका गवीथुका जर्तिलाश्च वेणुफलाः।
गार्मुकवास्तुसमेता आरण्याः सप्त च स्युरौषध्यः।।

इति।। 81।।

विवरणम्

सर्वौषधानीति। तिलानीति सप्त ग्राम्याणि, नीवारादीनि सप्तारण्यानीति विभागः। यद्वा–

तिलमाषयवव्रीहिगोधूमाणुप्रियङ्गवः । ।
तथा श्यामाकनीवारजर्तिलाश्च गवेथुकाः।।
गार्मुकाणुयवा वास्तुनिष्पावाश्च कुलस्थकाः।
स्मृता सप्तदशौषध्य आढकीभिस्समन्विताः।।

इति।। 81।।

Again for Śaṅkaranārāyaṇa decoctions for grāmya (for common use) and seven wild (for rare medicinal use) seeds are required for preparing the decoction. The (seven common seeds are Tila, māṣa, yava, priyaṅgu,

1. 'नि यवमाषतिलप्रि',
2. 'नि सप्त'। ख. पाठः

Godhūma, Śāli and a type of grass. The wild ones are Nīvara (wild rice) gārmuka (wild gram) ganthikā (wild wheat) jartila (wild sesamum) śyāmāka (grass called Panicum miliaceum) Veṇuphala (bamboo rice) Vāstuka (the seed of green vegetable leaves – chenapodium album which grows near the house) There are the seven wild ones. (81)

मूलाष्टोर्ध्वशताज्यहुत्युदितसंपातं समर्प्यात्मभू-
खण्डस्थेषु हिरण्यवर्णमनुमन्येषु स्वमूलं हरौ।
सर्वत्र स्वकमूलमेव परिजप्यान्येषु वस्त्रैर्नवै-
राच्छाद्येत्यधिवास्य तत्स्नपनतः पूर्वेऽह्नि रक्षेद् घटान्।। 82।।

विमर्शिनी

क्रियाशेषमाह–मूलेति। एवं कलशान् सम्पूर्य सम्पूज्य मूलाष्टोर्ध्वशताज्यहुत्युदितसम्पातं मूलेनाष्टोर्ध्वं शतमाज्यं हुत्वा तत्सम्पातं कलशेषु समर्प्य हरौ आत्मभूखण्डस्थेषु मध्यखण्डस्थकलशेषु हिरण्यवर्णमनुं 'हिरण्यवर्णां हरिणीमि'ति मन्त्रम्, अन्येषु खण्डगतकलशेषु स्वमूलम् अन्यत्र देवेषु सर्वत्र अन्तर्बहिश्च स्वकमूलं स्वस्वमूलमेव परिजप्य नवैर्वस्त्रैराच्छाद्य इति उक्तप्रकारेणाधिवास्य तत्स्नपनतः पूर्वेऽह्नि घटनाधिवास्य रक्षेत्।। 82।।

विवरणम्

मूलाष्टोर्ध्वशतेति। कलशक्षेत्रोदग्भागेऽग्निमाधायाग्निमुखं विधाय तत्तन्मूलेनाष्टोत्तरशतवारम् आज्यं हुत्वा पूर्णापि हुत्वा होमशेषं समाप्य तदुत्थं सम्पातं द्रव्यकलशेषु सिक्त्वा मूलं जपेत्। आत्मभूर्ब्रह्म। विष्णौ ब्राह्मखण्डगतनवकलशेषु हिरण्यवर्णामिति प्रागाद्यन्यखण्डेषु स्वमूलमपि जपेत्। अन्येषु सर्वत्र स्वकमूलमेव परिजप्येत्यन्वयः। सर्वत्रेति। वाह्यखण्डेषु ब्राह्मखण्डे चेत्यर्थः। इत्याधिवास्येति। उक्तप्रकारेणेत्यर्थः। स्तपनतः पूवेऽह्नीति। बिम्बाधिवासदिनपूर्वदिने। रात्राविति भावः। रक्षेदिति तालत्रयादिभिरिति शेषः।। 82।।

Perform a small sacrificial ritual. The main item is the pouring of clarified butter a hundred and eight times into the fire. The Sampāta the mixture of sacrificial materials is clarified butter itself. This is to be applied to all pots by touching them with relevant mantras. For Viṣṇu the mantra begins with "hiraṇyavarṇām": etc. For other deites their respective Mūlamantra is to be chanted while doing this. Thereafter these pots may be covered with fresh clothes and preserved uto the previous day of the actual installation. (82)

इति तन्त्रसमुच्चये तृतीयः पटलो मङ्गलबीजरोपणाढ्यः।
जलवासनवास्तुयागबिम्बाप्लवकुम्भार्चनचर्चितः प्रणीतः।। 83।।

विमर्शिनी

पटलमुपसंहरति–इतीति। तन्त्रसमुच्चये ग्रन्थे तृतीयः पटलः प्रणीतः कृतः। कथंभूतः मङ्गलबीजरोपणाढ्यः मङ्गलबीजरोपणाभिधानेन परिपूर्णः जलवासनवास्तुयागबिम्बापाव-


कुम्भार्चनचर्चितः जलाधिवासनस्य प्रासादशुद्ध्यादिवास्तुपूजायाः बिम्बशुद्धिकलशार्चनस्य चोक्तिभिः पूजितः ।। 83 ।।

Thus the third Paṭala of Tantrasamuccaya dealing with the auspicious sowing of seeds, jalādhivāsa – plunging of idol in water, purification of sanctum, Vāstubali the propitiation of the spirit dwelling on the plot, purification of idol and the details of the potful of water etc., comes to an end. (83)

इति तन्त्रसमुच्चयविमर्शिन्यां तृतीयः पटलः ।।



अथ चतुर्थः पटलः



अधिवासनमण्डपं तदर्हेऽह्न्यथ सङ्गृह्य गुरुर्विशोधयेत।
रुचिरैः परिभूषितं वितानप्रमुखैर्मृष्टसुलिप्तभूमिभागम्।।1।।

विमर्शिनी

अथाधिवासदिवसे प्रातरेव मण्डपसंस्कारादिकं कर्तव्यमिति विवक्षन् पटलमारभते- आधिवासनमण्डपमिति। अथ गुरुः स्वयं तदर्हे तद्योग्ये अह्नि रुचिरैः सुन्दरैः वितानप्रमुखैः वितानाच्छादनाद्यैः परिभूषितं परितोऽलङ्कृतं मृष्टसुलिप्तभूमिभागं मार्जनालेपनाभ्यां शोभितभूप्रदेशम् अधिवासनमण्डपं देवस्याधिवासनार्थं संपादितं मण्डपं संगृह्य विशोधयेत विशेषेण शोधयेत।। 1।।

विवरणम्

अथाधिवासदिवसे दिवाकार्यं सर्वं वदन् अधिवासमण्डपसंस्कारमारभते-अधिवासनमण्डपमिति। तदर्हेह्नीति। तदुचिते दिवसे। दिवैवेत्यर्थः। सङ्गृह्येति। प्रासादपरिग्रहवन्मण्डपपरिग्रहो द्रष्टव्यः। विशोधयेतेति। वक्ष्यमाणप्रकारेणेति भावः। वितानप्रमुखैरिति। वितानस्तम्भपरिवेष्टनादिभिः।

घण्टाचामरमालाभिर्धूपदीपाष्टमङ्गलैः ।
पल्लवैश्शालिकणिकैर्मुक्तादामफलादिभिः।। अपि चेति।

मृष्टसुलिसभूमिभागमिति लैकिकमार्जनलेपनमुक्तम्। युदुक्तं-

"वेदिकां च तथालिन्दं प्राङ्गणं परिशोध्य च।"

इति।। 1।।

The preceptor shall, on the prescribed day, decorate the Adhivāsamaṇḍapa—the special pavilion erected in front of the shrine towards its right side. The pavilion should be cleared by sweeping it and decorated with garlands and festoons in an act of purification. (1)

स्नात्वा शुद्धनवीनवस्त्रपरिधाय्याचम्य तन्मण्डपं
स्वास्त्रेक्षादिनिरस्तभूतनिवहं प्राविश्य पर्येत्य च।
नैर्ऋत्यामुपविश्य शोधितसमिष्टात्माथ विघ्नेश्वरं
संपूज्याभिहितक्रमात् त्रिगुणसूत्रादीनि संसादयेत्।। 2।।

विमर्शिनी

तच्छोधनविधानमाह-स्नात्वेति। गुरुर्विशेषतः स्नात्वा शुद्धनवीनवस्त्रपरिधायी शुद्धेन नवेन वस्त्रेण

परिहितो भूत्वा आचम्य स्वास्त्रेक्षादिनिरस्तभूतनिवहं स्वस्वास्त्रेक्षणादिना निरस्तोऽपसारितो भूतसमूहो यत्र तन्मण्डपं प्राविश्यान्तर्गत्वा पर्येत्य चालिन्दमार्गेण परितश्च गत्वा नैर्ऋत्यां निर्ऋतिकोणे उपविश्य शोधितसमिष्टात्मा आत्मनः शोधनं मन्त्रभावनं शङ्खपूरणमात्माराधनं च कृत्वा अथ विघ्नेश्वरं संपूज्य त्रिगुणसुत्रादीनि अभिहितक्रमात् प्रासादशोधने अभिहितेन क्रमेण संसादयेत्[1] ।। 2 ।।

विवरणम्

स्वास्त्रेक्षादिनिरस्तभूतनिवहमिति। स्वास्त्रनिरीक्षणादिभिर्मण्डपे सम्भाव्यमानभूतनिरासः प्रथमतः कार्य इति। तदुक्तम्–

ततस्तालत्रयच्छोटीपार्ष्णिघातनिरीक्षणैः ।
दिव्यान्तरिक्षभूमिष्ठान् विघ्नान् द्वारगतान् हरेत्।।
प्रधानद्वारमासाद्य नाराचास्त्रं प्रयोजयेत्।

इति। पुनस्तालत्रयाद्यग्निप्राकारान्तं विधायाधिवासमण्डपस्यान्तर्नाराचास्त्रं क्षिप्त्वेत्यत्र तालत्रयादिकमिदानीं वास्त्रतः प्रोक्ष्य चेत्येतदनन्तरं वा कार्यम्। स्वास्त्रेण निरीक्षणादीनि कार्याणि। तेषां क्रमनियमः। यद्वा निरीक्षणं नाराचास्त्रक्षेपणं च प्रधानमित्येवमभिधानम्। प्रविश्येति। प्रधानद्वारेणेति शेषः। पर्येत्य चेति। अलिन्दमार्गेणेति भावः। शोधितसमिष्टात्मेति देहशुद्ध्याद्यात्माराघनान्तमुक्तम्। अभिहितक्रमादिति। प्रासादशद्धिविधाविति भावः।। 2 ।।

After the bath and sipping the holywater the preceptor shall wear fresh clothes and enter the pavilion after driving away the evil spirits by chanting respective Astra mantras holding the bunch of darbhā grass in his hands. He shall take his seat in the south west corner and perform the purificatory action of his limbs, fill up the conch and perform meditation. Then drawing swastika shaped chart with powder he shall worship Vighneśa as prescribed, placing garlands and clearing the region. (2)

विप्राननुज्ञाप्य निरेत्य मुख्यद्वारास्त्रतः प्रोक्ष्य च मण्डपं तत्।
ईशादि नीप्रोपरि तन्तुदर्भस्त्रग्भ्यां यथोक्तं परिवेष्टयेच्च।। 3 ।।

विमर्शिनी

विप्रान् दानैरनुज्ञाप्य मुख्यद्वारा प्रधानद्वारेण निरेत्य निर्गत्य अस्त्रतः तन्मण्डपं च प्रोक्ष्य तालत्रयादि कृत्वा तन्तुकुशग्भ्यां नीप्रोपरि नीप्रस्योपरिभागे यथोक्तमीशादीशपर्यन्तं परिवेष्टयेच्च।। 3 ।।

विवरणम्

विप्राननुज्ञाप्योति। 'दत्त्वा धेनूर्द्विजेभ्य' इत्याद्युक्तं सर्वमभिप्रेतम्। यथोक्तमिति। ईशान्तं व्यस्तसमस्तताराभ्यामित्यर्थः।। 3 ।।

---

1. 'त्।। निर्गत्येशाद्यन्तमेतत् समन्ताद् व्यस्ताव्यस्तेनोदितेन ध्रुवेण।
वर्मास्त्राभ्यां वेष्टयेद् वा त्रितन्तुदर्भस्त्रग्भ्यां मण्डपं नीप्रदेशे।।' ख. पाठः

Thereafter obtaining the permission of the Brāhmins by giving suitable gifts he shall get out of the pavilion and sanctify with mantras including Praṇava. Now he shall place the secred thread and garlands around the top of the structure above the half beginning from the north direction. (3)

सर्वत्राप्यथ तोरणांश्चतसृषु[1] प्रागादिदिक्षु क्रमात्

केतूंश्चाष्टसु द[2]र्भपल्लवप[3]टीसंभूषितान् स्थापयेत्।

द्वौ द्वौ द्वार्यथवा हरीशमहिषार्योस्तोरणाभ्यन्तरे

विन्यस्येद् वृषवाहने नवसु दिक्षूर्ध्वावसानं पुनः।।4।।

विमर्शिनी

अथ सर्वत्र सर्वदेवेष्वपि पूर्वद्वारप्राधान्ये पश्चिमद्वारप्राधान्येपि प्रागादिष्वेव चतसृषु दिक्षु क्रमात् तोरणान् स्थापयेत्, दर्भपल्लवपटीसंभूषितान् दर्भैः पल्ववैः पताकया च समलङ्कृतान् केतून् ध्वजांश्च अष्टसु प्रागादिदिक्षु। हरीशमहिषार्योः अथवा द्वारि तोरणाभ्यन्तरे तोरणस्यान्तर्भागे द्वौ द्वौ केतून् विन्यस्येत्। वृषवाहने पुनर्नवसु दिक्षूर्ध्वावसानम् ऊर्ध्वगतमन्त्यमीशानकोण एव विन्यस्येत्।। 4।।

विवरणम्

केतूंश्चाष्टस्विति। प्रागादिदिक्ष्वित्यनुषङ्गः। दर्भपल्लवपटीसम्भूषितानित्युभयेषां विशेषणम्। पटी तोरणेष्वावेष्टनपटः। ध्वजेषु तत्पट्टिकेति भेदः। तोरणेषु स्रगलङ्करणमपीष्यते। द्वौ द्वाविति। केतुशब्दोऽनुवर्तते। तोरणाभ्यन्तर इति। पूर्वत्र दिग्ध्वजानामपि समानम्। ऊर्ध्वावसानमिति। नवमं ध्वजमैशवाह्य उपरिबुद्धया विन्यसेत्। यदुक्तम्–'नवमश्शिवसन्निधावि'ति।। 4।।

Therefore for all the gods on the front corner of the temple, festoons shall be placed and on the eight directions short flag staffs with young shoots of bamboos shall be erected from the eastern side onwards. For Śaṅkaranārāyaṇa and Durgā there shall be two flag staffs atop each on the four sides. For Śiva the number of staffs shall be nine having two at the northern region. (4)

प्लाक्षौदुम्बररौहिणाश्चलदलोत्थश्चेश्वरे तोरणाः

सार्ये ते गुहविघ्नयोर्वटभवान्त्यास्ते हरीशाच्युते।

प्रोक्ताः प्लाक्षचतुर्थपैप्पलपुरोगास्तेऽपि मध्यस्थयुग्

व्यत्यासान्महिषद्विषि स्युरखिलेऽपीष्टा ध्वजा वैणवाः।।5।।

विमर्शिनी

तोरणदीनाह–प्लाक्षेति। सार्ये शास्तृसहिते ईश्वरे प्लाक्षौदुम्बररौहिणाश्चनदलोत्थश्च। रोहिणो वटः। चलदलोऽश्वत्यः। तोरणाः तोरणबृक्षाः प्रोक्ताः स्युः। गुहविघ्नयोः वटभवान्त्याः ते प्लक्षोदुम्बराश्व–

1. 'प्वाशासु पूर्वादितः',
2. 'दिक्षु प',
3. 'ताकादर्भसंभूषितान्। द्वौ' ख. पाठः

परिहितो भूत्वा आचम्य स्वास्त्रेक्षादिनिरस्तभूतनिवहं स्वस्वास्त्रेक्षणादिना निरस्तोऽपसारितो भूतसमूहो यत्र तन्मण्डपं प्राविश्यान्तर्गत्वा पर्येत्य चालिन्दमार्गेण परितश्च गत्वा नैर्ऋत्यां निर्ऋतिकोणे उपविश्य शोधितसमिष्टात्मा आत्मनः शोधनं मन्त्रभावनं शङ्खपूरणमात्माराधनं च कृत्वा अथ विघ्नेश्वरं संपूज्य त्रिगुणसुत्रादीनि अभिहितक्रमात् प्रासादशोधने अभिहितेन क्रमेण संसादयेत्[1] ।। 2 ।।

विवरणम्

स्वास्त्रेक्षादिनिरस्तभूतनिवहमिति। स्वास्त्रनिरीक्षणादिभिर्मण्डपे सम्भाव्यमानभूतनिरासः प्रथमतः कार्य इति। तदुक्तम्–

ततस्तालत्रयच्छोटीपार्ष्णिघातनिरीक्षणैः ।
दिव्यान्तरिक्षभूमिष्ठान् विघ्नान् द्वारगतान् हरेत्।।
प्रधानद्वारमासाद्य नाराचास्त्रं प्रयोजयेत्।

इति। पुनस्तालत्रयाद्यग्निप्राकारान्तं विधायाधिवासमण्डपस्यान्तर्नाराचास्त्रं क्षिप्त्वेत्यत्र तालत्रयादिकमिदानीं वास्त्रतः प्रोक्ष्य चेत्येतदनन्तरं वा कार्यम्। स्वास्त्रेण निरीक्षणादीनि कार्याणि। तेषां क्रमनियमः। यद्वा निरीक्षणं नाराचास्त्रक्षेपणं च प्रधानमित्येवमभिधानम्। प्रविश्येति। प्रधानद्वारेणेति शेषः। पर्येत्य चेति। अलिन्दमार्गेणेति भावः। शोधितसमिष्टात्मेति देहशुद्ध्याद्यात्माराघनान्तमुक्तम्। अभिहितक्रमादिति। प्रासादशद्धिविधाविति भावः।। 2 ।।

After the bath and sipping the holywater the preceptor shall wear fresh clothes and enter the pavilion after driving away the evil spirits by chanting respective Astra mantras holding the bunch of darbhā grass in his hands. He shall take his seat in the south west corner and perform the purificatory action of his limbs, fill up the conch and perform meditation. Then drawing swastika shaped chart with powder he shall worship Vighneśa as prescribed, placing garlands and clearing the region. (2)

विप्राननुज्ञाप्य निरेत्य मुख्यद्वारास्त्रतः प्रोक्ष्य च मण्डपं तत्।
ईशादि नीप्रोपरि तन्तुदर्भस्त्रग्भ्यां यथोक्तं परिवेष्टयेच्च।। 3 ।।

विमर्शिनी

विप्रान् दानैरनुज्ञाप्य मुख्यद्वारा प्रधानद्वारेण निरेत्य निर्गत्य अस्त्रतः तन्मण्डपं च प्रोक्ष्य तालत्रयादि कृत्वा तन्तुकुशग्भ्यां नीप्रोपरि नीप्रस्योपरिभागे यथोक्तमीशादीशपर्यन्तं परिवेष्टयेच्च।। 3 ।।

विवरणम्

विप्राननुज्ञाप्योति। 'दत्त्वा धेनूर्द्विजेभ्य' इत्याद्युक्तं सर्वमभिप्रेतम्। यथोक्तमिति। ईशान्तं व्यस्तसमस्तताराभ्यामित्यर्यः।। 3 ।।

---

1. 'त्।। निर्गत्येशाद्यन्तमेतत् समन्ताद् व्यस्ताव्यस्तेनोदितेन ध्रुवेण।
वर्मास्त्राभ्यां वेष्टयेद् वा त्रितन्तुदर्भस्त्रग्भ्यां मण्डपं नीप्रदेशे।।' ख. पाठः

Thereafter obtaining the permission of the Brāhmins by giving suitable gifts he shall get out of the pavilion and sanctify with mantras including Praṇava. Now he shall place the secred thread and garlands around the top of the structure above the half beginning from the north direction. (3)

सर्वत्राप्यथ तोरणांश्चतसृषु[1] प्रागादिदिक्षु क्रमात्
केतूंश्चाष्टसु द[2]र्भपल्लवप[3]टीसंभूषितान् स्थापयेत्।
द्वौ द्वौ द्वार्यथवा हरीशमहिषार्योस्तोरणाभ्यन्तरे
विन्यस्येद् वृषवाहने नवसु दिक्षूर्ध्वावसानं पुनः।।4।।

विमर्शिनी

अथ सर्वत्र सर्वदेवेष्वपि पूर्वद्वारप्राधान्ये पश्चिमद्वारप्राधान्येपि प्रागादिष्वेव चतसृपु दिक्षु क्रमात् तोरणान् स्थापयेत्, दर्भपल्लवपटीसंभूषितान् दर्भैः पल्ववैः पताकया च समलङ्कृतान् केतून् ध्वजांश्च अष्टसु प्रागादिदिक्षु। हरीशमहिषार्योः अथवा द्वारि तोरणाभ्यन्तरे तोरणस्यान्तर्भागे द्वौ द्वौ केतून् विन्यस्येत्। वृषवाहने पुनर्नवसु दिक्षूर्ध्वावसानम् ऊर्ध्वगतमन्त्यमीशानकोण एव विन्यस्येत्।। 4।।

विवरणम्

केतूंश्चाष्टस्विति। प्रागादिदिक्ष्वित्यनुषङ्गः। दर्भपल्लवपटीसम्भूषितानित्युभयेषां विशेषणम्। पटी तोरणेष्वावेष्टनपटः। ध्वजेषु तत्पट्टिकेति भेदः। तोरणेषु स्रगलङ्करणमपीष्यते। द्वौ द्वाविति। केतुशब्दोऽनुवर्तते। तोरणाभ्यन्तर इति। पूर्वत्र दिग्ध्वजानामपि समानम्। ऊर्ध्वावसानमिति। नवमं ध्वजमैशवाह्य उपरिबुद्धया विन्यसेत्। यदुक्तम्–'नवमशिशवसन्निधावि'ति।। 4।।

Therefore for all the gods on the front corner of the temple, festoons shall be placed and on the eight directions short flag staffs with young shoots of bamboos shall be erected from the eastern side onwards. For Śaṅkaranārāyaṇa and Durgā there shall be two flag staffs atop each on the four sides. For Śiva the number of staffs shall be nine having two at the northern region. (4)

प्लाक्षौदुम्बररौहिणाश्चलदलोत्थश्चेश्वरे तोरणाः
सार्ये ते गुहविघ्नयोर्वटभवान्त्यास्ते हरीशाच्युते।
प्रोक्ताः प्लाक्षचतुर्थपैप्पलपुरोगास्तेऽपि मध्यस्थयुग्
व्यत्यासान्महिषद्विषि स्युरखिलेऽपीष्टा ध्वजा वैणवाः।।5।।

विमर्शिनी

तोरणदीनाह–प्लाक्षेति। सार्ये शास्तृसहिते ईश्वरे प्लाक्षौदुम्बररौहिणाश्चनदलोत्थश्च। रोहिणो वटः। चलदलोऽश्वत्यः। तोरणाः तोरणबृक्षाः प्रोक्ताः स्युः। गुहविघ्नयोः वटभवान्त्याः ते प्लक्षोदुम्बराश्च–

1. 'ष्वाशासु पूर्वादितः',
2. 'दिक्षु प',
3. 'ताकादर्भसंभूषितान्। द्वौ' ख. पाठः

त्थवटः। हरीशाच्युते शिवनारायणविष्णवोः प्लाक्षचतुर्थपैप्पलपुरोगाः ते अश्वत्थोदुम्बरवटप्लक्षाः। महिषद्विषि तेऽपि मध्यस्थयुग्व्यत्यासाद् अश्वत्थवटोदुम्बरप्लक्षाः। आखिलेऽपि वैणवाः ध्वजाश्चेष्टाः स्युः।।5।।

विवरणम्

ते गुहविघ्नयोर्वटभवान्त्या इति। प्लक्षोदुम्बराश्वत्थवटजाः। हरीशाच्युत इति। पिप्पलोदुम्बर-वटप्लक्षजाः। तेऽपि मध्यस्थयुग्व्यत्यासादिति। प्लक्षवटोदुम्बराश्वत्थजाः।।5।।

For decorating Śāstā and Śiva with twigs of trees prescribed as Plaksa Udumbara and two varieties of fig trees. For Subramania and Vighneśa one or more variety of fig tree is to be added to the above list (of four). For Śaṅkaranārāyaṇa and Viṣṇu the first mentioned four trees prescribed to collect twigs only the order is be changed suitably. For all deities the flag staffs shall be the young shoots of bamboo. (5)

द्वारां पार्श्वयुगे कृतास्त्रखननादिक्षिप्तदर्भाक्षता-
दीष्टाब्जासनकेऽवटेऽस्त्रविहितोक्षादीन् क्रमात् तोरणान्।
योगेयोगगऋचाङ्घ्रियुग्भिरपि देवस्येति शूलैः सुयो-
ज्योत्तिष्ठेत्यधिदैवनाम[1]भिरपि न्यस्येच्छिवे मन्त्रवित्।।6।।

विमर्शिनी

स्थापनक्रियामाह–द्वारामिति। मन्त्रबिद् मन्त्रविशेषज्ञो गुरुः शिवे द्वारं द्वाराणां पार्श्वयुगे पार्श्वद्वये कृतास्त्रखननादिक्षिप्तदर्भाक्षतादीष्टाब्जासनके कृतमन्त्रेण खननादि खननहरणगोमयजलोक्षतानि यत्र, क्षिप्तं दर्भाक्षतादि दर्भाक्षगन्धपुष्पाणि च यत्र, इष्टं पूजितं 'पद्माय नमः' इति पीठं च यत्र, तस्मिन्नवटे गर्त्ते अस्त्रविहितोक्षादीन् अस्त्रेण कृतीक्षणादीन्। आदिशब्देन शोषणादिकं, स्वस्वनाममन्त्रेण प्राणायामः पूजनं चोच्यते। तोरणान् क्रमाद् योगेयोगगऋचा 'योगे योगे तवस्तरमि'ति मन्त्रेण अङ्घ्रियुग्भिः पादद्वयैः, 'देवस्य त्वे'ति मन्त्रेण शूलैरपि सुयोज्य 'उत्तिष्ठे'त्यृचा आधिदैवनामभिः 'प्रमोदाय नमः' इत्यादिनाममन्त्रैरपि न्यस्येत् स्थापयेत्।।6।।

विवरणम्

कृतास्त्रखननादिक्षिप्तदर्भाक्षतादीष्टाब्जासनक इत्येकं पदम्। पूर्वमस्त्रेण द्वार्दक्षिणवामपार्श्वबहिर्भागे तोरणपादोचिततया खननं पांसुनिर्हरणं गोमयजलालेपनं प्रोक्षणं च कृत्वा प्रणवेन गन्धपुष्पाक्षतोपेतान् ह्रस्वदर्भान् निक्षिप्य पद्ममात्रं पीठमर्चयेदित्यभिप्रायः। अस्त्रविहितोक्षादीनिति। अस्त्रप्रोक्षणं प्रागुक्तदर्भाद्यलङ्करणं शोषणादिकं तत्तन्मन्त्रप्राणायामपूजनमित्येतत्सर्वमुक्तम्। स्थापनानन्तरमेव वस्त्रस्रगलङ्करणमुचितमिति। क्रमात्तोरणानिति। शिवे 'उत्तिष्ठे'त्यधिदैवनाममनुभिर्न्यस्येदित्यन्वयः। पादैश्शूलैश्च योजनमस्त्रप्रोक्षणानन्तरं कार्यमिति ज्ञेयम्। मन्त्रविदिति प्रणवपुटितत्वं नमोन्तत्वमप्युक्तम्।।6।।

---

1. 'नाममनुर्भिन्र्यस्येच्छिवे' इति विवरणरित्या पाठः।

For erecting these flag staffs the preceptor well versed in mantras shall dig up two pits on both the sides of the door (of the sanctum). Then splashing water mixed with cowdung the place may be cleared. Thereafter he shall put short of Kuśa grass, Akṣata and fragrant flowers. After ritualistically worshipping the pit he shall place the Toraṇas (arches) with prescribed chant of mantras which differ from each of the gods. Chanting specified mantras the priest shall fix the staffs. The mantra for Śiva is indicated in the stranza as 'Yoge Yoge: etc. (6)

तैरेवेषुभवेऽथ तैर्मुररिपौ स्योनापृथिव्या युतै-
र्वेदाद्यैर्महिषारिशास्तृगणपेष्वीशाच्युते तारतः।
प्राग्द्वार्दक्षिणपार्श्वपूर्वविहितस्थानेषु संस्थापयेत्
के[1]तूंश्च क्रमविद् द्वयेषु यजतामावाह्य तद्देवताः।।7।।

विमर्शिनी

इषुभवे तैरेव अधिदैवनामभिरेव, अथ मुररिपौ स्योनापृथिव्या ऋचा युतैस्तैरधिदैवनामभिः, महिषारिशास्तृगणपेषु वेदाद्यैः 'अग्निमीळे' 'इषे त्वा' 'अग्न आयाहि' 'शन्नो देवीः' इति चतुर्भिर्मन्त्रैः ईशाच्युते तारतश्च न्यस्येत्। पुनः क्रमवित् स्थानक्रमं मन्त्रक्रमं च वेत्ता गुरुः प्राग्द्वार्दक्षिणपार्श्व-पूर्वविहितस्थानेषु प्राग्द्वारस्य दक्षिणं पार्श्वं, दक्षिणद्वारस्य पश्चिमं पार्श्वमित्यादिविहितेषु स्थानेषु केतूंश्च तथा संस्थापयेत्। द्वयेषु तोरणेषु ध्वजेषु च तद्देवता आवाह्य यथोक्तरीत्या यजताम्।। 7।।

विवरणम्

तैरेवेषुभव इति। अधिदैवनाममनुभिरेवेत्यर्थः। अस्त्रविहितोक्षादीन् क्रमात् तोरणानिति सर्वेष्वपि सम्बन्धनीयम्। वेदाद्यैर्महिषारिशास्तृगणपेष्विति। 'अग्निमीळे' इषेत्वोर्जे त्वा' 'अग्न आयाहि वीतये' शन्नो देवीरि'त्येभिर्वेदादिभवैर्मन्त्रैः क्रमात्तोरणान् स्थापयेत्। नैषु तत्तद्देवता[1]मन्त्रयोग इति भावः। ईशाच्युते तारत इति। यदुक्तम्–

"प्रणवेन तु संस्थाप्य पूजयेत् स्वैश्च नामभिः।"

इति। प्राग्द्वार्दक्षिणेति। प्राग्द्वारस्य दक्षिणपार्श्वपूर्वकेषु केतूंश्चाष्टसु द्वौ द्वौ द्वारीत्येवं विहितेषु स्थानेष्विति। प्राग्द्वारदक्षिणपार्श्वे तोरणाभ्यन्तरे पुनरग्निकोणे त[2]तो दक्षिण्द्वारस्य पश्चिमपार्श्वे तोरणाभ्यन्तरे पुनर्निरृतिकोणे इत्यादि। तथा प्राग्द्वारदक्षिणपार्श्व उत्तरपार्श्वे च तोरणाभ्यन्तरे त[2]तो दक्षिणद्वारपश्चिमपार्श्वे पूर्वपार्श्वे चेत्यादि इति। एतदेव सर्वं क्रमविदित्युक्तम्। द्वयेषु यजतां आवाह्य तद्देवता इति। द्वयेषु तोरणेषु ध्वजेषु च तत्तत्तोरणस्थापनानन्तरं तत्तद्देवतामपि तस्मिंस्तस्मिन्नावाह्य पूजयेत्। पुनस्तत्तद् ध्वजस्थापनानन्तरं तत्तद्देवताः तस्मिंस्तस्मिन्नप्यावाह्य पूजयेत्। अङ्गाभावे व्यापकमात्रं सकलीकरणम्। यद्वा प्रणवेन षडङ्गविधिः। अथवा अं सुशोभनाय नमः। आं हृदयाय नमः इं सुशोभनाय नमः ईं शिरसे स्वाहेत्यादीनि षडङ्गानि स्युः।। 7।।

1. 'तानामयो' घ पाठः।
2. 'पूर्वदक्षिणद्वारप' घ. पाठः

For Subrahmaṇya the mantra is related to the god while for Viṣṇu an addition alone as indicated here is needed. For Durgā, Śāstā and Vighneśa four mantras as indicated are needed. In the case of Subrahmaṇya similar mantras are required. The Toraṇas are to be created in particular quarters as indicated here. After the erection the Toraṇa, they are to be propitiated with the required mantras connected with the deity. (7)

सुशोभनः शार्ङ्गधरे सुभद्रः सुकर्मनामा च तथा सुहोत्रा।
शिवे प्रमोदाभयशान्तसंज्ञा महांश्च चत्वार इति प्रदिष्टाः।।8।।

विमर्शिनी

देवताः पठति—**सुशोभन** इत्यादिभिः। शार्ङ्गधरे सुशोभनः सुभद्रः सुकर्मनामा सुहोत्रश्च प्रदिष्टाः उक्ताः। अत्रत्या नामसंज्ञाभिधाह्वयादिकाः क प्रत्ययश्च स्वतोऽर्थविशेषाभावात् पद्याविरोधार्थमेव कल्पिताः। शिवे प्रमोदाभयशान्तसंज्ञा महांश्च इति चत्वारः।। 8।।

विवरणम्

इदानीं तद्देवता उपदिशति—**सुशोभन** इति।। 8।।

In respect of Viṣṇu the four mantras to propitiate the deity of Toraṇa indicated by the stanzas such as Suśobhana, Subhadra, Sukarma and Suhotra whereas for Siva another four mantras indicated here as Pramoda, Abhaya, Śānta and Mohana. (8)

सुमङ्गलः स्थाणुहरौ सुहोत्रस्तथैव कल्याणकभद्रकौ च।
यज्ञेशनामा महिषाभिमातौ प्रभाकरो मङ्गलसुप्रभौ च।।9।।

विमर्शिनी

स्थाणुहरौ सुमङ्गलः सुहोत्रः तथा कल्याणकभद्रकौ च। महिषाभिमातौ महिषशत्रौ यज्ञेशनामा प्रभाकरो मङ्गलसुप्रभौ च।। 9।।

For the deities of the flagstaff in relation to Subrahmoṇya, the four mantras are indicated as Sumaṅgala, Subhadra, Kalyāṇa and Bhadraka. For Durgā another four mantras to worship the diety of Toraṇa are four indicated as Yajñeśa, Prabhākara, Maṅgala and Suprabha. (9)

षाण्मातुरे स्युर्वरदो यशोदो द्वौ पुष्टिदश्रीप्रदसंज्ञितौ च।
विघ्ने सुपूर्णाह्वयपूर्णभद्रौ प्रशान्तनामा विजयाभिधश्च।।10।।

विमर्शिनी।

षाण्मातुरे वरदो यशोदः पुष्टिदश्रीप्रदसंज्ञितौ द्वौ च। विघ्ने सुपू[1]र्णाह्वयपूर्णभद्रौ प्रशान्त[2]नामा विजयाभिधश्च।। 10।।

---

1. 'ज्या' ख. पाठः,
2. 'न्ति' क. पाठः,

In relation to Subramhaṇya the four mantras to proportiate the deity of Toraṇa are indicated as Varada, Yaśoda, Puṣṭida and Suprabha. The four mantras for Vighneśa in this connection are Suparṇa, Pūrṇabhadra, Praśānta and Vijaya. (10)

आर्यः शास्ता गुहासन्नः सेनानीश्च प्रभापतौ।
इति सप्तसु संप्रोक्ताः क्रमात् तोरणदेवताः ।। 11 ।।

विमर्शिनी

प्रभापतौ आर्यः शास्ता गुहासन्न[1]: सेनानीश्च । इति सप्तसु देवेषु क्रमात् तोरणदेवताः संप्रोक्ताः ।। 11 ।।

For Śāstā the four mantras to propitiate the deity on flagstaff are four as Ārya, Śāstā, Guhāsanna and Senānī, Thus the deities on Toraṇa the ornamental arch the seven gods have been indicated. (11)

कुमुदकुमुदाक्षसंज्ञौ लक्ष्मीशे पुण्डरीकवामनकौ।
अथ शङ्कुकर्णसर्वादिकनेत्रौ सुमुखसुप्रतिष्ठितकौ ।। 12 ।।

विमर्शिनी

लक्ष्मीशे कुमुदकुमुदाक्षाद्या ध्वजेशाः। सर्वादिकनेत्रः सर्वनेत्रः ।। 12 ।।

विवरणम्

वामनकसुप्रतिष्ठितकवीरभद्रकेषु ककारो वृत्तानुरोधार्थ एवेति ज्ञेयम् ।। 12 ।।

The Dhvajadevatā deities on flag-staff are indicated as for the eight mantras related to Kumuda, Kumudākṣa, Puṇḍarīka, Vāmana, Śankukarṇa, Sarvanetra, Sumukha and Supratiṣṭhita. (12)

भृङ्गीशकार्त्तिकेयौ वृषनन्दीशौ शिवे महाकालः।
कुम्भोदरो महोदरनामाथो वीरभद्रको ब्रह्मा ।। 13 ।।

विमर्शिनी

शिवे भृङ्गीशाद्या नव ।। 13 ।।

In connection with Śiva nine deities are worshipped as presiding over the flagstaff. They are Bhṛṅgīśa Kārtikeya, Vṛṣa, Nandiśa, Mahākāla, Kumbhodara, Mahodara, Vīrabhadra and Brahmā (altogether nine) (13)

शिवशार्ङ्गिणि गिरिशोत्सवविधास्यमानाः स्युरष्ट नन्द्याद्याः।
भृङ्गीशाद्या नव वा कुमुदाल्पाद्यैस्तथाष्टभिः सहिताः ।। 14 ।।

विमर्शिनी

शिवशार्ङ्गिणि कुमुदात्माद्यैरष्टभिः सहिताः गिरिशोत्सवविधास्यमानाः शिवस्योत्सवे वक्ष्यमाणा

1. 'नः' ख. पाठः

नन्द्याद्या अष्ट स्युः 'नन्दिने कुमुदात्मने नम' इत्यादयः। तथा कुमुदात्माद्यैरष्टभिः सहिताः भृङ्गीशाद्या नव वा। 'भृङ्गीशाय कुमुदात्मने नम' इत्याद्यष्ट। नवमे 'ब्रह्मणे नम' इत्येव।। 14।।

विवरणम्

कुमुदात्माद्यैरिति। यथा 'नन्दिने कुमुदात्मने नम' इत्यादि, 'भृङ्गीशाय कुमुदात्मने नम' इत्यादि। नव वेति। भृङ्गीशादिपक्षे नवसु दिक्षूर्ध्वावसानमित्येतदिष्यते। तत्र नवमे ध्वजे केवल एव ब्रह्मा पूज्य इत्यपि प्रतिपादितं भवति।। 14।।

In the case of Śaṅkaranārāyaṇa the eight hymns beginning with "nandine" mentioned in connection with the festival of Śiva could be used or one may use the nine hymns spoken earlier beginning with "Bhṛṅgīśa" (14)

काली कराली विरजा मन्दरा विन्ध्यवासिनी।
सुप्रभा सिंहवक्त्रान्त्या दुर्गायां दैत्यमर्दिनी।। 15।।

विमर्शिनी

दुर्गायां कालीकरालाद्याः। अन्त्या दैत्यमर्दिनी च।। 15।।

For Durgā there are eight deities of flag staff who need to be propitiated. They are Karalī, Virajā, Mandarā, Vindhyāvāsinī, Suprabhā, Símhavaktrā and Daityamardinī. (15)

गोप्ता च पिङ्गलाक्षश्च वीरसेनश्च शाम्भवः।
त्रिणेत्रशलिनौ दक्षभीमरूपौ च शास्तरि।। 16।।

विमर्शिनी

शास्तरि गोप्त्रादयः।। 16।।

In relation to Śāstā the deities of the flagstaff are eight as follows: Goptā, Piṅgalākṣa, Vīrasena, Sambhava, Trinetra, Śūlin, Dakṣa and Bhīmarūpa. (16)

स्कन्ददन्तीन्द्रमुखयोरिन्द्राद्या दिगधीश्वराः।
इति सप्तसु संप्रोक्ताः क्रमेण ध्वजदेवताः।। 17।।

विमर्शिनी

स्कन्ददन्तीन्द्रमुखयोः, दन्तीन्द्रमुखो गणपति, इन्द्राद्या दिगधीश्वराः लोकपाला। इति सप्तसु देवेषु क्रमेण ध्वजदेवताः संप्रोक्ताः।। 17।।

For Subrahmaṇya and Vighneśa the lods of the quarters beginning with Indra are the deites of the flagstaff. Thus the deities with regard to the seven deities have been enumerated. (17)

इष्ट्वा बलिं तोरणदेवताभ्यो ध्वजाधिपेभ्योऽपि च वाद्यहृद्यम्।
दत्त्वा समाचम्य समेत्य चान्तः समाचरेद् द्वारघटार्चनाद्यम्।। 18।।

विमर्शिनी

एवमिष्ट्वा तोरणदेवताभ्यो ध्वजाधिपेभ्योऽपि च वाद्यहृद्यं वाद्यघोषैर्मनोहरं यथा भवति तथा बलिं दत्त्वा समाचम्य अन्तः समेत्य द्वारघटार्चनाद्यं समाचरेच्च।। 18।।

विवरणम्

इष्ट्वेति। बलिदानाङ्गतया पूजोक्ता। बलिं दत्त्वेत्यन्वयः। शुद्धान्नेन भूतकूरहविषा वायं बलिः। 'सर्वधान्येन सम्पन्नं पललेन विमिश्रितम्'। इति चोक्तम्।। 18।।

After offering oblation to Toraṇadevatas and Dhvajādhipas - (the deities presiding over the arches and flagstaffs) along wiuth the sounding of musical instruments the priest should sip ceremonial water to indicate the culmination of the act. Thereafter he shall perform the rituals to worship of the pots kept inside the pavilion. (18)

प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्या चतुर्दिक्ष्वपि
द्वाःस्थान् पूर्णघटेषु विष्णुगुहविघ्नार्येश्वरेषु द्विशः।
द्वाः शाखासु यजेत वा शिवहरौ द्वाःस्थानिहाष्टासु दि-
क्ष्वाशेशान् कलशेषु केवलममून् वै तेषु सुम्भद्विषि।। 19।।

विमर्शिनी

विष्णुगुहविघ्नार्येश्वरेषु पञ्चसु चतुर्दिक्ष्वपि द्विशः द्वौ द्वौ पूर्णघटेषु पूरितकलशेषु प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्या पूर्वद्वारस्य दक्षिणोत्तरपार्श्वक्रमेण तथा दक्षिणस्य पश्चिमपूर्वक्रमेण तथान्ययोरपि तत्क्रमेणारभ्येत्यर्थः, द्वाःस्थान् यजेत्। शिवहरौ द्वाःशाखासु द्वाःस्थान् यजेत वा न वा। इह शिवहरौ अष्टासु दिक्षु कलशेषु आशेशान् लोकपालान् यजेत। सुम्भद्विषि तेषु कलशेषु केवलममून् आशेशान् वै यजेत।। 19।।

विवरणम्

प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्येति। यथा प्राग्द्वारस्य दक्षिणपार्श्वे सौम्यपार्श्वे च दक्षिणद्वारस्य पश्चिमपार्श्वे पूर्वपार्श्वे चेत्यादि। द्वाश्शाखासु यजेत वा शिवहराविति। प्राग्द्वार्दक्षिणसौम्यपार्श्वसमुपक्रान्त्येति सम्बध्यते। द्वाराणां द्विदिशाखयोः द्वौ द्वौ द्वाःस्थावुक्तक्रमेण पूजयेत्, नवा पूजयेदित्यर्थः। अष्टासु दिक्ष्विति। द्वाःस्थपूजने तदपूजनेऽपि प्रागाद्यष्टदिक्षु कलशेषु इन्द्राद्यष्ट दिक्पालाः पूज्या इत्यर्थः। यदुक्तम्–

द्वाःस्थौ सम्पूजयेद् द्वारशाखयोर्मध्यतोऽधिपान्।
इन्द्रादीन् पूर्णकुम्भेषु

इत्यादि। केवलममून्वै तेषु सुम्भद्विषीति। प्रागाद्यष्टदिग्गतपूर्णकुम्भेषु केवलमिन्द्रादिदिक्पालानेव वा पूजयेत्। यदा, तोरणकलशैस्सहैव दिक्कलशेर्ष्विन्द्रादिपूजा। यद्वा तोरणकलशैस्सह द्वारकलशपूजेति विकल्पाभिप्रायः। यदुक्तम्–

तोरणध्वजमूलेषु घटेष्वर्च्याः स्वदेवताः।
दिक्क्रमादष्टकुम्भेषु दिगीशान् वा समर्चयेत्।।

इति। यज्ञेशादयस्तोरणकलशदेवताः कालीकराल्याद्याश्च ध्वजमूलगतद्वारकलशदेवता इति।। 19।।

For Viṣṇu, Subrahmaṇya, Gaṇeśa, Śāstā and Śiva the priest shall sanctify potfuls of water on all the four quarters beginning from the east and ending with the western direction. The objects of the worship are the guardians of the doors and each has to be offered a couple of pots. The worship in respect of Subrahmaṇya can be at the base of the pillars of arch. The lords of the eight quarters have to be propitiat placing potfuls of water on their respective regions. In the case of Durgā also the lords of the quarters have to be worshipped with potfuls of water. (19)

पद्मरागं प्रवालं विडूरोद्भवं
पुष्यनीलाश्मगर्भाणि मुक्ताफलम्।
स्फाटिकं च न्यसेत् विष्णुविष्वीशयो-
र्द्वारकुम्भेषु हेमापि वा सर्वतः।। 20।।

विमर्शिनी

विष्णुवि[1]ष्वीशयोर्द्वारकुम्भेषु पद्मरागं प्रवालं विडूरोद्भवं वैडूर्यं पुष्यनीलाश्मगर्भाणि, अश्मगर्भं मरतकं, मुक्ताफलं स्फाटिकं च न्यसेत्, सर्वतः सर्वत्र हेम स्वर्णमपि वा।। 20।।

विवरणम्

हेमापि वा सर्वत इति। वैष्णवापेक्ष एव विकल्पः। सर्वतः सर्वेष्वपि कलशेषु तोरणकलशेषु दिक्कलशेष्वपीत्यर्थः। यदुक्तम्–

साधारेष्वथ कुम्भेषु जलपूर्णेषु देशिकः।
सहिरण्येषु सर्वेषु मण्डितेष्वथ लोकपान्।।

इति।। 20।।

In the case of Viṣṇu and Śiva the pot kept at the door may be filled up with jewels like Padmarāga, Pravāla, Vaidūrya, Pushparāga, Indranīla, Marataka, Muktāphala and Sphaṭka; for all the deites gold can also be put in such pots. (20)

द्वारपाला हरौ पूर्णपुष्करानन्दनन्दनाः।
वीरसेनसुषेणौ च सम्भवप्रभवौ क्रमात्।। 21।।

विमर्शिनी

हरौ पूर्णपुष्कराद्याः द्वारपालाः क्रमात् स्युः।। 21।।

---

1. 'वृष्णीश' ख. पाठः

The deities presiding over the pots kept at the door steps are eight in number for Viṣṇu and they are to be propitiated with mantras like Pūrṇa, Puṣkara, Ānanda, Nandana, Vīrasena, Suṣeṇa, Sambhava and Prabhava. (21)

स्थाणौ महोदरमहाकायमहाकण्ठका महोरस्कः।
अग्न्यादिजिह्वनेत्रौ तदनु विरूपाक्षको विशालाक्षः।। 22।।

विमर्शिनी

स्थाणौ महोदराद्याः। अग्न्यादिजिह्वनेत्रौ अग्निजिह्वोऽग्निनेत्रश्च।। 22।।

विवरणम्

महाकण्ठकविरूपाक्षकगजास्यकमेघनादकेषु ककारो वृत्तानुरोधार्थ एव।। 22।।

For Śiva the deities there are noted as Mahodara, Mahākāya, Mahākaṇṭha, Mahoraska, Agnijihva, Agninetra, Virūpākṣa and Viśālākṣa. (22)

वीरमहाद्यौ स्वाद्यो भद्राद्यश्चारुपूर्वकः सेनाः।
षष्ठो गुहे सुषेणः सेनावथ पूर्णचित्रपूर्वौ च।। 23।।

विमर्शिनी

गुहे वीराद्याः सेनाः। वीरमहाद्यौ वीरसेनो महासेनश्च। स्वाद्यः सुसेनः। भद्राद्यो भद्रसेनः। चारुपूर्वकश्चारुसेनः। षष्ठः सुषेणश्च। अथ पूर्णचित्रपूर्वौ सेनौ पूर्णसेनश्चित्रसेनश्च।। 23।।

विवरणम्

वीरमहाद्याविति। यथा वीरसेनो महासेन इत्यादि।। 23।।

For Subramoṇya (the eight) deities to be propitiated as the guardian of the door (pot) are Vīrasena, Mahāsena, Suṣeṇa, Bhadrasena, Cārusena, Suṣena, Pūrṇasena and Citrasena. (23)

गणराजि वज्रदन्तो गजास्यको भीमनाममहिषास्यौ।
अथ मेघनादकविरूपाक्षौ वरदश्च सर्वभक्षश्च।। 24।।

विमर्शिनी

गणराजि वज्रदन्ताद्याः।। 24।।

विवरणम्

भीमनामा भीम एव।। 24।।

For Gaṇeśa the (eight deities guarding the door pots are Vajradanta, Gajarāja, Bhīma, Mahiṣāsya, Meghanāda, Virūpākṣa, Varada, and Sarvabhaskṣa (24)

वीरबाहुमहावीरविद्युद्दन्तविलासिनः ।
आर्ये तीक्ष्णस्तीक्ष्णदन्तस्ताराक्षश्च भवोद्भवः ।। 25 ।।

विमर्शिनी

आर्ये वीरबाह्वादयः ।। 25 ।।

For Ārya (Śāstā) the (eight) deitie in this connection are Vīrabāhu, Mahendra, Vidyuddanta, Vilāsin, Tīkṣṇa, Tīkṣṇadanta, Tārakākṣa, and Bhavodbhava. (25)

महोदरादस्तेऽष्टौ पूर्णात्मादिभिरष्टभिः ।
सम्भेदिता हरिहरे द्वारपाला इतीरिताः ।। 26 ।।

विमर्शिनी

हरिहरेपूर्णात्मादिभिरष्टभिः सम्भेदिता युक्तास्ते महोदरादयोऽष्टौ । 'महोदराय पूर्णात्मने नमः' इत्यादयः । इति द्वारपाला ईरिताः ।। 26 ।।

विवरणम्

महोदरादयस्तेऽष्टाविति । यथा 'महोदराय पूर्णात्मने नमः' 'महाकायाय पुष्करात्मने नमः' इत्यादि ।। 26 ।।

For Śaṅkaranārāyaṇa the deities in this respect are the (eight) related to Śiva as Pūrṇātman etc.) (mentioned earlier) and the (eight) related to Viṣṇu (The combined mantras are mentioned as Mahodara Pūrṇātman, Mahākāya – Puṣkarātman, Mahākaṇṭha – Anantātman, Mahoraska, Nandātman, Agnijihva, Vīrasenātman, Agninetra, Suṣeṇātman, Virūpākṣa, Sambhavātman and Viśālākṣa Paramātman). (26)

सहस्रवीची विमला शतादिधारा प्रमोदिन्यपि धूर्जटौ स्युः ।
अर्च्याश्चतुस्तोरणकुम्भकेषु दिक्पा हरौ मन्त्रविदा स्वमन्त्रैः ।। 27 ।।

विमर्शिनी

धूर्जटौ चतुस्तोरणकुम्भकेषु चतुर्षु तोरणमूलस्थकलशेषु सहस्रवीची विमला शतादिधारा शतधारा प्रमोदिन्यपि स्युः । हरौ तु तेषु मन्त्रविदा इन्द्रादीनां मन्त्रज्ञेन दिक्पा अर्च्याः स्युः ।। 27 ।।

विवरणम्

दिक्पा हराविति । इन्द्रयमवरुणसोमाः । मन्त्रविदेति । सर्वत्रावहनादिप्रयोगाभिज्ञत्वम् । प्रणवेन द्विद्विस्वरमध्यगस्वमन्त्रेण बाङ्गभिज्ञत्वं चोक्तम् । यद्वायमाशयः–ओं इन्द्राय सुराधिपतये सायुधवाहनाय सपरिवाराय नमः इत्यादयो मन्त्रा इति । दिक्कलशेष्वपि समानमेतत् । तथान्येऽपि तोरणध्वजाधिपा द्वारतोरणकलशवासिनश्च सपरिवारा विभावनीयाः । तदुक्तम्–

एता स्वगणयुक्ता वै पूज्या देव्यस्तु सर्वदा ।
सुरारिपिशिताशा वै सर्वदुष्टभयङ्कराः । इति ।।

कालीकराल्याद्यभिप्रायेण एता इति निर्देशः। इति।। 27।।

In the case of Śiva the four pots at the base of the pillars of the arch shall be worshipped as Sahasravīcī, Vimalāśatadhāra and Pramodini (with the four mantras for Viṣṇu the lords of the quarters may be worshipped as Indra, Yama, Varuṇa and Soma (with reference to their names). (27)

कुम्भभद्रादिकौ कर्णौ श्वेतगोपूर्वकावपि।
शिवशार्ङ्गीश[1]योर्द्वारमध्येऽर्च्या द्वारदेवताः।। 28।।

विमर्शिनी

शिवशार्ङ्गीशयोर्द्वारमध्ये कुम्भभद्रादिकौ कर्णौ कुम्भकर्णो भद्रकर्णश्च, श्वेतगोपूर्वकावपि कर्णौ श्वेतकर्णो गोकर्णश्च द्वारदेवता अर्च्याः।। 28।।

In the central part of the door of Śiva, Śaṅkaranārāyaṇa, the four deities may be invoked with the mantras like Kumbhakarṇa, Bhadrakarṇa, Svetakarṇa and Gokarṇa. (28)

अग्न्यादीशदिगन्तमुक्तविधिना मुष्ट्यादिभिः शोधयेत्
सिद्धार्थादिभिरेव वा सशिखिकुण्डं मण्डपान्तःस्थलम्।
प्रागास्योऽञ्जलिना त्रिधात्र विकिराञ्छक्त्यात्मनि प्रोत्किरेत्
सिद्धार्थान् विकिरांश्च रक्षतु सशेषान् मार्जनोपार्जितान्।। 29।।

विमर्शिनी

क्रियाशेषमाह—अग्न्यादीति। मुष्ट्यादिभिः सिद्धार्थादिभिरेव वा, पक्षद्वयेऽपि सशिखिकुण्डम् अग्निकुण्डसहितं मण्डपान्तःस्थलं प्रासादशुद्धावुक्तविधिना अग्न्यादीशदिगन्तं शोधयेत् अग्निकोणा-दीशकोणान्तं प्रदक्षिणगत्या शोधयित्वा पुनरग्न्यादीशान्तमपि पूर्वभागं शोधयेदित्यर्थः। शक्त्यात्मनि भुवनेश्वर्यां पूर्णपुष्पाञ्जलिं विधाय मण्डपं शक्तिमयं ध्यात्वा अत्र मण्डपे प्रागास्यो भूत्वा अञ्जलिना विकिरान् त्रिधा प्रोत्किरेत् पूर्वं मध्ये पुनर्दक्षिणोत्तरपार्श्वयोश्व। मार्जनोपार्जितान् मार्जनेन स्वीकृतान् सशेषान् पात्रेऽवशेषितांश्च सिद्धार्थान् विकिरांश्च रक्षतु।। 29।।

विवरणम्

वेद्याश्शुद्धिमभिधत्ते—अग्न्यादीशदिगन्तमिति। उक्तविधिनेति। पुरा प्रासादशुद्धौ 'दिष्टमनुना मुष्ट्याद्ययान्तर्बहिरि'त्याद्युक्तविधानेनेत्यर्थः। सिद्धार्थादिभिरेव वेति। 'मुष्ट्या शकृद्वारि वा पश्चात् सर्षपमुष्टी'ति मुष्ट्यादिपक्षस्सिद्धार्थादिपक्षश्चोक्तः। सशिखिकुण्डमिति। यथासन्निधानं पूर्वादि-कुण्डशोधनमुक्तम्। कुम्भेशवर्धनीस्थलमपि औचित्याच्छोधनीयम्। मण्डपस्यान्तःस्थलं वेदी भवति। धूपदीपान्ता शुद्धिस्सर्वापीहोक्ता। तत्र विकिरविकिरणं गव्यानन्तरमक्षतविकिरणानन्तरं वोक्तम्। तत्प्रकारमुपदिशति—प्रागास्य इति। प्राग्द्वारेऽपि मण्डपे वेदिपश्चिमदिशि प्राङ्मुखस्तिष्ठन्नञ्जलौ पूर्णं

---

1. 'शसेनांनीरर्च्याः स्युर्द्वार' ख. पाठः

विकिरं गृहीत्वा तेनाञ्जलिनैव तद्विकिरं वेद्यां पश्चिमादिप्रागन्तपातबुद्ध्या विकिरेत्। पुनस्ततो दक्षिणतः प्राङ्मुखस्तिष्ठन्नप्येवं विकीर्य, उत्तरतस्तथा तिष्ठन्नप्येवं विकिरेदिति।

"विकिरान्विकिरेत्तिष्ठंस्त्रिधा चोत्तानपाणिना।" इति[1]।

सर्वत्र विकिरणमपीष्यत एव। तथा चोक्तम्–प्राङ्मुखस्तिष्ठन्नुत्तानपाणिना विकिरान् मण्डपमध्ये दक्षिणवामयोर्विकीर्य पुनस्सर्वत्र विकीर्येति। तदा च कुण्डेष्वपि त्रेधा विकिरणम्। पुनस्तत्र सर्वत्र विकिरणं च कार्यमिति।।

"शक्त्यात्मनीति सङ्कल्प्य शक्तिरूपं च मण्डपम्"

इति चोक्तम्। विष्णौ श्रीबीजेन। इतरेषु शक्तिबीजेन। मण्डपं शक्तिरूपं ध्यात्वा, तेनैव जलगन्धादिभिरभिपूज्य विकिरप्रयोग इति भावः। सिद्धार्थानिति। सिद्धार्थविकिरणकाले तावदैशपर्यन्तं विकीर्य सिद्धार्थशेषान्वितं तत् पात्रं तत्र निदध्यात्। पुनर्मार्जनकाले मार्जनेनापि विकीर्णसिद्धार्थानैशदेशे सञ्चित्य पूर्वनिहिततत्पात्रे सङ्गृह्णीयात्। तच्च पुनर्वर्धनीपीठे तत्परिभ्रमणानन्तरं विनियोक्तुं कुत्रचित् सङ्गृह्य रक्षेद्, एवं विकिरमपि कुम्भेशपीठे विनियोक्तुं सङ्गृह्य रक्षेदिति। वक्ष्यति च 'अथ परार्जितान् सर्षपानि'त्यादि।। 29।।

For the sanctification of the inner part of the pavilion it shall be cleaned. with handful of Kuśa or white mustard from south eastern portion onwards upto the north – east corner. The cleaning shall cover the sacrificial pit with fire. The handful of materials including the white mustard shall be sprinkled by the priest himself facing the east after sanctifying them with their own Śaktimantras. The sprinkling shall be repeated thrice. The balance sprinkled on the floor should be collected together by employing a brush for the purpose and there are to be kept apart. (29)

मध्येवेदि समिष्टपीठनिजशक्त्यास्थापितं मूलतो
देवेशं दिगधीश्वरानपि दिशास्वभ्यर्च्य कृत्वा ततः।
पुष्पास्त्रप्रविमोचनं च परितो धूपं प्रदीपं तथा
न्यस्यारक्षतु मण्डपाल्पकममुं चा[2]स्त्रत्रितालादिना।। 30।।

विमर्शिनी

मध्येवेदि वेदिमध्ये समिष्टपीठनिजशक्त्यास्थापितं समिष्टे पीठे निजायां शक्तावावाहितं देवं मूलतो दिशासु दिगधीश्वरानप्यभ्यर्च्य ततः पुष्पास्त्रप्रविमोचनं परितः पुष्पेणास्त्र[3]मन्त्रेण क्षेपणं च कृत्वा तथा धूपं प्रदीपं च न्यस्य मण्डपात्मकममुं देवम् अस्त्रत्रितालादिना अस्त्रेण तालत्रयादिना आरक्षतु।। 30।।

---

1. 'ति। पुनः स' घ. पाठः
2. 'देवं त्रि' इति मूलकोशपाठः,
3. 'स्वं' ख पाठः

विवरणम्

मध्येवेदीति। 'पारे मध्ये षष्ठ्या वे'ति समासः। समिष्टपीठनिजशक्तिः तस्यां आस्थापितं मूलात एवावाह्य सकलितम्। मूलतोऽभ्यर्च्येति सम्बन्धः। वेदिमध्ये स्वस्तिकमालिख्य तत्र स्वं पीठं सम्पूज्य तस्मिन् मण्डपशक्तेः शक्त्यात्मनि प्रोत्किरेदिति भावनामात्रसिद्धां निजशक्तिमेव तन्मन्त्रेणावाहन-सकलीकरणपूजनैः सम्यग् विभाव्य तस्यां मण्डपात्मिकायां देवमपि तन्तन्त्रेण समावाह्य पूजयेत्। मध्ये विकिरपक्षे विधानमेतत्। अन्तर्विकिरपक्षे त्वयं विशेषः। शक्तिविभावनायां कृतायां विकिरविकिरणं पुनर्मध्ये देवोऽपि पूजनीयः। यद्वा, शक्तिपूजायामेव तस्यां देवोऽप्यावाह्य पूजनीय इति। पक्षद्वयेऽपि देवपूजायां प्रागादिदिक्षु इन्द्रादिलोकपालानपि सह पूजयेत्। यद्वा, तेषां तत्तद्दिक्षु स्वस्तिकेषु पूजा। "यदुक्तं–

...परितो दिक्षु यजेद्दिङ्नायकानपि।
तारनामस्वाधिपत्यहेतिवाहनपार्षदैः ।।

इति। मण्डपात्मिकायाः शक्तेर्मार्जनालेपनादिस्थूलशोधनवत् भूतसंहारादिशोधनमप्युचितम्। तदुक्तम् –'धूपदीपानन्तरं तच्छक्तिमात्मनि संहृत्य भूतसंहारधारणानन्तरं तच्छक्तिप्रतिसङ्क्रमणं कृत्वा भूतसर्गानन्तरं तन्मन्त्रप्राणायामव्यापकाङ्गानि कृत्वा पीठपूजापूर्वकमावाह्य मण्डपशक्तिं पूजयेत' इति। केचिद् वेदिमध्ये तच्छक्तिपूजामेव वदन्ति–

"पूजयेद्गन्धपुष्पैश्च शक्तिं मण्डपभूगताम्।"

इति। श्रीबीजेनावाह्य साङ्गं सम्पूज्य दिक्ष्विन्द्रादीन् यजेदिति च। वैष्णवत्वात् श्रीबीजेनेत्युक्तम्। इति।

शक्तौ मण्डपरूपिण्यां शान्त्यतीता तु मध्यतः।
प्रागादिद्वारदेशेषु शान्त्याद्याः क्रमतः कलाः।।
वेद्यामाधारशक्त्याद्या धर्माद्याः स्तम्भगोचराः।
चतुर्वंशेष्वधर्माद्याः सत्त्वाद्यास्तद्गुणास्पदाः।।
मायाविताने विद्या च कल्पनीया विधानतः।

इति। शक्तेः सकलीक्रियायामेतद् भवति। पुनः पुष्पास्त्रमोचनादि सर्वं कार्यमिति। मण्डपात्मकममुं देवमिति। शक्तिमयमण्डपस्यान्तरात्मतयावस्थितमित्यर्थः।। 30।।

An Altar placed in the centre of the pavilion where the powers of the deity is invoked and worshipped with mūlamantra may be offered oblation along with the eight lords of the quarters invoking them with Astramantra and offering incenses and ceremonial torch by waving the lamp in the prescribed manner The divinity invoked in the form of the stool kept in the pavilion may be properly propitiated with Astramantra and three measures of the palm. (30)

अथ शि[1]वदिशि पार्जन्यां[2]शके वा लिखित्वा
वसुदलकमलं तद्दक्षिणे स्वस्तिकं च।
सरसिरुहि सशालीवस्त्रदर्भादिपीठे
न्यसतु कलशना[3]थं स्वस्तिके कर्करीं च।। 31 ।।

विमर्शिनी

कुम्भेशपूजामाह–अथेति। अथ तदनन्तरं शिवदिशि पार्जन्यांशके वास्तुगतपर्जन्यस्यांशे वा वसुदलकमलम् अष्टदले पद्मं तद्दक्षिणे स्वस्तिकं च लिखित्वा सशालीवस्त्रदर्भादिपीठे शालीसहितवस्त्रदर्भतण्डुलादिभिः कृते पीठे सरसिरुहि पद्मे कलशनाथं कुम्भेशं, स्वस्तिके कर्करीं सनालं कुम्भं च न्यसतु।। 31 ।।

विवरणम्

इदानीं कुम्भेशपूजां वक्तुमारभते–अथ शिवदिशीति। वास्तुपदाभिप्रायमेतत्। तत्रालिन्दोद्देश ईशानपदे पर्जन्यपदे वेति। वसुदलकमलमिति। अष्टदलं पद्मम्। तच्च पीठपर्यन्तं स्यात्। सरसिरुहीति। तस्मिन् कमले। कलशराजमिति। कुम्भेशन्यग्बिलतया सादनमेतदुक्तम्। स्वस्तिके कर्करीं चेति। न्यसत्वित्यनुषज्यते। शालिदर्भवस्त्रादिभिः पीठरचनमिहाप्युचितं कार्यम्।। 31 ।।

Thereafter at the north eastern corner or at the Parjanyapada which is adjacent to the previous one (following Īśānapadạ) draw a diagram of lotus with eight petals and a Swastika next to it the mainpot to be placed in a stool. The pot may be filled up with paddy, rice and sesamum and mustard coverd with cloth. In it Kumbheśa the lord of the pot and in the Swastika the jar holding water – technically called Karkari may be placed. (31)

आराध्य योगासनमत्र तोयैः सिक्तं प्रसक्तं गुणगन्धधूपैः।
सुसंस्कृतं न्यस्तकुशाद्यमिष्टं घटं समुत्तानितमात्तकूर्चम्।। 32 ।।
सहेमरत्नाक्षतगन्धपुष्पं सुधीः समापूर्य जलैश्च पूतैः।
त[4]त्रेष्टवर्णाम्बुरुहोपविष्टमूर्त्यन्तरुद्यत्स[5]कलाल्पतत्त्वे ।। 33 ।।
त्र्याधारपद्मेष्वभिवाह्य चात्मविद्यापराख्यान्यपि तत्त्वकानि।
सर्वेषु सम्पूजयतु त्रिणेत्रे परांशसम्प[6]न्नशिवानि मन्त्री।। 34 ।।

---

1. 'खलु शिवकोणे देशिकः कल्पयित्वा' क. पाठः,
2. 'न्येऽपि वा कल्पयत्वा',
3. 'राजं स्व' ख. पाठः
4. 'समिष्ट',
5. 'त्परमित्यमुष्मिन्।।' ख. पाठः,
6. 'म्भि' क. पाठः

विमर्शिनी

तत्पूजाविधानं सूत्रयति–आराध्येत्यादिभिः। अत्र अष्टदलपद्मे पीठे योगासनमाराध्य तोयैः सिक्तं क्षालितं, गुणगन्धधूपैः प्रसक्तं गुणेन वेष्टितं गन्धेन लिप्तं धूपेन धूपितं च, सुसंस्कृतं धारणादिभिः शोधितं, न्यस्तकुशाद्यं कृतदर्भविन्यासगन्धजलोक्षणादिकम्, इष्टं पूजितं, समुत्तानितं यथाविधि स्थापितम्, आत्तकुर्चं, सहेमरत्नाक्षतगन्धपुष्पं हेमरत्नाक्षतगन्धपुष्पैर्योजितं घटं सुधीः मानसपूरणकृद् गुरुः पूतैर्गालितपूजितैर्जलैश्च समापूर्य इष्टवर्णाम्बुरुहोपविष्टमूर्त्यन्तरुद्यत्सकलात्मतत्त्वे इष्टे लिपिपङ्कजे उपविष्टाया मूर्तेरन्तः प्रकाश्यमानैः कलासहितैरात्मनस्तत्त्वैश्च युक्ते तत्र कलशे त्र्याधारपद्मेषु मूलाधारकलशगतमन्त्रमूर्तेर्मूलाधारहृदयभ्रूमध्येषु सर्वेषु देवेषु आत्मविद्यापराख्यानि तत्त्वानि 'ओं अं नमः परायात्मतत्त्वात्मने नमः' 'ओं उं नमः पराय विद्यातत्त्वात्मने नमः' 'ओं मं पराय परतत्त्वात्मने नमः' इति मन्त्रैस्तान्यावाह्य सम्पूजयतु च। त्रिणेत्रे परांशसम्पन्नशिवानि परांशे परतत्त्वस्थाने योजितशिवतत्त्वानि 'ओं नं नमः शिवाय शिवतत्त्वात्मने नमः' इति मन्त्रेण च। मन्त्रीत्यनेन वक्ष्यमाणाद् ब्रह्मकलशपूजनात् पूजाविधानं स्वीकर्तव्यमिति सूचितम्।। 32-34।।

विवरणम्

तोयैः सिक्तमिति। 'अस्त्रेणासिच्य तोयै'रित्येतदुक्तम्। प्रसक्तं गुणगन्धधूपैरिति। गुणः सूत्रम्। 'कलयतु कवचेन त्रिसूत्रेणे'त्यादिकमुक्तम्। सुसंस्कृतमिति शोषणादिसंस्कारपञ्चकम्। न्यस्तकुशाद्यमिति वक्ष्यमाणरीत्या दर्भन्यासगन्धोदकप्रोक्षणाक्षतविकिरणानि। इष्टमिति। मूलेन जलगन्धादिभिः पूजितम्। समुत्तानितमित्युत्तानीकरणं स्वपीठमध्ये विन्यसनं चोक्तम्। आत्तकूर्चमिति। आत्तः परिगृहीतो निक्षिप्ततया कूर्चो येनेति समासः। प्रणवप्रोक्षणपूर्वकमस्त्रप्रो[1]क्षितयमादिसंस्कृतकूर्चन्यसनमनेनोक्तम्।। 32।।

सहेमरत्नाक्षतगन्धपुष्पमिति। अस्त्रप्रोक्षणादिसंस्कृतद्रव्यन्यासः। सुधीरिति मानसपूरणाभिप्रायम्। भूतैरिति। ऐशभागे कट्यहादौ नवपटगा[2]लितैः। वरुणपूजाद्युपलक्षणमेतत्। तत्रेति। तस्मिन् कलशे। इष्टवर्णाम्बुरुहेति। पूजिते वर्णाम्बुरुहे लिपिपङ्कज उपविष्टायाः आवाहितपूजिततया आसीनाया मूर्तेः अन्तरुद्यः भवति सकलात्मतत्त्वं यत्रेति, तत्रेत्येतद्विशेषणतया बहुव्रीहिः। इष्टवर्णाम्बुरुहायाः उपविष्टाया मूर्तेरिति वा स्यात्। तदा मूर्त्तौ लिपिपङ्कजपूजा लभ्यते। सकलात्मतत्त्व इति विद्यादेहावाहनाभिप्रायमेतत्। सकलं हि सदात्मतत्त्वं हि विद्यादेहः। यद्वा सकलानि सर्वाण्यात्मतत्त्वानि स्तस्वदेवस्य तत्त्वानि यत्र तत् सकलात्मतत्त्वम्। विद्यादेहान्तस्तदवयवशक्तितया तत्त्वावाहनमप्यनेनोक्तम्। अथवा सह कलाभिरात्मीयतत्त्वैश्च वर्तत इति सकलात्मतत्त्वम्। मूर्त्तौ मूलाधाराद्यारत्रयेऽग्निसूर्यसोमकलानां विधिवदावाहनम्। विद्यादेहे तत्त्वावाहनं च। एवमुक्तं न्यासपूजान्वितं सर्वमावाहनमिति ज्ञेयम्।। 33।।

त्र्याधारपद्मेष्विति। मूलाधारे हृदये पुनर्भ्रूमध्ये मूर्धनि द्वादशान्ते वा। पद्मपदेनैतद् दर्शितं– पूर्वमग्न्यादिकलावाहना न कृता चेदिदानीं तासां न्यासमात्रमवश्यं कर्तव्यमिति। त्रिनेत्र इति। परतत्त्वस्थाने शिवतत्त्वं स्यादित्यर्थः। मन्त्रीति। मन्त्रप्रयोगाभिज्ञः। यथा 'ओं अं नमः परायात्मतत्त्वात्मने नम'

---

1. 'प्रोक्षणय' घ. पाठः,
2. 'न' ग. पाठः

इत्यादि। शैवे तु 'ओं अं नमः शिवायात्मतत्त्वात्मने नम' इत्यादि। एतदपि परांशसम्भिन्नशिवानीत्यनेनैव लभ्यते। प्रणवादिपञ्चपदैरेषां पञ्चाङ्गन्यासः। प्रणवत्रयतत्त्वमन्त्रामन्त्रितपदादियोगोऽप्यावाहनधर्मो मन्त्रीत्येवोक्तः। 'ओं सं सो ह्रीं हं सः' इत्यादियोगोऽपीष्यत इति।। 34।।

Having placed Kumbheśa the lord of the pot, on the lotus design washed with water and encircled with thread and anointed with fragrant water, flushed with smoke turned up with its mouth on the upper side holding Kuśa the darbhā grass, enwined offer worship to it. Now put gold, jewel and akṣata, Aṣṭagandha and flower inside the pot. The priest shall fill up it with sanctified water and offer the worship with special rites like Ātmatattva, Vidyātattva and Paratattva the three principles each of which shall be invoked separately – the last mentioned one called Paratattva represents the Śivatattva and these have to be offered proper worship using respective mantras related to it and these are applicable to all deities at the Mūladhāra, hṛdaya and bhrūmadhya since they are in the form of Mantra and placed inside the pot. (32-34)

तस्मिन् पल्लवचक्रिकादिघटिते तारोपचारादिना
देवेशं कलशेऽभिवाह्य निजमूलेनार्णतत्त्वादिभिः।
साकल्यं परिकल्प्य कल्पविधिना दत्त्वोपहारान् क्रमात्
सम्पूज्याथ निवेद्य तोषणसपर्यां च प्रकुर्याद् गुरुः।। 35।।

विमर्शिनी

अथ गुरुः पल्लवचक्रिकादिघटिते पल्लवचक्रिकातण्डुलदर्भाक्षतफलगन्धां पुष्पैर्युक्ते तस्मिन् कलशे तारोपचारादिना निजमूलेन देवेशमभिवाह्य अर्णतत्त्वादिभिंः लिपितत्त्वमूलाक्षराङ्गादिभिः साकल्यं सकलत्वं परिकल्प्य कल्पविधिना पूजापटले वक्ष्यमाणविधानेनोपहारान् क्रमाद् दत्त्वा सम्पूज्य निवेद्य तोषसपर्यां प्रसन्नपूजां च प्रकुर्यात्।। 35।।

विवरणम्

पल्लवचक्रिकादिघटिते इति। पल्लवाद्यलङ्करणं कलशपटल[1] वक्ष्यमाणरीत्या कार्यम्। तारोपचारादिना निजमूलेनेत्यन्वयः। अर्णतत्त्वादिभिरिति मूलाक्षराङ्गादिग्रहणम्। कल्पविधिनेति। स्वागमोक्तरीत्या पूर्वं कलशपूजाक्रमकथनमिदानीं कल्पविधिनेत्यभिधानं च पूजासङ्कोचाकरणार्थमिति बोद्धव्यम्।। 35।।

In that pot in which bunches of figs, mango leaves, Akṣata, shoots, Kuśa grass and fragrant flowers are put the god may be invoked with his Mūlamantra with the principles of divinity. There after it may be properly worshipped along with entire accompaniments to please the divinity. (35)

प्रक्लृप्तयोगासनपूजनादिकां गलन्तिकां गालितवारिपूरिताम्।
ततो निजास्त्रेण कृताभिवाहनां प्रकल्पिताङ्गाममुना प्रपूजयेत्।। 36।।

1. 'लभाविरी' ग. घ. पाठः

विमर्शिनी

ततः प्रक्लृप्तयोगासनपूजनादिकां कृतपीठपूजादिकां, गालितवारिपूरितगालितैर्जलैः पूरितां, निजास्त्रेण कृताभिवाहनां स्वस्वास्त्रेण कृतावाहनां प्रकल्पिताङ्गाम् अस्त्रमन्त्रस्याङ्गैः कृताङ्गां गलन्तिकां कर्करीम् अमुनास्त्रेण प्रपूजयेत्।। 36।।

विवरणम्

प्रक्लृप्तयोगासनपूजनादिकामिति कुम्भसंस्कारकुर्चन्यासग्रहणम्। गलन्तिकां वर्धनीम्। प्रकल्पिताङ्गामिति। लिपितत्त्वास्त्रियाङ्गन्यासकथनम्। अमुना प्रपूजयेदिति। अस्त्रेण साङ्गेन सावरणं परिपूज्य निवेद्य प्रसन्नपूजामपि कुर्यादिति भावः। पूजान्ते कुम्भेशे मूलत्रितत्त्वजपो वर्धन्या-मस्त्राष्टोत्तरशतजपश्च कार्यः। तदुक्तम्–

अस्त्रेण शतवारं तु मन्त्रयित्वा तु वर्धनीम्।

इति।। 36।।

Thereafter the pot in which water is to be poured may be propitiated with Astramantra after placing it properly on a stool. The priest shall perform the ritual called Aṅganyāsa the conception of principles on the various limbs. (36)

ततः करकधारया विहितकुड्यमूलोक्षया
प्रदक्षिणपरिभ्रमं वितनुयादलिन्देऽस्त्रतः।
घटं नयतु पृष्ठतोऽप्यथ पुरार्जितान् सर्षपान्
विकीर्य करकं घटीं विकिरकांश्च पीठे न्यसेत्।। 37।।

विमर्शिनी

ततोऽलिन्दे विहितकुड्यमूलोक्षया विहितं विधीयमानं कुड्यमूलोक्षणं यया तया करकधारयास्त्रतो[1]ऽस्त्रमन्त्रं जपन् प्रदक्षिणपरिभ्रमम् ईशादीशपर्यन्तं प्रदक्षिणक्रमेण परितो भ्रमणं वितनुयात्। पृष्ठतः तस्पृष्ठमार्गेण घटं कुम्भेशं नयतु। अथ पुरार्जितान् प्राङ् मण्डपशोधने गृहीतान् सर्षपान् विकीर्य करकं कर्करीं न्यसेत्। पीठे विकिरकांश्च विकीर्य घटीं कुम्भेशं न्यसेत्।। 37।।

विवरणम्

विहितकुड्यमूलोक्षयेति करकधाराया विशेषणम्। विहिता कृता अलिन्दस्यैव कुड्यमूले उक्षा दक्षणं सेको यया सा तथोक्ता। ततः प्रदक्षिणपरिभ्रममिति। ईशादारभ्य तदन्तमिति भावः। तदुक्तम्–

"ईशानान्तं परिभ्रम्य तत आरभ्य साधकः।"

इति। घटं नयतु पृष्ठत इति। तदप्युक्तम्–'घटं तेनैव मार्गेणे'ति। रक्षार्थं वर्धन्याः परिभ्रमणं भूपरिग्रहार्थं कुम्भेशस्येति ज्ञेयम्। गुरुर्वर्धनीं नयतु मूर्तिपः कुम्भेशमपि, विपर्ययेण वेति। पुरार्जितानिति। सिद्धार्थान्

---

1. 'तो म' ख. पाठः

विकिरांश्च। रक्षत्वित्यादि पुरोक्तम्। करकं स्वे पीठे सर्षपान् विकीर्य न्यसेत्। कुम्भेशं च स्वे पीठे विकिरान् क्षिप्त्वेति विवेकः।। 37।।

Now the preceptor shall engage his Assistant to carry the potful of sanctified water and make him move about in such a way as to let the flow of water on the ground. He shall chant mantra during this act and he shall also carry the pot conceived as the divinity. Thereafter he shall sprinkle the items like mustard collected earlier on the stool over which the pot is to be placed. (37)

आधारत्रितये यथापुरमदः सम्पूज्य तत्त्वत्रयं
मूलेनात्र विभाव्य देवमणुना साङ्गं समभ्यर्चयेत्।
पूर्णीकृत्य गलन्तिकामपि यजेत् स्वास्त्रेण कृत्वा द्वयो-
नैवेद्यं परितोष्य र[1]क्षतु घटौ द्वयेकांशुकावेष्टितौ।। 38।।

विमर्शिनी

आधारत्रितये अदः एतत् तत्त्वत्रयं यथापुरं पूर्ववत् सम्पूज्य अत्र मूलेनाणुना देवं (परि?वि) भाव्य आवाह्य साङ्गं सफलीकृतं तं समभ्यर्वयेत्। गलन्तिकां कर्करीमपि पूर्णाकृत्य स्तास्त्रेण यजेत्। द्वयोरपि नैवेद्यं कृत्वा परितोष्य प्रसन्नपूजां कृत्वा द्वयेकांशुकावेष्टितौ वस्त्रद्वयेन वस्त्रैकेन च वेष्टितो कुम्भेशकर्करीघटौ रक्षतु।। 38।।

विवरणम्

अत्र अदस्तत्त्वत्रयं यथापुरं सम्पूज्येति। अत्रेति कुम्भेशे। यथापुरमित्यावाहनादिपूर्वकम्। मूलेनाणुना देवं च विभाव्येति पुनः स्वमूलेनावाहनादिकमुक्तम्। पूर्णीकृत्य गलन्तिकामपीति। वर्धनीं पूर्वोक्तैरेव गालितोदकैः सुपूर्णां कृत्वेत्यर्थः। यजेत् स्वास्त्रेणेत्या वाहनादिकमुक्तम्। घटाविति। कुम्भेशं वर्धनीं च। 'पुमान् स्त्रिये'त्येकशेषः। द्वयेकांशुकावेष्टिताविति। कुम्भेशेंऽशुकद्वयं वर्धन्यामेकमिति विभागः।। 38।।

The tattvas mentioned earlier (Ātma, Vidyā and Para) may be conceived in the three places (Mulādhāra, hṛdya and bhrūmadhya) by invoking divinity. Having pleased the divinity with worship the two pitful of water may be covered with a pair of clothes. (38)

स्वि[2]ष्टात्मा परिमार्जनादिपरिशुद्धेऽस्त्रान्ततारोक्षिते
वाय्वग्न्यम्बुमहीवियद्दहनबीजैस्तत्त्वसंख्योदितैः ।
सन्धार्यासुमसौ विधाय परिशोषादिप्रदाहान्तिमं
तद्वैशेषिकशोधनं प[3]रिलिखेत् कुण्डे स्वके स्वोक्तवत्।। 39।।

---

1. 'नव्यसवनैरावेष्ट्य रक्षेद् घटौ।।',
2. 'कण्ठे स्वे कृतार्जनादिपरिशोधे वायुवह्न्यम्बुभूव्योमेरानलबीजमन्त्रशरकृत्यावृत्तिमात्रं क्रमात्। आयच्छन्ननिलं विधा'
3. 'गुरुरिति प्रोत्पादयेत् पावकम्।।' ख. पाठः 'प्रजनयेत्' कुण्डे 'स्वकेऽथातलम्'।। क. पाठः समनन्तरपद्यव्याख्यारित्या विवरणकारस्याप्येष एव पाठ इति प्रतीयते।

विमर्शिनी

अग्निजननमाह–**स्विष्टात्मेति**। असौ गुरुः स्विष्टात्मा सकलीकरणशङ्खपूरणानन्तरं कृतात्माराधनो भूत्वा गणेशमभ्यर्च्य परिमार्जतादिपरिशुद्धे। अत्र मण्डपशोधनेन सह कुण्डानामपि परिशोधनं क्रियते। अपरत्राप्यग्निजनने मुष्ट्यादिभिः स्थलशुद्धिः कार्येत्यभिप्रायः। अस्त्रान्ततारोक्षिते 'ओं हुं फडि'ति मन्त्रेण प्रोक्षिते स्वके (कुण्डे) आचार्यकुण्डे तत्त्वसंख्योदितैः प्रत्येकं पञ्चविंशतिसंख्यया जप्तैः वाय्वग्न्यम्बुमहीवियद्दहनबीजैः यं रं वं लं हं रं इति बीजैः असुं प्राणं संधार्य संयम्य परिशोषादिप्रदाहान्तिमं शोषणदहनप्लावनकाठिन्यसुषिरीकरणदहनात्मकं तद्वैशेषिकशोधनं तस्य कुण्डस्य विशेषशोधनं विधाय स्वोक्तवत् स्वस्वोक्तप्रकारेण परिलिखेत्।। 39।।

विवरणम्

अथाग्निजननं प्रस्तौति–**स्विष्टात्मेति**। देहशुद्ध्याद्यात्माराधनान्तमुक्तम्। गणपतिपूजादि सर्वं सामान्यसिद्धम्। परिमार्जनादिपरिशुद्ध इति कुण्डे स्वक इत्यत्रान्वयः। परिमार्जनादिभिस्सशिखिकुण्डं मण्डपान्तः स्थलमित्युद्दिष्टाभिः शुद्धिभिः परिशोधिते। पूर्वं परिशोधनासम्भवे पुनरिदानीं तत्कार्यमिति चाभिप्रायः। अस्त्रान्ततारः फडन्तप्रणवः। वाय्वादिपञ्चबीजैः शोषणादिपञ्चकं कुण्डशरीरस्यैव। पुनर्वह्निबीजेन प्रदाह आयतनोद्देशस्येत्यवबोद्धव्यम्। तत्त्वसङ्ख्योदितैस्सन्धार्येति। पञ्चविंशति-सङ्ख्याजप्तैः कुम्भकप्राणायामा उक्ताः। असाविति गुरुः। तद्वैशेषिकशोधनमिति। परिमार्जनादिशोधनं सामान्यं, शोषणादित्विदं विशेषशोधनमिति भावः। यद्वा वैशेषिकं सामान्यभूतविकृतित्वात्। कुण्डशक्तेः शरीरं कुण्डरूपमुच्यते। यदुक्तम्–

> **प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः।**
> **उदरं कुण्डमित्युक्तं योनिः पादौ च पश्चिमे।।**

इति। तस्य[1] शोधनं भूतसंहारादिलक्षणम्। तदुक्तम्–

> **कुण्डाभिमानिनीं शक्तिं संहृत्योत्पादयेत् पुनः।**
> **उद्घातावृत्तियोगेन प्राणायामपुरस्सरम्।।**

इति। तत्त्वसङ्ख्योदितैरिति। तत्त्वाय तद्भावाय वाय्वग्न्यादिभावापत्तये सङ्ख्याः षोडश तद्द्विगुणतद्द्विगुणरूपा रेचकादिलक्षणाः ताभिरुदितैरिति व्याख्येयम्। कुण्डजीवशक्तिमात्मन्याहृत्य भूतसंहारशोषणादिपञ्चकतज्जीवप्रतिसंक्रमणभूतसर्गायतनोद्देशप्रदाहप्राणायामं कृत्वा लिपिन्यासं कुर्यात्। स्वके कुण्डे इति। यद्वस्तु तावत् कुण्डं तद्वस्त्वात्मके कुण्डे सम्पन्ने अग्निं प्रजनयेदिति। यत उक्तम्–

> **"कुण्डस्था वैष्णवी शक्तिः प्रकृतिस्त्रिगुणात्मिका"**

इत्यादि। तत्र प्रथमं प्रणवन्यासः।

> **व्यापय्य तारतः कुण्डं तदंशान्मेखलात्रये।**
> **गर्तेऽन्तर्बिन्दुनादादीन् व्यापकत्वेन विन्यसेत्।।**

---

1. 'स्याः' क. ख. पाठः

सत्तवर्गपदे गर्ते पर्जन्याद्यब्जजावधि।
पदेषु विन्यसेद् विद्वानादिहान्तां च मातृकाम्।।

अब्जजो ब्रह्मा मध्यपद एव हलक्षाक्ष(र)न्यासः। वक्ष्यति च–'हलक्षाक्षरं मध्यभाग' इति।

न्यस्येत् स्वस्वजिनार्णार्णान् प्रागादिषु पदेषु तु।
तावत् सुपश्चिमान्तेषु तारेण व्यापयेत् पुनः।।

गर्तोद्देशं प्रागादिपश्चिमान्तं चतुर्विंशतिधा विभज्य तेषु पदेषु गायत्र्या वर्णन्यासः।

गर्तवप्रेऽपि पूर्वादिचतुर्वप्रेषु विन्यसेत्।
षट् षट् पदानि सङ्कल्प्य गायत्र्यर्णान् विभागवित्।।
व्यापय्य जीवतत्त्वेन शेषतत्त्वान्यथ क्रमात्।
प्रागादिपश्चिमान्तेषु पदेषु त्र्यष्टसु न्यसेत्।।
शैवे शिवादितत्त्वानि द्वादश व्यापकात्मना।
विन्यस्य शेषतत्त्वानि प्रागादिषु पदेष्वपि।।
पश्चिमादिपुरोन्तेषु योनौ पञ्चदश स्वरान्।
पदेषु[1] विन्यसेत् गर्ते विसर्गं होमदेशतः।।
शक्त्या व्यापय्य तस्यांशांस्त्रीन्न्यसेन्मेखलास्वथ।
बिन्द्वादीन् व्यापयेद्गर्ते तदङ्गान्यपि विन्यसेत्।।

इति। तत्तन्न्यासानन्तरं तत्तत्पूजापि कार्येति। प्रागुक्ताधिकसंस्कारेण कुण्डशक्तेः संहारसामर्थ्यं वा साधनीयम्। तदुक्तम्–

"लीयते विश्वमत्रेति कुण्डं तद्विश्वकुण्डनात्"।

इति। यद्वा, होमोद्देशे बिन्दुलक्षणायाः संहारशक्तेः स्फूर्त्त्यर्थमेतत्। तदा त्वमृतबीजेन सर्गशक्तेः स्फूर्त्तिरपि भावनीया। यदप्युक्तम्–

अग्निरूपेण संहारं सोमरूपेण चोदयम्।

करोति बिन्दुयुग्मस्था' इति।। 39।।

The priest having purified himself and performed the worship of Vighneśa sprinkle the sacrificial fire with holy water chanting mystic formula. Thereafter he shall draw lines on the kindled fire as if dividing all the while making sure that the fire is blazing forth. (39)

ता[2]रेणाजितसुम्भजिद्धरिहरे रेखामुदग्गामिनीं
प्रागग्रे च तदन्तयोर्विलिखंतु द्वे ते च तिस्रोऽन्तरा।

---

1. 'षु न्यस्य गर्ते तु वि' घ. पाठः,
2. 'अस्त्राणुना विधिवदायतनं विलिख्य भूयः समुक्ष्य सलिलैः सकलं निरस्य। कृत्वा सगन्धकुसुमाक्षतवारिकूर्चैस्तारेण' ख. पाठः

तच्छेषेष्वथ तिस्र एव विलिखेत् पाश्चात्यरेखोर्ध्वतो
याम्यादिक्रमतो महेशगुहयोस्ताः स्वास्त्रतः कल्पवित्।। 40।।

विमर्शिनी

कल्पविद् अजितसुम्भजिद्धरिहरे विष्णुदुर्गाशिवनारायणेषु तारेण उदग्गामिनीं पश्चिमभागे दक्षिणत आरभ्योदगग्रां रेखां विलिखतु, तदन्तयोस्तस्या रेखायाः पार्श्वयोः (प्रागग्रे) द्वे रेखे च, ते अन्तरा तयोरन्तराले दक्षिणत आरभ्य तिस्रश्च। अथ तच्छेषेषु शिवस्कन्दगणपतिशास्तृषु पाश्चात्यरेखोर्ध्वतः पश्चिमरेखावसाने याम्यादिक्रमतस्तिस्र एव विलिखेत्। कल्पविदित्यनेन स्वचरणोक्ता रेखा लिखेद्वेति च सूचितम्। महेशगुहयोस्ता रेखाः स्वास्त्रतो विलिखेत्।। 40।।

विवरणम्

अथानलं प्रजनयेदित्ययमुद्देशः कथमित्याह–तारेणेति। प्रादेशमात्रा इह रेखाः स्युः। तदन्तयोः प्रागग्रे च द्वे इति। रेखे इति शेषः। याम्यादिक्रमत इत्येतदिहापि योजनीयम्। ते चान्तरा तिस्र इति। तयोर्मध्ये इत्यर्थः। पाश्चात्यरेखोर्ध्वत इति। रेखामुदग्गामिनीमित्यस्याः प्राग्भाग इत्यर्थः। महेशगुहव्यतिरिक्तेषु तारत एव। कल्पविदिति....।। 40।।

The priest well versed in tantras shall draw lines over the sacrificial fire as follows: For Viṣṇu, Durgā, Śaṅkaranārāyaṇa lives shall be drawn, at first from South to north and from the end of which two lines shall be drawn downwards. In the middle of these lines he shall draw three lines. For Siva, Subrahmaṇya, Gaṇeśa and Śāstā only three lines are needed from the top of the westline. For Śiva and Subrahmaṇya the mantra is Astra and for others it is Praṇava. (40)

स्कन्देशयोः कवचतो ध्रुवतः परेषु
भूयः समुक्ष्य सलिलैः शकलं निरस्य।
न्यस्येत् सगन्धकुसुमाक्षतवारिकूर्चै[1] –
स्तारेण विष्टरमिहार्हतु योगपीठम्।। 41।।

विमर्शिनी

भूयः स्कन्देशयोः कवचतः, परेषु ध्रुवतश्च सलिलैः समुक्ष्य शकलं निरस्य सगन्धकुसुमाक्षतवारिकूर्चैः गन्धसहितपुष्पाक्षतजलकूर्चैस्तारेण विष्टरमग्नेरुपवेशनयोग्यं पीठं न्यसेत्। इह विष्टरे योगपीठमर्हतु च।। 41।।

विवरणम्

शकलं निरस्येति। नैर्ऋतादिश्यस्त्रेणेति सामान्यावसेयम्। कूर्चपदेन कलशपटलभाविकूर्चग्रहणम्। विष्टरमित्यौचित्याच्छ्यनीयरूपमित्यवसीयते।। 41।।

1. 'चैं तारे' क. पाठः

For Subrahamaṇya and Śiva, Kavaca mantra may be used for sprinkling the leaves with water while for other gods Praṇava may be used. Removing the waste through the south western corner with water an altar or stool may be placed chanting Praṇava. This Yogapīṭha over which there shall be Akṣata and Kuśa grass is to be offered worship. (41)

श्रीबीजेन प्रकृतिमभिवाह्याजितेऽन्येषु शक्त्या
चेष्ट्वा दीर्घस्वरभिदुरबीजाङ्गसाङ्गीकृतां ताम्।
पुत्रीयन्तीं शुचिमृतुमतीं प्राक्शिरस्कां रतोत्का-
मुत्तानाङ्गीमुदरकुहरीभूतकुण्डां स्मरेच्च।। 42।।

विमर्शिनी

अजिते श्रीबीजेन, अन्येषु शक्त्या भुवनेश्वर्या च प्रकृतिं जगत्कारणभूतां शक्तिमभिवाह्य दीर्घस्वरभिदुरबीजाङ्गसाङ्गीकृतां दीर्घस्वरभेदितेन श्रीबीजेन शक्तिबीजेन वा कृतैरङ्गैः सकलीकृतामिष्ट्वा तां प्रकृतिम् ऋतुमतीं सञ्जातर्तुकालां, शुचिं शुद्धाम्। शुचिशब्द उभयथा योज्यः। शुचिमग्निं पुत्रीयन्तीम् अग्निमात्मनः पुत्रमिच्छन्तीं च, प्राक्छिरस्कां कुण्डस्य प्राग्भागगतशिरोभागयुक्तां पश्चिमगतपादां च, रतोत्कां सुरत उन्मनस्काम्, उत्तानाङ्गीम् उत्तानावयवाम्, उदरकुहरीभूतकुण्डाम् उदरकुहरत्वेन कल्पितकुण्डां च स्मरेत्।। 42।।

विवरणम्

शक्त्या चेति। आवाह्येत्यनुकर्षः। दीर्घैः स्वरैर्भिदुरं तद्बीजं श्रां श्रीमित्यादि ह्रां ह्रीमित्याद्यपि लिपितत्त्वन्यासावपीह युक्तौ। तामिष्ट्वेति जलगन्धादिभिस्सपर्योक्ता। पुत्रीयन्तीं शुचिमिति। अग्निमात्मनः पुत्रमिच्छन्तीं, शुचिमिति स्नातालङ्कृतामिति चार्थः। ऋतुमतीमिति। गर्भाधानकालयोगिनीम्। प्राक्छिरस्कामिति। यदुक्तम्–'प्राच्यां शिरस्समाख्यातम्'। इत्यादि। रतोत्कामिति। वागीश्वरीशक्तिरियम्। वागीश्वरेण सह सम्प्रयोगोन्मना भवतीति भावः। तदा ध्यानार्थमेतावदुक्तम्। स्वात्मनश्च वागीश्वर-भावधिया मूलप्राणायामाङ्गन्यासाद्यपि कार्यमिति ज्ञेयम्। स्मरेच्चेत्यनेनैतदपि सूचितम्। वक्ष्यति च-'विभुवीर्यमयमि'ति। तच्चोक्तम्–'ध्यात्वात्मानं शिवं देवमि'त्यादि। पाद्यादि दत्त्वा परिपूज्यार्घ्यदानमपि कार्यम्।। 42।।

By invoking the natural power of Viṣṇu with Śrībīja and of other Gods with Śaktibīja the priest shall perform Mūrtipūjā and offering of flowers keeping mental control he shall think of the sacrificial pit as an woman, purified with the bath after menses and lying with the head on the eastern side on her back as if desirous of sexual enjoyment for having a male child. The pit is to be taken as the stomach portion of the nature mother. (42)

विप्रावसथ्यं निभृतोपनीतमर्काश्मजं वारणिसम्भवं वा।
हव्यादमादाय निधाय नाभौ क्रव्यादभागं निरृतौ निरस्येत्।। 43।।

विमर्शिनी

विप्रावसथ्यं ब्राह्मणस्य महानसभवम्, अर्काश्मजं सूर्यकान्तातप[1]योगाज्जातं वा, अरणिसम्भवम् अरणिभ्यां मथनात् सम्भूतं वा निभृतोपनीतं गूढोपनीतं हव्यादमग्निमादाय नाभौ निधाय क्रव्यादभागं राक्षसांशं निर्ऋतौ बहिर्नितऋतिभागे निरस्येत् त्यजेत्।। 43।।

विवरणम्

विप्रावसथ्यमिति। ब्राह्मणगृहसम्भवम्। निभृतोपनीतमिति। शरावादिपात्रे सुभूतमक्षुब्धतया प्रशान्ततया कृत्वा मूर्त्तिपेनोपाहृतमित्यर्थः। पात्रान्तरेण उपर्याच्छादनमपि कार्यम्। अर्काश्मा सूर्यकान्तम्। हव्यादमादायेति। अग्निं प्रणवेन परिगृह्येत्यर्थः। निधाय नाभाविति। दर्भसंस्तरे कूर्चे वा न्यसनम्। क्रव्यादभागमिति। रक्षसां भागम्। स चाङ्गारमात्रं दर्भोद्योतो वा अस्त्रेण वा तूर्ष्णीं वा निरासः।। 43।।

The fire for receiving offering to the gods, procured from the kitchen of a Brāhmin or kindled by the frictions produced by the sun stone (Sun crystal) or from Araṇī – the two pieces of wood used for making sacrificial fire should be carefully brought and deposited into the centre of the sacrificial pit, the rest of the fire which is to receive the oblations to demons may be thrown away through the south west corner. (43)

उन्नीय वह्निचितिमात्मनि संविलाप्य
कृत्वा प्रदाहचरमां परिशुद्धिमग्नौ।
प्रत्यर्प्य तत्र चितिमात्मगतां निजेन
बीजेन तारपुटितेन यजेच्च किञ्चित्।। 44।।

विमर्शिनी

वह्निचितिमग्निचैतन्यम् उन्नीयोर्ध्वं नीत्वा स्वात्मनि स्वस्य गुरोरात्मनि योजयित्वा प्राणायामेन संविलाप्याग्नौ प्रदाहचरमां परिशद्धिं शोषणदहने स्वस्वबीजेन कृत्वा 'ओं पद्माय नमः' इति पूजितपीठे तत्राग्नौ वा आत्मगतां पूर्वं योजितां चितिं चैतन्यकलां प्रत्यर्प्य आवाह्य तारपुटितेन निजेन बीजेन 'ओं रं ओं नमः' इत्यनेन किञ्चिद् यजेच्च।। 44।।

विवरणम्

उन्नीय वह्निचितिमिति। फडन्तप्रणवप्रोक्षणमस्त्रेण, तालत्रयाद्यपि सामान्यसिद्धम्। प्रणवेनैतदुन्नयनमात्मनि संविलापनं च भवति। प्रदाहचरमामिति। शोषणं दहनं च। प्रत्यर्प्येति प्रणवेनैव प्रतिसङ्क्रमणमुक्तम्। निजेन बीजेनेति। यजेच्चेति सम्बन्धः। किञ्चिदिति। अग्नेरुद्वासनं मा भूदिति भावः। विद्वानिति वा पाठः। तारपुटितेन रंबीजेन अग्निशक्त्यावाहनं रा रीमित्याद्यङ्गन्यासोऽपि कार्य इति तदाशयः। यद्वा सोऽप्यग्निः स्वात्मनो वागीश्वरभूतस्य मूलाधारे चिन्तनीय इति। यत उक्तम्–

ध्यात्वात्मानं शिवं देवं चिद्रूपं कुण्डमध्यगाम्।
रत्यर्थिनीं ऋतुस्नातां ध्यायन्नादाय पावकम्।।

---
1. 'पाभायो' क. ख. पाठः

इत्यादि।। 44।।

Invoking the spirit into one's own soul and purifying the altar, the spirit of fire may again be put into the sacrificial pit. Now the bīja of Agni may be kindled to the chanting of Praṇava. (44)

उद्बुद्धमुद्धृतपिधानमुदर्चिषं त्रि-
रास्थाय जानुयुगलेन परिभ्रमय्य।
योन्यां ध्रुवेण विभुवीर्यमयं निदध्याद्
गर्भाशयं समुपनीय समेधयेच्च।। 45।।

विमर्शिनी

ततः स्वयं जानुयुगलेनास्थाय जानुयुगलं भुवि स्पृष्टं यथा भवति तथोपविश्य पात्रधृतेन उद्बुद्धमुद्धृतपिधानं त्यक्ताच्छादनम् उदर्चिषम् अग्निमायतनोपरिभागे त्रिः परिभ्रमय्य विभुवीर्यमयं देवस्य बीजात्मकं ध्रुवेण प्रकृतेर्योन्यां निदध्यात्। पुनर्गर्भाशयं गर्भपात्रमिन्धनशकलेन समुपनीय समेधयेत् ज्वालयेच्च।। 45।।

विवरणम्

उद्बुद्धमिति। कुण्डगतवागीश्वरीशक्तिसम्प्रयोगमाहात्म्याद् उद्बुद्धं तद्बुद्धया पात्रताडनेन उद्बोधितम्। उदर्चिषमिति। अग्निं जानुयुगलेनास्थाय त्रिः परिभ्रमय्येत्यन्वयः। वीर्यमथनधियैतत् परिभ्रमणम्। ध्रुवेणेत्युद्बोधने परिभ्रमणे च सम्बन्धनीयम्। विभुवीर्यमयमिति। विभोर्यतः सा शक्तिः पुत्रीयन्ती तस्य शुक्लं वीर्यमयमित्यर्थः। अत एवोद्बोधपरिभ्रमणयोरुक्तप्रतिपत्तिलाभः। विभुवीर्यमय-मित्यभिधानेन वागीश्वरस्य पृथग्भावनापक्षोऽपि सूचितः। गर्भाशयमित्यग्नयातनमध्यमित्यर्थः। समेधनं ध्रुवेणैव प्रज्वलनम्। तदा च वागीश्वरभावोपसंहारेण प्रकृतभावभावनया मन्त्रप्राणायामाद्यपि कार्यमिति ज्ञेयम्।। 45।।

Shaking the upward flames of fire the top of the pot be removed before taking it in the hand one should stand on one's knees and waving the fire and the pit thrice it shall be deposited into the pit, as if putting the semen of divinity into the womb. Thereafter the fire may be blazened by using a fan. (45)

स्वस्वोक्तवत् परिसमूहपरिस्तराद्यं
सर्पिः स्रुवप्रभृतिसंस्करणं च कृत्वा।
कल्याणरेतसममुं परिभूष्य गर्भा-
धानादिसंस्कृतिमथ क्रमशोऽस्य[1] कुर्यात्।। 46।।

विमर्शिनी

स्वस्वोक्तवत् स्वस्वगृह्योक्तक्रमेण परिसमूहपरिस्तराद्यं परिसमूहनपरिस्तरणपर्युक्षणाद्यं सर्पिः

1. 'त्र' म. पाठः,

स्रुवप्रभृतिसंस्करणमाज्यसंस्कारादिकं[1] कृत्वा कल्याणरेतसमग्निं परिभूष्य गन्धपुष्पादिभिरलङ्कृत्य अथास्याग्नेः गर्भाधानादिसंस्कृतिं क्रमशः कुर्यात्।। 46।।

विवरणम्

स्वस्वोक्तवदिति। स्वस्वकल्पोक्तमेव स्वस्वोक्तं भवतीत्येवमभिधानम्। परिसमूहपरिस्तराद्यमिति पर्युक्षणादिग्रहणम्। सर्पिः स्रुवप्रभृतिसंस्करणं चेति स्रुगादिग्रहणम्। महास्रुचा हि पूर्णाहुतिरिष्यते; तदसम्भवे तु जुह्वेति। कल्याणरेतसममुं परिभूष्येति। गन्धपुष्पाभ्यामिमग्निमलङ्कृत्येत्यर्थः।। 46।।

In the following rituals one should resort to one's own system of gṛhyamantra, the manual of domestic rituals. Thus the Ājyasamskāra cleaning the ladle of ghee, and rubbing it clean have to be done before worshipping the auspicious fire of semen and related procedures may be carried out. (46)

तारेण प्रसमर्च्य कर्म करणीयं कल्पयित्वा धिया
हुत्वैकां समिधं घृतं प्रजुहुयात् स्वोक्ताणुनात्राष्टशः।
तिष्ठन् सस्रुवया स्रुवा चतुरवत्ताज्याढ्यया होमयेत्
पूर्णां कर्म कृतं स्मरेत् तदधुना वा स्यात्[2] ध्रुवेणार्चनम्।। 47।।

विमर्शिनी

तत्परिपाटीमाह–**तारेणेति।** पूर्वं तारेण प्रसमर्च्य करणीयं कर्म धिया कल्पयित्वा 'गर्भाधानं करिष्य' इत्यादिकमुपांशूच्चार्य एकां समिधममन्त्रकं हुत्वा अत्र अग्नौ स्वोक्ताणुना स्वस्वोक्तमन्त्रेणाष्टशो घृतं प्रजुहुयात्। चतुरवत्ताज्याढ्यया स्रुचि स्रुवेण चतुष्कृत्वः आज्यमवदाय पूरणं कृत्वा सस्रुवया स्रुवसहितया तया स्रुवा स्वयं तिष्ठन् पूर्णां होमयेत्। ततस्तत्कर्म कृतं स्मरेः 'गर्भाधानं कृतमि'त्याद्युपांशूच्चरेत्। तत् ध्रुवेणार्चनमधुना वा स्यात्, कर्मणः पूर्वमर्चनमिति केचित्, कर्मण उपरीति केचिदित्यर्थः।। 47।।

विवरणम्

गर्भाधानादिसंस्कृतिं विवृणोति–**तारेण प्रसमर्च्येति।** करणीयं कर्म धिया कल्पयित्वेति। 'ओं गर्भाधानं करिष्ये' इति मनसोच्चारणमेतत्। चतुरवत्ताज्याढ्यया सस्रुवया स्रुवा तिष्ठन् पूर्णां स्वोक्ताणुना होमयेदित्यनुषङ्गेण योज्यम्। स्रुवेण चतुर्वारं महास्रुचि घृतमवदाय तिष्ठन् पूरयेत्। अत एवाढ्यग्रहणम्। पुनः स्रुवं तदुपरि सम्पुटं निधाय नाभिसंलग्नतया कृत्वा वौषडन्तेन तन्मन्त्रेण पूर्णाहुतिमच्छिन्नधारया विदध्याद् इत्येवं तत्प्रकारोऽप्यनेन सूचितः। कर्म कृतं स्मरेत्तदिति। 'ओं गर्भधानं कृतमि'ति। एवं पुंसवनादिष्वपि बोद्धव्यम्। अधुना वा स्याद् ध्रुवेणार्चनमिति। तारेण पूजा प्रक्रमे तावदुक्ता, सेदानीं परिसमाप्तौ वा स्यादित्यर्थः।। 47।।

Chanting the Praṇava the priest shall put a piece of sacrificial wood into the fire conceiving it as the act of impregnation. He shall conclude

---

1. 'कर्म कृ' ख. पाठः
2. 'स्याद् ध्रुवे' क. पाठः,

with the feeling of having carried out the act Ghee and Praṇava may be used eight times for this. (47)

ईशे षोडश सेकपुंसवनसीमन्तोन्नया जातक-
र्माख्या निष्क्रमभुक्तिचौलमुपनीतिश्च व्रतानि क्रियाः।
स्नानोद्वाहवितानवह्निकरणं शेषेष्वनिष्क्रान्तयः
सन्त्यष्टोपनयान्तिमा महिषहन्त्र्यां सप्त चौलान्तिमाः।। 48।।

विमर्शिनी

कर्माण्याह–ईश इति। ईशे सेकपुंसवनसीमन्तोन्नयाः सेको गर्भाधानं, पुंसवनं, सीमन्तोन्नयश्च, जातकर्म, आख्या नामकरणं, निष्क्रमभुक्तिचौलं निष्क्रामणमन्नप्राशनं चौलं च, उपनीतिरुपनयनं, व्रतानि माहानाम्न्यमहाव्रतौपनिषदगोदानानि। चरणवशादन्यथात्वेऽपि सर्वेषां चत्वार्येव व्रतानि ग्राह्याणि। स्नानोद्वाहवितानवह्निकरणं स्नानं समावर्तनं, उद्वाहो विवाहः, वितानवह्निकरणमग्न्याधानम् इति षोडश क्रियाः सन्तु, शेषेषु देवेष्वनिष्क्रान्तयः निष्क्रामहीनाः उपनयान्तिमा अष्टौ। महिषहन्त्र्यामनिष्क्रान्त-यश्चौलान्तिमाः सप्त[1]।। 48।।

विवरणम्

ईशे षोडशेति। क्रियाः सन्त्विति सम्बन्धः। सेको गर्भाधानम्। सीमन्तोन्नयः सीमन्तोन्नयम्। आख्या नामकरणम्। निष्क्रम उपनिष्क्रामणम्। भुक्तिरन्नप्राशनम्। चौलं चौळकर्म। उपनीतिरुपनयनम्। व्रतानीति। सर्वचरणेष्वपि चत्वार्येव ग्राह्याणि। यथा माहानाम्निकं माहाव्रतमौपनिषदं गोदानमित्यादि। स्नानं समावर्तनं, उद्वाहो विवाहकर्म, वितानवह्निकरणं अग्न्याधानम्।। 48।।

In the case of Śiva the sixteen domestic rituals mentioned in the stanza have to be performed. For all other gods only the first eight items need be carried out. For Durgā the number is only eight culminating with Cūḍākarma.

The sixteen purificatory rites are mentioned as (1) Seka, (2) Pumsavana, (3) Sīmantonnayana (4) Jātakarma (6) Niṣkrāma (7) Bhuktii (Annaprāśana) (8) Caula (Cūḍākarma) (9) Upanīti (Upanayana) (10) Vrata slike Mahānāmnyam, (11) Mahāvrata (12) Upaniṣada (13) Godāna (14) Snāna (Samāvartana) (15) Udvāha (Vivāha) and (5) Vitānavahnikarma (Agnyādhāna). (48)

कु[2]र्यात् सद्यादिपञ्चाननशिवनृशिवब्रह्मपङ्क्त्यर्णनादै-
री[3]शे श्रीशार्यदुर्गास्वपि मनुलिपिभिः स्वाङ्गबीजैर्गणेशे।

---

1. 'प्त क्रियाः सन्तु।। तासां क्रि' ख पाठः,
2. 'शर्वे स',
3. 'रार्ये षण्मूलतारैश्चरतु षडणुमूलद्वयैर्बाहुलेये। भूराद्यैः सत्यतो द्वौ स्मरमुरदमने स्वाङ्गबीजैर्गणेशे संस्कारानन्त्यतस्त्रीन हरिमहिषजितोर्मूलवर्णैश्च वह्नेः।' ख. पाठः

संस्कारानन्त्यतस्त्रीन् स्मरमुरभिदि भूराक्षिभिः सत्यतो द्वौ
श्रीशे वाङ्गैः षडास्ये षडणुमनुयुजार्येऽपि षण्मूलतारैः।। 49।।

विमर्शिनी

क्रियाणां होममन्त्रानाह–**कुर्यादिति**। ईशे सद्यादिपञ्चाननशिवनृशिवब्रह्मपङ्क्त्यर्णनादैः सद्यादिपञ्च 'सद्योजातं प्रपद्यामी'त्यादिपञ्चब्रह्माणि, आननं तत्पुरुषः, शिव ईशानः, नृशब्देन तत्पुरुष उक्तः, पुनरपि शिव ईशान एव, ब्रह्मेति सद्योजातादीशानान्तानि पञ्च ब्रह्माणि, पङ्क्त्यर्णं व्योमव्यापि दशाक्षरं, नादः प्रासादः, एतैः संस्कारान् कुर्यात्। श्रीशार्यदुर्गास्वपि मनुलिपिभिर्मूलमन्त्राक्षरैः, गणेशे स्वाङ्गबीजैरन्त्यतः अस्त्रेण त्रीनपि, स्मरमुरभिदिशिवनारायणे भूरादिभिः सप्तव्याहृतिभिः, तत्र सत्यतो द्वावपि, श्रीशे अङ्गैः अष्टाङ्गैर्वा, षडास्ये षडणुमनुयुजा षण्मन्त्रैर्मूलमन्त्राभ्यां च। आर्येऽपीत्यपिशब्दो विकल्पार्थः, पूर्वं मूलार्णैरुक्तत्वात्। तत्र षण्मूलतारैः षण्मन्त्रमूलमन्त्रप्रणवैः संस्कारान् कुर्यात्। सर्वत्र होमे मन्त्राणां स्वाहान्तत्वमवगन्तव्यं, मन्त्राणां बीजानां व्याहृतीनां विभक्तिरहितत्वं च, पीठपरिवारादीनाममन्त्राणां स्वाहान्तविभक्तिसहितत्वं च।। 49।।

विवरणम्

आननं तत्पुरुषः, शिव ईशानः, नृशब्देन तत्पुरुष उक्तः, ब्रह्माणि सद्योजातादीनि, पङ्क्त्यर्णो व्योमव्यापि दशाक्षरम्, नादः प्रासादः। मनुलिपिभिरिति। स्वस्वाष्टाक्षरमनोरष्टभिरक्षरैः। तानि च प्रणवरुद्धानि स्युः। गणेशे स्वाङ्गबीजैरन्त्यतस्त्रीनिति। प्रणवरुद्धैः गांगीमित्यादिषड्भिरङ्गबीजैरत्र-प्राशनान्तानि पुनरन्त्येनैव चौळमुपनयनं चेत्यर्थः। भूरादिभिरिति प्रणवादित्वमिष्यते। श्रीशे वाङ्गैरित्यष्टाङ्ग-विकल्पः। षडास्ये षडणुमनुयुजा वेति। 'ओं सनत्कुमाराय स्वाहा' इत्यादिषण्मन्त्रैर्मूलेनोपचारमनुना चेत्यर्थः। षण्मूलतारैरिति। रेवन्तादिषण्मन्त्रैर्मूलेन च प्रणवेन च। अयमपि विकल्प एव।। 49।।

The mantras prescribed for Ājyāhuti – pouring of ghee in connection with the above mentioned rites for the respective gods are prescribed as follows:

For Śiva the sixteen rites may be performed with the mantras prescribed beginning with "Sadyojata upto nāda" altogether sixteen. For Viṣṇu, Śāstā, and Durgā the syllables of Mūlamantra are prescribed. For Gaṇapati his bīja mantra is required. For Śaṅkaranārāyaṇa the Vyāhrti beginning with bhūti is ordained. For Viṣṇu the mantra called Aṣṭāṅga and for Subrahmanya his own Mūlamantra with Praṇavas are prescribed. (49)

पूर्णेषु कर्मसु समर्चितयोगपीठे -
ऽत्रावाह्य मूलमनुना लिपितत्त्वमन्त्रान्।
विन्यस्य तं सकलितं परि[1]दीप्तसप्त-
जिह्वादिकं प्रयजतामनुसन्दधानः।। 50।।

---

1. 'कल्प्य देवं संपूजयेत् सुपरिवारवृतं जलाद्यैः।। ता' ख. पाठः,

विमर्शिनी

क्रियाशेषमाह–पूर्णेष्विति। एवं पूर्णेषु कर्मसु सत्सु समर्चितयोगपीठेऽत्राग्नौ मूलमनुनावाह्य लिपितत्त्वमन्त्रान् विन्यस्य सकली[1]कृतं तं परिदीप्तसप्तजिह्वादिकं परितो दीप्ताः सप्त जिह्वा ज्वालाभेदा यस्य तम्। एतेन पक्षान्तरे जिह्वाङ्गमूर्तिन्यासादिकं सूचितम्। एवंभूतं च तमनुसंदधानः ध्यायन् प्रयजताम्।। 50।।

विवरणम्

पूर्णेषु कर्मस्विति। परिसमापितेषु संस्कारेषु प्राग्जिह्वादिन्याससम्भवे तैरपिकार्ये होमः। समर्चितयोगपीठ इति। 'प्राग् इहार्हतु योगपीठमि'ति यदुक्तं तदनुवादः। यद्वाधुनापि पीठपूजा कार्येति विधानं प्रागुक्तपीठं शक्तेरेव तद्गताग्नावेवेदं देवस्य पीठमिति च भेदः। जातकर्मणि कृते सा शक्तिः कुण्डशक्तिरूपेणैव विभावनीयेति। तं सकलितमिति। एवं सकलितम्। यद्वाङ्गायुधादिन्यासाभिप्रायमेतत्। परिदीप्तसप्तजिह्वादिकमिति। तं अनुसन्दधान इति सम्बध्यते। जिह्वादीनामनुसन्धानमात्रमेव। यद्वा, अग्न्याधानानन्तरं न्यासोऽपि कार्यः। तत्र प्रथमं लिपिन्यासं तत्त्वन्यासं च कृत्वा पुनर्जिह्वादीनां न्यासः। तदुक्तम्–

सलिङ्गगुदमूर्धास्यनासानेत्रेषु च क्रमात्।
सर्वाङ्गेषु च विन्यस्येत् सप्तजिह्वा हविर्भुजः।।
हिरण्या गगना रक्ता कृष्णा चैव तु सुप्रभा।
बहुरूपातिरक्ता च जिह्वाः सप्तेति सात्त्विकाः।। इति।

आदिशब्देन मूर्त्यङ्गग्रहणम्। तदप्युक्तं–

मूर्धांसपार्श्वकट्यन्धुकटिपार्श्वांसकेषु च।
जातवेदाः सप्तजिह्वो हव्यवाहन एव च।।
अश्वोदरजसंज्ञश्च स वैश्वानर एव च।
कौमारतेजाश्च तथा विश्वदेवमुखाह्वयौ।।
स्युरष्टमूर्तयो वह्नेरग्नयेपदपूर्विकाः।। इति।।

'ओमग्नये जातवेदसे नमः' इत्यादि। 'विश्वदेवमुखाह्वयावि'ति। ओमग्नये विश्वमुखाय नमः'। 'ओमग्नये देवमुखाय नमः'। इति मूर्तिन्यासः। पुनरङ्गन्यासः–

सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषस्तथा।
धूमव्यापी सप्तजिह्वो धनुर्धर इतीरिताः।। इति।।

'ओं सहस्रार्चिषे हृदयाय नमः' इत्यादि। परिदीप्तसप्तजिह्वादिकमित्यनेनैव अग्नावावाहितस्य देवस्य तेनैवाग्निमूर्तिना सह एकीभावभावनापि प्रणवेन सूचिता। ततश्चैतदपि लभ्यते। प्राग्जिह्वाङ्ग–मूर्तिन्यासाकरण इदानीं तदपि कार्यमिति। प्रयजतामिति विग्रहपूजावरणपूजा चोक्ता।। 50।।

Once the rite in respect of Gods are completed they are to be invoked

1. 'लितं' घ. पाठः

on the Yogapīṭha using Mūlamantra properly with their individual traits the priest shall meditate upon the flames of fire and offer oblation on them. (50)

तारव्याहृतिभि[1]: स्वपीठमनुभिस्तारोपचारस्वमू-
लाङ्गैरावरणाणुभिश्च सकृदावृत्त्या घृतं मूलतः।
पूर्णान्ते प्रजुहोतु भूःप्रभृतितारारख्यैः समाप्यार्च्य तं
रक्षेन्निष्कलितं [2]ततोऽत्र [3]परिषेकान्तं विधिं चा[4]चरेत्।। 51।।

विमर्शिनी

तारव्याहृतिभिः तारेण व्याहृतिभिश्च स्वपीठमनुभिः स्वस्वपीठमन्त्रैः तारोपचारस्वमूलाङ्गै-रावरणाणुभिः परिवारमन्त्रैश्च सकृद् मूलत आवृत्त्या अष्टाशतमष्टविंशतिवारमष्टवारं वा (घृतं) जुहोतु। पूर्णान्ते भूःप्रभृतितारारख्यैर्व्याहृतिभिः प्रणवैश्च जुहोतु। होमं समाप्यार्च्य प्रसन्नपूजां कृत्वा निष्कलितं तं रक्षेत्। ततोऽत्र परिषेकान्त विधिं चाचरेत्।। 51।।

विवरणम्

स्वपीठमनुभिरिति। सर्वत्र नतिस्थाने स्वाहाकारः। **तारोपचारस्वमूलाङ्गैरिति।** सर्वैरपि न्यस्तमन्त्रैर्होमः सम्भववशादिष्यते। अङ्गग्रहणमायुधोपलक्षणम्। अत्र मूलाक्षराणां तारपुटितत्वम्। अङ्गानां नमोवषडाद्यनन्तरं स्वाहाकारस्त्वसौ शिरस एवेति ज्ञेयम्। **आवरणाणुभिश्चेति।** नेह पूजायामिवावरणसङ्कोचनमित्यर्थाद् गम्यते। **सकृदिति।** प्रणवव्याहृत्यादिनिर्माल्यधारिपर्यन्तमस्त्रैस्सकृत् सकृदित्यर्थः। **आवृत्या मूलत इति।** 'सर्वत्राष्टावष्टाविंशतिरावृत्तिरष्टशतमथवे'ति। **पूर्णान्ते प्रजुहोत्विति।** मूलत आवृत्येत्यत्रापि सम्बध्यते। **भूत्प्रभृतितारारख्यैरिति।** सकृदित्यनुषङ्गः। ब्रह्मार्पणेनापि हुतमिष्यते। **समाप्येति** संस्रावाभिप्रायम्। **आर्च्येति** प्रसन्नपूजोक्ता। **निष्कळितं रक्षेदिति** लयाङ्गन्यासतालत्रयादिक-मुक्तम्। **पर्युक्षणान्तं विधिमिति।** परिसमूहपर्युक्षणगन्धपुष्पाराधनपर्युक्षणान्युक्तानि। ततः स्वात्मन्यपि लयाङ्गन्यासादि कुर्यादिति।

मण्डपाङ्गतयामुष्मिन् जनिते जातवेदसि।
कुम्भेशभ्रमणं कुर्यादिति केचित् प्रचक्षते।।
शक्त्या मूलेन वा हुत्वा जनिताग्नौ विशेषवित्।
सम्पातं मण्डपे वेद्यामर्पयेदिति केचन।।।। 51।।

A full offering of oblation on the fire is to be made to the accompaniment of Praṇava and mantra related to Pīṭha. This is to be repeated with the

---

1. 'पीठमूलपरिवारैः स्वैर्जुहोत्वेकशः सर्पिः साष्टशतं स्वमूलमनुना पूर्णान्वितं मन्त्रवित्। भूरादिप्रणवैः सकृत् सकृदथाराध्य प्रसाद्य प्रभुं र',
2. ततः परिसमूहाद्यं वि' ख. पाठः,
3. तनयात् पर्यक्षणान्तं विधिम' इति विवरणपाठः।
4. 'प्रा' क. पाठः

chant of Mūlamantra, twenty eight times along the pouring of ghee. Now the rite is to completed by the gentle sprinkling and washing with water offering sandal paste and flowers Ganeśa is to be cremonially sent off revoking his presence. (51)

अथ सम्मृष्टलिप्तायां वेद्यां दक्षिणतो गुरुः।
शय्याक्षेत्रं प्रकुर्वीत मूलप्रासादसम्मुखम्।। 52।।

विमर्शिनी

शय्याकल्पनादिकमाह–**अथेति**। अथ कुम्भेशपरिभ्रमणाग्निजननयोरनन्तरं गुरुः स्वयं संमृष्टलिप्तायां विशेषतश्च कृतमार्जनानुलेपाया वेद्यां दक्षिणतो दक्षिणार्धे शय्याक्षेत्रं शय्यायाः स्थानकल्पनं मूलप्रासादसंमुखं यथा भवति तथा प्रकुर्वीत।। 52।।

विवरणम्

अथ प्राग्जलेऽधिवासितस्य बिम्बस्येह ध्यानाधिवासकृते शय्यापूजामाह–**अथ संमृष्टलिप्तायामिति**। प्राग्विकीर्णमक्षतादिकं विकिरादिकं वा मुष्ट्या सम्मार्ज्य गन्धतोयेन सम्प्रोक्ष्य वेदितलमालिप्य तत्रेत्यर्थः। लौकिकमेवैतदुभयं मन्तव्यम्। दक्षिणत इति। मध्यसूत्रादिति भावः। तत्रापि प्राग्द्वारे प्रासादे किञ्चित् प्राङ्नीत्वा प्रत्यग्द्वारे किञ्चित् प्रत्यङ्नीत्वा शय्या कल्पनीया। मूलप्रासादसम्मुखमिति। प्राग्द्वारे प्राक्शिरस्कं प्रत्यग्द्वारे प्रत्यक्छिरस्कम् इत्यभिप्रायः। स्कन्दे त्वन्यथा वक्ष्यति 'तत्पूर्वतः शय्यामि'ति।। 52।।

The preceptor shall prepare to the right side of the pavilion a spot with water and made level by the use of mud, build a bed chamber facing the sanctum. (52)

कृत्वा स्वस्तिकमत्र धान्यनिचयं द्रोणाष्टकाद्युन्मितं
मूलेनामलतण्डुलादिसहितं क्षिप्त्वा कुशाग्रोत्तरम्।
तत्रौर्णेयकतूलसंभृतपटीपट्टादिभिः कल्पितां
शय्यां शार्ङ्गिणि संस्तृणातु मिहिरार्णेनान्यतो मूलतः।। 53।।

विमर्शिनी

महत् स्वस्तिकं कृत्वात्र द्रोणाष्टकाद्युन्मितं धान्यनिचयं व्रीहिपुञ्जम् अमलतण्डुलादिसहितम्। आदिशब्देन सिद्धार्थो गृह्यते। कुशाग्रोत्तरं यथा भवति तथा मूलेन क्षिप्त्वा त[1]त्र और्णेयकतूलसंभृतपटीपट्टादिभिः और्णयकः कम्बलः तूलसंभृतपटी तूलैरन्तर्गृहीता पटी ( )। पट्टादीत्यादिशब्देन इन्द्रगोपादयः पट्टविशेषा गृह्यन्ते। तैः कल्पितां शय्यां शार्ङ्गिणि मिहिरार्णेन द्वादशाक्षरेण, अन्यतोऽन्यदेवेषु मूलेन च संस्तृणातु कल्पयेत्।। 53।।

विवरणम्

कृत्वा स्वस्तिकमिति विथीस्वस्तिकमभिप्रेतम्। यथोक्तम्–

---

1. 'त्र पूर्वे औ' ख. पाठः

प्रागग्रसूत्राण्युदगग्रसूत्राण्यपि क्रमादत्र षडष्ट कृत्वा।
त्र्येकैः पदैः स्वस्तिकमादधीत चतुर्दिशास्वन्यपदैश्च वीथीम्। इति।।

अत्र मूलेन धान्यनिचयं क्षिप्त्वेति व्रीह्यभिप्रायम्। द्रोणाष्टकाद्युन्मितमिति। द्रोणं मानमुक्तम्।

माषः शाणस्तलं मुष्टिरञ्जलिः प्रस्थ आढकः।
द्रोणो गोणी च खारी च क्रमादेतच्चतुर्गुणम्।। इति।।

अमलतण्डुलादिसहितमिति।

धान्येषु वा शालिषु वा सतण्डुले-
ष्वेतेषु वा सार्धतिलेषु वैषु।
ससर्षपेष्वेषु करोतु शय्यां
तिलोत्तरेष्वेष्वथवा मनस्वी।। इति।।

तत्र शय्यां संस्तृणात्विति सम्बन्धः। और्णेयकं कम्बलं, तूलैः कार्पासादिभिः सम्भृतान्तः पूरिता पटी वस्त्रं, पट्टं क्षौमादिकम्। आदिशब्देन वर्णविचित्रपट्टादिग्रहणम्। एतैः। कल्पितामिति। खट्वाया-मायतफलके आयतपीठमात्रेऽपि समानमेतत्। शार्ङ्गिणी मिहिरार्णेनेति। द्वादशाक्षरेण।। 53।।

Drawing a diagram of the Svastika design eight droṇas (a measure) of-paddy may be spread over it. Using the Mūlamantra half the measure rice and half portion sesamum of which another half portion of mustard shall be sprinkled. All these are to be covered with cloth. Again spreading the tips of Kuśa grass a bed of wool and cotton covered with silken cloth is to be placed. It should be propitiated with twelve syllabled hymn in the case of Viṣṇu and for all other deities the Mūlamantra is to be used for spreading the bed. (53)

परार्ध्यवासोविहितोत्तरच्छदे शिरोपधानादिमतीष्टविष्टरे।
यजेत [1]तत्[2]पीठदृढाभिमानिनीं स्वकीयशक्तिं निजबीजविद्यया।। 54।।

विमर्शिनी

पराध्यर्वासोविहितोत्तरच्छदे पराध्यैः श्रेष्ठैर्वासोभिर्विहितमुत्तरच्छदमुपरिगतवस्त्रं यस्मिंस्तस्मिन्। शिरोपधानादिमतीत्यादिशब्देन पादोपधानकपोलस्थलादिकं गृह्यते। इष्टविष्टरे कृतपीठार्चने तत्र तत्पीठदृढाभिमानिनीं तत्पीठरूपिण्यां शय्यायां स्थिराधिष्ठात्रीं रमोमाद्यां निजबीजविद्यया विष्णौ श्रीवीजेन अन्यत्र भुवनेश्वर्या चावाह्य यजेत।। 54।।

विवरणम्

पराध्यर्वासोविहितोत्तरच्छद इति। पराध्यर्मर्धतो महत्। द्वे त्विह उपर्यास्तरणे स्याताम्। शिरोपधानादिमतीति। कपोलस्थलद्वयं पादगडुकमित्येतद् आदिशब्देनोक्तम्। इष्टविष्टर इति।

1. 'तस्मिञ्छयने समाहितः' इति विवरणरीत्या पाठः
2. 'स्मिञ्छयने समाहितः स्व' क. ग. पाठः

समुचितविष्टरन्यासः पीठपूजा चोक्ता। यजेतेति। आवाहनादिपूर्वकं पूजनमभिप्रेतम्। समाहित इति प्रतिपत्त्यभिप्रायम्। विधानविदिति वा पाठः। तेनात्मनः सकळीकरणादिकं गुरुगणपतिपूजापूर्वकं शय्यायामस्त्रप्रोक्षणतालत्रयादिकं शोषणादिकं शक्तिधारणेत्येतत् सर्वमुक्तम्। स्वकीयशक्तिमिति। विष्णौ लक्ष्मीं, अन्येषु मूलप्रकृतिम्। निजबीजविद्ययेति। श्रीबीजेन भुवनेश्वर्या वेत्यर्थः। यद्वा स्वकीयशक्तिमिति,

विष्णौ श्रीः स्यात्, शिव उमा श्र्युमा हरिहरे गुहे।
देवयान्यथ दुर्गायां प्रकृतिश्शक्तिरिष्यते।।
प्रभा शास्तरि हेरम्बे विभूतिर्भुवनेश्वरी।
श्रीहृल्लेखापि बीजं स्वं स्वा वा विद्या प्रभादिषु।।

इति। प्रभाविभूतिदेवयानीषु तासामेव विद्या वेत्यर्थ इति।। 54।।

Spreading a costly cloth over the bed and arranging pillars, it should be propitiated with the respective mantras of the divinity. The Śakti may be worshipped (for Viṣṇu with Śrībīja and Śaktibīja for other Gods). (54)

आपोहीत्यणुभिः स्मरद्विषि शिरोदेशे कुमारे तथा-
पोदेवीरिति मूलतस्तदितरेष्वार्येऽथवैश्यां दिशि।
निद्राकुम्भमथाभिपूर्य विधिवद् गन्धाम्भसा पूजये-
च्छय्यान्ते परितोऽष्टदिक्षु मनुविद् विद्येशकुम्भानपि।। 55।।

विमर्शिनी

अथ मनुवित् मन्त्रविशेषज्ञो गुरुः सर्वदेवेषु शय्यायाः शिरोदेशे आर्येऽथवैश्यां दिशि स्मरद्विषि आपोहीत्यणुभिः आपोहिष्ठादिमन्त्रैः, तथा कुमारे 'आपो देवीः' इति मन्त्रेण, तदितरेषु मूलतश्च (निद्राकुम्भं) गन्धाम्भसाभिपूर्य विधिवत् कलातत्त्वावाहनादिसंयुतं पूजयेत्। शय्यान्ते शय्यासमीपे परितोऽष्टदिक्षु विद्येशकुम्भानप्यभिपूर्य पूजयेत्।। 55।।

विवरणम्

शिरोदेश इति। शय्यायामेव। न बहिरिति भावः। निद्राकुम्भमथाभिपूर्येति। पूजयेदित्युपरि सम्बन्धः। आर्येऽथवैश्यां दिशीति। शास्तरि शिरोदेशे वेशदिशि वा तत्र प्राक्च्छिरस्के बिम्बे शिरसो दक्षिणाभ्याशे भवति। प्रत्यक्छिरस्के उत्तराभ्याशे तु गन्धाम्भसा विधिवदभिपूर्य पूजयेदित्यन्वयः। विधिवदिति। कुम्भसंस्कारतदावाहनकुर्चन्यासहेमरत्नाक्षतद्रव्यन्यासमानसपूरणाद्युक्तानि। लिपिपङ्कजपूजामूर्त्ति-द्वयतत्त्वावाहनादिकमपि कार्यम्। वक्ष्यति च-

"निद्राघटेन च तथाखिलतत्त्वमूलैः"।

इति। शय्यान्त इति। शय्याया बहिर्भाग एवेत्यर्थः। स्वस्तिकेषु व्रीहिभिः पीठं विधाय तेषु विद्येश्वरकलशपूजा कार्या। मनुविदिति। विद्येश्वरमन्त्रतदङ्गाभिज्ञत्वमुक्तम्।। 55।।

The worship of Nidrā Kumbha for Śiva is to be done with the hymn "Āpohi" for Subrahmaṇya with (Āpodevī" and for all other divinities with

Mūlamantra. For Śāstā the worship can be at the north – eastern corner. Fragrant water is to be used for filling up the pot. Various principle or tattvas are to used. The well versed priest should worship the pots of Vidyeśa placing them on a Swastika diagram. (55)

विष्णौ विष्णुमुखाः समूललिपयो दिक्कोणकास्त्रीक्षणे-
ऽनन्ताद्या अ[1]पि ते द्वये शिवहरौ गोप्त्रादयः शास्तरि।
पूज्यास्तेषु घटेषु भाविपरिवारा मूर्तयः शक्तय-
श्चान्येषु त्रिषु मूलमेव चतसृष्वाशासु वा षण्मुखे।। 56।।

विमर्शिनी

विष्णौ तेषु घटेषु समूललिपयः मूलमन्त्राक्षरैः क्रमाद् युक्ता विष्णुमुखा विष्णुमधुसूदनाद्याश्च[2]क्रपूजायां वक्ष्यमाणाः पूर्वादिदिक्कोणगाः पूज्याः। त्रीक्षणे अनन्ताद्याः अनन्तसूक्ष्माद्याः पूजायां वक्ष्यमाणाः। शिवहरौ ते द्वयेऽपि 'अनन्ताय विष्ण्वात्मने नमः' इत्याद्याः। शास्तरि गोप्त्रादयः गोप्तृपिङ्गलाक्षादयो मण्डपसंस्कार उक्ताः। अन्येषु त्रिषु दुर्गास्कन्दगणेशेषु मूर्तयः शक्तयश्च भाविपरिवाराः पूजापटले वक्ष्यमाणाः। तत्र दुर्गाया जयाद्याः शक्तयः, स्कन्दे सनन्कुमाराद्या मूर्तयः, गणेशे गणञ्जयाद्या मूर्तयः पूज्याः। षण्मुखे चतसृष्वाशासु मूलमेव वा मन्त्रः।। 56।।

विवरणम्

विष्णौ विष्णुमुखा इति। चक्राब्जपूजायां वक्ष्यमाणा इति भावः। समूललिपय इति। अष्टाक्षरवर्णैः प्रण[3]वपुटितैः आदौ युताः स्वस्वपदैरिह पञ्चाङ्गानि। दिक्कोणगा इति।... ... त्रीक्षणेऽनन्ताद्या इति। एष[4]: प्रासादः योगः। ह्रांह्रीमादियुतैः स्वनामभिरिह षडङ्गानि। प्रासादयोगे प्रणवेन वा अ आ इत्यादिस्वरद्वन्द्वगतेन स्वनाम्ना वाङ्गानि। यद्वा समूललिपय इति ... मूललिपिरिह प्रासाद एव। द्वितयेऽपि ते शिवहराविति। भिन्नसंभिन्न वा स्युरिति भावः। भाविपरिवारा इति। स्कन्दे सनत्कुमारादयः। गणपतौ। ते चौजस्वरयुताः। एता मूर्तयः। दुर्गायां जयाद्याः शक्तयः। सर्वेषां प्रणवेन वा प्रागुक्तवद् द्विस्वरयोगेन वा षडङ्गानि। एतत् सर्वमपि मनुविदित्येव सूचितम्। षण्मुखे चतसृष्वाशासु मूलमेव वेति पक्षभेद उक्तः। स्वात्मनो व्यूहरूपमेतदिति च बोद्धव्यम्।। 56।।

The deities of Vidyeśa to be worshipped with the following mantras. For Viṣṇu, eight mantras beginning with 'Viṣṇave' For Śiva deities like Ananta numbering eight. For Śaṅkaranārāyaṇa the above mantras may be joined together. For Subrahmaṇya, Gaṇeśa and Durgā, attendant deities may be propitiated as for eight attendants for Subramaṇya beginning with Sanatkumāra and for Gaṇeśa eight attending deities are Jayā and others

---

1. द्वितयेऽपि ते शि' इति मूलकोशपाठो विवरणपाठश्च।,
2. 'श्च पू' ख. पाठः
3. 'भ',
4. 'षां' घ. पाठः

Subrahmaṇya may be worshiped with Mūlamantra also in all the four directions. (56)

मध्येवेदि विनिर्मिते रसदले कौमारके मण्डले
कौमारं कलशं प्रपूर्य विधिवत् संपूज्य तत्पूर्वतः।
शय्यां दक्षिणसौम्यदिक्कृतसमायामां गुहे कल्पयेत्
स्वोद्यत्स्वापघटादिकामभिदधे कौमारकुम्भार्चनम्।। 57।।

विमर्शिनी

कुमारे विशेषमाह–मध्येवेदीति। गुहे मध्येवेदि वेदिमध्ये रसदले षड्दले विनिर्मिते द्वादशपटले वक्ष्यमाणविधिना संपादिते कौमारके मण्डले कौमारं कुमारदेवत्यं कलशं विधिवत् प्रपूर्य संपूज्य च तत्पूर्वतः तस्य पूर्वभागे दक्षिणसौम्यदिक्कृतसमायामां दक्षिणोत्तरदीर्घां स्वोद्यत्स्वापघटादिकां स्वस्वस्थानस्थितनिद्राकलशविद्येश्वरकलशयुक्तां शय्यां कल्पयेत्। कौमारकुम्भार्चनमभिदधे वच्मि।। 57।।

विवरणम्

अथ स्कन्द एवापरं भेदमभिधत्ते–मध्येवेदीति। 'पारे मध्ये षष्ठ्या वे'ति समासः। प्रपूर्य विधिवदिति पीठपूजाकुम्भसंस्कारादिकमुक्तम्। सम्पूज्य तत्पूर्वत इति स्कन्दे मण्डलपूजापूर्वमेव शय्यापूजेत्युक्तम्। स्वोद्यत्स्वापघटादिकामिति। शय्यायामेव शिरोदेशे निद्राकलशं बहिः स्वस्तिकेपु विद्येश्वरकलशांश्च पूजयेदिति भावः।। 57।।

For Subrahmaṇya a diagram with six squares may be made in the centre of the pavilion where an altar is to be prepared for placing the bed. The portions to rest the head should be the northern direction. Here potful of water is to be placed along with Nidrākalaśa and Vidyeśvarakalaśa. Thereafter one shall perform the worship of the pot designated for Kumāra. (57)

पीठान्ते ब्रह्माणं सभद्रकालीगणेशविष्णुं[1] च।
ईश्वरशास्तारावपि दलषट्के हरिदिगादि समभियजेत्।। 58।।

विमर्शिनी

तत्पूजाविधिमाह–पीठान्त इति। सामान्यस्कन्दपीठपूजानन्तरं दलषट्के हरिदिगादि पूर्वदिग्दलमारभ्य ब्रह्माणं सभद्रकालीगणेशविष्णुं भद्रकालीं गणेशं विष्णुं च ईश्वरशास्तारावपि स्वस्वनाममन्त्रैः 'ब्रह्मणे नम' इत्यादिभिरभियजेत्।। 58।।

विवरणम्

पीठान्त इति। समष्टिपूजानन्तरम्। हरिदिगादीति। हरिरिन्द्रः।। 58।।

---

1. 'ष्णुमिह।' इति मूलकोशपाठः

After propitiating the Pīṭha the powers called Śakti is to be mediated upon. Here six gods, viz. Brahmā, Bhadrakālī, Gaṇeśa, Viṣṇu, Īśvara and Śāstā to be worshipped using their own respective mantras which shall begin with their names. (58)

पूर्णे हिरण्मयाम्बुजगजशिखिशक्तिस्वरून् निधायात्र।
कलशे सार्णसरोजे गुहमावाह्यार्चयेत् सहावरणैः।। 59।।

विमर्शिनी

हिरण्ययाम्बुजगजशिखिशक्तिस्वरून् सुवर्णमयपद्मगजमयूरशक्तिवज्रान् निधाय पूर्णे कलशे सार्णसरोजे पूजितलिपिपङ्कजेऽत्र गुहमावाह्य आवरणैः परिवारैः सहार्चयेत्।। 59।।

विवरणम्

पूर्ण इति। अत्र कलश इत्यन्वयः। हिरण्मयेति। हिरण्यकृतान् पद्मगजमयूरशक्तिवज्रानित्यर्थः। हेमरत्नाक्षतं निक्षिप्य पूरणं सामान्यसिद्धम्। सार्णसरोज इति लिपि पङ्कजपूजोक्ता। भूर्तिद्वयमप्यावाह्य पूजनीयम्।। 59।।

Once the pot is filled up and a golden lotus placed jewels and diamonds are to be deposited in the worship called Lipipaṅkaja and invocation of the forum is made. Subramaṇya is to invoked along with his emblishments and attendants. (59)

प्राग्वज्रादेः प्रयजेदादित्यानश्विनौ पितॄन् गणपम्।
मात्रप्सरोवसूनिह रुद्रांश्चाभ्यन्तरे जयन्ताद्ये।। 60।।

विमर्शिनी

तत्र वज्रादेः प्राक् लोकपालपूजानन्तरं तदायुधपूजायाः प्राक् जयन्ताद्येऽभ्यन्तरे ईशेन्द्रयोर्मध्याद्यन्तरालेषु 'ओं आदित्येभ्यो नमः' 'ओं अश्विभ्यां नमः' इत्यादिमन्त्रैः आदित्यानश्विनौ पितॄन् गणपं गणपतिं मात्रप्सरोवसून् मातॄरप्सरसो वसून् रुद्राश्च प्रयजेत्।। 60।।

विवरणम्

जयन्ताद्य इति। ईशानेन्द्रान्तरालमारभ्येत्यर्थः।। 60।।

In worshipping the attendants one should begin from Jayanta located is between Īśana and Indra another eight categories need to be propitiated. They are Āditya, Aświns, Pitṛs, Gaṇeśa, Mātṛs, Apsaras, Vasus and Rudras. (60)

गाङ्गेयरूप्यमयताम्रजकांस्यमृत्सा-
पात्राणि मौलिपदपार्श्वयुगग्रभञ्जि।
विष्णौ क्रमेण धृतमाक्षिकदुग्धशान्ति-
वार्गव्यवन्त्यमिमृशेन्निजपञ्चतत्त्वैः ।।61।।

विमर्शिनी

उपहारस्थापनमाह–गाङ्गेयेति। विष्णौ मौलिपदपार्श्वयुगग्रभाञ्जि शिरोभागे पादयोः समीपे पार्श्वयोरग्रभागे च स्थितानि घृतमाक्षिकदुग्धशान्तिवार्गव्यवन्ति क्रमेण आज्यमधुक्षीरशान्तिजलपञ्च-गव्यपूरितानि गाङ्गेयरूप्यमयताम्रजकांस्यमृत्सापात्राणि क्रमात् सुवर्णरजतताम्रकांस्यमृन्मयपात्राणि निजपञ्चतत्त्वैः क्रमेणाभिमृशेत् संस्थाप्य स्पृष्ट्वा जपेत्।। 61।।

विवरणम्

गाङ्गेयरूप्यमयेति। सुवर्णकृतं रजतकृतं च पात्रं, मृत्सापात्रं प्रशस्तया मृदा कृतं पात्रं, मौलिः शिरोग्रदेशः पदं पादाग्रदेशः। अग्रं पुरोभागः माक्षिकं मधु, शान्तिवारिति हेमरत्नाक्षतयुतं जलं गृह्यते। निजपञ्चतत्त्वैः क्रमेणाभिमृशेदित्यन्वयः। फडन्तप्रणवप्रोक्षणं शोषणादिकं क्रमेण पञ्चतत्त्वैरिज्या चेष्यते।। 61।।

The vessels to be used in this worship should be according to the deities. For Viṣṇu on the head, two shoulders and top of the crown vessels made of gold, silver, copper bell metal and clay shall be used in which the materials of ghee, honey, milk sanctified water and Pañcagavya shall be put and chanting the Pañcatatva of the God these vessels should be touched. (61)

न्यस्येत् तद्वत् पदपरिसरे पात्रयोरर्घ्यपाद्ये
क्षीरक्षौद्रे मदनदमने पार्श्वयोर्मूलतश्च।
मूलेनार्ये घृतमधु शिरोङ्घ्र्योः कुमारेऽर्घ्यपाद्ये
पात्रद्वन्द्वे रजतरचिते स्वोपचाराणुनाङ्घ्[1]योः।। 62।।

विमर्शिनी

मदनदमने शिवे तद्वत् पदपरिसरे पादसमीपे पात्रयोरर्घ्यपाद्ये अर्घ्यं पाद्यं च, पार्श्वयोः पात्रयोः क्षीरक्षौद्रे क्षीरं मधु च मूलतो न्यस्येत्। आर्ये शिरोङ्घ्र्योः शिरस्समीपे पादसमीपे च मूलेन घृतमधु घृतं मधु च, कुमारे अङ्घ्र्योः पादयोः समीपे रजतरचिते पात्रद्वन्द्वे स्वोपचाराणुना 'ओं नमः षण्मुखाये'ति मन्त्रेणार्घ्यपाद्ये च न्यस्येत्। अत्रार्घ्यपाद्ययोर्द्रव्यं स्वस्वकलशादवगन्तव्यम्।। 62।।

विवरणम्

पदपरिसर इति। पदोद्देशसन्निधौ। पात्रयोरिति। पात्रं हेमादि ग्राह्यम्। मूलतश्चेत्येतदर्घ्यपाद्ययोरपि सम्बध्यते। क्षौद्रं मधु। मूलेनार्ये घृतमधु शिरोङ्घ्र्योरिति। शिरः सन्निधौ हैमादिपात्रे घृतं पादाग्रसन्निधौ च मध्विति विवेकः। अङ्घ्र्योरिति दक्षिणवामपादाग्रयोस्सन्निधाविति भावः।। 62।।

Using the mūlamantra the priest shall offer oblations of Arghya and Pādya at the feet of Śiva as in the case of Viṣṇu and milk and honey in the pits of both the sides. In the case of Śāstā ghee and honey should be placed at the head portion and feet using Mūlamantra. For Subrahmaṇya two silver

---
1. 'ङ्घ्र्योः।। मङ्ग' ख. पाठः

vessels filled with water for washing the feet at his feet. Here again of the mantra should be the one prescribed for him. (62)

हैमे न्यसेच्छिरसि सुम्भरिपाविषेत्वे-
त्याज्यं पदे मधु च मध्विति रौप्यपात्रे।
मूलेन पार्श्वयुजि ताम्रजकांस्यजेऽर्घ्य-
पाद्ये हरीशगणपेऽत्र[1] हरीशवच्च।। 63।।

विमर्शिनी

अत्र शिवनारायणदुर्गयोर्वैष्णवोक्तं ग्राह्यं गणपतेः शिवोक्तं च। स्वस्वस्थाने स्वस्तिकानि विलिख्य धान्यानि दर्भांश्च निक्षिप्यैतानि स्थाप्यानि च।। 63।।

विवरणम्

हैम इति पात्रे। शिरसीति। शि[2]रोदेशे। मध्वितीति। मधुवातः इत्यादिमनुभिः। पार्श्वयुजीति। दक्षिणपार्श्वे ताम्रपात्रेऽर्घ्यं वामपार्श्वे कांस्यपात्रे पाद्यं मूलेन न्यसेदित्यर्थः। हरीशगणपे तु हरीशवच्चेति। हरीशे हरिवद् गणपतौ शिववदित्यर्थः।। 63।।

For Durgā the oblation should be placed on the head is a golden vessel. The offer of ghee shall be to the accompany this mantra "iṣe tvā". At the feet the offering shall consists of honey put in a silver vessel. Here the mantra is a "Madhuvātā" etc. On both the sides vessels of bell metal are prescribed in which water is to be offered with the Mūlamantra. For Śaṅkaranārāyaṇa it shall be like that of Viṣṇu and for Gaṇeśa it shall be as in the case of Śiva. (63)

मङ्गलान्यष्ट परितस्तथा मङ्गलपालिकाः।
प्रदीपादींश्च विन्यस्य मण्डयेन्मण्डपोदरम्।। 64।।

विमर्शिनी

तथाष्टमङ्गलानि मङ्गलपालिकाः प्रदीपादींश्च परितो विन्यस्य मण्डपोदरं मण्डपान्तर्भागं मण्डयेत् अलङ्कुर्यात्।। 64।।

विवरणम्

मङ्गलान्यष्ट परित इति। घृतमध्वाद्युक्तपात्रावरणबाह्ये स्वस्तिकानि विरचय्य तेषु प्रागाद्यष्टदिक्षु अष्टमङ्गलानि विन्यसेत्। यदुक्तम्-

"शय्याकुम्भान्तरे दिक्षु विन्यसेदष्टमङ्गलम्।"

इति। पुनः फडन्तप्रणवप्रोक्षणादि कृत्वा हृल्लेखया श्रीबीजेन वा पूजयेत्। तथा मङ्गलपालिका

---

1. 'तु' क. पाठः,
2. 'रोग्रोद्दे' घ. पाठः

इति। विद्येश्वरकलशबाह्ये परितो व्रीहिपीठेषु प्रादक्षिण्येनेति भावः। 'पौर्वाह्णिके प्रत्तबलीनि'त्यादि ह्युक्तम्। प्रदीपादींश्चेति धान्यपूर्णपात्रादिग्रहणम्।। 64।।

The inside of the pavilion should be decorated by placing Aṣṭamaṅgala, the eight auspicious things on all the eight sides as also on plates. There shall be much lamps to lighten up the interior of the hall. (64)

न्यस्येच्छङ्खारिकेतून् मुकुरवृषसृणींश्चामरं मत्स्ययुग्मं
दिक्ष्वीशे त्र्याद्यवत्सं मुकुरवृषझषद्वन्द्वकुम्भांस्त्रिधाम्नि।
श्रीशेशे स्वस्तिकाब्जं दरघटमुकुरं सोत्पलावर्तवत्सं
वत्सं कुम्भं सभेरीमुकुरझषसृणीच्छङ्खनन्द्यौ च चण्ड्याम्।। 65।।

विमर्शिनी

अष्टमङ्गलानि विविच्याह–न्यस्येदिति। ईशे दिक्षु शङ्खारिकेतून् शङ्खं चक्रं ध्वजं च, मुकुरवृषसृणीन् आदर्शं वृषभम् अङ्कुशं च, चामरं मत्स्ययुत्मं, याज्ञिकवृक्षैः कृतानेतान् शय्याया अष्टसु दिक्षु स्वस्तिकस्थेषु तण्डुलपूर्णेषु पात्रेषु न्यस्येत्। त्रिधाम्नि त्र्याद्यवत्सम् उक्तेषु त्र्याद्यं शङ्खारिकेतून् श्रीवत्सं च, मुकुरवृषझषद्वन्द्वकुम्भान् आदर्शं वृषभं मत्स्यद्वन्द्वं पूर्णकुम्भं च। श्रीशेशे स्वस्तिकाब्जं स्वस्तिकं पद्मं च, दरघटमुकुरं शङ्खं पूर्णकुम्भमादर्शं च, सोत्पलावर्तवत्सम् उत्पलं नन्द्यावर्तं श्रीवत्सं च। चण्ड्यां दुर्गायां वत्सं श्रीवत्सं, कुम्भं, सभेरीमुकुरझषसृणीन् भेरीमादर्शं मत्स्यद्वयमङ्कुशं च, शङ्खनन्द्यौ च शङ्खं नन्द्यावर्तं च न्यस्येत्।। 65।।

विवरणम्

अष्टमङ्गलान्याचष्टे–न्यस्येच्छङ्खारिकेतूनिति। अरिः चक्रं, केतुः वृषाङ्कितो ध्वजः। मुकुरं दर्पणम्। सृणिरङ्कुशः। त्र्याद्येति। शङ्खं चक्रं गरुडाङ्कितध्वजश्च, वत्सः श्रीवत्सः। झषद्वन्द्वं मत्स्यमिथुनम्। स्वस्तिकेति। ... घटं पूर्णकुम्भम्। आवर्तं नन्द्यावर्तं, वत्सं पूर्ववच्छ्रीवत्सम्। शङ्खनन्द्यौ चेति। नन्दी नन्द्यावर्तः।। 65।।

For Śiva the eight items - Conch, disc, flagstaff, metal mirror, replica of ox, a hook white chowrie and a pair of fishes are to be placed in the prescribed manner in eight directions from east onwards. For Viṣṇu – Conch, disc, flagstaff, Śrīvasta, mirror, ox, pair of fishes and a jar filled with water (eight items). For Śaṅkaranārāyaṇa, Swastika, lotus, conch, pot, mirror, utpala (blue lotus) Nandyārvarta flower and Śrīvatsa (8 items). For Durgā (the eight) items are Śrivātsa, full pot, tabor, mirror, pair of fishes, hook, conch, Nandyāvarta flower. All these are to be placed from east onwards. (65)

पूर्णघटध्वजवज्रं स्वस्तिकशक्ती च चामरद्वितयम्।
नागं मयूरमष्टौ स्कन्देऽपि करोतु मङ्गलान्यत्र[1]।। 66।।

1. 'त्र।। इ पाठः',

विमर्शिनी

अत्र स्कन्दे पूर्णघटध्वजवज्रं पूर्णकुम्भं केतुं वज्रं च, स्वस्तिकशक्ती च स्वस्तिकं शक्तिं च, चामरद्वितयं, नागं गजं मयूरमप्यष्टौ मङ्गलानि करोतु।। 66।।

विवरणम्

नागमिति गजम्।। 66।।

For Subrahmaṇya the items required are potful of water, flagstaff, diamond, Swastika, javelin, a pair of chowrie, replica of elephant and peacock (altogether eight). (66)

दर्पणं पूर्णकुम्भं च वृषभं चामरद्वयम्।
श्रीवत्सं स्वस्तिकं शङ्खं दीपं विघ्ने च शास्तरि।। 67।।

विमर्शिनी

गणपतिशास्त्रोरपि शिवोक्तवदेवाष्टमङ्गलानि योज्यानि।। 67।।

विवरणम्

गणपतौ शिवोक्तानि शास्तरि विष्णूक्तानि। यद्वा दर्पणं पूर्णकुम्भं चेति। दीपमिति भौमदीपग्रहणम्।। 67।।

For Gaṇeśa and Śāstā the items are – mirrors, potful of water, ox, pair of Chowrie, Śrīvatsa, Svastika, Conch and lamp. (67)

इति संस्कृतमण्डपो[1]ऽस्य बाह्ये
शिवदिग्धाम्नि निधाय भद्रपीठम्।
परिपूज्य कुशादिमान् प्रयायात्
प्रतिती[2]र्थं प्रतिमामिह प्रणेतुम्।। 68।।

विमर्शिनी

एवं मण्डपाश्रितं कर्माभिधाय प्रतिमाश्रितं कर्म प्रस्तौति–इतीति। एवं संस्कृतमण्डपः संपादितमण्डपाश्रितकर्मा गुरुः अस्य बाह्ये शिवदिग्धाम्नि तस्येशभागस्थापरमण्डपे भद्रपीठं निधाय परिपूज्य पीठपूजां कृत्वा कुशादिमान् दर्भपुष्पवस्त्रगन्धादिसहितः इह अल्पमण्डपस्थभद्रपीठे प्रतिमां प्रणेतुमानेतुं प्रतितीर्थं तीर्थाभिमुखं प्रयायाद् गच्छेत्।। 68।।

विवरणम्

इति संस्कृतमण्डप इत्युपसंहारः। अस्य बाह्य इति। अस्य मण्डपस्य बाह्ये। शिवदिशि यो बिम्बशुद्धिमण्डपो यत्र बिम्बशुद्धिकलशपूजनमुक्तं तस्मिन् भद्रपीठं निधाय गुरुगणपतिपूजापूर्वकं स्वं

---

1. 'पे' क. पाठः,
2. 'बिम्दं प्र' ख. पाठः

स्वं पीठं सम्पूज्य तालत्रयादि कुर्यात्। अत्र विष्णौ प्राङ्मुखतया बिम्बं निधित्सितम्, इतरेषु प्रासादसम्मुखतयेति तदुचि[1]तयोगेन पीठपूजा स्यादिति बोद्धव्यम्। कुशादिमानिति दर्भांशुक-गन्धपुष्पादिग्रहणम्। इहेति। अस्मिन्नेव स्नपनमण्डपे।। 68।।

Thus having completed the decorations and purification of the pavilion and placing altar to the north – east of the sanctum with due worship, the priest shall proceed to the holy ghat with Kuśa flower and akṣata in his hand to bring the idol where it is submerged in water. (68)

तद्रक्षणाय परितः कृतसन्निवेशं
संहृत्य दैवतगणं सलिलस्थबिम्बे।
उद्धृत्य वारिण इदं प्रविसृज्य वासो
दर्भैर्विघृष्य सलिलेन विशोधयेच्च।। 69।।

विमर्शिनी

तद्रक्षणाय तद्बिम्बरक्षणाल परितः कृतसन्निवेशं कृतावस्थानं दैवतगणं सलिलस्थबिम्बे संहृत्योद्वास्य इदं बिम्बं वारिण उद्धृत्य पूर्ववेष्टितं वासो विसृज्य दर्भैर्विघृष्य सलिलेन विशोधयेच्च।। 69।।

विवरणम्

तद्रक्षणायेति। पञ्चतत्त्वदेवतानाम् अस्त्रदेवताया दिक्पालानां व बिम्बात्मनि विलापनमुक्तम्। तत्र तीरे बिम्बाभिमुखोऽवस्थाय गुरुगणपतिवन्दनतालत्रयादिपूर्वकं मन्त्रप्राणायामादि सर्वं विधाय पञ्चतत्त्वदेवतादिषु पुष्पमाराध्य बिम्बे प्रणवेनोद्वासनं कार्यम्। जलतटे भद्रपीठं निधाय तत्र पीठपूजापीष्यते। वारिण इदमुद्धृत्येति। बिम्बं तत्पीठोद्वासनपूर्वकं प्रणवेनोद्धृत्य तीरे कुर्यात्। प्रविसृज्य वास इत्याच्छादनवस्त्रादिहानमुक्तम्। यदुक्तम्–'अर्चामथावेष्ट्य सदर्भवस्त्रैरि'ति।। 69।।

After invoking the presence of the lords of the quarters enjoined to protect the idol kept in the water, the same may be lifted up and after removing the cloth with which it is covered it may be rubbed with the Kuśa grass dipped in water as an act of cleaning. (69)

कृत्वा तद्गतभूतसर्जनमिदं तन्मन्त्रसाङ्गीकृतं
गन्धाद्याहितचर्चनं प्रतिसरं तत्साम्प्रतिक्ये तथा।
बद्ध्वा वस्त्रसुवेष्टितं द्विजरथेऽथारोप्य वाद्यादिभिः
साकं शाकुनजापकः स्नपनगेहं मन्त्रबिम्बं नयेत्।। 70।।

विमर्शिनी

तद्गतभूतसर्जनं प्लावनादिकं भूतसृष्टिं च यथोक्तक्रमेण कृत्वा तन्मन्त्रसाङ्गीकृतं तत्तन्मन्त्रेण सकलीकृतं गन्धाद्याहितयर्चनं गन्धादिभिरलङ्कृतं कृतपूजनं च इदं मन्त्रबिम्बं तथा तत्साम्प्रतिक्ये

1. 'ततया पी' घ. पाठः

तत्सम्प्रतिभवे तदानीं कौतुकबन्धयोग्ये देवे प्रतिसरं कौतुकं बद्धवा अथ वस्त्रसुवेष्टितं द्विजरथे द्विजैः कल्पिते रथे आरोप्य वाद्यादिभिर्वाद्यघोषादिमङ्गलध्वनिभिः साकं शाकुनजापकः द्विजैः सह 'कनिक्रददि'त्यादि जपन् स्वपनगेहं स्नानार्थं पूर्वं कल्पितं मण्डपं मन्त्रबिम्बं नयेत् प्रापयेत्।। 70।।

विवरणम्

कृत्वा तद्गतभूतसर्जनमिति। पुनर्भद्रपीठे प्रागवन्निधाय तद्बिम्बगतभूतसर्गं विदध्यात्। जलाधिवासविधौ यत्पर्यन्तं कृतं तच्छेषकरणमेतदुक्तम्। अत्र ह्लामादिस्वस्वबीजोर्ध्वगतेत्याद्युक्तवैपरीत्येन मन्त्रप्रयोगौ भवतः। यथा–ओं हौं नमः परायाकाशात्मने नम इति बिम्बमूर्ध्नि स्पृशन् पञ्चविंशतिवारेण सकृत् कुम्भकं विधाय तेनैव तदादितात्वन्तं व्यापयेदित्यादि। उद्घातावृत्त्यैव प्राणायामाः स्युरिति। इदमिति। बिम्बम्। तन्मन्त्रसाङ्गीकृतमिति सकृल्लिपिन्यासपूर्वकं मन्त्रप्राणायामव्यापक-वर्णाङ्गन्यासाभिप्रायम्। गन्धाद्याहितचर्चनमिति गधमाल्याद्यलङ्करणं गन्धपुष्पादिपूजनं चोक्तम्। प्रतिसरं तत्साम्प्रतिक्ये तथा बद्धवेति। प्रतिसरं कौतुकं तस्य साम्प्रतिक्ये साम्प्रतिकत्वे सम्प्रतिकार्यत्वे। यदुक्तम् –'मुरभिदि जलवासोद्घृतावि'ति। 'बद्धवा सोपचारेणाष्टार्णेने'ति। स्थित्वा प्रार्थ्येत्याद्युक्तविधया कौतुकबन्धनं विष्णौ विधायेति भावः। तीर्थोद्वासनमपि कार्यम्। शाकुनजापक इति कनिक्रदस्त्वस्तिसूक्तजपाभिप्रायम्।। 70।।

After properly washing the idol and sanctifying it with the chants and decorating it with fragrant flowers a bracelet may be put on it wherever necessary as an auspicious mark. Again the idol covered and secured with cloth may be carried in a chariot by the Brahmins who are to chant particular mantras. Accompanied by instrumental music and bearers of umbrella, it may be brought to the place for bathing it ceremonially. (70)

प्रासादसम्मुखतया विनिधाय भद्रं
कर्णेत्यृचं जपतु सर्वसुपर्वबिम्बम्।
न्यस्येत् त्रिधाम्नि हरिदिङ्मुखमिष्टपीठे
त्रीणीत्यृचा जपतु भद्रमृचं तदग्रे।। 71।।

विमर्शिनी

तत्र सर्वसुपर्व[1] (णां) देवानां बिम्बम् इष्टपीठे पूर्वं पूजिते पीठे प्रासादसस्मुखतया मूलप्रासादाभिमुख्येन विनिधाय 'भद्रं कणेभि'रित्यृचं जपतु। त्रिधाम्नीष्टपीठे हरिदिङ्मुखं पूर्वाभिमुखं 'त्रीणि पदा विचक्रमे' इत्यृचा न्यस्येत्। तदग्रे स्थित्वा 'भद्रं कर्णेभिः' इत्यृचं जपतु च।। 71।।

विवरणम्

प्रासादसम्मुखतया सर्वसुपर्वबिम्बं विनिधायेत्यन्वयः। सुपर्वाणो देवाः। इष्टपीठ इत्येतदिहापि योज्यम्। भद्रपीठं परिपूज्येति ह्युक्तम्। न्यस्येदिति त्रीणीत्यृचेति सम्बध्यते। 'त्रीणि पदे'ति मन्त्रेण।

1. 'र्बबि' ख. पाठः,

हरिदिङ्मुखमिति। इन्द्रदिगभिमुखम्। तदग्रे भद्रमृचं जपत्विति। देवाग्रे तिष्ठन् 'भद्रं कर्णेभिरि'त्यृचं जपेत्।। 71।।

Placing the auspious idol facing the sanctum on a pedestal which is already sanctified various mantras may be uttered like "Bhadram Karṇebhih" "Trin Vicakrame (for Viṣṇu) to be concluded with the first one. The mantras have to be chanted three times. (71)

श्रीशेशाजितयोर्घृतेन धृतवत्याङ्क्त्वा हरीशे नम-
स्ते रुद्रेति विशोधयेन्मुररिपौ मूलेन मासूरकैः।
तेजोऽसीति हरौ घृताक्तिरथवा[1] कार्या द्वयं मूलतः
स्कन्देभाननयोः स्वकल्पविधिना शेषेष्वथैतच्चरेत्।। 72।।

विमर्शिनी

अथ श्रीशेशाजितयोर्घृतेन घृतवत्या 'घृतवती सवितुरि'त्यृचा अङ्क्त्वा अञ्जनं कृत्वा, हरीशे 'नमस्ते रुद्र मन्यव' इति, मुररिपौ मूलेन च मासूरकैः शोधयेत्। (   )। अथवा हरौ 'तेजोऽसी'ति मन्त्रेण घृताक्तिः घृतसेचना कार्या। स्कन्देभाननयोर्द्वयं घृतसेचनं शोधनं च मूलतः, शेषेषु एतद्द्वयं स्वस्वकल्पविधिना चरेत्।। 72।।

विवरणम्

घृतवत्येति। 'घृतवती सवितरि'त्यृचा मासूरकैर्विशोधयेदिति योज्यम्। मासूरवार्भिः क्रमादिति। यदुक्तम्–

"घृतेन मधुनालिप्य क्षालयेच्छुद्धवारिभिः।"

इति। पुनर्मासूरजलाभ्यां शोधनं लौकिकमेव।। 72।।

The idols of Viṣṇu and Śaṅkaranārāyaṇa may be anointed with ghee chanting the mantra of "ghṛtaveti" etc. The idol of Śaṅkaranārāyaṇa may be cleaned with the mantra "namaste rudra" while that of Viṣṇu with the powder of Bengal gram using the Mūlamantra. For Viṣṇu one may use the mantra "tejosi" to anoint the idol with ghee. In the case of Śiva, Mūlamantra may be used while anointing the idol with ghee and honey. Here the powder of Bengal gram may be used while washing the same with water. (72)

[2]'दीर्घायुत्वे'त्यणुः। द्रुपदमनुना 'द्रुपदादिवेदि'त्यादियजुषा। क्षालयेदिति। जलैरिति गम्यते। मूलेनैतद् गुहगणपयोराचरेत् सर्वमिति। घृतालेपनमासूरोद्वर्तनपूर्वकं क्षालनं च। आर्ये मूलतो घृतमध्वक्तिकृच्छैरीषैश्शोधयत्विति योजना। शोधनमिह लौकिकमेव।।

---

1. 'वैशे मूलतः सर्पिषा क्षौद्रेणापि विलिप्य शोधयतु वा र्मासूरवार्भिः क्रमात्।। दीर्घायुत्वेत्यणुकृतघृतालेपमुद्वर्त्यं बिम्बं मासूरेण द्रुपदमनुना क्षालयेत् सुम्भहन्त्र्याम्। मूलेनैतद् गुहगणपयोराचरेत् सर्वमार्ये शैरीषैः शोधयतु घृतमध्वक्तिकृन्मूलतोऽथ।। द' क. ग. पाठः
2. दीर्घायुत्वेत्यादि क. ग. गताधिकपाठमाश्रित्येदं विवरणव्याख्यानम्।

दर्भाद्यैः परिघृष्य शोधयतु दुर्गायां जलैस्त्वच्छक्-
न्मृत्साभस्मभिरीश्वरे प्रमथपे मृत्त्वक्छकृद्भिः क्रमात्।
मृत्त्वग्भ्यां गणपे गुहे स्वकलशोक्तद्रव्यकैः स्वाणुभि-
र्मृद्भिः श्रीशहरीशयोः स्वविहिताभिर्वक्ष्यमाणक्रमात्।। 73।।

विमर्शिनी

ततो दुर्गायां दर्भाद्यैः दर्भमृत्त्वग्भिः क्रमात् परिघृष्य जलैः शोधयतु। ईश्वरे त्वक्छकृन्मृत्साभस्मभिः परिघृष्य शोधयतु। प्रमथपे मृत्त्वक्छकृद्भिः, गणपे मृत्त्वग्भ्यां, गुहे स्वकलशोक्तद्रव्यकैः सवैः सवैः स्वाणुभिश्च श्रीशहरीशयोः स्वविहिताभिर्मृद्भिर्वक्ष्यमाणक्रमात्।। 73।।

विवरणम्

दर्भाद्यैरिति। दर्भमृत्त्वग्भिः। त्वक्छकृन्मृत्साभस्मभिरीश्वर इति वाक्यम्। गुहे स्वकलशोक्तद्रव्यकैः स्वाणुभिरिति। अत्रायमाशयः–

मूलेन कुशकूर्चेन कौश्या गव्यसुदिग्धया।
मुष्ट्या दार्भ्यैव वास्त्रेण क्याथचूर्णेन वर्मणा।।
दूर्वापिष्टेन मूलेन हृदा सर्षपपिष्टतः।
मृदा मूलेन चोद्घृष्य तत्तत्कुम्भाभिषेचनम्।।

इति। सर्वत्रास्त्रमेव वा मन्त्रः स्यादिति। वक्ष्यमाणक्रमादिति। यथा–'लक्ष्मीशे विहितसप्त-मृत्तिकाभिरि'त्यादि। 'शार्ङ्गीश्वरे वृषविषाणे'त्यादि।। 73।।

The idol of Durgā may be anointed with ghee using the mantra 'dīrghāyuṣṭvāya' etc. and washed in water using the powder of Bengal gram chanting the mantra "drupadādi' etc. The same action is to be carried out on the idols of Subrahmaṇya and Gaṇapati but the mantra applicable is their own mūlamantra. For Śāstā ghee and honey are to be used for anointing the idol and powder of Bengal gram chanting the mantra "drupadādi" etc.. The same action is to be carried out on the idols of Subrahmaṇya and Gaṇapati but the mantra applicable is their own mūlamantra. For Śāstā ghee and honey are to be used for anointing the idol and powders of Bengal.gram for removing them in the act of washing. The mantra applicable in the Mūlamantra of the god. (73)

दुर्गा[1]गणेशशरजन्मसु बिम्बशुद्धि-
स्नानात् पुरो हरिहरीश्वरयोः करोतु।
स्नानान्तरे नयनमोक्षणमार्यके तत्
प्राक् स्नानतः सलिलवासनकर्मतो वा।। 74।।

---

1. 'र्गाया गणपे च बिम्बकलशासेकात् पुरः प्रावरेन्नेत्रोच्छेखनमार्यके निगदितं ततोयवासात् पुरः। दुर्गावद् विदधीत पावकभवे भूतेशवद् वाथ तच्छ्रीशेशाजितयोस्तु बिम्बकलशस्नानक्रमस्यान्तरे।। है' ख. पाठः

विमर्शिनी

नेत्रोन्मीलनकालमाह्न–दुर्गेति। दुर्गागणेशशरजन्मसु बिम्बशुद्धिस्नानात् पुरः पूर्वं नयनमोक्षणं करोतु। हरिहरीश्वरयोः स्नानान्तरे स्नानमध्ये आर्ये स्नपनतः प्राक् तद् नयनमोक्षणं, सलिलवासनकर्मतो जलाधिवासात् प्राग् वा।। 74।।

विवरणम्

बिम्बशुद्धिस्नानात् पुर इति। यदेतच्छोधनमुक्तं तत्कृत्वा नेत्रोन्मीलनं पुनरावाह्य साङ्गीकरणादि कृत्वेत्येतदादि कार्यमिति भावः। स्नानान्तरे इति। बिम्बशुद्धिस्नपनमध्ये। वक्ष्यति च– "इत्यभिषिच्याक्षिणी विलिखेदि"ति।

"सिञ्चेदच्छजलैस्ततो वितनुयान्नेत्रत्रयोन्मीलनम्।"

इति। सलिलवासनकर्मतो वेति। प्रागित्यनुषङ्गः।। 74।।

The idol of Durgā is to be washed in water rubbing it with darbha grass, mud and bark. That of Śiva may be rubbed with bark, water mixed with cowdung, mud and ashes. The idols of Śāstā may be rubbed with mud, bark, and water mixed with cowdung. That of Gaṇapati may be rubbed with mud and bark for washing the idol of Subrahmoṇya the articles put in the pot may be used chanting the required mantra. For Viṣṇu and Śaṅkaranārāyaṇa prescribed variety of mud may be used for rubbing away the anointed material. (74)

हैमे निषिच्य चषके मधुमन्त्रजप्तं
सूच्या प्रगृह्य घृतमाक्षिकमक्षिमोक्षम्।
नेत्रेण शास्तृग[1]णपेषुभवेषु मन्त्री
त्रिष्टुम्मयेन मनुना तनुयात् कुमार्याम्।। 75।।

विमर्शिनी

नेत्रोल्लेखनक्रियाविधानमाह–हैम इति। मन्त्री मन्त्रविशेषज्ञो गुरुः शास्तृगणपेषु- भवेषु हैमे चषके घृतमाक्षिकं घृतं मधु च निषिच्य मधुमन्त्रजप्तं 'मधु वाता' इत्यादितृचेन जप्तं तत् सूच्या सुवर्णसूच्या प्रगृह्य नेत्रेण नेत्रमन्त्रेण अक्षिमोक्षं नयनोन्मीलनं सतारकार्चिः तारकार्चिर्भ्यां सह तारकं मूलेन तत्रस्थं तेजः प्रणवेन च तनुयात्। तारकार्चिलेखनं सर्वत्र समानम्। कुमार्यां त्रिष्टुम्मयेन 'जातवेदस' इत्यृचा।। 75।।

विवरणम्

हैमे निषिच्य चषक इति। घृतमाक्षिकमिति लभ्यते। अस्त्रप्रोक्षणशोषणादि सर्वं सामान्यसिद्धम्। अक्षिमोक्षमिति। नेत्रोन्मीलनम्। मन्त्री इति.....।। 75।।

For Durgā, Gaṇapati and Subrahmaṇya the rite of the opening of the

---

1. 'वदिभास्यषडास्ययोश्च त्रि' ख. पाठः

eyes may be performed before the washing of the idols whereas in the case of Viṣṇu and Subramaṇya it can be after the ceremonial purification in water. (75)

हिरण्यगर्भः समिति प्रगृह्य मध्वाज्यकं चित्रमिति त्रिधाम्नि[1]।
नेत्रं लिखेद् दक्षिणमन्यद[2]त्राप्यायस्वमन्त्रेण सतारकार्चिः[3]।। 76।।

विमर्शिनी

त्रिधाम्नि 'हिरण्यगर्भः समवर्तत' इति मध्वाज्यकं प्रगृह्य दक्षिणं नेत्रं 'चित्रं देवानाम्' इत्यृचा, अत्रान्यन्नेत्रम् 'आप्यायस्व'मन्त्रेण च लिखेत्।। 76।।

विवरणम्

प्रगृह्येति। 'हैमे निषिच्य चषके मधुमन्त्रजप्तं सूच्या' इत्येतदनुषज्यते।। 76।।

In a golden goblet ghee and honey sanctified with mantra may be arranged. The prescribed mantra is indicated as "madhuvātāh" etc. The mixture of ghee and honey may be taken by the tip of a golden needle and chanting Netramantra the idols of Śāstā, Gaṇapati and Subrahmaṇya may be rubbed in the eye for proper opening. For Durga, the priest should chant the mantra beginning with 'jātavedasa' during the act of ceremonial opening of the eye. (76)

माध्वीदुग्धघृतं हिरण्यमनुना संगृह्य शार्ङ्गीश्वरे
वामं चित्रमृचोल्लिखेन्नयनमन्यद् विश्वतश्चक्षुषा।
लालाटाक्षि हिरण्यगर्भमनुनाथापूर्य गामग्रगां
हृत्वा नेत्रपटं प्रदर्शयतु तां कर्ताथ तस्मै दिशेत्।। 77।।

विमर्शिनी

शार्ङ्गीश्वरे हैमे चषके निषिक्तं माध्वीदुग्धघृतं 'हिरण्यगर्भः सम्' इति मनुना संगृह्य पूर्वं वामं नयनं 'चित्रं देवानाम्' इत्यृचोल्लिखेत्। अन्यद् दक्षिणं 'विश्वतश्चक्षुषा' इत्यृचा। लालाटाक्षि ललाटनेत्रं हिरण्यगर्भमनुना चोल्लिखेत्। अथानन्तरवक्ष्यमाणं सर्वत्र समानम्। नेत्रमापूर्य नेत्रपटं हृत्वा नयनमोक्षणात् पूर्वं पुरोभागे वस्त्रं प्रसार्य तत्कर्म कृत्वा नेत्र[4]पटं हृत्वा अग्रगा गां अग्रे गामानीय तां प्रदर्शयतु। अथ कर्ता यजमानः तां गां तस्मै गुरवे दिशेत्।। 77।।

विवरणम्

माध्वीदुग्धघृतमिति। अत्राप्येतदनुषङ्गः। माध्वी मधु। अथापूर्येत्यादि सर्वशेषत्वेन योज्यम्। नेत्रपटं

---

1. 'म्नः',
2. 'म' ख. पाठः, 'दस्याप्या' क. ख. ग. घ. पाठः,
3. 'ष्यम्' ख. पाठः,
4. 'पटलं ह' ङ पाठः

हृत्वा अग्रतां गां प्रदर्शयतु इत्यन्वयः। प्रागेवाग्रे गां सन्निधाप्य तां बिम्बं चान्तरा नेत्रपटं विततं कृत्वा नेत्रोन्मीलनं कार्यम्। तस्मै इति। आचार्याय।। 77।।

In the cse of the idol of Viṣṇu the priest chanting the mantra 'hiraṇyagarbha' shall take hold of the drops of honey and ghee with the tip of the golden needle and 'Citram devānam' shall rub the eye ball of the right eye and the chanting the hymn "āpyāyasva' shall rub the eyeball of the left eye to bring the same to proper shape. (77)

आ[1]वाह्य साङ्गीकरणादि कृत्वा दत्त्वोपहारान् स्नपनं करोतु।
विघ्नार्यदुर्गाशरजेषु शेषेष्वावाहनाद्यं स्नपने कृते तु।। 78।।

विमर्शिनी

विघ्नार्यदुर्गाशरजेषु मूलेनावाह्य साङ्गीकरणादि कृत्वा उपहारान् क्रमाद् दत्त्वा स्नपनं बिम्बशुद्धिस्नपनं करोतु। शेषेषु स्नपने कृते त्वावाहनाद्यं करोतु।। 78।।

विवरणम्

विघ्नादिषु स्नानवेलायां बिम्बशुद्धिरित्याह–आवाह्येति। हरिहरादिषु क्षालनमेतदित्याह–शेषेष्विति।। 78।।

In respect of Śaṅkaranārāyaṇa the left eye may be opened with the needle taking the mixture of honey, milk and ghee chanting the mantra "hiraṇyagarbha" while in the case of the right eye the mantra "Viśwatah Cakṣuḥ" may be chanted. The eye on the forehead is to be opened chanting the mantra "hiraṇyạgarbha" itself removing the cloth which covered the eyes. The owner shall bestow the gift of a cow on the preceptor. (78)

लक्ष्मीशे स्वविहितसस्तमृत्तिकाभि-
मूर्धानं दिव इति मन्त्रतो विलिप्य।
तन्मृत्सा[2]सुभृतघटाम्भसा समुद्र-
ज्येष्ठा इत्यणुपरिजापकोऽभिषिञ्चेत्।। 79।।

विमर्शिनी

अथ बिम्बशुद्धिस्नपनकलशोपहारदानादिकं पृथक् पृथगेवाह–लक्ष्मीश इत्यादिभिः। लक्ष्मीशे स्वविहितसप्तमृत्तिकाभिः स्वकलशपूरण उक्ताभिः सप्त[3]मृत्तिकाभिर्वल्मीकमृद्भिः 'मूर्धानं दिवः' इति

---

1. अस्य स्थाने
'विस्पष्टतायै पृथगेव वच्मि विष्ण्वादिबिम्बस्नपनं समासात्।
मूलाणुसाङ्गीकरणोपहारादत्युत्तरं वैतदिह प्रयोज्यम्।।' इति ख. पाठः
2. 'त्स्ना' क. पाठः,
3. 'प्तव' ङ. पाठः

मन्त्रतो विलिप्य तन्मृत्सासुभूतघटाम्भसा तन्मृद्भिः पूर्णेन ब्रह्मकलशेन 'समुद्रज्येष्ठा' इत्यणुपरिजापको गुरुरभिषिञ्चेत्।। 79।।

विवरणम्

अथ पृथगेव तत्तद्बिम्बशुद्धिरभिधीयते-स्तविहितसप्तमृत्तिकाभिरिति। सप्तवल्मीक-मृद्भिरित्यर्थः। तन्मृत्सासुभृतघटाम्भसेति। 'वल्मीकसप्तकमृदः कलशेऽथ मध्ये' इत्यमुनेत्यर्थः।। 79।।

Thereafter invoking the deities of Gaṇapati, Śāstā, Durgā and Subrahmaṇya and presenting them with supplication they may be washed with water in an act of bath. For ther gods Viṣṇu, Śiva and Subrahmaṇya the invocation and presentation of oblations shall be after the purificatory bathing. (79)

प्रागादिदिग्दलस्थैर्यज्ञा यज्ञा पयः पृथिव्यां च।
याः फलिनीर्या दिव्या इत्यभिषिच्याक्षिणी विलिखेत्।। 80।।

विमर्शिनी

प्रागादिदिग्दलस्थैः कलशैः 'यज्ञा यज्ञा वः', 'पयः पृथिव्यां', 'याः फलिनीः', 'या दिव्याः' इति चतुर्भिरभिषिच्याक्षिणी विलिखेत्। तदा नेत्रोल्लेखनमित्यर्थः।। 80।।

The cememonial bathing after the purification of the idols is due to Viṣṇu using the mantra "Mūrdhānam diva etc. Several varities of mud are to be applied on the idol from the pot where it is sanctified as Brahmakalaśa and water kept in it should be poured on the idol to wash away the mud. For this the Mantra beginning with. Samudra' etc., is to be chanted. (80)

हंसः शुचिषद्विष्णोरराटमिति चानलादिदलकलशैः।
सोमं राजानमृचा सविश्वतश्चक्षुषापि च स्नपयेत्।। 81।।

विमर्शिनी

'हंसः शुचिषद्', 'विष्णोरराटं', 'सोमं राजानं', सविश्वतश्चक्षुषा 'विश्वतश्चक्षुः' इत्यनया चर्चा अनलादिदलकलशैः अग्न्यादिकोणदलकलशैश्च स्नपयेत्।। 81।।

The pair of eyes may be ceremonially opened after bathing the idol with water from the pots beginning with those in the east chanting the mantras "yajnā yajña, payaḥ, prthivyām, yā phalinī and yā divya" (81)

उद्वर्त्य द्रुपदादिनागलतलान्मासूरपिष्टैस्तनौ
मानस्तोकऋचा च मूर्ध्नि मुरमांसीक्षीरपिष्टामलैः।
आलिप्याथ बहिष्ठगन्धसलिलैर्विष्णोरराटाणुना
संसिञ्चेदिदमाप इत्युपघटैर्दिक्कोणसंस्थैः सह।। 82।।

विमर्शिनी

द्रुपदादिना 'द्रुपदादिवेन्मुमुचानः' इत्यादिना मासूरपिष्टैः आगलतलादाकण्ठपर्यन्तं तनौ देहे उद्वर्त्य

मूर्ध्नि मुरमांसीक्षीरपिष्टामलैः मुरमांसीभ्यां क्षीरेण च सह पिष्टैरामलकैः 'मा नस्तोके तनये' इत्यृचा चालिप्याथ· बहिष्ठगन्धसलिलैर्दिक्कोणसंस्थैः विष्णोररायणुना, तत्र तत्र दिक्कोणसंस्थैरुपघटैः 'इ(मा?द)मापः' इति मनुना च सह संसिञ्चेत्।। 82।।

विवरणम्

उद्वर्त्येति। गळात्प्रभूति बिम्बशरीरे मासूरपिष्टैर्द्रुपदादिवेत्युद्वर्तयेत्। पुनः क्षीरेण मुरमांसीभ्यां सह पिष्टं यदामलकं तेन शिरसि 'मा नस्तोके' इत्यालेपयेदित्यर्थः।। 82।।

The four pots placed in the four directions beginning from South-east may be bathed in water chanting the mantra "hamsāli" sucishal" Viṣṇorarāṭam" "somam rājānām", and "viśvataḥ cakṣuh" respectively. (82)

बिम्बकलशाभिषेकं कृत्वेत्येह्येहिरूपूर्वमन्त्रेण।
आवाह्य विष्णुमेनं मूलाङ्गन्यासमाचरेन्मन्त्री।। 83।।

विमर्शिनी

इति बिम्बकलशाभिषेकं कृत्वा 'एह्येहि' इति पूर्वमन्त्रेण मन्त्री आवाहने मन्त्रविशेषयोजनं कुर्वन् एनं विष्णुमावाह्य मूलाङ्गन्यासं मूलाङ्गन्यासव्यापकाङ्गन्यासादिकमाचरेत्।। 83।।

विवरणम्

मन्त्रीति। 'एह्येहि' इत्यादिमन्त्रान्ते मूलमुक्त्वा नारायणमावाहयामीत्येवमावाहनमुक्तम्।। 83।।

The paste prepared with the powder of Bengal gram may be applied to the portion of the neck of the idol chanting the mantra "drupada" etc. On its head the paste of Mansi (Indian spikenard and Āmalaka (Phyllanthus Emblica) prepared in milk may be applied on the portions of the head chanting the mantra "mānastoka" etc. Thereafter chanting mantra "viṣṇorarāṭa etc. the water from all the sanctified pots at the outer sphere of the sacrificial diagram from east onwards may be poured on the idol. (83)

एह्येहि भगवन्! विष्णो! लोकानुग्रहकारक!।
यज्ञभागं गृहाणेमं वासुदेव! नमोऽस्तु ते[1]।। इति।। 84।।

विमर्शिनी

आवाहनमन्त्रं पठति–एह्येहीति।। 84।।

The priest shall thus pour the water from sanctified pots on the idol chanting the mantra "ehyehi" and invoke the presence of the divinity on it.

The mantra means 'O good Viṣṇu, the benefactor, of the world, please accept the portion of the sanctified obations presented here Vāsudeva,. I bow to you. (84)

---

1. 'ते।। अ' ख. पाठः

अर्घ्यं रातु हिरण्मयादिमनुना तस्मै सपाद्योदकं
गायत्र्याचमनीयकं समधुपर्कं च स्वया मन्त्रवित्।
मन्त्रेणाथ बृहस्पते अतियदित्याद्येन पीताम्बरं
वेदाहं मनुनोत्तरीयमुपवीतं हैममोङ्कारतः।। 85।।

विमर्शिनी

तस्मै विष्णवे हिरण्मयादिमनुनाघ्यं सपाद्योदकं रातु दद्यात्। मन्त्रविदिति तत्तदुपहारदाने 'अर्घ्यम्' इत्यादिमन्त्रयोगः सूचितः। स्वगायत्र्याचमनीयं समधुपर्कं च, 'बृहस्पते अति यत्' इत्याद्येन मन्त्रेण पीताम्बरं पीतवस्त्रं च, 'वेदाहं' मनुनोत्तरीयम्, ओङ्कारतः प्रणवेन हैममुपवीतं च।। 85।।

विवरणम्

रात्विति। 'रा दाने' दद्यादित्यर्थः। सपाद्योदकमिति। तेनैव मन्त्रेण पाद्यमिति भावः। तदुक्तम्– 'पाद्यं तेनैव दापयेत्' इति। स्वया गायत्रेति योज्यम्। समधुपर्कं चेति। तेनैव मन्त्रेणेति भावः। अत्रार्घ्याद्युपहारास्त[1]त्तद्द्रव्यभाजः फडन्तप्रणवप्रोक्षणशोषणादिसंस्कृताः स्युः। पीताम्बरादिष्वपि यथार्हं समानमेतत्। मन्त्रविदिति। तत्तन्मन्त्रान्ते तत्तदुक्त्वा समर्पयामीत्येवं मन्त्रप्रयोग उक्तः। पीताम्बरमिति। रात्वित्यनुवर्तते। वस्त्रादिषु परिधापनादि कार्यम्। तदुक्तम्–'वासस्तु परिधापयेत्' इत्यादि।। 85।।

Now the priest well versed in mantra shall give arghya the oblation with the mantra "hiraṇmye" to the hand of of the idol and "padya" the water at his feet. Thereafter the madhuparka - the mixture of honey, ghee and curd to the hand itself to the chant of Viṣṇugāyatrī mantra. An yellow cloth may be draped around the waist of the idol chanting the mantra "bṛhaspate" etc. An upper garment may also be put on the idol with the chant of the mantra "Vedāham". A golden thread to form the Upavīta (the Brahmanical thread) may also be put on the idol chanting the Praṇava (85)

गन्धं च पुष्पं च पवित्रकं च
दद्यादिदं विष्णुरृचा क्रमेण।
विश्वाणुनाचिर्मयमादधीत
व्यापय्य तं सर्गविसर्गरीत्या।। 86।।

विमर्शिनी

'इदं विष्णुः' इत्यृचा गन्धं च पुष्पं च हैमं पवित्रकं च क्रमेण दद्यात्। विश्वाणुना 'विश्वतश्चक्षुः' इत्यृचा तं सर्गविसर्गरीत्या सृष्टिसंहारक्रमेण व्यापय्य अर्चिर्मयं तेजोमयमादधीत।। 86।।

विवरणम्

विश्वाणुनेति। तं सर्गसंहारप्रकारेण 'विश्वतश्चक्षुः' इति व्यापय्य तेजोमयं सकलनिष्कलात्मकं विभावयेदित्यर्थः।। 86।।

---

1. 'स्तद्द्रव्य' घ. पाठः

Incenses, flowers and Pavitra the two blades of grass knotted at the tip are to be applied in that order mixed with a sandal paste chanting "idam viṣṇu" etc. Then rubbing the idol from head to foot chanting the mantra "Viśvatah cakṣuḥ" it may be made attractive with lustre. (86)

पुष्पैरोषधयः समित्यवकिरेत् सन्धूपयेद् धूरसी-
त्येतेनोपहरेत् प्रदीपकमथो तेजोसिमन्त्रेण च।
नेत्रे चाञ्जनरञ्जिते वितनुयाद् भूयः समिद्धोणुना
येनाकस्यमनुं जपन् वितनुयाद् गोरोचनादित्रकम्।। 87।।

विमर्शिनी

'ओषधयः संवदन्ते' इति पुष्पैरविकिरेत्। 'धूरसि' इत्यनेन सन्धूपयेत्। अथो 'तेजोऽसि'मन्त्रेण प्रदीपकमुपहरेत्। अथो इत्यनेनान्तरान्तरा जलदानं सूचितम्। भूयः समिद्धोणुना "समिद्धो अञ्जन्" इति मन्त्रेण नेत्रे द्वे अञ्जनरञ्जिते वितनुयात्। 'ये नाकस्य' मनुं जपन् गोरोचनावित्रकं गोरोचनया तिलकं वितनुयात्।। 87।।

विवरणम्

समिद्धोणुनेति। 'समिद्धो अञ्जन्' इत्यनेन।। 87।।

Flowers may be showered on the idol chanting the mantra "Oṣadhaya" etc. Now smoke of incense shall be waved with the mantra "dhūrasi". Torch may be shown with the mantra 'tejosi'. Thereafter collyrium may be applied on the eye of the idol with the mantra "Samidha" Gorocanātilakam the fore head mark with Gorocanā the yellow pigment from the bile of a cow is be applied with the chant of the mantra "ye nāka etc." (87)

वनस्पतेः पुष्प इति प्रजापी
माल्यं च मालां च समर्प्य तस्मै।
दत्त्वोपहारान् पुनरर्घ्यधारां
मूलेन दत्त्वा विकिरेत् प्रसूनैः।। 88।।

विमर्शिनी

'वनस्पतेः पुष्प' इति प्रजापी माल्यं पुष्पं मालां च तस्मै समर्प्य पुनरुपहारान् अर्घ्यपाद्याचमनीयानि दत्त्वा अर्घ्यधारां मूलेन दत्त्वा प्रसूनैर्विकिरेत्।। 88।।

विवरणम्

दत्त्वोपहारानिति जलगन्धादिभिः सपर्योक्ता।। 88।।

Flowers and garlands should be put on the idol with the chant of the mantra "Vanaspati" etc. Again giving oblation with materials and water the priest should meditate upon the god and then shower flowers. (88)

रथन्तरेण वैराजगायत्राभ्यां च सामभिः।
स्वयोनिजैः पुरः स्थित्वा स्तुवन् सम्प्रीणयेद्धरिम्।। 89।।

विमर्शिनी

रथन्तरेण, वैराजगायत्राभ्यां च, स्वयोनिजैः रथन्तरस्य 'अभि त्वा शूर' इत्याद्येन वैराजस्य 'पिबा सोममिन्द्र' इत्याद्येन, गायत्रस्य 'अग्न आयूंषि' इत्याद्येन सामभिः स्तुवन् हरिं सम्प्रीणयेत्।। 89।।

विवरणम्

स्वयोनिजैरिति। 'अभि त्वा शूर' 'पिबा सोममिन्द्र' 'अग्न आयूंषि' इत्येताः स्वयोनयस्तद्वर्त्तिभिरित्यर्थः।। 89।।

Thus standing before the idol praising the lord with mantras like "Abhitvā" "Piba somam" and "Agna āyūmṣi" the priest shall please the God. (89)

शुद्धे तैजसपात्रके सुविमलैरापूरिते तण्डुलै-
र्मध्ये सान्द्रघृतं शरावमुपधायाभ्युज्ज्वलद्दीपकम्।
स्वोद्यद्गोमयक्लृप्तचित्रितदिगीशास्त्रैः सदूर्वाग्रकै-
र्दिक्ष्वश्वत्थदलैर्विभूष्य रचयेन्नीराजनीयं शुभम्।। 90।।

विमर्शिनी

नीराजनीयसम्पादनमाह–**शुद्ध** इति। शुद्धे सुविमलैस्तण्डुलैरापूरिते तैजसपात्रके लोहमयपात्रे मध्ये तन्मध्ये सान्द्रघृतं पूर्णघृतम् अभ्युज्ज्वलद्दीपकम् अभितः परितः उज्ज्वलद्भिर्दीपैः उज्ज्वलद्वर्तिभिर्युतं शरावमुपधाय तस्य दिक्षु स्वोद्यद्गोमयक्लृप्तचित्रितदिगीशास्त्रै स्वस्मिन्नुद्यतानि गोमयेन क्लृप्तानि श्वेतरक्तादिरजोभिश्चित्रितानि दिगीशास्त्राणि वज्रादीनि येषु तैः सदूर्वाग्रकैः दूर्वाग्रयुक्तैरश्वत्थदलैर्विभूष्य शुभं नीराजनीयं रचयेत्। तथा विष्णुसंहितायां–

शुभे तु तैजसे पात्रे शालितण्डुलपूरिते।
अस्त्रैरश्वत्थपत्रस्थैर्नवगोमयकल्पितैः ।।
वर्णोज्ज्वलैर्यथाशोभं वर्धमानाज्यवर्त्तिभिः।
उज्ज्वलाभिर्युतं मध्ये कुर्यान्नीराजनं त्विदम्।।

इति।। 90।।

विवरणम्

नीराजनीयमाह–**शुद्ध** इति। मार्जनादिशुद्धिरियम्। यद्वा अस्त्रक्षालनादिशुद्ध्यभिप्रायम्। तैजसपात्रक इति। ताम्रकांस्यादिमये। सुविमलैरापूरित इति। हृदयेनेति ज्ञेयम्। शरावमस्त्रधौतं हृदैव निधाय अष्टदिक्षु चतुर्दिक्षु अग्रदिश्येव वा वर्त्ती[1]हृदैव विन्यस्य सान्द्रेण घृतेन शिरसापूर्यास्त्रेण ता वर्त्ताः प्र[2]ज्वालयेत्।

1. 'र्त्तिं हृ',
2. 'सं' घ. पाठः

स्वोद्यदित्याद्यश्वत्थदलविशेषणम्। तेषामुदरभागे गोमयेन वज्रशक्त्याद्यायुधानि विरचय्य तेषु रजनीरजो विकिरेत्। तदुपरि प्रतिपत्रं दुर्वाग्राण्यपि बहिरग्राणि विन्यसेत्। सर्वमेतदस्त्रेण कार्यम्। दूर्वाक्षतमपि पृथक् सम्पाद्यम्।। 90।।

In a metal vessel filled up with white rice over which a small casket full of ghee an a burning wick shall be arranged. On all the eight directions leaves of fig tree washed in water mixed with cowdung and tips of green grass may be put before waving the burning light to suggest auspiciousness. (90)

दूर्वाक्षतं मूर्धनि पादयोश्च तारेण कृत्वास्त्रसमर्चितेन।
नीराजयेत् तेन निजास्त्रजापी कुर्वीत षुण्याहमिति त्रिधाम्नि।। 91।।

विमर्शिनी

नीराजनीयविनियोजनादिकमाहं–दूर्वाक्षतमिति। तारेण दूर्वाक्षतं मूर्धनि पादयोश्च कृत्वा अस्त्रसमर्चितेन तेन नीराजनीयेन निजास्त्रजापी नीराजयेत्। 'ओं विष्णुः प्रीयताम्' इत्यादिविशेषयुक्तं पुण्याहं च कुर्वीत। इति त्रिधाम्नि बिम्बविशुद्धिविधिः स्यात्।। 91।।

विवरणम्

अस्त्रसमर्चितेनेति फडन्तप्रणवप्रोक्षणशोषणाद्यस्त्रपूजनवज्रादिषु त[1]त्तन्मनुपूजनास्त्रजपाभिप्रायम्। तेनेति उक्तनीराजनीयेनेत्यर्थः। तिष्ठंस्त्रिवारं पञ्चवारं वा नीराजयेत्। दूर्वाक्षतं मूर्धनि पादयोश्च तारेण कृत्वेत्येतत् पुनरपि कार्यम्। 'मङ्गलानि च दर्शयेत्' इति चाहुः। इति त्रिधाम्नीति प्रकरणोपसंहारः। बिम्बशुद्धिरिति च शेषः।। 91।।

In the case of Viṣṇu the idol is to be showered with green grass and Akṣata on the head and from with the chant of Praṇava mantra and waiving of light be done to be concluded with a Punyāha. (91)

शार्ङ्गीश्वरे वृषविषाणनदीद्वितीर-
मृद्भिर्विलिप्य शिरसि प्रणवेन सिञ्चेत्।
तद्वत् तनौ समुपलिप्य मृदा सनाकु-
क्षेत्रोत्थयाच्छसलिलैरपि तेन सिञ्चेत्।। 92।।

विमर्शिनी

शार्ङ्गीश्वरे शिरसि प्रणवेन वृषविषाणनदीद्वितीरमृद्भिः वृषशृङ्गाद् नदीतीरद्वयाद् गृहीताभिर्मृद्भिर्विलिप्याच्छसलिलैः शुद्धजलैः सिञ्चेत्। तनौ तद्वत् सनाकुक्षेत्रोत्थया (मृदा) वल्मीकात् क्षेत्राच्च गृहीताभ्यां मृद्भ्यां तेन प्रणवेन समुपलिप्याच्छसलिलैः सिञ्चेत्।। 92।।

---

1. 'तन्मनु' घ. पाठः

विवरणम्

प्रणवेन सिञ्चेदिति। अच्छसलिलैरभिषिञ्चेदित्यर्थः। नाकुर्वल्मीकम्।। 92।।

For Śaṅkaranārāyaṇa the idol is to be anointed on its head with the mud collected from the horn of an ox and sand from both the banks of a river. On the limbs the above mentioned type of sand along with that from a fertile field may be anointed. Mantra is to be chanted by the priest while washing it with water. (92)

एवं साधु विशोध्य तं स्नपितयेन्मृत्पूर्णकुम्भाम्भसा
मानस्तोकऋचा कषायपयसावोचाममन्त्रेण च।
आज्यान्तैर्ध्रुवतः फलाद्भिरथ मूलेनान्तराब्लिङ्गकैः
सिञ्चेदच्छजलैस्ततो वितनुयान्नेत्रत्रयोन्मीलनम्।। 93।।

विमर्शिनी

एवं साधु विशोध्य मृत्पूर्णकुम्भाम्भसा मध्यकलशेन मा नस्तोक ऋचा तं शार्ङ्गीश्वरं स्नपितयेत् स्नपितं कुर्यात्। कषायपयसा पूर्वदलस्थकलशेन 'अवोचा[1]म नमः' इति मन्त्रेण च, आज्यान्तैः दक्षिणपश्चिमोत्तराग्नेयनिरृत्रृतिदलस्थैः गोमूत्रगोमयक्षीरदध्याज्यपूर्णकलशैः ध्रुवतश्च, अथ मूलेन वायव्यदलस्थफलाद्भिश्च, अन्तरा मध्ये मध्ये अच्छजलैः अब्लिङ्गकैः आपो हि ष्ठादिभिः सिञ्चेत्। ततो नेत्रत्रयोन्मीलनं वितनुयात्।। 93।।

विवरणम्

मृत्पूर्णकुम्भाम्भसेति। 'मृत्क्वाथकं[2] हरिहरे' इत्यादि ह्युक्तम्। आज्यान्तैर्ध्रुवत इति। 'पृथगास्थितानि पञ्च' इत्युक्तैरिति भावः। फलाद्भिरथ मूलेनेति वाक्यम्। अन्तरेति प्रतिद्रव्यमन्तरा स्नानमुक्तम्।। 93।।

Before the three eyes of the god is ceremonially opened (in respect of the idol) it should be properly washed after applying the various anointed things. The process is as follows. Using the 'mānastoka; mantra water from the pot in which mud is mixed is to be poured with the 'avoca' mantra and decoction filled pot is to be poured using Praṇava the pots containing urine of cow of etc., filled in pots and placed in the locations of the diagram at south-west, north and south east are to be poured. Finally pure water is to splashed on the idol with the mantras "Apohiṣṭhā" etc/. Here again one should present a cow before the idol and then make a gift of it. (93)

नमः शम्भव इत्याद्यमिषे त्वाद्यं च सिञ्चतु।
नमो वः किरिकेत्युक्त्वा सर्वौषधिजलेन तम्।। 94।।

---

1. 'चमानम इ' क. पाठः
2. 'का' घ. पाठः

विमर्शिनी

ततः ईशदलस्थितेन सवौषधिजलेन तं देवं 'नमः शम्भवे' इत्याद्यम् 'इषे त्वाद्यं' 'नमो वः किरिकेभ्यः' इत्याद्यं चोक्त्वा सिञ्चतु।। 94।।

विवरणम्

नमश्शम्भव इत्याद्यमिति सर्वौषधिकलशे मन्त्रत्रयमुक्तम्।। 94।।

Again the idol of the God is to be bathed chanting the three mantras– "namaḥ śambhave" iṣe tvādya" and "namo vah". This time the water is to contain all medicinal properties. (94)

तत् त्वा यामीत्याद्ययर्क्षा समुद्रं
गच्छेत्यापोहीत्यणुभ्यां च मन्त्री।
गायत्र्या च स्नापयेद् दिक्स्थखण्डै-
र्गायत्र्या चोंरुद्धया कोणख[1]ण्डैः।। 95।।

विमर्शिनी

पुनः दिक्स्थखण्डैः दिवखण्डस्थकलशैः 'तत् त्वा यामि' इत्याद्य्यर्चा, 'समुद्रं गच्छ' इति, 'आपो हि' इत्यणुभ्यां गायत्र्या च स्नापयेत्। ओंरुद्धया तारपुटितया गायत्र्या कोणखण्डैः कोणखण्डस्थकलशैश्च। मन्त्रीति मन्त्राणामादिरेवात्रोच्यते, मन्त्रं समस्तं विद्वानित्यर्थः।। 95।।

विवरणम्

अणुभ्यामिति खण्डद्वयापेक्षं द्विवचनम्।। 95।।

Further the priest shall chant the mantras like "tat tvāyāmi", "Samudram gaccha" "Āpohiṣṭhā" to the accompaniment of Praṇava and Gāyatrī. He should use the portfoils of sanctified water kept at the four corners beginning from south east. (95)

तारेणावाह्याहिताङ्गाय तस्मै
सोमारुद्रा वीति दत्त्वार्घ्यपाद्ये।
गन्धं पुष्पं चापि तद्वत् पवित्रं
वस्त्रं सन्दद्यात् युवंवस्त्रजापी।। 96।।

विमर्शिनी

तारेणावाह्याहिताङ्गाय तारेणैव कृताङ्गाय तस्मै 'सोमारुद्राविवृहतं' मन्त्रेणार्घ्यपाद्ये द्वे गन्धं पुष्पं वापि तद्वत् पवित्रं दत्त्वा युवं वस्त्रजापी वस्त्रं सन्दद्यात्।। 96।।

---

1. 'संस्थैः'।। ख. पाठः

विवरणम्

तद्वदिति। पवित्रपर्यन्तेषु स एव मनुरित्यर्थ।। 96।।

After invoking the presence of the God (in the idol) with Praṇava and presenting him with oblation and with the mantra "Arghya pādya" etc. and "somarudra" sandal paste, incenses, flowers and pavitra, the (priest shall drape the idol saying "vastram' etc. (96)

दत्त्वोत्तरीयं च बृहस्पते अती-
त्यृचाथ वेदाहमृचोपवीतकम्।
स्वमूलतोऽलङ्करणानि धूरसी-
त्यनेन धूपं च तथा समर्पयेत्।। 97।।

विमर्शिनी

अथ 'बृहस्पते अति' इत्यृचा उत्तरीयं दत्त्वा 'वेदाहम्' ऋचोपवीतं समर्पयेत्। स्वमूलतोऽलङ्करणानि, तथा 'धूरसि' इत्यनेन धूपं च।। 97।।

Thereafter presenting the God with an upper garment and the sacred thread called Upavīta he should be decorated. The mantra 'bṛhaspati' is for upper garment 'Vedāham. for sacred thread. Now fragrant smoke is to be waived before him using the mantra 'dhūrasi." (97)

उद्दीप्यस्वेत्युपहरतु तस्मै प्रदीपं समिद्धो
अञ्जन्नित्यञ्जनमपि च गोरोचनां तारकेण।
सोमारुद्रा युवमिति जपन् दर्पणं दर्शयित्वा-
ग्नाविष्णू इत्यपि मनुवरेण स्तुतिं चादधीत।। 98।।

विमर्शिनी

पुनस्तस्मा 'उद्दीप्यस्व' इति प्रदीपमुपहरतु। 'समिद्धो अञ्जन्' इत्यञ्जनमपि च। तारकेण गोरोचनां च। 'सोमारुद्रा युवम्' इति जपन् दर्पणं दर्शयित्वा 'अग्नाविष्णू' इत्यपि मनुवरेण स्तुतिं चादधीत।। 98।।

विवरणम्

अग्नाविष्णू इति। 'अग्नाविष्णू सजोषसा वर्धन्तु गिरो या मम इन्द्रस्य पत्नीः पञ्चाग्रे सरस्वती' इति।। 98।।

The Dīpa the ceremonial light is to be offered with the mantra 'Uddīpyasva" and Anjana – the collyrium for the eyes may be applied with the mantra "samiddhāñjana" the forehad mark with gorocana from the bile of the cow is to be applied with the chant of Pranava. The mirror of bell metal shall be presented with the mantra "somārudrā". Finally the deity is to be eulogised with praises using the mantra "Agnā" etc. (98)

युवमेतानीति प्रार्थ्यौषधय इति विकीर्य पुष्पमपि पुण्याहम्।
कृत्वा दद्यात् पादुकसचामरच्छत्रयानमपि तारेण।। 99।।

विमर्शिनी

पुनः 'युवमेतानि' इति प्रार्थ्य 'ओषधय' इति पुष्पं विकीर्य 'ओं शिवनारायणः प्रीयताम्' इति विशेषयुक्तं पुण्याहमपि कृत्वा पादुकसचामरच्छत्रयानमपि पादुकं चामरं छत्रं स्ववाहनमपि तारेण दद्यात्।। 99।।

विवरणम्

प्रार्थ्येत्युपस्थानम्।। 99।।

After praying the deity with the mantra "yuvametāni" and showering medicinal flowers with the chant of "oṣadhaya" etc. Puṇyāha mantra shall be pronounced with his remark "Śivanārāyaṇah prīyatām", Thereafter items like Pāduka – footwear, cāmara, umbrella and vehicle are to be submitted with Praṇava. (99)

पूजाक्रमेण पुरुषादिचतुष्टयाङ्ग-
केशानसूक्तमनुभिः स्नपयेन्महेशे।
दिक्कोणमध्यगतखण्डघटैस्तु बिम्ब-
शुद्धौ तदीयपरिकुम्भगणैः समेतम्।। 100।।

विमर्शिनी

महेशे तु बिम्बशुद्धौ दिक्कोणमध्यगतखण्डघटैः दिक्खण्डेषु कोणखण्डेषु मध्यखण्डे[1] च ब्रह्मकलशैः तदीयपरिकुम्भगणैः समेतं यथा भवति तथा पूजाक्रमेण स्वस्वदिक्प्राप्तैः पुरुषादिचतुष्टयाङ्ग-केशानसूक्तमनुभिः तत्पुरुषादिचतुष्टयेन पञ्चब्रह्माङ्गैः ईशानेन च मनुभिः तं स्नपयेत्।। 100।।

विवरणम्

पूजाक्रमेणेति। पुरुषाघोरसद्यवामैर्दिक्षु हृच्छिखाकवचशिरोभि[2]र्विदिक्ष्वित्यर्थः।। 100।।

With regard to the Bimbaśuddhikalaśa purification of idol with the showering of sanctified water of Śiva the worships of the four deities of Tatpuruṣa, Aghora, Sadyojāta and Vāmadeva is involved. Pots assigned to them in the four directions as well as that in the centre are required to perform the auspicious bathing of the idol. (100)

ध्यात्वा देवमघोरतो दिशतु गन्धं वामतश्चाम्बरं
पुष्पं चापि शिवेन तत्पुरुषतो धूपं सदीपार्घ्यकम्।

---

1. 'ण्डेषु च' ङ. पाठः,
2. 'भिश्व वि' घ. पाठः

आनम्याथ सुगन्धचर्चितकरो भागान् दिशास्वेकशो
वृत्तान्तान् विधिविष्णुरुद्रजिनवर्णैरालभेत क्रमात्।। 101।।

विमर्शिनी

अथ देवं यथोक्तं ध्यात्वा आवाह्य सकलीकृत्य पाद्यमाचमनं च दत्त्वा अघोरतो गन्धं दिशतु। वामतोऽम्बरं व। शिवेन ईशानेन पुष्पाणि च। तत्पुरुषतो धूपं सदीपार्घ्यकं दीपमर्घ्यं च। अथानम्य नमस्कृत्य सुगन्धचर्चितकरो भूत्वा वृत्तान्तान् भागान् चतुरश्राष्टाश्रवृत्तभागानेकशः प्रत्येकं दिशासु विधिविष्णुरुद्रजिनवर्णैः ब्रह्मविष्णुरुद्रगायत्रीभिः क्रमाद् आलभेत संस्पृशेत्।। 101।।

विवरणम्

ध्यात्वा देवमिति। 'शेषेष्वावाहनाद्यं स्नपने कृते तु' इत्येतदभिप्रायमेतत्। पाद्यादिभूषणान्तमुपचारतः समर्प्याघोरतो गन्धमित्यादि सर्वं कार्यम्। तदुक्तंः-

सकलीकृत्य देवेशं पीठं सद्येन कल्पयेत्।
ततोऽपि लेपयेद्गन्धैर्मन्त्रेण बहुरूपिणा।।

इत्यादि। शिवेनेति। ईशाने[1]न। आचम्येति तदुचितमन्त्रप्रणामस्तुत्याद्यभिप्रायम्। वृत्तान्तान् भागानिति। चतुरश्राष्टाश्रवृत्तक्रमेण[2] त्रिभागं हि लिङ्गं भवति। एकश इति। एकैकशो दिशास्वालभेत। सुगन्धाक्तकरतलस्तेन बह्मगायत्र्या चतुरश्रभागमग्नादिदिक्ष्वालभ्य करतलं क्षालयेत्। एवमितरद्भागद्वयमपीति।। 101।।

After invoking the God with his mūlamantra and presenting him with oblation and water Sandal paste is to be applied with the mantra of Aghora, cloth with the mantras of Vāmadeva with Īśāna the flower and with Tatpuruṣa, Dhupas and Dīpa (smoke and light) are to be submitted. Thereafter prostrating before the God taking Aṣṭagandha in both the hands the priest shall touch the idol in a specified manner. The square portion of the idol the pedestal may be rubbed using Brahmagāyatrī the Akṣata – the octagonical part with Viṣṇugāyatrī and the circular part with Rudragāyatrī are to be ceremonially touched. (101)

तत्पुरुषाय विद्महे पितामहाय धीमहे।
तन्नो ब्रह्मा प्रचोदयात्।।
तत्पुरुषाय विद्महे जनार्दनाय धीमहे।
तन्नो विष्णुः प्रचोदयात्।।
तत्पुरुषाय विद्महे महादेवाय धीमहे।
तन्नो रुद्रः प्रचोदयात्।।

1. 'नः।',
2. 'णेति त्रि' घ. पाठः,

तद्गायत्र्य इति प्रोक्ताः सितमाल्यादिभिस्ततः।
प्राच्र्य नीराज्य पुण्याहमाचरेन्मूर्त्तिपैः सह।। 102।।

विमर्शिनी

तद्गायत्रीराह –तत्पुरुषायेति।।

इति तद्गायत्र्यः प्रोक्ताः। ततः सितमाल्यादिभिः श्वेतपुष्पगन्धादिभिः प्राच्र्य नीराज्य मूर्तिपैः सह पुण्याहमाचरेत्।। 102।।

विवरणम्

सितमाल्यादिभिस्ततः प्राच्र्येति। यदुक्तं–

ततः शुक्लानि पुष्पाणि दत्त्वा लिङ्गस्य मूर्धनि।
नीराजनविधिं कुर्याद् यच्चान्यदपि मङ्गलम्।।

इति। यद्वा 'सितमाल्यादिभिर्बुधः' इति[1] पाठः। बुधशब्देन 'शेषेष्वावाहनाद्यम्' इत्येतदिदानीमेव कार्यम्। 'ध्यात्वा देवम्' इत्येतत्तु गन्धालेपनाद्युचिततया तद्रूपध्यानमात्रमिति सूचितम्। यदप्युक्तं–स्वस्वगायत्र्या स्पृशेत्।

आवाह्य सकलीकृत्य देवदेवमुमापतिम्।
पाद्याद्यैः परिपूज्यास्मिन् पुण्याहं च समाचरेत्।।

इति। सितमाल्यादिभिरिति पाद्याद्यनन्तरं ज[2]लगन्धादिषु मध्ये पुष्पे विशेषः प्रतिपादितः। जलगन्धाद्यर्घ्यान्तानामादिपदेन ग्रहणम्। बुधग्रहणेनैतदपि साधितमिति। नीराज्येति। तत्प्रक्रिया च प्रागुक्ता। पूर्वादिपञ्चदिक्ष्वपि वा नीराजनं बुधशब्देन सूचितम्। तदुक्तं–नीराज्यास्त्रेण दिक्क्रमाद् इति।। 102।।

Using these Gāyatrī mantras and worshipping the God with white flowers and garlands and waving light the priest shall chant the Puṇyāhamantra along with his assistant adding on adjective like "Sadāśivaḥ prīyatām". (102)

मूलेनावाह्य तस्मै सकलितमहसे [3]स्थाणवे सम्प्रदद्यात्
पाद्याद्यं भूषणान्तं नवकमथ समर्प्योर्मिकाकर्णभूषाः।
इष्ट्वा गन्धादिभिः पादुकमपि सहयानातपत्रं प्रदद्यात्
सादर्शं चाथ पुण्याहमपि चरतु नीराजनं चेति वेज्या।। 103।।

विमर्शिनी

पक्षान्तरमाह–मूलेनेति। मूलेनावाह्य सकलितमहसे सकलीकृततेजसे तस्मै स्थाणवे शिवाय पाद्याद्यं भूषणान्तं नवकं पाद्यार्घ्याचमनीयमधुपर्कपुनराचमनीयस्नानवस्त्रोपवीतभूषणानि सम्प्रदद्यात्। अथ

---

1. 'ति वा पा'
2. 'गन्धादि' क. ख. पाठः,
3. स्थाणवे 'इत्यस्य स्थाने कल्पविदिति विवरणरीत्या पाठः

ऊर्मिकाकर्णभूषाः अङ्गुलीयं कुण्डले च समर्प्य गन्धादिभिरिष्ट्वा पादुकमपि सहयानातपत्रं वाहनं छत्रं च सादर्शं दर्पणं च दद्यात्। अथ पुण्याहं नीराजनं चापि चरतु। इति वा इज्या पूजा स्यात्।। 103।।

विवरणम्

शिव एव मतान्तरमाह–**मूलेनावाह्येति**। ब्रह्मादिगायत्रीभिर्भागत्रयस्पर्शनान्ते कृत एतत् सर्वं कार्यम्। कल्पवित् सम्प्रदद्यादिति च कल्पविद्ग्रहणमेतदर्थम्। यद्वा सितमाल्यादिभिरित्यत्रापि समानमावहनादि सर्वमिति। अथवोपचारेण तत्तद्द्रव्यशालिनां फडन्त[1]प्रणवप्रोक्षणादिसंस्कृतानां पाद्यादीनां प्रदानार्थ–मेतदुक्तम्। ऊर्मिका अङ्गुलीयकम्। कर्णभूषे च द्वे भवतः। इष्ट्वा गन्धादिभिरित्यर्घ्यदानान्तमुक्तम्। इति वेज्येति। मूलेनावाहनादि सर्वं समानम्। पा[2]द्यादिपूजायामेव विकल्पोऽयमिति भावः।। 103।।

Invoking Śiva with his Mūlamantra and properly worshipping him in detail the items from Pādya upto bhūṣaṇa – the nine embelishments may be presented. These are Pādya, Arghya, Ācamanīya, Madhuparka, Punarācamanīya, Snāna, Vastra, Upavīta and Bhūṣaṇa. Thereafter present him with a ring and pair of ear pendants. Again worshipping with rituals present him with foot wear, vehicle, umbrella and mirror. After a Puṇyāha torches may be waved to conclude the ritualistic worship. (103)

दुर्गार्याद्यणुभिः क्रमात् स्नपितयेद् गव्यैर्मृदालिप्य मृ–
द्द्वारा वारुणपञ्चकेन महिषारौ पावमानाणुना।
क्वाथोदैरथ शालितण्डुलभुवा चूर्णेन लिप्त्वा समा–
सिञ्चेदञ्चितरत्नगन्धकलशाभ्यां पञ्चदुर्गाणुभिः।। 104।।

विमर्शिनी

महिषारौ मन्त्रोद्धारे वक्ष्यमाणैः दुर्गार्याद्यणुभिः पृथक् स्थितैः पञ्चभिर्गव्यैः क्रमात् स्नपितयेत्। स्वकलशोक्तया मृदा आलिप्य मृद्द्वारा मृज्जलपूर्णकलशेन वारुणपञ्चकेन 'अव ते हेलो वरुण' इत्यादिवक्ष्यमाणेन च। पुनः क्वाथोदैः पावमानाणुना 'पावमानीः स्वस्त्ययनीः' इति मन्त्रेण च। अथ शालितण्डुलभुवा चूर्णेनोद्वर्त्य अञ्चितरत्नगन्धकलशाभ्यां पूजिताभ्यां रत्नोदगधोदाभ्यां पञ्चदुर्गाणुभिश्च स्नपितयेत्।। 104।।

विवरणम्

दुर्गार्याद्यणुभिरिति। मूलेनावाहनादि कृत्वा अर्घ्यानि दत्त्वा स्नानविधावेवं स्ना[3]पयेत्। यदुक्तं– 'आवाह्य साङ्गीकरणादि कृत्वा' इत्यादि। सें दुर्गायै[4] इत्यादिभिः। क्रमादिति पञ्चभिर्मन्त्रैः क्रमेण पञ्चभिर्गव्यैः स्तपनमुक्तम्। मृदालिप्येति। मृत्कलशोक्तमृद्भिरित्यर्थः। मृद्द्वारेति। मृत्कलशजलेन। 'तत्त्वा,

---

1. 'न्तप्रो' क. ख. पाठः,
2. 'वा' घ. पाठः
3. 'स्न',
4. 'यै ओं आर्यायै इ' घ. पाठः

इमं मे, अव ते हेळ, त्वं नो अग्ने, उदुत्तमम्' इति वारुणपञ्चकम्। पावमानाणुना क्वाथोदैरिति। पावमानानुवाकेनेत्यर्थः।। 104।।

In respect of Durgā five mantras connected with the goddess is to be used. Mud should be anointed on the idol and washed away using decoction prepared from certain herbs. Again paste prepared from paddy should be anointed on the idol to be washed away with water from the pot kept at north east containing jewels as well as from the pit kept in the centre of the diagram in which water of Aṣṭagandha is stored. (104)

[1]पुण्याहं प्रविधाय शेषसलिलैस्तैरेव सिक्तवांशुके
रक्ते द्वे परिधाप्य तैर्दिशतु गन्धं पुष्पधूपावपि।
दीपाकल्पवितानचामरयुगच्छत्राणि नीराज्य दि-
क्ष्वेनां सम्यगयंपुरः प्रभृतिभिः स्वोक्तैः स्तुवीताणुभिः।। 105।।

विमर्शिनी

पुनः पुण्याहं 'ओं दुर्गा प्रीयताम्' इति विशेषयुक्तं विधाय शेषसलिलैः तैरेव पञ्चदुर्गाणुभिः सिक्त्वा रक्ते द्वे अंशुके वस्त्रे परिधाप्य तैः पञ्चदुर्गाणुभिर्गन्धं पुष्पधूपावपि दीपाकल्पवितानचामरयुगच्छत्राणि दीपमलङ्कारं वितानं चामरयुगं छत्रं च दिशतु। पुनरेनां दुर्गाम् अयंपुरःप्रभृतिभिः 'अयं पुरो हरिकेशः' इत्यादिभिर्मन्त्रैर्दिक्षु सम्यक् प्रत्येकं नीराज्य स्वोक्तैरणुभिः स्वागमोक्तमन्त्रैः स्तुवीत च।। 105।।

विवरणम्

तैरेवे[2]ति। तैरिति च पञ्चदुर्गाभिप्रायम्। नीराज्य दिक्ष्विति। 'अयं पुरो हरिकेशः' हत्यादिपञ्चमनुभिः क्रमेण प्रागाद्यूर्ध्वान्तं[3] पञ्च दिक्षु नीराजनमुक्तम्। स्तोक्तैः स्तुवीताणुभिरिति। तदुक्तम्–

स्तुतिं च पश्चात् कुर्वीत साम्ना वा[4]थर्वणेन च।
तां (हे?मे)ति यजुषा चापि स्तुवीत पुरतः स्थितः।।

इति।। 105।।

After Puṇyāha water is poured with a mantra the rest of the water shall be splashed on the idol. Using Pañcadurgā hymn a pair of red silk cloth shall be put in the idol. Thereafter the usual items may be used for worship.

---

1. 'सिक्त्वा बिम्बघटैर्विधाय विबुधैः पुण्याहमेतज्जलैः
सिक्त्वा रक्तनवांशुके च परिधाप्याभ्यर्च्य दुर्गाणुभिः।
दत्त्वाकल्पवितानचामरयुगच्छत्राणि दिक्षु क्रमा-
न्मन्त्रैः सम्यगयंपुरः प्रभृतिभिर्नीराजयेत् पञ्चभिः।।
से' क पाठः
2. 'ति प' क. ख. पाठः,
3. 'न्त',
4. 'ह्या',

These include sandal, flowers, incenses light, ornaments, fans, umbrella etc. Once again mantras prescribed in Āgamas may be used for the usual Nīrājana waving of light before the God. (105)

सेनान्यां कलशैः स्वपूरणसमुक्तेन क्रमेणाञ्चितैः
सिञ्चेन्मन्त्रिवरः स्वमूलमनुना स्वास्त्राणुना वर्मणा।
मूलेनापि हृदाग्निमील इति पूर्वर्चा त्विषेत्वादिना
शन्नोदेव्यणुनोपचारमनुना कौशादिगन्धान्तिमैः।। 106।।

विमर्शिनी

सेनान्यां तु मन्त्रिवरः मन्त्रक्रिययोरैक्यं विमृशन् गुरुः कौशादिगन्धान्तिमैरञ्चितैर्नवसु खण्डेषु स्थितैः सपरिकलशैः कलशैः क्रमात् स्वमूलमनुना स्वास्त्राणुना वर्मणा मूलेनापि हृदा 'अग्निमीळे' इति पूर्वर्चा 'इषे त्वा'दिना 'शन्नो देव्य'णुना उपचारमनुना च नवभिर्मन्त्रैः स्वपूरणसमुक्तेन क्रमेण सिञ्चेत्।। 106।।

विवरणम्

सेनान्यामिति। नवकलशैर्नवमन्त्रैः क्रमेणाभिषेकः। मन्त्रिवर इति। मूलेनावाहनादिपूर्वकं स्नपनमेतदित्युक्तम्। यदुक्तम्—आवाह्य साङ्गीकरणादि कृत्वा इत्यादि। यद्वा सर्वत्र प्रणवमूलयोराद्यन्त[1]योग उक्तः।। 106।।

In respect of Subrahmaṇya the preist shall pour water from the various pots beginning from the one in which Kuśa grass is put upto the one having fragrant water. Astra, Kavaca, Mūla and Hridaya mantras are to be chanted as suggested by the Pratīkas in the stanza like 'Iṣe tvā etc. While pouring water on the idol these are to be chanted. (106)

संस्नाप्य स्वजिनार्णतो बहुजलैर्दत्त्वांशुके द्वे युवं
वस्त्राणीत्युपवीतगन्धकुसुमस्त्रग्धूपदीपान् क्रमात्।
दद्याच्चामरमातपत्रमुपचारेणाञ्जनं दर्पणं
तस्मै पादुकयुग्ममप्यथ चरेन्नीराज्य पुण्याहकम्।। 107।।

विमर्शिनी

स्वजिनार्णतः स्वगायत्र्या बहुजलैः संस्नाप्य तस्मै स्कन्दाय 'युवं वस्त्राणि' इति मन्त्रेणांशुके द्वे दत्त्वा उपवीतगन्धकुसुमस्त्रग्धूपदीपान् चामरं चामरद्वयम् आतपत्रमञ्जनं दर्पणं पादुकयुग्ममपि क्रमादुपचारेण दद्यात्। अथ नीराज्य 'स्कन्दः प्रीयताम्' इति विशेषयुक्तः पुण्याहं चरेच्च।। 107।।

विवरणम्

उपचारेणेति। उपवीतादिषु मन्त्रकथनम्।। 107।।

---

1. 'न्ततो यो घ. पाठः

After bathing the idol with his own Gāyatri by pouring much water a pair of cloth may be draped with the mantra "yuvām ravo": Thereafter Upavīta made of gold, sandal paste, flower, garland etc, are to be presented. Showing dhūpa and dīpa cāmara, umbrella collyrium, mirror, footwear etc., should be presented chanting mantras. After a complete bath and waving of light, Puṇyāha is to be presented with the mantra "skandaḥ prīyatām" (107)

स्वाष्टमूर्तिमनवः स्वकमूलं चापि बिम्बकलशस्नपने स्युः।
विघ्नराजि निजमूलकमार्ये मध्यनिष्ठमुभयोः स्नपनं स्यात्।। 108।।

विमर्शिनी

विघ्नराजि बिम्बकलशस्नपने स्वाष्टमूर्तिमनवः गणञ्जयाद्याः स्वकमूलं चापि स्युः। आर्ये नवस्वपि निजमूलं च। अत्र विघ्ने बहिः प्रदक्षिणक्रमेण आर्ये दिग्विदिक्क्रमेणेति विशेषः। उभयोरपि मध्यनिष्ठं ब्रह्मकलशान्तं स्नपनं स्यात्।। 108।।

For Gaṇapati in the matter of purification the eight mantras, related to him shall be used. For Śāstā his own mūlamantras are needed for the nine pots. The last item shall be for the use of the central pot. (108)

पञ्चोपहारान् प्रददातु विघ्ने मूलेन ताञ्छास्तरि दर्पणं च।
नीराज्य पुण्याहमपि प्रकुर्यादितीरितात्राखिलबिम्बशुद्धिः।। 109।।

विमर्शिनी

विघ्ने पञ्चोपहारान् जलगन्धपुष्पधूपदीपान् मूलेन प्रददातु। शास्तरि तान्[1] दर्पणं च। उभयोः नीराज्य पुण्याहमपि यथोक्तवत् कुर्यात्। अत्राखिलबिम्बशुद्धिरितीरिता।। 109।।

विवरणम्

पञ्चोपहारानिति। मूलेनावाहनादि कृत्वा पाद्यादि दत्त्वा स्नपनं कार्यम्। पुनरङ्गवस्त्रादिभूषणान्ते दत्ते जलगन्धादिपञ्चोपहारदानं कार्यम्। पुनरर्घ्यमपि देयम्। मूलेनेति। अध उपरि च योज्यम्। तानिति। पञ्चोपहारान्। बिम्बशुद्धिप्रकरणमुपसंहरति इतीरितेति।। 109।।

For Ganapati Pañcopahāra the five rites with mantra (for giving jala, gandha, puṣpa, dhūpa and dīpa) For Śāstā the above mentioned five along with mirror be to be presented with his mūlamantra. Nīrājana is a must for both invoking Vighnaḥ prīyatām" and "Śāstā prīyatām" are to be used appropriately. (109)

दत्त्वार्घ्यमुत्तिष्ठमनुप्रजापी प्रोत्थाप्य याने प्रविधाय बिम्बम्।
प्रदक्षिणप्रक्रमतो नयेत तन्मण्डपं शाकुनकादिजापी।। 110।।

---

1. 'न् दारुणं द' क. ख. पाठः

विमर्शिनी

अथ सर्वेष्वप्यर्घ्यं दत्त्वा उत्तिष्ठमनुप्रजापी 'उत्तिष्ठ ब्रह्मणस्पते' इति जपन् बिम्बं प्रोत्थाप्य रथादियाने प्रविधाय शाकुनकादिजापी 'कनिक्रदत्' 'स्वस्त्या'दिकं जपन् प्रदक्षिणप्रक्रमतस्तद् बिम्बं मण्डपं नयेत ।। 110 ।।

विवरणम्

दत्त्वार्घ्यमिति। स्वस्वोपचारेणेति ज्ञेयम्। यान इति। ब्रह्मयाने रथादौ वा। प्रदक्षिणेति। मण्डपस्येति शेषः ।। 110 ।।

After giving all the deities with Arghya their respective idols may be lifted up and placed in the vehicle with the chant of the mantra prescribed. They should be led to the sanctum moving to the right. (110)

रथारोपे रथे तिष्ठन्नखिलेऽणुः प्रदक्षिणे।
उदुत्यमिति शार्ङ्गीशे पौरुषं च जपेद्धरौ ।। 111 ।।

विमर्शिनी

अखिले सर्वेषु देवेषु रथारोपे 'रथे तिष्ठन्' इत्यणुः[1]। शार्ङ्गीशे प्रदक्षिणे 'उदु त्यं जातवेदसम्' इति, हरौ पौरुषं पुरुषसूक्तं च जपेत् ।। 111 ।।

विवरणम्

पौरुषं च जपेद्धराविति। चकारः प्रदक्षिण इत्येतदनुकर्षणार्थः। शिवादिषु शाकुनस्वस्तिसूक्तजपेनैव प्रदक्षिणं भवति। 'शाकुनकादिजापी' इति चोक्तम् ।। 111 ।।

For all gods the act of placing the idol on the chariot the mantra "uttiṣṭha" is to be chanted. For Śaṅkaranārāyaṇa the mantra 'Udutyam' prescribed is presented. In respect of this the mantra to be chanted is 'kanikrad' etc. (111)

दत्त्वा द्वार्युपचारतोऽर्घ्यमखिलेषूदुत्यमित्युच्चर-
न्नाकृष्णेन युतं शिवे समवतार्यान्तर्नयेन्म[2]न्त्रवित्।
आसत्येनमनुं गुहे हरिहरे यस्मिन्नृचः पूर्वकं
मन्त्री मन्त्रमिनाक्षरं मुररिपौ शेषेषु मूलं निजम् ।। 112 ।।

विमर्शिनी

अखिलेषु द्वार्युपचारतोऽर्घ्यं दत्त्वा शिवे 'उदु त्यम्' 'आकृष्णेन' युतमुच्चरन् यानात् समवतार्यान्तर्नयेत्। गुहे 'आसत्येन'मनुं, हरिहरे यस्मिन्नृचःपूर्वकं 'यस्मिन् वृक्षे' इत्यादिकं, मुररिपौ इनाक्षरं द्वादशाक्षरं मन्त्रं, शेषेषु निजमूलं चोच्चरन् बिम्बमन्तर्नयेत्। मन्त्रविन्मन्त्रीति च पदाभ्यां तत्र शोभनान् मन्त्रान् यथावकाशमुच्चरेदिति सूचितम् ।। 112 ।।

---

1. 'णुं' ख. पाठः
2. 'कल्पवित्' इति विवरणरीत्या पाठः

विवरणम्

दत्त्वा द्वारीति। मण्डपद्वारे इत्यर्थः। उदु त्यमिति। शिवे तस्माद् यानाद् 'उदु त्यम्' 'आकृष्णेन' इति चोच्चरन्नवतार्यान्तर्नयेत्। कल्पत्रिदिति। वेदिशय्ययोः प्रादक्षिण्येन नयनमुक्तम्। यस्मिन्नृचःपूर्वकमिति। 'यस्मिन् ऋचः साम' इत्याद्यृचो ग्रहणम्। मन्त्रीति...। इनाक्षरं मुररिपाविति। द्वादशाक्षरम्।। 112।।

At the door of the sanctum all the gods may be given Arghya with their own mantras. For Śiva the mantra is "Udutyam" and "Ākṛṣena rajasā" Chanting these his idol is to be taken inside the sanctum taking it from the chariot. For Subrahmaṇya the mantra is "āsatyena". For Śaṅkaranārāyaṇa it is "yasmai" etc. Using these their respective idols may be taken inside the sanctum. For using the mantra is the twelve syllabled one. For Durgā, Gaṇapati and Śāstā, their respective mūlamantras are required in taking the idol inside the sanctum. (112)

वामाणुना त्रिणयनेऽथ नमो हिरण्य-
बाह्वादिना न्यसतु शार्ङ्गिशिवेऽधिशय्यम्।
सत्रिष्टुभा महिषविद्विषि तारकेण
शेषेषु मूलत इनार्णत इन्दिरेशे।। 113।।

विमर्शिनी

अथ त्रिणयने वामाणुना 'वामदेवेन' अधिशय्यं शय्यायां न्यसतु। शार्ङ्गिशिवे नमो हिरण्यबाह्वादिना, महिषविद्विषि सत्रिष्टुभा तारकेण, शेषेषु मूलतः इन्दिरेशे विष्णौ इनार्णतो द्वादशाक्षरेण च न्यसतु।। 113।।

In placing the idol on the couch the idol of Śiva requires the mantra "Vāmadevāya" etc. For Śaṅkaranārāyaṇa 'Namo hiraṇyagarbha' for Durgā the mantra 'jātavedase' along with Praṇava is needed. For all others Mūlamantra is required. But for these it is the twelve lettered hymn itself. (113)

विश्वत इति त्रिधाम्नि व्याप्यान्येषु स्वमूलतो बिम्बम्।
शाययतु सकलयित्वा मन्त्रैः प्रासादसम्मुखमिहोक्तैः।। 114।।

विमर्शिनी

त्रिधाम्नि 'विश्वतश्चक्षुः इति, अन्येषु स्वस्वमूलतश्च व्याप्य सकलयित्वा इहोक्तैः शय्यारोपणोक्तमन्त्रैः प्रासादसम्मुखं शाययतु।। 114।।

विवरणम्

विश्वत इति त्रिधाम्नि व्याप्येति। सकलयित्वा शाययत्वित्यन्वयः। मन्त्रैरिहोक्तैः प्रासादसम्मुखं शाययत्विति। वामदेवाद्युक्तमन्त्रैरेवेत्यर्थः। यदुक्तम्–'गुह्येनेशं तु शाययेत्' इत्यादि। यद्वा इहेति शयनविषये तन्त्रान्तरोक्तैरिति। यदुक्तम्–'विष्णौ शययेच्चायं सो अग्निः सर्वयोगेश्वरोम्' इति। शिवे 'सकळीकृत्य वामेन अयं स इति शाययेत्' इति। हरिहरे 'नमो हिरण्यबाहवे' 'अयं स' इति। दौर्गे तारेण, स्कन्दे मूलेन, गणपतौ शास्तरि च बीजेनेति।। 114।।

The idols are to be placed facing the door of the sanctum. For Viṣṇu the mantra "Viśwataḥ cakṣuḥ" is to be chanted. For all others their mūlamantra is to be submitted on the idols. (114)

पीठे संस्थाप्योपचर्यार्घ्यनिष्ठैः
स्कन्दे बिम्बं शाययेच्चाधिशय्यम्।
प्रासादे प्राग्द्वार्युदक्छीर्षकं च
प्रत्यग्द्वारे याम्यदिक्छीर्षकं च।। 115।।

विमर्शिनी

स्कन्दे तु पीठे संस्थाप्य अर्घ्यनिष्ठैः अर्घ्यावसानैरुपचारैरुपचर्य अधिशय्यं शय्यायां प्रासादे प्राग्द्वारि सत्युदक्छीर्षकमुत्तरशिरस्कं, प्रासादे प्रत्यग्द्वारे याम्यदिक्शीर्षकं दक्षिणशिरस्कं च बिम्बं शाययेत्।। 115।।

विवरणम्

स्कन्दे भेदमाह–**पीठे संस्थाप्येति**। भद्रपीठे पुरैव पूजितपीठे प्रासादाभिमुखतया स्थापनमुक्तम्। उपचर्यार्घ्यनिष्ठैरिति। उपचरणं पूजनं स्वोपचारेण चैतदिष्यते। अर्घ्यनिष्ठैरिति पाद्यार्घ्ययोर्ग्रहणम्। बहुवचनेनासनमपि गृह्यते। मूलेन व्यापय्य सकलीकरणमिहाप्यु[1]चितमेव। विष्ण्वादिषु शय्यायामेव न्यासेऽपि तदनन्तरं सकलीकरणानन्तरमेव[2] पाद्यार्घ्यो[3]पचरणमप्युपचारेणोचितं भवति। शाययेच्चा-धिशय्यमिति। शय्यायां मूलेन तच्छय्यौचित्येनोत्तरशिरस्कं दक्षिणशिरस्कं वा शाययेदित्यर्थः। यदुक्तम्–

शय्यां दक्षिणसौम्यदिक्कृतसमायामाम्" इति।। 115।।

For Subrahmaṇya a pīṭha is to be placed near the couch in which his idol is to be put for necessary worship like Arghya and other requirements like seat, before doing the Mānasapūjā. The idol is to be put with its head towards the north if the door is on the east. If it is in the west the head of the idol shall be in the southern direction. (115)

इति तन्त्रसमुच्चये तुरीयः
पटलो मण्डपसंस्क्रियाक्रमाढ्यः।
कथितः कलशेशवह्निशय्या-
विधिमान् बिम्बविशुद्धिविध्युपेतः।। 116।।

विमर्शिनी

पटलमुपसंहरति–**इतीति**। (इति) तन्त्रसमुच्चये ग्रन्थे तुरीयः चतुर्थः पटलः कथितः। कथम्भूतः, मण्डपसंस्क्रियाक्रमाढ्यः मण्डपसंस्कारपरिपाट्या परिपूर्णः। कलशेशवह्निशय्याविधिमान् कुम्भेशपूजाग्नि–

---

1. 'पि ह्युचि' क. ख. पाठः,
2. 'वा',
3. 'चरताम' घ. पाठः

जननशय्यापूजादिभिश्च युक्तः। बिम्बविशुद्धिविध्युपेतः बिम्बशुद्धिकलशाभिषेकेण उपहारदानेन चोपेतः।। 116 ।।

Thus the fourth Paṭala of Trantrasamuccaya dealing with Maṇḍapasamskriyā (arrangement of the pavilion) and Kalaśapūjā are narrated along with Bimbaśuddhi and Kalaśābhiṣeka has come to an end. (116)

इति तन्त्रसमुच्चयविवरणे चतुर्थः पटलः।।

शुभं भूयात्।



MANUSCRIPTS USED FOR VOL I

The edition of the text is based on the following manuscripts:—

1. (क) Obtained from the Palace Library.
2. (ख) Lent by Mr. Kailasapuram Govinda Pisharoti.
3. (ग) Do. Mr. Krishnan Tantri, Thazhaman Matham.
4. (घ) Do. Mr. Sivan Potti, Munchira.

The Present edition of the commentaries is based on the following :

(i) Vimarśinī : Tantrasamuccaya of Nārāyaṇa with the commentary of Śaṅkara, Part I, 1919, Trivandrum Sanskrit Series No. 67.

The Commentary is based on the following manuscripts:—

1. (क) Obtained from the Palace Library, running up to the 10th Patala.
2. (ख) Lent by Mr. Chitran, Numburi Vezhapparambu.
3. (ग) Do. Mr. Rudran Numburi, Kalpakasseri, incomplete.
4. (घ) Do. Mr. Sri Suryan Bhattatiri, Kalatimana.
5. (ङ) Do. Do.
6. (च) Do. Mr. Krishnan Tantri, Thazhaman Matham.


All the above manuscripts are in Malayalam characters on palm-leaves.

(ii) Vivaraṇa

	No.	*Owner*
क.	C 710	Kuzhikkāṭṭu Maheśvaran Bhaṭṭatiri.
ख.	C 1507	Kṛṣṇaru Nārāyaṇaru, Muttavila Maṭham
ग.	8991	Raja of Chirakkal
घ.	L 668	Nārāyaṇan Nambutirippādu, Puliyannūr Mana
ङ.	L 964	Mattappalli Mana, Aṅkamāli
च.	L 1048	Tiruvārppu Svāmiyār Maṭham


This part is originally published in the Trivandrum Sanskrit Series as No. 151 in the year 1945 and edited by V.A. Ramaswami Sastri.

श्लोकानुक्रमणिका











₹ 5000 (Set of 3 Vols.)

ISBN 978-81-8315-222-8



NEW BHARATIYA BOOK CORPORATION
208, 2nd Floor, Prakashdeep Building,
4735/22, Ansari Road, Daryaganj,
New Delhi-110 002 (INDIA)
Ph: 011-23280214, 23280209
Email: deepak.nbbc@yahoo.in